CC0. In Public Domain, Digitizagtion by eGangotri

5.3

T 1/80

अमरकोशः

आम्नाय-ग्रन्थालय,
[illegible]
वाराणसी-५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आम्नाय-ग्रन्थालय,
भारतनिधि, करौंदी
वाराणसी-5

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमदमरसिंहविरचितः

अमरकोशः

'अभिनवराजलक्ष्मी' 'भाषाटीका' द्वयविराजितः ।

श्रीगुरुप्रसादशास्त्रिभिर्निर्ध्यातः ।

संस्कृतटीकाकारः-स्व. श्रीरघुनन्दनप्रसादशास्त्री कविचक्रवर्त्ती ।

भाषाटीकाकारः—श्रीसीतारामशास्त्री,

व्याकरणाचार्यः, 'राजशास्त्री' साहित्यरत्नम् ।

चतुर्थं संस्करणं] १९५० [मूल्यं २)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रथम संस्करण सन् १९३५
द्वितीय संस्करण सन् १९३८
तृतीय संस्करण सन् १९४२
चतुर्थ संस्करण सन् १९५०

वाराणसी-5

(अस्य सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः)

मुद्रक—
पं० बैकुण्ठनाथ भार्गव,
आनन्दसागर प्रेस, गायघाट,
बनारस १.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आम्नाय-ग्रन्थालय
भरतनिधि, कशी
वाराणसी-5

* श्रीः *

अथ किञ्चिद्वाचिकम् ।

'अष्टाध्यायी जगन्माता' । 'अमरकोशो जगत्पिता' ।

संस्कृत-साहित्य में कोश का स्थान बहुत ही ऊँचा माना जाता है, क्योंकि प्रत्येक वाक्य के प्रयोग के पहले ही तद्गत पदों के लिङ्ग और अर्थ का ज्ञान प्रथमतः आवश्यक होता है। और लिङ्ग आदि का ज्ञान प्रायः कोश की सहायता से ही यथार्थ रूप से हो सकता है। अतः विद्वानों और संस्कृत-प्रेमियों के लिए कोश-का ज्ञान सर्व प्रथम आवश्यक है—यह कहना नहीं पड़ेगा।

कोशों में भी 'अमरकोश' का प्रचार बहुत है; कारण—थोड़े में ही पर्याय, लिङ्ग और नानार्थ आदि का ज्ञान 'अमरकोश' से बहुत सरलता से हो जाता है। इसी लिये अक्षरोच्चारण के योग्य होते ही ब्राह्मण बालकों को प्रारम्भ में ही प्रायः 'अमरकोश' कण्ठ करा दिया जाता है।

इस प्रकार जगत्प्रसिद्ध सर्वोपयोगी इस 'अमरकोश' का भी कोई विशद सुन्दर सटीक और सस्ता संस्करण अभी तक सुलभ नहीं था, इसलिये सरल और बालोपयोगी 'अभिनवराजलक्ष्मी'

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नामक संस्कृत टीका तथा संक्षिप्तपर अतीव उपयोगी 'भाषाटीका' सहित 'अमरकोश' का यह गुटका-संस्करण प्रस्तुत किया गया है। अब सन्दिग्ध स्थलों में भी आपको बड़ी-बड़ी टीकाओं के उलटने की आवश्यकता नहीं होगी, केवल इन संक्षिप्त टीकाओं से ही आपका कार्य सुचारु रूप से प्रायः चल सकेगा।

संस्कृत-टीकाकारका कुछ परिचय

इस संस्कृत टीका के टीकाकार मेरे कनिष्ठभ्राता स्वर्गीय पण्डित रघुनन्दनप्रसादशास्त्री 'साहित्याचार्य' 'आयुर्वेदाचार्य' 'आशुकवि' कवि-चक्रवर्ती हैं। इनकी प्रतिभा व पाण्डित्य अद्भुत चमत्कारी था। इनकी संस्कृत एवं हिन्दी कविता में बड़ी तीव्र गति थी, और इनकी कविता में ओज और प्रसाद-रस खूब रहता था। हमारे दुर्भाग्य से इनका स्वल्प ही समय में स्वर्गवास हो गया। अतः उनकी स्मृति को स्थिर रखने के लिये यह टीका उनकी कृति रूप से प्रकाशित की गयी है।

संस्कृत टीका की विशेषता

संस्कृत टीका में—शब्दों का प्रायः असली रूप और लिङ्ग ये सब स्पष्ट रूप से समझाये गये हैं—यह बात आप टीका देख कर ही जान सकेंगे।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भाषाटीका

संस्कृत के प्रचार के साथ-साथ 'अमरकोश' की भाषाटीका की अधिक माँग देख कर टीकाकार के दत्तक पुत्र पं० श्रीसीताराम-शास्त्री व्याकरणाचार्य, 'राजशास्त्री' साहित्यरत्न कृत सरल एवं संक्षिप्त भाषाटीका भी इस संस्करण में साथ दे दी गई है। इससे इस संस्करण में सोने में सुगन्धयोग हो गया है।

अतः हमारा विश्वास है कि 'अभिनवराजलक्ष्मी' तथा 'भाषाटीका' सहित 'अमरकोश' का यह गुटका-संस्करण छात्रों तथा विद्वानों के लिए भी बहुत लाभप्रद होगा। विद्वद्वर्ग इससे लाभ उठावें।

संस्कृत-साहित्य-सेवी मात्र को 'अमरकोश'
अवश्य कण्ठस्थ करना चाहिये।

श्रीराजस्थानसंस्कृतकालेज,
मीरघाट, काशी।
पौष. शु. १५ सं. २००६ वि.

निवेदक—
श्रीगुरुप्रसादशास्त्री।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ श्रीः ॥

अमरकोशप्रथमकाण्डस्थश्लोकसंख्या

पृष्ठाङ्काः	वर्गाङ्काः	वर्गनाम	श्लोकसंख्या
१—२७	१	स्वर्गवर्गे	७५
२७—२७	२	व्योमवर्गे	२॥
२८—४०	३	दिग्वर्गे	३५
४०—५३	४	कालवर्गे	३१
५३—५९	५	धीवर्गे	१७
६०—६९	६	शब्दादिवर्गे	२५॥
७०—८३	७	नाट्यवर्गे	३८
८३—८६	८	पातालभोगिवर्गे	११
८७—८८	९	नरकवर्गे	३॥
८८—१०४	१०	वारिवर्गे	४५

एवं सङ्कलने सति—१० वर्गाः, श्लोकाः २८३॥

क्षेपकैश्च सह श्लोकाः ३००

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अमरकोशे द्वितीयकाण्डे—

❀ श्लोकादिसंख्या ❀

पृष्ठाङ्काः	वर्गाङ्काः	वर्गनाम	श्लोकाः
१०५—११२	१	भूमिवर्गे	१९
११२—१२०	२	पुरवर्गे	२०
१२०—१२३	३	शैलवर्गे	१०
१२३—१६९	४	वनौषधिवर्गे	१७०
१७०—१८३	५	सिंहादिवर्गे	४३
१८३—२३४	६	मनुष्यवर्गे	१४०
२३५—२५९	७	ब्रह्मवर्गे	५८
२६०—३०५	८	क्षत्रियवर्गे	१२०
३०६—३४८	९	वैश्यवर्गे	१११
३४८—३६५	१०	शूद्रवर्गे	४८

एवं द्वितीयकाण्डे १० वर्गाः, श्लोकाः ७३९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

तृतीयकाण्डे श्लोकादिसंख्या

पृष्ठाङ्काः	वर्गाङ्काः	वर्गनाम	श्लोकसंख्या
३६६—४०३	१	विशेष्यनिघ्ने	११२॥
४०३—४२२	२	संकीर्णवर्गे	४२
४२३—५४०	३	नानार्थवर्गे	२६४
५४१—५५६	४	अव्ययवर्गे	२३
५५६—५८८	५	लिङ्गसंग्रहे	४७

एवं सङ्कलनया पञ्चसु वर्गेषु श्लोकाः— ... . ४८८॥

सम्पूर्णश्लोकसंख्या .... १५२७॥

अमरकोशे सङ्गृहीतशब्दसंख्या प्रायः— ११०२५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीगणेशाय नमः ।

कविचक्रवर्त्ति-श्रीरघुनन्दनप्रसादशास्त्रि-विरचितया

अभिनवराजलक्ष्म्याऽलङ्कृतः—

अमरकोशः ।

तस्य च—

प्रथमं काण्डम् ।

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीराः ? स श्रिये चामृताय च ॥ १ ॥

❀ अथाभिनवराजलक्ष्मीः ❀

वन्देऽनवद्यसद्ग्रन्थविद्योद्द्योतितदिङ्मुखान् ॥
मरुमण्डलमार्त्तण्डस्नेहिरामाभिधान् गुरून् ॥ १ ॥

यस्येति । हे धीराः = विद्वांसः ! 'कृतिकृष्ट्यभिरूपधीराः' इति नाममाला । अक्षयः = अनादिरनन्तः, सः = भगवान् शिवः, सेव्यताम् । 'भवद्भि'रिति शेषः । स कः ? यस्य—अगाधस्य=अन-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

समाहृत्यान्यतन्त्राणि सङ्क्षिप्तैः प्रतिसंस्कृतैः ।

वच्छिन्नमहिमातिशयस्य, [ज्ञानञ्च दया च—ज्ञानदये, ज्ञानदययोः सिन्धुरिव-तस्य-] —ज्ञानदयासिन्धोः=ज्ञानसागरस्य, दयानिधेश्च, अनघाः = निष्पापाः, मनोहराः, पवित्राश्च क्षमाशान्त्यैश्वर्यादयो गुणाः-सन्ति । कस्मै प्रयोजनाय सेव्यतामित्यत आह—श्रिये = कल्याणाय, त्रिवर्गसुखाय, अमृताय=मोक्षाय च ।

यद्वा—हे अनघाः = निष्कलङ्का विद्वांसः !—भवद्भिः स सेव्यताम् । स कः ?—यः-धीराः । धियं=ज्ञानं राति = ददातीति धीराः = ज्ञानप्रदः, शिवः । श्रिये=सकलसुखसम्पत्तये, अमृताय च= मोक्षाय च ।

यद्वा—'यस्ये'त्यत्र 'इको यणची' त्यनेन कृतयणादेशस्य ईकारस्य प्रश्लेषः, (ई—अस्येति प्रश्लेषः) । तथा च—यतः— अस्य = शिवस्य, ईं = लक्ष्मीः, अनघाः = पवित्रा गुणाश्च सन्ति, अतः—सुप्रसन्नो भगवाञ्शिवो युष्मभ्यं भोगमोक्षलक्ष्मीं कृपया दास्यतीति भावः ।

ज्ञायतेऽनेन ज्ञानं = शास्त्रं, दया = निरुपाधि परदुःखहानेच्छा, तयोः सागरस्येवागाधस्य । यतः कारुणिकात् सर्वा विद्याः प्रादुर्भवन्तीत्यर्थः । कथम्भूतः सः ?, अक्षयः = नित्यशुद्धबुद्धसच्चिदानन्दरूपः—इत्यर्थः—इति सङ्क्षेपः ॥ १ ॥

समाहृत्येति । अन्येषां = व्याडि—वाचस्पत्यादीनां, तन्त्राणि=

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥ २ ॥
प्रायशो रूपभेदेन, साहचर्याच्च कुत्रचित् ।
स्त्रीपुंनपुंसकं ज्ञेयं, तद्विशेषविधेः क्वचित् ॥ ३ ॥

नामलिङ्गानुशासनादीनि, सिद्धान्तांश्च, समाहृत्य=सङ्गृह्य, [नामानि च लिङ्गानि च–नामलिङ्गानि, तानि अनुशिष्यन्ते–विविच्य बोध्यन्तेऽनेन—अस्मिन् वा, तत्–] नामलिङ्गानुशासनम्, (अमरकोशः–) सङ्क्षिप्तैः=स्वल्पशब्दैः, प्रतिसंस्कृतैः = यथायोग्यं परिपाटीक्रमेण स्थापितैः–रचनाचातुरीमनोहरैः, वर्गैः = प्रकरणैः–युक्तम्, अत एव सम्पूर्णं=साङ्गोपाङ्गं, मया–अमरसिंहेन–उच्यते। 'बालानामुपकारये'ति शेषः ॥ २ ॥

प्रायश इति—अत्र नामलिङ्गानुशासने–अमरकोशे–प्रायशः= बाहुल्येन, रूपभेदेन = टाप्–ङीप्–विसर्गा–नुस्वारादिविशेषैः, कुत्रचिच्च साहचर्यात्–स्त्री–पुं–नपुंसकं ज्ञेयम् । क्वचिच्च तद्विशेषविधेः— स्त्रीपुंसादीनां विशिष्य निर्देशाच्च—स्त्रीपुंनपुंसकं–ज्ञेयमित्यर्थः ।

(१) तत्र रूपभेदेन यथा—'लक्ष्मीः पद्मालया पद्मा', 'पिनाकोऽजगवं धनुः' इति। विशेषणपदस्थेन, सर्वनामपदस्थेन वा रूपभेदेनापि क्वचिल्लिङ्गनिर्णयः कार्यः । यथा—'तत्परो हनुः' अत्र 'तत्परः' इति विशेषणात् 'हनु'शब्दस्य पुंस्त्वं निर्णीयते। एवं– 'कुतूः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमा'नित्यत्र 'सा इति सर्वनामलिङ्गदर्शनात्कुतूशब्दस्य स्त्रीलिङ्गता । (२) रूपभेदाभावेऽपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

भेदाख्यानाय न द्वन्द्वो नैकशेषो न सङ्करः ।
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते ॥ ४॥

निश्चितलिङ्गशब्दसाहचर्याल्लिङ्गनिर्णयो तथा–'अश्वयुगश्विनी' 'भानुः करो मरीचिः स्त्रीपुंसयोः' 'वियद्विष्णुपदम्'–इत्यादि। अत्र–अश्विनी–कर—विष्णुपदादिशब्दसाहचर्यात्–अश्वयुक्–भानु–वियच्छब्दानां स्त्रीत्वं, पुंस्त्वं, क्लीबत्वञ्च यथायथं बोध्यम् ।

(३) तद्विशेषविधेः–[तस्य=स्त्रीपुंनपुंसकस्य, वचनस्य च–विशेषविधेः = विशिष्योपादानात्] निर्णयो यथा–'भेरी स्त्री दुन्दुभिः पुमान्' 'मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्' 'गृहाः पुंसि तु भूम्न्येव' इत्यादौ ॥ ३ ॥

भेदेति । अत्र=कोशे, अनुक्तानां=स्वस्वपर्यायेषु स्थानान्तरेऽपठितानां, भिन्नं लिङ्गं येषां तेषां—भिन्नलिङ्गानां शब्दानां—भेदाख्यानाय = लिङ्गभेदं प्रदर्शयितुं, द्वन्द्वः, एकशेषश्च न कृतः । तथाहि—'देवताऽमराः' इति द्वन्द्वे न न पठितम् । तथा सति हि लिङ्गभेद नियमो न स्यात् । एवं 'खं नभः श्रावणो नभाः' इत्यत्र 'खश्रावणौ तु नभसी' इत्येकशेषो न कृतः । समानलिङ्गानान्तु लिङ्गभेदाऽभावात् द्वन्द्वैकशेषौ कृतावेव । यथा–स्वर्गनामसु—'त्रिदिवत्रिदशालयाः' इति, 'पादा रश्म्यङ्घ्रितुर्याशाः' इत्यादौ च ।

स्थानान्तरे स्वस्वपर्यायेषु निर्दिष्टानान्तु—भिन्नलिङ्गानामपि—द्वन्द्वैकशेषावत्र कोशे कृतावेव । यथा—'अप्सरोयक्षरक्षोगन्धर्वकि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्रिलिङ्ग्यां 'त्रि'ष्विति पदं, मिथुने तु 'द्वयो' रिति।
निषिद्धलिङ्गं शेषार्थं, त्वन्ताऽथादि न पूर्वमाक् ॥५॥

नराः' इत्यत्र स्वस्वपर्यायप्रक्रमे 'नैर्ऋतो यातुरक्षसी' 'स्त्रियां बहुष्वप्सरसः' इत्यादिना निर्दिष्टानां यक्षाप्सरोरक्ष आदीनां द्वन्द्वे नात्र निर्देशः कृत एव।

एवं—'मातापितरौ' इत्यत्र मातृशब्दस्य, पितृशब्दस्य च 'जनयित्री प्रसूर्माता' 'तातस्तु जनकः पिता' इत्यादिना स्वस्वपर्यायप्रक्रमे निर्दिष्टलिङ्गतयाऽत्रैकशेषेण—'पितरौ' इति निर्देशः कृतः।

किञ्चात्र कोशे—क्रमादृते=क्रमं विना (=प्रसङ्गं विना) सङ्करो न कृतः। भिन्नलिङ्गानां मेलनं सङ्करः। यथा—'स्तवः स्तोत्रं स्तुतिर्नुतिः' इत्यत्र 'स्तव' इति पुंलिङ्गमुक्त्वा, 'स्तोत्र'मिति च नपुंसकलिङ्गमुक्त्वा 'नुतिः स्तुति'रिति स्त्रीलिङ्गनिर्देशः, न तु 'स्तुतिः स्तोत्रं नुतिः स्तवः' इत्येवं सङ्करः कृतः। यथा वा—'जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः' इत्यत्र क्लीबस्त्रीपुंलिङ्गानां क्रमेणैव निर्देशः कृतो, न तु सङ्करः कृतः।

क्रमेण=प्रसङ्गेन तु स्त्रीपुंनपुंसकानां सङ्करः कृत एव। यथा स्वर्गप्रक्रमे—'द्योदिवौ' इति भिन्नलिङ्गावपि स्वर्गपर्यायप्रसङ्गान्निर्दिष्टौ॥४॥

त्रयाणां लिङ्गानां समाहारस्त्रिलिङ्गी, तस्यां—त्रिलिङ्ग्यां—[त्रिलिङ्गास्तटादिशब्दा इति बोधनाय] 'त्रिषु' इति पदं बोध्यम्। यथा—'त्रिषु स्फुलिङ्गोऽग्निकणः' इति। मिथुने तु=स्त्रीपुंसयोस्तु, 'द्वयोः'

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ अथ स्वर्गवर्गः ❀

[1]स्वरव्ययं, स्वर्ग-नाक-त्रिदिव-त्रिदशालयाः ।
सुरलोको, द्योदिवौ द्वे स्त्रियां, क्लीबे त्रिविष्टपम् ॥६॥

इति पदं बोध्यं, यथा—'द्वयोः प्रणाली पयसः' इत्यादि ।

निषिद्धं लिङ्गं यस्य तत्—निषद्धलिङ्गपदं, शेषार्थं = शेषलिङ्गं बोध्यम् । यथा—'वज्रमस्त्री स्यात्' । अत्र 'अस्त्री'त्युक्त्या पुंनपुंसकलिङ्गता वज्रशब्दस्य । 'तु'शब्दोऽन्ते यस्य-तत्-त्वन्तम्, 'अथ' शब्द आदिर्यस्य-तत्-अथादि, त्वन्तञ्च अथादि च-त्वन्ताथादि-नामपदं, लिङ्गपदं, सर्वनामपदम्, अव्ययपदञ्च—न पूर्वभाक् = पूर्वान्वयि न भवति, किन्तूत्तरान्वयि एव भवति । तत्र नामपदं यथा—'नगरीत्वमरावती' 'जवोऽथ शीघ्रं त्वरितम्'—इति । लिङ्गपदं यथा—'पुंसि त्वन्तर्द्धिः' 'शस्तं चाथ त्रिषु द्रव्ये' इति । सर्वनामपदं यथा—'तस्य तु प्रिया' इति । अव्ययपदं यथा—'वा तु पुंसि' इति । अत्र 'अथ' शब्दोऽथोशब्दस्याप्युपलक्षणं, यथा—'अनुक्रोशोऽप्यथो हसः' इति ॥ ५ ॥ ❀ इति परिभाषाप्रकरणम् ❀

---

(१) स्वरादि नवऽनामानि स्वर्गलोकस्य । तत्र स्वःशब्दोऽव्ययम्, द्योदिवौ स्त्रियाम्, त्रिविष्टपं नपुंसकं, शेषाः पञ्च पुंसि । त्रिदिवशब्दः क्लीबेऽपि मेदिनीप्रमाण्यात् । द्यौः, द्यावौ, द्यावः । द्यां । द्योभ्याम् ॥ द्यौः, दिवौ, दिवः, द्युभ्यामित्यादिरूपाणि । अत्र दिवशब्दोऽकारान्तः क्लीबलिङ्गोऽप्यस्ति—'मन्दरः सैरिभः शक्रभवनं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ ७ ॥
आदितेया दिविषदो लेखा अदितिनन्दनाः ।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥८॥
बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः ।
वृन्दारका, दैवतानि पुंसि वा, देवता स्त्रियाम् ॥९॥
[2]आदित्यविश्ववसवस्तुषिताऽऽभास्वराऽनिलाः ।
महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥१०॥

खं दिवं नभः' इति त्रिकाण्डशेषात् । [स्वर् आदि९नाम स्वर्ग के हैं]।

(१) 'अमरा' इत्यादि २६—षड्विंशतिर्देवानां नामानि । तत्र देवतैव दैवतम्-इति स्वार्थिके प्रज्ञाद्यणि निष्पन्नः दैवतशब्दः पुंसि, नपुंसके च । देवताशब्दस्तु स्त्रियां भवति । शेषाः पुंसि । [ये २६ नाम देवताओं के हैं] ।

(२) आदित्यादयो नव—गणदेवताः = समुदायचारिण्यो देवताः । तदुक्तं वाचस्पतिकोशे—

"आदित्या द्वादश (१२) प्रोक्ताः, विश्वेदेवा दश (१०) स्मृताः ।
वसवश्चाष्ट (८) संख्याताः, षट्त्रिंशत्तुषिता मताः (३६) ॥
आभास्वराश्चतुःषष्टि-(६४)-र्वाताः पञ्चाशदूनकाः (४९) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]विद्याधराऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः ।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः ॥११॥
[2]असुरा दैत्यदैतेयदनुजेन्द्राऽरिदानवाः ।
शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ॥१२॥
[3]सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।
समन्तभद्रो भगवान् मारजिल्लोकजिज्जिनः ॥१३॥
षडभिज्ञो दशबलोऽद्वयवादी विनायकः ।

महाराजिकनामानो द्वे शते विंशतिस्तथा (२२०) ॥
साध्या द्वादश (१२) विख्याता, रुद्राश्चैकादश (११) स्मृताः" इति ।

(१) 'विद्याधरे'त्यादि प्रत्येकं देवजातिविशेषाणां नामधेयम् । अमी = पूर्वोक्ता विद्याधरादयो दश देवयोनिभेदाः । देवा योनिरेषान्ते—देवयोनयः = देवांशाः । [ये ९ नाम देवयोनि (देवगण)-विशेषों के हैं] ।

(२) असुरेत्यादीनि दश असुराणां नामानि पुंसि ।
[ये १० नाम असुरों के हैं] ।

(३) अष्टादश बुद्धस्य नामानि, पुंसि । तत्र—'मारजित्—लोकजित्'—शब्दौ तान्तौ । अद्वयवादी—नकारान्तः । शास्तृशब्द ऋकारान्तः । [ये १८ नाम बुद्ध के हैं] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुनीन्द्रः श्रीघनः शास्ता मुनिः, [1]शाक्यमुनिस्तु यः ॥
स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः ।
गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः ॥ १५ ॥
[[2]सर्वज्ञो वीतरागोऽर्हन् केवली तीर्थकृज्जिनः] ।
[3]ब्रह्माऽऽत्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ।
हिरण्यगर्भो लोकेशः स्वयम्भूश्चतुराननः ॥ १६ ॥
धाताऽब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः ।
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड् विधिः ॥१७॥
[[4]नाभिजन्माऽण्डजः पूर्वोऽनिधनः कमलोद्भवः ।
सदानन्दो रजोमूर्तिः [5]सत्यको हंसवाहनः] ॥

(१) सस शाक्यस्य-बुद्धभेदस्य-नामानि-पुंसि [ये ७ नाम गौतम बुद्ध (विशेष) के हैं] ।

२ 'सर्वज्ञ' आदि ६ नाम जिन (जैन देवता) के हैं ।

(३) ब्रह्मे'त्यादीनि विंशतिर्नामानि ब्रह्मणः-पुंसि । तत्र ब्रह्मपरमेष्ठिनौ-नकारान्तौ, धातृ-विधातृ-स्रष्टारस्त्रय ऋकारान्ताः, वेधाः-सकारान्तः, विश्वसृट्-जकारान्तः । ४ 'नाभिजन्मे'त्यादि च नव नामानि प्रक्षिप्तानि । [ब्रह्माजी के ये २९ नाम हैं] ।

५ 'सत्य-कौ' इति पाठः स्यात् ।

Vasishtha Tripathi Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ।
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥ १८ ॥
दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः ।
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥१९॥
उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ।
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ॥ २० ॥
देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः ।
वनमाली बलिध्वंसी कंसारातिरधोक्षजः ॥ २१ ॥
विश्वम्भरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः ।
[[2]पुराणपुरुषो यज्ञपुरुषो नरकान्तकः ।
जलशायी विश्वरूपो मुकुन्दो मुरमर्दनः] ।
[3]वसुदेवोऽस्य जनकः स एवाऽऽनकदुन्दुभिः ॥२२॥

(१) 'विष्णु'रित्यादीनि ऊनचत्वारिंशत्-(३९)-नामानि विष्णोर्भगवतः-'पुंसि' । तत्र विष्टरश्रवाः-सकारान्तः, शार्ङ्गि-वनमालि-बलिध्वंसिनो नकारान्ताः । 'विश्वजित्' तकारान्तः ।

[ये ३९ नाम विष्णु के-हैं] ।

(२) सप्त प्रक्षिप्तान्यप्यस्यैव । [ये ७ नाम भी विष्णु के हैं] ।

(३) श्रीकृष्णपितुर्वसुदेवस्य द्वे नामनी-पुंसि । [ये २ नाम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः ।
रेवतीरमणो रामः कामपालो हलायुधः ॥२३॥
नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली ।
सङ्कर्षणः सीरपाणिः कालिन्दीभेदनो बलः ॥२४॥
[2]मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ।
कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ॥२५॥
शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः ।
पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥२६॥
ब्रह्मसूर्ऋष्यकेतुः [3]स्यादनिरुद्ध उषापतिः ।

श्रीकृष्ण के पिता वसुदेवजी के हैं] ।

(१) श्रीकृष्णाग्रजन्मनो बलभद्रस्य सप्तदश-(१७) नामानि । तत्र 'हलि-मुसलिनौ' नकारान्तौ । एते सर्वेऽपि पुंलिङ्गाः ।

[ये १७ नाम श्रीकृष्णके बड़े भ्राता बलदेवजी के हैं] ।

(२) एकविंशतिः (२१) नामानि कामदेवस्य । तत्र पुष्पधन्वा-नकारान्तः । सर्वे पुँल्लिङ्गाः । ऋष्यकेतुर्विश्वकेतुश्चेत्युभयथाऽपि पाठः । [ये २१ नाम कामदेव के हैं ।] ।

(३) नामद्वयं कृष्णपौत्रस्याऽनिरुद्धस्य । 'उषापति'रित्यपि नाम । [ये २ नाम अनिरुद्ध के हैं] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ॥२७॥
[इन्दिरा लोकमाता मा क्षीरोदतनया रमा ।
भार्गवी लोकजननी क्षीरसागरकन्यका] ॥
[2]शङ्खो लक्ष्मीपतेः [3]पाञ्चजन्यश्चक्रं सुदर्शनम् ।

केचित्तु–'ब्रह्मसूर्यकेतुः स्यादनिरुद्ध उषापति'रिति चत्वारि अनिरुद्धस्य कृष्णपौत्रस्य प्रद्युम्नसूनोर्नामानि । एकोनविंशतिः पूर्वाणि नामानि तु मदनस्य–इत्याहुः । तत्र कामदेवस्य पञ्च बाणाः—

"उन्मादनस्तापनश्च शोषणः स्तम्भनस्तथा ।
संमोहनश्च कामस्य पञ्च बाणाः प्रकीर्तिताः ॥" इति ।

(१) प्रक्षिप्तैरष्टभिः सह षडिमानीति संहत्य चतुर्दश नामानि-लक्ष्म्याः । लक्ष्म्यादयः सर्वे—स्त्रीलिङ्गाः । [ये १४ नाम लक्ष्मीजी के हैं] ।

(२) लक्ष्मीपतेर्विष्णोः शङ्खः—'पाञ्चजन्य' इति–विष्णोरायुधविशेषस्यैकं नाम । तच्च पुंसि । [विष्णु के शङ्खका १ नाम] ।

(३) विष्णुचक्रस्यैकं नाम । तत्र सुदर्शनः–पुंस्यपि, नपुंसके च–'सुदर्शनोऽस्त्रियां चक्रे' इति–नामनिधानकोशोक्तेः । [विष्णु के सुदर्शन चक्र का १ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कौमोदकी गदा, [2]खड्गो नन्दकः, [3]कौस्तुभो मणिः२८
[[4]चापः शार्ङ्गं मुरारेस्तु, [5]श्रीवत्सो लाञ्छनं स्मृतम् ।
[6]अश्वाश्च शैव्य-सुग्रीव-मेघपुष्प-बलाहकाः ॥
[7]सारथिर्दारुको, मन्त्री ह्युद्धवश्चानुजो गदः] ।
[8]गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ।
नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ॥ २९ ॥

(१) एकं विष्णुगदाया नामधेयं,तच्च स्त्रियाम् । 'कौपोदकी'-त्यपि क्वचित् पाठः । [विष्णु की गदा का १ नाम] ।

(२) विष्णोः खड्गस्य 'नन्दक' इत्येकं नामधेयन्तच्च पुंसि । [विष्णु की तलवार का १ नाम] ।

(३) लक्ष्मीपतेर्विष्णोर्मणिः—कौस्तुभः, स च पुंसि । [विष्णु के कौस्तुभ मणि का १ नाम] ।

(४) एकं विष्णुधनुषः—क्लीबे । [विष्णु के धनुष का १ नाम] ।

(५) एकं विष्णुलाञ्छनस्य—पुंसि । [विष्णु के श्रीवत्स चिह्न का १ नाम] ।

(६) विष्णुवाहनानां चत्वारि । [विष्णु के घोड़ों के ४ नाम]

(७) विष्णुसारथि-मन्त्रि-भ्रातॄणामेकैकम् । । [विष्णु के सारथि, मन्त्री व भाई के १-१ नाम] ।

(८) नव विष्णुवाहनस्य गरुडस्य नामानि । तत्र-गरु-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः ।
ईश्वरः शर्व ईशानः शङ्करश्चन्द्रशेखरः ॥ ३० ॥
भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ।
मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः ॥
उग्रः कपर्दी श्रीकण्ठः क्षितिकण्ठः कपालभृत् ।
वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ॥ ३२ ॥
कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः ।
हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ॥ ३३ ॥
गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ।
व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ॥
[[2]अहिर्बुध्न्योऽष्टमूर्तिश्च गजारिश्च महानटः] ।

त्मान्-तकारान्तः । सर्वेऽपि शब्दा इमे पुंल्लिंगाः । [ये ९ नाम गरुडजी के हैं] ।

(१) 'शम्भुं'रित्यादीन्यष्टाचत्वारिंशत्-(४८)-नामानि भगवतो विश्वेश्वरस्य शिवस्य । तत्र-शूलि-पिनाकि-कपर्दि-क्रतुध्वंसिनो नकारान्ताः । कृत्तिवासः-कृशानुरेतसौ सकारान्तौ । कपालभृत् तकारान्तः । एते सर्वे शब्दाः पुंलिङ्गाः । [ये ४८ नाम शिवजीके हैं] ।

(२) चत्वारीमानि नामान्यपि शिवस्यैव । [ये ४ नाम भी शिवजी के ही हैं] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कपर्दोऽस्य जटाजूटः, [2]पिनाकोऽजगवं धनुः ।
[3]प्रमथाः स्युः पारिषदा, ब्राह्मीत्याद्यास्तु मातरः ॥
[[4]ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः] ॥
[5]विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा ।
[[6]अणिमा महिमा चैव गरिमा लघिमा तथा ।
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः] ॥

---

(१) अस्य-शम्भोर्जटानां, जूटः=बन्धः-कपर्दः । एकं शिव-जटाभारस्य नाम, तच्च पुंसि । [शिवजी के जटा के भार का१नाम]।

(२) द्वे नामनी शिवधनुषः । तत्र-अजगवं नपुंसके, पिनाकः पुंसि [शिवजी के धनुष के २ नाम] ।

(३) शिवानुचराणां द्वे नामनी । [शिवजी के गणों के २ नाम] ।

(४) ब्रह्म-विष्णु-शिवादिशक्तिभूतानां देवतानामेकैकं नाम स्त्रियाम् । [मातृका शक्तियों के १-१ नाम] ।

(५) नामत्रयं योगादिशक्तिजप्रभावविशेषस्य । तत्रैश्वर्यं क्लीबे, भूतिविभूती-स्त्रियाम् । [विभूति=वैभव-के ३ नाम] ।

(६) अष्टसिद्धीनामेकैकं नाम । अणिमादिशब्दा आबन्ता अपि 'अणिमायै नमः' इत्यादिरीत्या तन्त्रेषु प्रसिद्धाः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]उमा कात्यायनी गौरी काली हैमवतीश्वरी ॥३६॥
शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला ।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाऽम्बिका ॥
[आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा] ।
[2]विनायको विघ्नराज-द्वैमातुर-गणाधिपाः ।
अप्येकदन्त-हेरम्ब-लम्बोदर-गजाननाः ॥३८॥
[3]कार्तिकेयो महासेनः शरजन्मा षडाननः ।
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ॥३९॥
बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः ।
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ॥४०॥

---

(१) पार्वत्याः-(१७)-नामानि स्त्रियाम् । प्रक्षिप्तैश्चतुर्भिस्तु सहैकविंशतिः । [ये २१ पार्वतीजी के नाम हैं] ।

(२) अष्टौ गणेशस्य नामानि पुंसि । [ये ८ गणेशजी के नाम हैं] ।

(३) शिवसूनोः कार्तिकेयस्य सप्तदश (१७) नामानि पुंसि-तत्र—शरजन्मा—नकारान्तः, तारकजित्—तकारान्तः । सर्वे च पुंलिङ्गाः ।[स्वामीकार्तिकेय के ये १७ नाम हैं] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]शृङ्गी भृङ्गिरिटिस्तुण्डी नन्दिको नन्दिकेश्वरः।
[2]कर्ममोटी तु चामुण्डा चर्ममुण्डा च चर्चिका]॥
[3]इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः
वृद्धश्रवाः सुनासीरः पुरुहूतः पुरन्दरः ॥ ४१ ॥
जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः।
सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा ॥४२॥
वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः।
जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः ॥ ४३ ॥

---

(१) नन्दिकेश्वरस्य ५ पञ्च नामानि [५ नाम नन्दिकेश्वरजी के हैं]।

(२) चत्वारि नामानि चण्डिकायाः। [४ नाम चामुण्डा =कालीजी के हैं]।

(३) इन्द्रस्य पञ्चत्रिंशत्-(३५) नामानि। तत्र-मरुत्वान्-तकारान्तः, मघवा—नान्तः, वृद्धश्रवो—बिडौजसौ—सकारान्तौ। सुत्राम-वृष-वृत्रहणो नकारान्ताः। गोत्रभित्-तकारान्तः। ऋभुक्षि-वज्रि-जम्भभेदिनो नकारान्ताः। ऋभुक्षाः, ऋभुक्षाणौ ॥ ऋभुक्षः, ऋभुक्षा, ऋभुक्षिभ्यामित्यादि रूपाणि। तुराषाट्-हकारान्तः। स्वाराट्-जकारान्तः। इमे सर्वे पुंसि बोध्याः।

[ये ३५ नाम इन्द्र के हैं।]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सङ्क्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः ।
आखण्डलः सहस्राक्ष ऋभुक्षास्तस्य[1] तु प्रिया ॥४४॥
पुलोमजा शचीन्द्राणी, [2]नगरी त्वमरावती ।
[3]हय उच्चैःश्रवाः, [4]सूतो [5]मातलिर्नन्दनं वनम् ॥४५॥
[6]स्यात्प्रासादो वैजयन्तो, [7]जयन्तः पाकशासनिः ।

---

(१) तस्य=इन्द्रस्य, प्रिया–पत्नी–पुलोमजा–शची–इन्द्राणी, इति त्रीणि पौलोम्या इन्द्रपत्न्या नामानि । [इन्द्र की स्त्री इन्द्राणी के ३ नाम] ।

(२) तस्य=इन्द्रस्य नगरी तु–अमरावती । एकमिन्द्रनगर्या नामधेयम् । [इन्द्र की पुरी अमरावती का १ नाम] ।

(३) एकमिन्द्राश्वस्य नाम । तत्र उच्चैःश्रवाः–सकारान्तः [इन्द्र के घोड़े का १ नाम] ।

(४) एकमिन्द्रसारथेः । [इन्द्र के सारथी का १ नाम] ।

(५) इन्द्रकाननस्य एकं नाम, तच्च नपुंसकम् । [इन्द्र के बगीचे का १ नाम] ।

(६) एकमिन्द्रभवनस्य नाम । तच्च पुंसि । [इन्द्र के महल का १ नाम] ।

(७) द्वे नामनी इन्द्रपुत्रस्य जयन्तस्य ।
[इन्द्र के पुत्र के २ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]ऐरावतोऽभ्रमातङ्गैरावणाऽभ्रमुवल्लभाः ॥४६॥
[2]ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः ।
शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः ४७॥
[3]व्योमयानं विमानोऽस्त्री, [4]नारदाद्याः सुरर्षयः ।
[5]स्यात्सुधर्मा देवसभा, [6]पीयूषममृतं सुधा ॥४८॥

---

(१) चत्वारीन्द्रहस्तिन ऐरावतस्य नामानि । [इन्द्र के ऐरावत हाथी के ४ नाम] ।

(२) दश वज्रस्य नामानि । तत्र ह्रादिनी—स्त्रियाम्, वज्रकुलिशौ—द्वावपि पुंनपुंसकयोः, भिदुरं क्लीवे, अशनिः—स्त्री-पुंसयोः, शेषाः—पञ्च पुंसि । [इन्द्र के आयुध वज्र के १० नाम] ।

(३) द्वे देवादिविमानस्य नामानि । तत्र व्योमयानं—क्लीबे, विमानः—पुंसि, नपुंसके च । [ये २ नाम विमान (हवाई जहाज) के हैं] ।

(४) नारद—पर्वत—तुम्बरु—देवलादीनामेकं नाम पुंसि । [नारद आदि देवऋषियों का १ नाम] ।

(५) द्वे देवसभायाः । तत्र—सुधर्मा, सुधर्मे, सुधर्माः—इत्यादि रूपाणि । स्त्रीलिङ्गः सुधर्माशब्दः । [देवताओं की सभा का नाम] ।

(६) त्रीणि—अमृतस्य । तत्र—सुधा स्त्रियां, पीयूषामृते—क्लीबे । [अमृत के ३ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका ।
[2]मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ॥४९॥
[3]पञ्चैते देवतरवो मन्दारः पारिजातकः ।
सन्तानः कल्पवृक्षश्च, पुंसि वा हरिचन्दनम् ।
[4]सनत्कुमारो वैधात्रः, [5]स्वर्वैद्यावश्विनीसुतौ ।
नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ॥५१॥
स्त्रियां [6]बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः ।

---

(१) चत्वारि नामानि स्वर्गगङ्गायाः, तानि च स्त्रियाम् । [स्वर्ग की गङ्गा मन्दाकिनी के ४ नाम] ।

(२) पञ्च सुमेरोर्नामानि । सर्वाणि च पुंसि । [सुमेरुके ५ नाम] ।

(३) मन्दारादयः पञ्च देवानां तरवः = वृक्षाः । तत्र हरिचन्दनं पुंसि, क्लीवे च । [देवताओं के ५ वृक्षों के नाम] ।

(४) सनत्कुमारस्य ब्रह्मसूनोर्द्वे नामनी । [सनत्कुमार के २ नाम] ।

(५) अश्विनीकुमारयोः षड् नामानि—प्रायो द्विवचनान्तानि । [अश्विनीकुमारों के ६ नाम] ।

(६) द्वे उर्वश्यादेः । तत्र अप्सरश्शब्दो नित्यं बहुवचनान्तः, सान्तश्च स्त्रियाम् । [अप्सराओं के २ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम् ॥५२॥
[2]अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः ।
कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ॥५३॥
बर्हिःशुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः ।
आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ॥५४॥
रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः ।
हिरण्यरेता हुतभुग् दहनो हव्यवाहनः ॥५५॥
सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ।

---

(१) त्रिदिवौकसां=देवानां, गन्धर्वाः=गायकाः = हाहाहूहू-तुम्बरु-वृषणश्व—विश्वावसु-चित्ररथादयः। एकैकं देवगायकानां नाम। [देवताओं के गन्धर्वों के १-१ नाम]।

(२) अग्नेश्चतुस्त्रिंशत्-(३४)-नामानि। तत्र जातवेदो-बर्हि-र्हिरण्यरेतः-सप्तार्चि-र्दमुनसः सान्ताः। शुष्म-कृष्णवर्त्मानौ नकारान्तौ। तनूनपात्-शिखावच्छब्दौ तकारान्तौ। हुतभुक्-जकारान्तः। शुष्मशब्दोऽकारान्तोऽपि क्वचित्। आप्पित्तं क्लीबे। शेषाः पुंसि। तनूनपात् तनूनपातौ इत्यादि। शत्रन्तस्य तु तनूनपान्तौ इत्यादीति—सुधाकृतः। काली-कराली-मनोजवा-सुलोहिता-सुधूम्रवर्णा-स्फुलिङ्गिनी-विश्वदासाख्याः सप्त वह्नेर्जिह्वाः। [अग्नि के ३४ नाम]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शुचिरप्पित्त[1]मौर्वस्तु वाडवो वडवानलः ॥५६॥
[2]वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम् ।
[3]त्रिषु स्फुलिङ्गोऽग्निकणः, [4]सन्तापः संज्वरः समौ ५७
[[5]उल्का स्यान्निर्गतज्वाला, [6]भूतिर्भसितभस्मनी ।
क्षारो रक्षा च, [7]दावस्तु द्रवो वनहुताशनः] ॥
[8]धर्मराजः पितृपतिः समवर्ती परेतराट् ।
कृतान्तो यमुनाभ्राता शमनो यमराड् यमः ॥५८॥

---

(१) त्रीणि वडवानलस्य । [समुद्र की अग्नि (ज्वालामुखी) के तीन ३ नाम] ।

(२) वह्नेर्ज्वालायाः पञ्च । तत्र ज्वाल-कीलौ-स्त्रीपुंसयोः । अर्चिरादयस्त्रयः शब्दाः स्त्रियाम् । अर्चिः क्लीवेऽपि । अर्चिःशब्दः सकारान्तोऽपि, इकारान्तोऽपि च, 'अग्नेर्भ्राजन्तेऽर्चय' इति श्रुतेः । [अग्नि की लपट के ५ नाम] ।

(३) द्वे अग्निस्फुलिङ्गस्य, ['चिनगारी'] । तत्र स्फुलिङ्ग-शब्दस्त्रिष्वपि लिङ्गेषु बोध्यः । स्त्रियां तु 'स्फुलिङ्गा'टाबन्तः ।

(४) द्वे सन्तापस्य नामनी । (५) द्वे उल्कायाः । (६) पञ्च भस्मनः [भस्म के ५ नाम] । (७) त्रीणि वनवह्नेर्नामानि । [जङ्गल की अग्नि के ३ नाम] । (८) चतुर्दश यमराजस्य नामानि । तत्र समवर्ती नकारान्तः, परेतराट् नकारान्तः, यमराडपि नान्तः, यमुना-

CC0. In Public Domain, Digitizagtion by eGangotri

CC0. In Public Domain, Digitizagtion by eGangotri

कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः ।
[1]राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः५९
रात्रिञ्चरो रात्रिचरः कर्बुरो निकषात्मजः ।
यातुधानः पुण्यजनो नैर्ऋतो यातु-रक्षसी ॥६०॥
[2]प्रचेता वरुणः पाशी यादसाम्पतिरप्पतिः ।
[3]श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ॥६१॥
पृषदश्वो गन्धवहो गन्धवाहाऽनिला-ऽऽशुगाः ।
समीर-मारुत-मरुज्जगत्प्राण-समीरणाः ॥६२॥
नभस्वद्वात-पवन-पवमान-प्रभञ्जनाः ।

भ्राता-ऋकारान्तः । सर्वे पुंसि । [यमराज के १४ नाम]

(१) पञ्चदश राक्षसानां नामानि । तत्र—यातुरक्षसी क्लीबे, शेषाः पुंसि । रक्षश्शब्दः सान्तः । क्रव्यात्-दकारान्तः । यातु,यातुनी,यातूनि । रक्षः, रक्षसी, रक्षांसीत्यादि रूपाणि । [राक्षसों के १५ नाम] ।

(२) पञ्च वरुणस्य नामानि । प्रचेताः, प्रचेतसौ, प्रचेतसः । पाशी, पाशिनौ, पाशिनः । [वरुण के ५ नाम] । (३) वायोर्विंशतिर्नामानि सर्वाणि पुंसि । तत्र-मातरिश्वा नान्तः । मातरिश्वानौ, मातरिश्वानः । मरुत्, मरुतौ, मरुतः । नभस्वान्, नभस्वन्तौ ॥ नभस्वता । जगत्, जगतौ, जगतः । 'वर्त्तमाने पृषद्दित्यादिना

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[[1]प्रकम्पनो महावातो झञ्झावातः सवृष्टिकः ।]
[2]प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ।
शरीरस्था इमे, [3]रंहस्तरसी तु रयः स्यदः ।
[4]जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ॥६४॥
सत्वरं चपलं तूर्णमविलम्बितमाशु च ।
[5]सततऽनारताऽश्रान्तसन्ततऽविरताऽनिशम् ॥६५॥

निपातितस्य तु जगन्, जगन्तौ, जगन्तः । 'जगत्प्राण' इत्येकमपि नाम । [वायु के २० नाम] । (१) सवृष्टिकस्य महावातस्य त्रीणि । [झञ्झावात 'अन्धड' 'आन्धी' के ३ नाम] ।

(२) प्रत्येकं देहस्थपञ्चवायूनाम् । तत्र प्राणादीनां कर्माणि यथा-"अन्नप्रवेशनं मूत्राद्युत्सर्गोऽन्नविपाचनम् ।
भाषणादि निमेषादि तद्व्यापाराः क्रमादमी ॥" इति ।

(३) पञ्च वेगाख्यगुणस्य नामानि । तत्र रंहस्तरसी क्लीबे, शेषाः पुंसि । रंहः, रंहसी, रंहांसि । तरः, तरसी, तरांसि । [वेग के ५ नाम] (४) शीघ्रस्य एकादश नामानि । इमे सर्वे शब्दाः क्लीबलिङ्गाः-असत्त्ववाचिनश्चेत् । सत्त्ववाचिनस्तु-त्रिषु लिङ्गेषु ज्ञेयाः । [शीघ्रता के ११ नाम] । (५) निरन्तरं कार्यकरणस्य नव । अत्रापि लिङ्गनिर्णयः पूर्ववत् । सततमिति, अजस्रमिति चाव्ययमपि क्वचित् । [निरन्तर के ९ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नित्याऽनवरताऽजस्रमप्यथा[1]ऽतिशयो भरः ।
अतिवेलभृशाऽत्यर्थाऽतिमात्रोद्गाढनिर्भरम् ॥६६॥
तीव्रैकान्तनितान्तानि गाढ-बाढ-दृढानि च ।
क्लीबे [2]शीघ्राद्यसत्त्वे स्यात्त्रिष्वेषां सत्त्वगामि यत् ६७
[3]कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः ।
मनुष्यधर्मा धनदो राजराजो धनाधिपः ॥६८॥

(१) चतुर्दश नामान्यतिशयस्य । तत्र—अतिशय-भरशब्दौ पुंस्येव । 'अतिशयं पचती'त्यादौ तु क्रियाविशेषणत्वाद्वाचनिकं नपुंसकत्वमिति केचित् । अन्येतु क्रियाविशेषणत्वादत्र द्वितीयैव, न क्लीबता, नियतलिङ्गत्वादित्याहुः । [अतिशय के १४ नाम] ।

(२) शीघ्रादिदृढपर्यन्तमसत्त्वे = अद्रव्ये वर्तमानं सत्—[क्रियाविशेणत्वात्-] क्लीबे भवति । यथा—शीघ्रं गच्छति, सततं पठति । एषां मध्ये यत् सत्त्वगामि = द्रव्यवाचि, तत् त्रिषु=वाच्यलिङ्गं सत्—यथायथं स्त्रीपुंनपुंसकं ज्ञेयम् । यथा—शीघ्रो रथः । शीघ्रा गन्त्री, शीघ्रं वयः—इति । अतिशयभरौ तु पुंस्येव । अत्र 'भेद्यगामी'-ति पाठे=विशेष्यलिङ्गमित्यर्थो बोध्यः ।

(३) सप्तदश कुवेरस्य नामानि । तत्र—यक्षराट् जकारान्तः, मनुष्यधर्मा नान्तः । मनुष्यधर्मा, मनुष्यधर्माणौ, मनुष्यधर्माणः । ऐडविडः । ऐलविलोऽपि, डलयोरेकत्वात् । इडविडा=पुलस्तिभार्या

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः ।
यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वराः ॥६९॥
[1]अस्योद्यानं चैत्ररथं, [2]पुत्रस्तु नलकूबरः ।
[3]कैलासः [4]स्थानमलका [5]पूर्विमानन्तु पुष्पकम् ७०
[6]स्यात्किन्नरः किम्पुरुषस्तुरङ्गवदनो मयुः ।
[7]निधिर्ना शेवधिर्भेदाः[8] पद्मशङ्खादयो निधेः ॥७१॥

कुबेरस्य जननी, तस्या अपत्यमिति च विग्रहः । [कुबेरजी के १७ नाम] ।

(१) एकं कुबेरोद्यानस्य नाम क्लीवे । [कुबेरजी के बाग के नाम] । (२) एकं कुबेरपुत्रस्य नामधेयम् । [कुबेरजी के पुत्र का १ नाम] । (३) अस्य=कुबेरस्य, स्थानं=निवासः-कैलासः-पुंसि । [कैलास पर्वत का १ नाम] । (४) अस्य=कुबेरस्य पूः=नगरी, अलका-स्त्रियाम् । [कुबेर की पुरी] । (५) अस्य=कुबेरस्य, विमानं-पुष्पकं-क्लीवे । [कुबेरजी के विमान का १ नाम] ।

(६) चत्वारि किन्नराणां नामानि । किन्नराश्च देवविशेषाः— केचित् अश्वमुखाः पुरुषाकृतयः, केचिच्च नरमुखा, अश्वकायाश्च । [किन्नरों के ४ नाम] । (७) द्वे निधेर्नामनी, [खजाने के २ नाम] । (८) दिव्यनिधिभेदस्य प्रत्येकं नाम । तत्र पद्मोऽस्त्रियाम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

[पद्मोऽस्त्रियां महापद्मः शङ्खो मकर-कच्छपौ ।
मुकुन्द-कुन्द-नीलाश्च खर्वश्च निधयो नव] ॥

❀ इति स्वर्गवर्गः ॥ १ ॥ ❀

❀ अथ व्योमवर्गः ❀

[1]द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् ।
नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ॥१॥
वियद्विष्णुपदं, वा तु पुंस्याकाश-विहायसी ॥
[विहायसोऽपि नाकोऽपि द्युरपि स्यात्स्वरव्ययम् ।
तारापथोऽन्तरिक्षश्च मेघाध्वा च महाबिलम्] ॥

❀ इति व्योमवर्गः ॥ २ ॥ ❀

---

(१) चतुर्विंशतिः—(२४) नामानि आकाशस्य । [आकाश के २४ नाम] । तत्र=द्योशब्दः, 'दिव्' शब्दश्च स्त्रियाम् । आकाश-विहायसी तु वा पुंसि—अर्थात् पुंसि क्लीबे च । शेषा नपुंसके । व्योम, व्योमनी । व्योमानि । सुरवर्त्म, सुरवर्त्मनी, सुरवर्त्मानि । नभः, नभसी, नभांसी । वियद् , वियती, वियन्ति । विहायः, विहायसी, विहायांसि । विहायः । विहायसौ, विहायस इति च रूपाणि । 'स्वरव्यय'मित्यत्र 'तदव्यय'मित्यपि क्वचित्पाठः ।

[आकाश के २४ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ अथ दिग्वर्गः ❀

[1]दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ।
[2]प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ॥१॥
उत्तरा दिगुदीची [3]स्याद्दिश्यन्तु त्रिषु दिग्भवे ।
[अवाग्भवमवाचीनमुदीचीनमुदग्भवम् ।
प्रत्यग्भवं प्रतीचीनं, प्राचीनं प्राग्भवं त्रिषु] ॥
[4]इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ॥२॥
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ।

---

(१) पञ्च दिशां नामानि स्त्रियां । दिक्, दिशौ, दिशः । ककुप्, ककुभौ, ककुभः । हरित्, हरितौ, हरितः । इमे सर्वे शब्दाः स्त्रियाम् । तत्र दिक्—शान्तः, ककुप् भान्तः । [दिशाओं के ५ नाम] ।

(२) पूर्वा-प्राची, दक्षिणादिक्अपाची । 'अवाचीत्यपि पाठः । पश्चिमा—प्रतीची, उत्तरा दिग्—उदीचीत्यर्थः। एते शब्दाः स्त्रियाम् ।

(३) दिग्भववस्तुमात्रे—दिश्यं स्त्रीपुंनपुंसकम् । [दिशाओं में होनेवाली वस्तु] । (४) प्राचीपतिरिन्द्रः, पूर्वा दिक् च ऐन्द्रीत्यादिरीत्या सर्वत्र ध्येयम् । पूर्वस्या इन्द्रः, आग्नेय्या अग्निः, दक्षिणस्या यमः, नैर्ऋत्यस्य-नैर्ऋतः, [निर्ऋतिरेव नैर्ऋतः] पश्चिमाया वरुणः, वायव्यस्य वायुः, उत्तरस्याः कुबेरः, ऐशान्याः शिवः—अधिपति—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[[1]रविः शुक्रो महीसूनुः स्वर्भानुर्भानुजो विधुः ।
बुधो बृहस्पतिश्चेति दिशाश्चैव तथा ग्रहाः] ॥
[2]ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ॥३॥
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ।
[3]करिण्योऽभ्रमुकपिलापिङ्गलानुऽपमाः क्रमात् ॥४॥
ताम्रकर्णी शुभ्रदन्ती चाऽञ्जना चाऽञ्जनावती ।
[4]क्लीबाऽव्ययन्त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम् ।

रित्यर्थः; (१) सूर्यादयः क्रमात्पूर्वादीनां ग्रहाः । (२-३) पूर्वस्या दिशो गजः—ऐरावतः, हस्तिनी अभ्रमुः स्त्रियाम् । आग्नेय्या गजः—पुण्डरीकः, करिणी च कपिला । दक्षणिस्या गजो—वामनः, करिणी पिङ्गला । नैर्ऋत्यकोणस्य गजः—कुमुदः, तत्पत्नी—अनुपमा । पश्चिमाया—अञ्जनो गजः, ताम्रकर्णी हस्तिनी । वायव्यदिग्गजः—पुष्पदन्तः, करिणी शुभ्रदन्ती । शुभदन्तीत्यपि पाठः । उत्तरस्या गजः—सार्वभौमः, करिणी—अञ्जना । ईशानदिग्गजः—सुप्रतीकः, करिणी—अञ्जनावतीत्यर्थः ।

(४) द्वे अग्न्यादिकोणस्य नामनी । तत्र—अपदिशं—क्लीबमव्ययम् , विदिक्—शकारान्तः स्त्रियाम् ।

[आग्नेय आदि विदिशाओं के २ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizaction by eGangotri

[1]अभ्यन्तरं त्वन्तरालं, [2]चक्रवालन्तु मण्डलम् ।
[3]अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ॥ ६ ॥
धराधरो जलधरस्तडित्वान् वारिदोऽम्बुभृत् ।
घन-जीमूत-मुदिर-जलमुग्धूमयोनयः ॥ ७ ॥
[4]कादम्बिनी मेघमाला, [5]त्रिषु मेघभवेऽभ्रियम् ।
[6]स्तनितं गर्जितं मेघनिर्घोषे रसितादि च ॥ ८ ॥
[7]शम्पा-शतह्रदा-ह्रादिन्यैरावत्यः क्षणप्रभा ।

---

(१) द्वे मध्यस्य नामनी—क्लीबे [बीच के २ नाम] । (२) द्वे मण्डलाकारेण परिणतस्य सेनादिसमूहस्य । [गोल] । (३) मेघस्य पञ्चदश नामानि । तत्र अभ्रं क्लीबे, शेषाः पुंसि । तत्र तडित्वान् तान्तः, । तडित्वान्, तडित्वन्तौ । जलमुक् चान्तः। जलमुक्, जलमुचौ । अम्बुभृत् । अम्बुभृतौ । [मेघ के १५ नाम] । (४) द्वे मेघानां पङ्क्तेर्नामनी,-स्त्रियाम् । [मेघों की घटा]।

(५) मेघभवे वस्तुनि—अभ्रियं—स्त्रीपुंनपुंसकं ज्ञेयम् । [मेघ में होने वाले जल आदि के १ नाम] ।

(६) चत्वारि मेघध्वनेर्नामानि । तत्र—मेघनिर्घोषः पुंसि, शेषाः क्लीबे । आदिना निर्ह्राद—ध्वनि—ध्वानादयः । [मेघों की गर्जना के ४ नाम] ।

(७) विद्युन्नामानि दश । [बिजली के १० नाम] । तत्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तडित्सौदामनी विद्युच्चञ्चला चपला अपि ॥ ९ ॥
[1]स्फूर्जथुर्वज्रनिर्घोषे, [2]मेघज्योतिरिरम्मदः ।
[3]इन्द्रायुधं शक्रधनुस्तदेव [4]ऋजु रोहितम् ॥ १० ॥
[5]वृष्टिर्वर्षं, तद्विघातेऽ[6]वग्राहाऽवग्रहौ समौ ।
[7]धारासम्पात आसारः, [8]सीकरोऽम्बुकणाः स्मृताः ११

तडिद्विद्युच्छब्दौ तकारान्तौ, सर्वे च स्त्रीलिङ्गाः । (१) वज्रध्वनेर्द्वे नामनी । [बिजली की गड़गड़ाहट के २ नाम । (२) वज्राग्नेर्द्वे नामनी । मेघज्योतिः मेघज्योतिषी, मेघज्योतींषि । [आकाश से गिरने-वाली बिजली के २ नाम] । (३) इन्द्रधनुषो द्वे नामनी । ते च क्लीबे । तत्र शक्रधनुः—सकारान्तः । [इन्द्रधनुष के २ नाम] ।

(४) तत्=इन्द्रधनुः—उत्पातादिना यदि ऋजु=अवक्रं स्यात्तदा 'रोहित'मित्युच्यते,—क्लीबे [उत्पातसूचक सीधे इन्द्रधनुष का १ नाम] । (५) द्वे वर्षाया नामनी, तत्र—वृष्टिः स्त्री, वर्षं नपुंसकम् । [वर्षा के २ नाम] । (६) तस्या वृष्टेः—विघाते = अवरोधे—अवग्राहः—अवग्रहश्च—पुंसि । [वर्षा के रुकजाने के २ नाम] ।

(७) द्वे धारावर्षस्य नामनी पुंसि । [निरन्तर जलधारा गिरने के २ नाम] । (८) जलकणस्यैकं नाम । शीकरः सीकरोऽपि—पुंसि [जलकण या फुहारे के १ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]वर्षोपलस्तु करका, [2]मेघच्छन्नोऽह्नि दुर्दिनम् ।
[3]अन्तर्धा व्यवधा पुंसि त्वन्तर्द्विरपवारणम् ॥१२॥
अपिधान-तिरोधान-पिधाना-ऽऽच्छादनानि च ।
[4]हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ॥१३॥
विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः ।
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ॥१४॥
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ।
[5]कला तु षोडशो भागो, [6]बिम्बो स्त्री मण्डलं त्रिषु १५

---

(१) वर्षोपलस्य नामद्वयम् । ['ओला'-'पत्थर' के २ नाम] । तत्र—करका—स्त्रियां । 'करक' शब्दोऽप्यस्ति पुंलिङ्गः ।

(२) मेघान्धकारितदिनस्यैकं नाम क्लीबे । [दुर्दिन का १ नाम] । (३) अन्तर्धानस्याष्टौ नामानि । तत्र—अन्तर्धा—व्यवधा—शब्दौ—स्त्रियाम्, अन्तर्धिः—पुंसि । शेषा नपुंसकलिङ्गाः । [छिपने के ८ नाम] । (४) चन्द्रमसो विंशतिर्नामानि—पुंसि । तत्र—चन्द्रमश्शब्दः सान्तः । चन्द्रमाः, चन्द्रमसौ, चन्द्रमसः । ग्लौः, ग्लावौ, ग्लावः । [चन्द्रमा के २० नाम] । (५) चन्द्रषोडशांशस्यैकं नाम—स्त्रियाम् । [कला का १ नाम] । (६) द्वे रविचन्द्रबिम्बस्य । तत्र—बिम्बः—पुंनपुंसकयोः, मण्डलं विशेष्य-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]भित्तं शकल-खण्डे वा पुंस्यर्धोऽर्धं [2]समेऽन्यके ।
[3]चन्द्रिका कौमुदी ज्योत्स्ना, [4]प्रसादस्तु प्रसन्नता ।१६
[5]कलङ्काङ्कौ लाञ्छनञ्च चिह्नं लक्ष्म च लक्षणम् ।
[6]सुषमा परमा शोभा, [7]शोभा कान्तिर्द्युतिश्छविः१७

निघ्नं,–त्रिषु लिङ्गेषु ।

(१) खण्डस्य चत्वारि नामानि । तत्र—भित्तं नपुंसकं, शकल–खण्डशब्दौ–वा पुंसि=पुंनपुंसकयोः । वा पुंसीत्यर्द्धशब्देनापि सम्बध्यते । तेन पुंनपुंसकयोरितिलभ्यते । अर्द्ध शब्दः त्रिषु लिङ्गेषु–(विशेष्यनिघ्न) इति तु रामाश्रमः । [टुकड़ा के ४ नाम] ।

(२) समानांशवाची अर्धशब्दो–नित्यं क्लीबलिङ्गः । तुल्यस्य खण्डद्वयस्य मध्ये एकस्य खण्डस्यैकं नाम । [आधे टुकड़ेका १ नाम]

(३) त्रीणि ज्योत्स्नायाः नामानि । [चांदनी के ३ नाम] ।

(४) निर्मलताया द्वे नामनी । तत्र–प्रसादः पुंसि, प्रसन्नता स्त्रियाम् । [स्वच्छता, प्रसन्नता, निर्मलता के २ नाम] ।

(५) षट् चिह्नस्य नामानि । तत्र–कलङ्काङ्कौ–पुंसि, शेषाः क्लीबे । लक्ष्म नान्तं–क्लीबे । लक्ष्म लक्ष्मणी, लक्ष्माणि । [चिह्न के ६ नाम] ।

(६) उत्कृष्टशोभाया एकं नाम–स्त्रियाम् । [उत्कृष्टशोभा का १ नाम] । (७) शोभायाश्च चत्वारि नामानि–स्त्रियाम् । [शोभा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् ।
प्रालेयं मिहिका चाथ हिमानी[2] हिमसंहतिः ॥१८॥
शीतं [3]गुणे, [4]तद्वदर्थाः सुषीमः शिशिरो जडः ।
तुषारः शीतलः शीतो हिमः सप्ताऽन्यलिङ्गकाः ॥१९॥
[5]ध्रुव औत्तानपादिः [6]स्यादगस्त्यः कुम्भसम्भवः ।
मैत्रावरुणिरस्यैव[7] लोपामुद्रा सधर्मिणी ॥२०॥
[8]नक्षत्रमृक्षं भं तारा\तारकाऽप्युडु वा स्त्रियाम् ।

के ४ नाम] । (१) हिमस्य सप्त नामानि । [बर्फ-ओस के ७ नाम] । तत्र अवश्याय-तुषार-नीहाराः पुंसि, मिहिका स्त्रियां, शेषा नपुंसके । (२) हिमसमूहस्य द्वे नामनी । [हिमसमूह एवं बर्फ के ढोके के २ नाम] । (३) शैत्यस्य एकं नाम क्लीबे । ['ठंड' 'जाडे' के नाम] । (४) शीतलस्य वस्तुनः सप्त नामानि । अन्यलिङ्गा इमे । अर्थात्—त्रिषु लिङ्गेषु । (५) द्वे ध्रुवस्य नामनी-पुंसि । [ध्रुवजी के २ नाम] । (६) अगस्त्यस्य ऋषेस्त्रीणि नामानि पुंसि । [अगस्त्यजी के ३ नाम] ।

(७) अस्यैव = अगस्त्यस्यैव, सधर्मिणी = पत्नी । अगस्त्यपत्न्या नामद्वयं-स्त्रियाम् । [अगस्त्य की पत्नी के २ नाम] । (८) नक्षत्राणां षट् नामानि । तत्र तारा-स्त्रियां । 'तारका' शब्दः, 'उडु'-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]दाक्षायण्योऽश्विनीत्यादि तारा, [2]अश्वयुगश्विनी२१
[3]राधा विशाखा, [4]पुष्ये तु सिष्यतिष्यौ, [5]श्रविष्ठया ।
समा धनिष्ठा, [6]स्युः प्रोष्ठपदा भाद्रपदाः स्त्रियः२२
[7]मृगशीर्षं मृगशिरस्तस्मिन्नेवाऽऽग्रहायणी ।

शब्दश्च स्त्रियां, क्लीबे च, शेषा नपुंसके। तारकं, तारके, तारकाणि। तारका, तारके, तारकाः। उडुः, उडू, उडवः–मतिवत्। उडु, उडुनी, उडूनि–वारिवत्। [नक्षत्रों के ६ नाम]। (१) एकमश्विन्यादिसप्तविंशतिनक्षत्राणां नाम–स्त्रियाम्। [अश्विनी आदि २७ नक्षत्रों का १ नाम]। (२) द्वे अश्विन्या नामनी–स्त्रियाम्। अश्वयुक्, अश्वयुजौ, अश्वयुजः। (३) द्वे विशाखानामनी–स्त्रियाम्। [विशाखा के २ नाम]। (४) पुष्यनक्षत्रस्य त्रीणि–नामानि पुंसि। [पुष्य के ३ नाम]। (५) द्वे धनिष्ठानक्षत्रस्य नामनी–स्त्रियाम्। [धनिष्ठा नक्षत्र के २ नाम]। (६) द्वे पूर्वभद्रपदोत्तरभद्रपदयोर्नामनी–स्त्रियाम्। [पूर्वोत्तर भाद्रपदा के २ नाम]।

(७)मृगशिरोनक्षत्रस्य त्रीणि नामानि। तत्र–आग्रहायणी स्त्रियाम्। मृगशिरः,मृगशिरसी, मृगशिरांसि। मृगशीर्षं,मृगशीर्षे मृगशीर्षाणि। उभौ शब्दौ नपुंसके। 'मृगशिरः'शब्दं केचित्स्त्रियामप्याहुः। [मृगशिरा के ३ नाम]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]इल्वलास्तच्छिरोदेशे तारका निवसन्ति याः ॥२३॥
[2]बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः ।
जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः ॥२४॥
[3]शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः ।
[4]अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः ॥२५॥
[5]रौहिणेयो बुधः सौम्यः, [6]समौ सौरि-शनैश्चरौ ।
[7]तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः ॥२६॥
[8]सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः ।

---

(१) मृगशिरोनक्षत्रशिरोभागस्थितानां पञ्चानां स्वल्पतारकाणामेकं नाम-स्त्रियाम् । [मृगशिरनक्षत्र के अग्रभाग में स्थित ५ ताराओं का १ नाम] । (२) बृहस्पतेर्नव नामानि-पुंसि । [बृहस्पति के ९ नाम] । (३) षट् शुक्राचार्यस्य नामानि-पुंसि । [शुक्राचार्य के ६ नाम] । (४) मङ्गलस्य पञ्च नामानि पुंसि । [मङ्गल के ५ नाम] ।

(५) बुधस्य त्रीणि नामानि पुंसि । [बुध के ३ नाम] ।

(६) शनैश्चरस्य द्वे नामनी पुंसि । [शनिभगवान् के २ नाम] ।

(७) राहोः पञ्च नामानि । तत्र तमः सान्तं क्लीवे, शेषाः पुंसि । तमः, तमसो, तमांसि । [राहु के ५ नाम] ।

(८) सप्तर्षीणां नाम[illegible] । [सप्तर्षियों के २ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[[1]मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः ।
वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः] ॥
[2]राशीनामुदयो लग्नं, ते [3]तु मेषवृषादयः ॥२७॥
[4]सूर-सूर्या-ऽर्यमा-ऽऽदित्य-द्वादशात्म-दिवाकराः ।
भास्करा-ऽहस्कर-त्रध्न-प्रभाकर-विभाकराः ॥२८॥
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः ।
विकर्तना-ऽर्क-मार्तण्ड-मिहिरा-ऽरुण-पूषणः ॥२९॥
द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ।

---

(१) मरीच्यादीनामेकैकं नाम [सप्तर्षियों के १-१ नाम] ।

(२) मेषवृषादिराशीनामुदयस्य नामैकं पुंसि, क्लीबे च । [लग्न का १ नाम] ।

(३) 'मेषो वृषोऽथ मिथुनं कर्कटः सिंहकन्यके ।
तुला च वृश्चिको धन्वी मकरः कुम्भमीनकौ ।'
इति द्वादश राशयः । [बारह-राशियों के उदय का १ नाम] ।

(४) सूर्यस्य सप्तत्रिंशत्-(३७)-नामानि । प्रश्चितैः सप्तदशभिः सह तु (४५) नामानि । तत्र अर्यमा नान्तः ।—अर्यमा, अर्यमणौ, अर्यमणः । द्वादशात्मा, द्वादशात्मानौ । भास्वान्, भास्वन्तौ, भास्वन्तः । भास्वता । एवं विवस्वान् । नकारान्तः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः ॥३०॥
भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ।
[[1]पद्मिनीस्तेजसां राशिश्छायानाथस्तमिस्रहा ॥
कर्मसाक्षी जगच्चक्षुर्लोकबन्धुस्त्रयीतनुः ॥
प्रद्योतनो दिनमणिः सद्योतो लोकबान्धवः ।
इनो भगो धामनिधिश्शांशुमाल्यब्जिनीपतिः] ॥
[2]माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः॥३१॥
[3]सूरसूतोऽरुणोऽमूरुः काश्यपिर्गरुडाग्रजः ।

पूषञ्शब्दः—पूषा, पूषणौ । सवितृशब्दस्य—सविता, सवितारौ, सवितारः । सर्वे पुंसि । [सूर्य के ३७ नाम]

(१) सूर्यस्य १७ प्रक्षिप्तानि नामानि । [सूर्यके १७ प्रक्षिप्त नाम]

(२) सूर्यपार्श्ववर्त्तिनां प्रधानानां त्रयाणामेकैकं नाम । तदुक्तं क्षीरस्वामिना—

"तत्र शक्रो वामपार्श्वे दण्डाख्यो दण्डनायकः ।
वह्निश्च दक्षिणे पार्श्वे पिङ्गलो, वामनश्च सः ।
यमोऽपि दक्षिणे भागे भवेन्माठरसञ्ज्ञया ॥" इति ।

[सूर्य के पार्श्वचर अनुचरों का ११ नाम]

(३) सूर्यसारथेः [illegible] । [अरुण के ५ नाम]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]परिवेषस्तु परिधिरुपसूर्यकमण्डले ॥ ३२ ॥
[2]किरणो-स्र-मयूखा-ऽशु-गभस्ति-घृणि-रश्मयः ।
भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम् ॥३३॥
[3]स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः ।
रोचिः शोचिरुभे क्लीबे, [4]प्रकाशो द्योत आतपः॥३४॥

(१) चन्द्रसूर्ययोरुत्पातादिना जातस्य मण्डलस्य चत्वारि नामानि । तत्र परिधिपरिवेषौ पुंसि, इतरे क्लीबे । [सूर्य चन्द्रमा के चारों ओर होनेवाले मण्डल 'कुण्ड' व 'परिधि' आदि के ४ नाम]।

(२) किरणानां नामानि एकादश । तत्र मरीचिः—स्त्रीपुंसयोः । दीधितिः स्त्रियां । शेषाः शब्दाः—पुंसि । [किरणों के ११ नाम] ।

(३) प्रभाया एकादश नामानि । तत्र प्रभादिदीप्त्यन्ताः स्त्रियाम् । रोचिः—शोचिषी सान्ते नपुंसके । रुक्चान्तः । रुक्-रुग्, रुचौ, रुचः । रुचिशब्द इकारान्तः । रुचिः, रुची, रुचय इत्यादि-रूपाणि । त्विट् षान्तः स्त्रियाम्—त्विट्, त्विषौ, त्विषः । भाः, भासौ, भासः । अकारान्तोऽपि भाशब्दः—भाः, भे, भाः । यद्वा 'भा' शब्दः स्त्रियां—गोपावत् । रोचिः, रोचिषी, रोचींषि । एवं शोचिः । [प्रभा के ११ नाम] ।

(४) त्रीणि—आतपस्य पुंसि । ['घाम' 'धूप' 'तावडा' 'रौंदा']।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कोष्णं कवोष्णं मन्दोष्णं कदुष्णं, त्रिषु तद्वति ।
[2]तिग्मं तीक्ष्णं खरं [3]तद्वन्मृगतृष्णा मरीचिका ॥३५

❀ इति दिग्वर्गः ॥ ३ ॥ ❀

❀ अथ कालवर्गः ❀

[4]कालो दिष्टोऽप्यनेहाऽपि समयोऽप्यथ[5] पक्षतिः ।

---

(१) चत्वारि नामानि ईषदुष्णस्य । ['कुनकुना' 'निवाया'] एते शब्दा गुणे क्लीबाः, तद्वति = गुणिनि–ईषदुष्णे जलादौ त्रिलिङ्गाः । [विशेष्यलिङ्गाः] ।

(२) त्रीणि अत्युष्णस्य । तत्र तद्वदित्यस्य–गुणे क्लीबे, तद्वति द्रव्ये च त्रिषु लिङ्गेषु इत्यर्थः । 'तीक्ष्णोऽसि'रिति तूपचारादनुष्णेऽपि तत्सदृशे खड्गादौ प्रयोगो बोध्यः । (३) मृगतृष्णाया द्वे नामनी—स्त्रियाम् । [मृगतृष्णा के २ नाम] ।

❀ अथ कालवर्गः ❀

(४) समयस्य चत्वारि नामानि । तत्र अनेहः-शब्दः सान्तः । अनेहाः, अनेहसौ । कालादयः पुंसि । [समय के ४ नाम] ।

(५) प्रतिपदायास्तिथेर्द्वे नामनी स्त्रियाम् । प्रतिपत्, प्रतिपदौ । प्रतिपदान्तः स्त्रियाम् । ['प्रतिपदा' 'पडवा' 'एकम' के २ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतिपद् द्वे इमे स्त्रीत्वे, [1]तदाद्यास्तिथयो द्वयोः ॥१॥
[2]घस्रो दिनाऽहनी–वा तु क्लीबे दिवस-वासरौ ।
[3]प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि ॥ २ ॥
[[4]व्युष्टं विभातं द्वे क्लीबे, पुंसि गोसर्ग इष्यते] ।
प्रभातश्च, [5]दिनान्ते तु सायः, [6]सन्ध्या पितृप्रसूः ।

(१) ता प्रतिपत्–आद्या यासां ताः–तदाद्याः = प्रतिपद्–द्वितीया तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तम्यष्टमी-नवमीत्येवमादयः–'तिथय' इत्युच्यन्ते । तिथिशब्दः–द्वयोः = स्त्रीपुंसयोः । [तिथियों का १ नाम] । (२) दिनस्य पञ्च नामानि । तत्र–घस्रः पुंसि, दिनाऽहनी क्लीबे । दिवस–वासरौ वा क्लीबे = पुंसि, क्लीबे चेत्यर्थः । [दिन के ५ नाम] । (३) नव प्रभातस्य नामानि ['सबेरा' के ९ नाम] । तत्र प्रत्यूषशब्दोऽदन्तः पुंसि, क्लीबे च । शेषाः क्लीबे । उषः–प्रत्यूषश्शब्दौ सान्तौ । उषः, उषसी, उषांसि । एवं–प्रत्यूषः, प्रत्यूषसी । (४) तत्र प्रभातस्य व्युष्टादिनामत्रयं प्रक्षिप्तम् । ['भाख फटना' 'पौ फटना' 'तडकाऊ' सबेरा होने के ९ नाम] ।(५) दिनलमाप्तिसमयस्य नामैकं पुंसि । सायः सायौ, सायाः । 'साय'मिति मान्तमव्ययमपि वक्ष्यतेऽव्ययवर्गे । 'साय'मिति क्वचित्पाठः । [सायङ्काल का १ नाम] ।

(६) द्वे सन्ध्याकालस्य नामनी स्त्रियाम् । [सन्ध्याके२ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]प्राह्णा-ऽपराह्ण-मध्याह्नास्त्रिसन्ध्यमथ[2] वर्वरी ॥३॥
निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ।
विभावरी-तमस्विन्यौ रजनी यामिनी तमी ॥४॥
[3]तमिस्रा तामसी रात्रिर्ज्यौत्स्नी [4]चन्द्रिकयाऽन्विता ।
[5]आगामि-वर्तमानाऽहर्युक्तायां निशि पक्षिणी ॥ ५ ॥
[6]गणरात्रं निशा बह्व्यः, [7]प्रदोषो रजनीमुखम् ।

(१) दिनस्य पूर्वो भागः–प्राह्णः, अन्यो भागः–अपराह्णः मध्यो भागः–मध्याह्नः । एते च मिलिताः–'त्रिसन्ध्य'मित्युच्यन्ते । त्रिसन्ध्यशब्दः क्लीबे, स्त्रियाञ्च बोध्यः । तत्र—स्त्रियां–त्रिसन्ध्यी । [तीनो सन्ध्याओं के १-१ नाम] ।

(२) द्वादशं रात्रिनाम–स्त्रियाम् । [–रात्रि के १२ नाम] ।

(३) गाढाऽन्धकाराया रात्रेर्नामद्वयं स्त्रियाम् । [–अन्धियारी रात के २ नाम] ।

(४) चन्द्रिकाधवलाया रात्रेरेकं नाम [चाँदनी रात का १ नाम] । (५) आगामिवर्तमानदिनद्वयमध्यगताया रात्रेरेकं नाम स्त्रियाम् । [दो दिन और बीच की एक रात का नाम] । (६) रात्रिसमूहस्यैकं नाम–क्लीबे ।[बहुत रातों के समूह का १ नाम] । (७) द्वे प्रदोषस्य । तत्र–प्रदोषः पुंसि, रजनीमुखं क्लीबे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अर्धरात्र-निशीथौ द्वौ द्वौ [2]यामप्रहरौ समौ ॥६॥
[3]स पर्वसन्धिः प्रतिपत्पञ्चदश्योर्यदन्तरम् ।
[4]पक्षान्तौ पञ्चदश्यौ द्वे, [5]पौर्णमासी तु पूर्णिमा॥७॥
[6]कलाहीने सा-ऽनुमतिः; [7]पूर्णे राका निशाकरे ।
[8]अमावास्या त्वमावस्या दर्शः सूर्येन्दुसङ्गमः ॥८॥

[प्रदोष काल का २ नाम]। (१) अर्धरात्रस्य द्वे नामनी पुंसि। [आधी रात के २ नाम]।

(२) प्रहरस्य नामद्वयं पुंसि। [पहर ३ घण्टा का नाम]।

(३) पूर्णिमाप्रतिपदोः सन्धेर्नामैकम्। नामद्वयमिति तु प्राञ्चः। सन्धिः पुंसि। 'पर्वसन्धि'रित्येकमपि समुदितं नाम। (४) पक्षान्तस्य = अमावास्यायाः पूर्णिमायाश्च नामैकं पुंसि। [अमावस एवं पूनौ का १ नाम]। (५) पूर्णिमाया नामद्वयं स्त्रियाम्। [पुनवासी 'पुन्यूँ' के २ नाम]।

(६) एककलाहीनचन्द्रयुक्ता पूर्णिमा–अनुमतिः। चन्द्रोदयकाले हि प्रतिपद्योगादेककलाक्षयः। तत्र–अनुमतिशब्दः स्त्रीलिङ्गः। [प्रतिपदायुक्त पूर्णिमा का नाम]। (७) षोडशकलायुक्तपूर्णचन्द्रसहिता पूर्णिमा तु–'राका'। [पूर्णचन्द्रयुक्त पूर्णिमा का १ नाम]। (८) चत्वारि नामानि–अमावस्यायाः। तत्र आद्यौ शब्दौ स्त्रियाम्, अन्त्यौ पुंसि। [अमावस्या के ४ नाम]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]सा दृष्टेन्दुः सिनीवाली, [2]सा नष्टेन्दुकला कुहूः ।
[3]उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च ॥९॥
[4]सोपप्लवोपरक्तौ द्वावग्न्युत्पात[5] उपाहितः ।
[6]एकयोक्त्या पुष्पवन्तौ दिवाकर-निशाकरौ ॥१०॥

---

(१) चतुर्दशीयांगात् दृष्टचन्द्रा अमावस्या 'सिनीवाली'-त्युच्यते । [चन्द्रदर्शन युक्त अमावस्या का १ नाम] ।

(२) अदृष्टचन्द्राऽमावस्या 'कुहू'रित्युच्यते, सा स्त्रियाम् । [चन्द्रदर्शनरहित अमावस्या का १ नाम] ।

(३) द्वे नामनि चन्द्रसूर्यग्रहणस्य–पुंसि । [सूर्य चन्द्र ग्रहण के २ नाम] । (४) राहुणा ग्रस्तयोश्चन्द्रसूर्ययोर्नामद्वयं पुंसि । [राहु से ग्रस्त सूर्य और चन्द्रमा के २ नाम] ।

(५) अग्न्युत्पातस्य द्वे–पुंसि–नामनी । ['आग लगने' 'लाय लगने' के २ नाम] ।

(६) 'युगपदुच्यमानौ चन्द्रसूर्यौ–पुष्पवन्तौ । तत्र–तकारान्तः पुष्पवच्छब्दो नित्यं द्विवचनान्तः । अकारान्तोऽपि पुष्पवन्तशब्दो दृश्यते । एवं 'पुष्पदन्त'–शब्दोऽपि दृश्यते । 'रविशशिनौ पुष्पवन्ताख्यौ' इति नाममाला । 'पुष्पदन्तौ पुष्पवन्तावेकोक्त्या शशिभास्करौ' इति च हैमनाममालाकोशः । [सूर्यचन्द्रमा का मिलित १ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अष्टादश निमेषास्तु काष्ठा, [2]त्रिंशत्तु ताः कला ।
[3]तास्तु त्रिंशत्क्षणास्ते [4]तु मुहूर्तो द्वादशाऽस्त्रियाम् ११
ते [5]तु त्रिंशदहोरात्रः, [6]पक्षस्ते दश पञ्च च ।
[7]पक्षौ पूर्वाऽपरौ शुक्लकृष्णौ, [8]मासस्तु तावुभौ ॥१२॥

---

(१) अष्टादश निमेषाः—काष्ठा स्त्रियाम् । [काष्ठा = प्रायः $\frac{1}{4}$ सेकेंड । १८ निमेष अर्थात् १८ बार पलक गिरने के तुल्य-काल का नाम] ।

(२) त्रिंशत् ताः = काष्ठाः—एका कला-स्त्रियाम् । [२० विपल = ८ सेकेण्ड का नाम] । (३) त्रिंशत्कलाः—क्षणः पुंसि । [क्षण = १० पल, = ४ मिनट] (४) द्वादश क्षणाः—मुहूर्त्तः—पुंसि क्लीबे च । [मुहूर्त्त = २ घड़ी, = ४८ मिनट] ।

(५) त्रिंशन्मुहूर्त्तैरेकोऽहोरात्रो भवति । ['६० घड़ी' = २४ 'घण्टा'] तत्र—द्विघटिकात्मक एको मुहूर्त्तः ।षष्टिघटिकात्मकोऽहोरात्रः।

(६) पञ्चदश दिनानि-पक्षः-पुंसि । ['१५दिन''पखवारा']

(७) तत्र शुक्लपक्षः—'पूर्व' उच्यते । कृष्णपक्षः—'अपर' इत्युच्यते । [शुक्लपक्ष, कृष्णपक्ष का १—१ नाम] ।

(८) पक्षद्वयेन एको मासः । [३० दिन, एक महीना] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वौ द्वौ [1]मार्गादिमासौ स्याद्दतुस्तैरयनं त्रिभिः[2] ।
[3]अयने द्वे गतिरुदग्दक्षिणाऽर्कस्य वत्सरः ॥ १३ ॥
[4]समरात्रिन्दिवे काले विषुवद्विषुवश्च तत् ।
[पुष्पयुक्ता पौर्णमासी पौषी मासे तु यत्र सा ।
नाम्ना स पौषो, माघाद्याश्चैवमेकादशाऽपरे] ॥
[5]मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः॥१४॥
पौषे [6]तैष-सहस्यौ द्वौ, [7]तपा माघेऽथ[8] फाल्गुने ।

(१) मार्गशीर्षपौषादियुग्मैर्हेमन्तादयः षड् ऋतवो भवन्ति । तत्र ऋतुः पुंसि । [६ ऋतुओं का १ नाम] ।

(२) त्रिभिर्ऋतुभिः षड्भिर्मासैरेकमयनं,-क्लीबे । [अयन का १ नाम] । (३) तत्र सूर्यस्य उत्तरस्यां गमनम्-उत्तरायणं, दक्षिणस्यां गमनं—दक्षिणायनम् । द्वाभ्यामयनाभ्याञ्च—द्वादशभिर्मासैश्च—वत्सरः । [१ वर्ष का नाम] ।

(४) तुलामेषावच्छिन्नस्य समरात्रिन्दिवकालस्य नामद्वयं,-क्लीबे विषुवच्छब्दो पुंस्यपि दृश्यते । [विषुवत् के २ नाम] ।

(५) चत्वारि मार्गशीर्षस्य नामानि पुंसि । तत्र-सहाः-सान्तः । सहाः, सहसौ, सहसः । [मार्गशीर्ष के ४ नाम] । (६) त्रीणि पौषमासस्य नामानि पुंसि । [पौषमास के ३ नाम] । (७) द्वे माघमासस्य नामनी पुंसि । तत्र तपश्शब्दः सान्तः । तपाः तपसौ । [माघ के ३ नाम] । (८) त्रीणि फाल्गुनमासस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यात्तपस्यः फाल्गुनिकः, [1]स्याच्चैत्रे चैत्रिको मधुः।१५।
[2]वैशाखे माधवो राधो,ज्येष्ठे [3]शुक्रः, [4]शुचिस्त्वयम्।
आषाढे, [5]श्रावणे तु स्यान्नभाः श्रावणिकश्च सः ॥१६॥
[6]स्युर्नभस्यः प्रौष्ठपद-भाद्र-भाद्रपदाः समाः।
[7]स्यादाश्विन इषोऽप्याश्वयुजोऽपि स्यात्तु [8]कार्तिके १७
बाहुलोर्जौ कार्तिकिको, [9]हेमन्तः, [10]शिशिरोऽस्त्रियाम्।

पुंसि। [फाल्गुनके ३ नाम]।

(१) त्रीणि चैत्रस्य नामानि। [चैत के ३ नाम]।

(२) त्रीणि वैशाखस्य नामानि। [वैशाख के ३ नाम]।

(३) ज्येष्ठस्य द्वे नामनी। [ज्येष्ठ के २ नाम]।

(४) द्वे आषाढस्य। [आषाढ़ के २ नाम]।

(५) त्रीणि श्रावणस्य नामानि—पुंसि। तत्र—नभाः सान्तः पुंसि। नभाः, नभसौ। [श्रावण के ३ नाम]। (६) चत्वारि भाद्रपदमासस्य नामानि पुंसि। [भाद्रपद के ४ नाम]।

(७)त्रीणि आश्विनमासस्य नामानि पुंसि। [आश्विनके ३नाम]।

(८)चत्वारि कार्त्तिकस्य नामानि पुंसि।[कार्त्तिकके ४नाम]।

(९) मार्गशीर्षपौषाभ्यां हेमन्तऋतुः। [हेमन्तऋतु का १ नाम। (१०) माघफाल्गुनाभ्यां शिशिरः—पुंनपुंसकयोः। [शिशिरऋतु का १ नाम]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]वसन्ते पुष्पसमयः सुरभिर्ग्रीष्म[2] ऊष्मकः ॥१८॥
निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः ।
स्त्रियां [3]प्रावृट् स्त्रियां भूम्नि वर्षा, अथ [4]शरत्स्त्रियाम् ।
[5]षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् ।
[6]संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः ॥२०॥

---

(१) त्रीणि चैत्रवैशाखाभ्यां वसन्तर्त्तोः । [वसन्तऋतु का ३ नाम]। (२) ज्येष्ठाऽषाढाभ्यां ग्रीष्मस्य सष्ठ । तत्र तपशब्दोऽकारान्तः । [ग्रीष्मऋतु का ७ नाम]।

(३) श्रावणभाद्रपदाभ्यां वर्षाया द्वे । तत्र—प्रावृट् स्त्रियां षान्तः । वर्षाशब्दः स्त्रियां बहुवचनान्तः । [वर्षाऋतु का २ नाम]। (४) आश्विनकार्त्तिकाभ्यां शरद् एकम्—स्त्रियाम् । तत्र शरद्दान्तः । [शरदऋतु का १ नाम]।

(५) मार्गशीर्षादिमासयुगलैः क्रमाद्धेमन्ताद्या अमी ऋतवो भवन्ति । तत्र ऋतुशब्दः पुंसीत्यर्थः । [छै ऋतुओं का १ नाम]।

(६) षड् वर्षस्य नामानि । तत्र-हायनशब्दः-पुंनपुंसकः । शरद्-स्त्रियां दान्तः । समाशब्दः स्त्रियां नित्यं बहुवचनान्तः । [वर्ष के ६ नाम]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]मासेन स्यादहोरात्रः पैत्रो, [2]वर्षेण दैवतः ।
[3]दैवे युगसहस्रे द्वे ब्राह्मः, [4]कल्पौ तु तौ नृणाम् ॥२१॥
[5]मन्वन्तरन्तु दिव्यानां युगानामेकसप्ततिः ।
[6]संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ॥२२॥

---

(१) मनुष्याणामेकेन मासेन पितॄणामेकोऽहोरात्रः । [मानुष १ मास = पितृ १ दिनरात्रि] ।

(२) मनुष्याणां वर्षेणैको देवानामहोरात्रो भवति । [मानुष १ वर्ष = दैव १ अहोरात्र] ।

(३) देवानां द्वे युगसहस्रे,—ब्राह्मः-अहोरात्रो भवति । [मनुष्याणां ३६० वर्षैर्दैव एको वर्षः । दिव्यवर्षाणां १२०००द्वादशसाहस्र्या—मानुषं चतुर्युगं, तदेव देवानामेकं युगम् । ईदृशदेवयुगसहस्राभ्यां ब्राह्मोऽहोरात्र एकः] । [ब्रह्माके १ अहोरात्र का १ नाम]

(४) ब्रह्मणो दिनं नृणां स्थितिकालः, ब्रह्मणो रात्रिर्नृणां प्रलयकालः,—उभावपि [दिनं रात्रिश्च पृथक् पृथक्]'कल्प' पदवाच्ये । [कल्प का १ नाम] । (५) दिव्यानां युगानामेकसप्ततिर्मन्वन्तरं क्लीबे । [मन्वन्तर का १ नाम] ।

(६) पञ्च प्रलयस्य नामानि । [प्रलय के ५ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अस्त्री पङ्कं पुमान् पाप्मा पापं किल्बिष-कल्मषम् ।
कलुषं वृजिनैनोऽघमंहो दुरित-दुष्कृतम् ॥२३॥
[2]स्याद्धर्ममस्त्रियां पुण्य-श्रेयसी सुकृतं वृषः ।
[3]मुत्प्रीतिः प्रमदो हर्षः प्रमोदा-ऽऽमोद-संमदाः ॥२४॥
स्यादानन्दथुरानन्दः शर्म-शात-सुखानि च ।
[4]श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ॥२५॥
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् ।

---

(१) द्वादश पापस्य नामानि । तत्र पङ्कं पुंनपुंसकं, पाप्मा नान्तः पुंसि । शेषाः शब्दाः क्लीबे । अंहः, अंहसी, अंहांसि । [पाप के १२ नाम] ।

(२) पञ्च पुण्यस्य । तत्र धर्मः-अस्त्रियां=पुंनपुंसके । वृषः-पुंसि । शेषाः क्लीबे॥ श्रेयः श्रेयसी श्रेयांसि। [पुण्य के ५नाम]।

(३) द्वादश नामानि हर्षस्य । तत्र-मुत्प्रीती-स्त्रियाम् । तत्र मुच्छब्दो दान्तः । मुत्, मुदौ, मुदः । शर्म नान्तं क्लीबे । शातसुखे अपि क्लीबे, शेषाः पुंसि । [हर्ष के १२ नाम] ।

(४) श्वःश्रेयसादीनि द्वादश नामानि कल्याणस्य । तत्र क्षेमशस्ते-पुंनपुंसके । [कल्याण के १२ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शस्तं चाऽथ [1]त्रिषु द्रव्ये पापं पुण्यं सुखादि च ॥२६॥
[2]मतल्लिका मचर्चिका प्रकाण्डमुद्ध-तल्लजौ ।
[3]प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः ॥२७॥
[4]दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ।
[5]हेतुर्ना कारणं बीजं, [6]निदानं त्वादिकारणम् ॥२८॥

(१) पापपुण्यशब्दौ, सुखादयः शस्ताऽन्ताश्च शब्दा द्रव्ये = विशेष्ये, वर्त्तमानाः सन्तः–त्रिषु = विशेष्यलिङ्गाः। यथा–पापो जनः, पापा स्त्री, पापं कुलमित्यादि । [पापी आदि के नाम] ।

(२) अमूनि = मतल्लिकादीनि, प्रशस्तवाचकानि पञ्च नियत-लिङ्गानि । तत्र आद्ये द्वे स्त्रियामेव, प्रकाण्डं पुंनपुंसकयोः, उद्ध-तल्लजौ पुंस्येव । [प्रशस्त के ५ नाम] ।

(३) शुभप्रदो विधिः—अयः–पुंसि । [शुभप्रदविधि का १ नाम] ।

(४) प्राक्तनकर्मणः षड् नामानि । तत्र–विधिः पुंसि,नियतिः स्त्री । [भाग्य के ६ नाम] ।

(५) कारणस्य त्रीणि नामानि । तत्र–हेतुः पुंसि, बीजकारणे क्लीबे । [कारण के ३ नाम] ।

(६) आदिकारणम्–मुख्यं कारणं–निदानं–क्लीबे । [आदि-कारण का १ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]क्षेत्रज्ञ आत्मा पुरुषः, [2]प्रधानं प्रकृतिः स्त्रियाम् ।
[3]विशेषः कालिकोऽवस्था, [4]गुणाः सत्त्वं रजस्तमः २९
[5]जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ।
[6]प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ॥३०॥
[7]जातिर्जातश्च सामान्यं, [8]व्यक्तिस्तु पृथगात्मता ।

---

(१) त्रीणि आत्मनो नामानि । तत्र—आत्मन्शब्दो नान्तः । [आत्मा के ३ नाम] । (२) द्वे प्रकृतितत्त्वस्य मायाख्यस्य । तत्र प्रधानं-क्लीबे । प्रकृतिः-स्त्रियाम् । [माया, प्रकृति के २ नाम] । (३) कालकृतो विशेषः-अवस्था स्त्रियाम् । [अवस्था का १ नाम] । (४) सत्त्वं रजः तमश्च गुणाः । क्लीबे सत्त्वादयस्त्रयः । रजस्तमसी सान्ते क्लीबे । अदन्तौ रजतमशब्दावपि पुंसि दृश्येते । [गुणोंका नाम] । (५) षड् जन्मनो नामानि । तत्र-जनुः षान्तं क्लीबे, जन्म नान्तं क्लीबे । जनिरुत्पत्तिश्च स्त्रियाम् । अदन्तोऽपि जन्मशब्दः पुंसि । [जन्म नाम] ।

(६) षट् प्राणिनो नामानि । प्राणिजन्मिशरीरिणो नान्ताः, सर्वे च पुंसि । [प्राणी के ६ नाम] ।

(७) घटत्व-पटत्वादिजातेस्त्रीणि । तत्र जातिः स्त्रियां, जात-सामान्ये-क्लीबे । [जाति का ३ नाम] ।

(८) घटादिव्यक्तेर्द्वे नामनी स्त्रियाम् । [व्यक्ति का २ नाम]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥३१॥

* इति कालवर्गः ॥ ४ ॥ *

—:०:—

* अथ धीवर्गः *

[2]बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः ॥ १ ॥
[3]धीर्धारणावती मेधा, [4]सङ्कल्पः कर्म मानसम् ।
[[5]अवधानं समाधानं प्रणिधानन्तथैव च] ॥
[6]चित्ताऽऽभोगो मनस्कारश्चर्चा [7]सङ्ख्या विचारणा ॥२॥

---

(१) अष्टौ मनसः । तत्र—चेतोमनसी सान्ते क्लीबे । हृद्-दान्तं क्लीबम् । [मन के ८ नाम] ।

(२) चतुर्दश बुद्धेः स्त्रियाम् । तत्र चित्–तकारान्तः । संवित्प्रतिपदौ दान्ते स्त्रियाम् । [बुद्धि के १४ नाम] ।

(३) त्रीणि मेधायाः स्त्रियाम् । [मेधा के ३ नाम] ।

(४) एकं मनोव्यापारस्य–सङ्कल्पाख्यस्य । [सङ्कल्प का १ नाम]

(५) त्रीणि समाधानस्य । [सावधानता के ३ नाम] ।

(६) मनसा तदेकतानतया सुखाद्यनुभवस्य नामद्वयं पुंसि । [मानसप्रत्यक्ष का १ नाम] ।

(७) विचारस्य त्रीणि स्त्रियाम् । [विचार के ३ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[[1]विमर्शो भावना चैव वासना च निगद्यते] ॥
[2]अध्याहारस्तर्क ऊहो, [3]विचिकित्सा तु संशयः ।
सन्देह-द्वापरौ चाऽथ[4] समौ निर्णयनिश्चयौ ॥ ३ ॥
[5]मिथ्यादृष्टिर्नास्तिकता, [6]व्यापादो द्रोहचिन्तनम् ।
[7]समौ सिद्धान्तराद्धान्तौ, [8]भ्रान्तिर्मिथ्यामतिर्भ्रमः ।४।
[9]संविदागूः प्रतिज्ञानं नियमाऽऽश्रवसंश्रवाः ।

---

(१) वासनाया नामत्रयम् । [वासना का ३ नाम] ।

(२) तर्कस्य त्रीणि नामानि । [तर्कके ३ नाम] । (३) चत्वारि संशयज्ञानस्य । तत्र विचिकित्सा स्त्रियाम् । [संशयके ३ नाम] ।

(४) निश्चयज्ञानस्य नामद्वयं पुंसि । [निश्चय के २ नाम] ।

(५) नास्तिकताया नामद्वयं—स्त्रियाम् । [नास्तिकता के २ नाम] । (६) पराऽनिष्टचिन्तनस्य नामद्वयम् । [द्रोह करना] ।

(७) सिद्धान्तस्य नाम द्वयम् । [सिद्धान्तके २ नाम] । (८) त्रयं भ्रान्तिज्ञानस्य । भ्रमः पुंसि, शेषं स्त्रियाम् । [भ्रान्तिज्ञान के ३ नाम] । (९) अङ्गीकारस्य दश नामानि । तत्र प्रतिज्ञानं क्लीबे । संवित्—दान्ता स्त्रियाम् । एवम्-आगू रेफान्तः । आगूः, आगुरौ, आगुरः । यद्वा डूप्रत्ययान्तः 'आगू'-शब्दः । आगूः, आग्वौ, आग्वः, आगूम्, आग्वौ, आगूः-इति वधूशब्दवद्रूपाणि । यद्वा-आगूः,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्गीकाराऽभ्युपगमप्रतिश्रवसमाधयः ॥ ५ ॥
[1]मोक्षे धीर्ज्ञानमन्यत्र[2] विज्ञानं शिल्पशास्त्रयोः ।
[3]मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसाऽमृतम् ॥६॥
मोक्षोऽपवर्गोऽथा[4]ऽज्ञानमविद्याऽहंमतिः स्त्रियाम् ।
[5]रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी ॥ ७ ॥
गोचरा इन्द्रियार्थाश्च, [6]हृषीकं विषयीन्द्रियम् ।

आग्वौ, आग्वः, आग्वम्, आग्वौ, आग्वः—इति खलपूवद्रूपाणि । शेषाः पुंसि । [स्वीकार के १० नाम] ।

(१) मोक्षोपयोगिबुद्धेरेकं नाम क्लीबे । [मोक्षोपयोगी आत्मज्ञान का १ नाम] ।

(२) शिल्पकलादिबुद्धेरेकं—क्लीबे । [कला कौशल ज्ञान] ।

(३) अष्टौ मोक्षस्य नामानि । तत्र मुक्तिः—स्त्रियां मोक्षापवर्गौ—पुंसि । शेषं क्लीबे । श्रेयःशब्दः सान्तः क्लीबे [मोक्ष के ८ नाम] ।

(४) त्रीणि—अज्ञानस्य, अज्ञानं—क्लीबे, अविद्याऽहंमती—स्त्रियाम् । [अज्ञान के ३ नाम] ।

(५)रूपादिविषयाणां त्रीणि नामानि—पुंसि । [विषयके ३नाम]।

(६) त्रीणि नामानीन्द्रियाणां क्लीबे । [इन्द्रियोंके ३ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कर्मेन्द्रियं तु पाय्वादि, [2]मनोनेत्रादि धीन्द्रियम्॥८॥
[3]तुवरस्तु कषायोऽस्त्री, [4]मधुरो [5]लवणः [6]कटुः ।
[7]तिक्तोऽम्लश्च[8] रसाः[9] पुंसि, [10]तद्वत्सु षडमी त्रिषु ।९।
[11]विमर्दोत्थे परिमलो गन्धे जनमनोहरे ।

---

(१) एकं कर्मेन्द्रियाणाम् । तदुक्तं—"पायूपस्थे पाणिपादौ वाक्चेतीन्द्रियसङ्ग्रहः"—इति । [कर्मेन्द्रिय का १ नाम] ।

(२) एकं ज्ञानेन्द्रियाणाम् । तदुक्तं—"मनः कर्णौ तथा नेत्रं रसना च त्वचा सह । नासिका चेति षट् तानि धीन्द्रियाणि प्रचक्षते ॥" इति । [ज्ञानेन्द्रियों का १ नाम] ।

(३) द्वे कषायस्य । तत्र–कषायतुवरौ पुंनपुंसकयोः । (तूवरोऽपि, कूवरोऽपि च क्वचित्) । [कसैला रस, जैसे–हर्रे का] ।

(४) एकं मधुररसस्य ['मीठा' का १ नाम] ।

(५) एकं लवणरसस्य । ['निमकीन रस' का १ नाम] ।

(६)एकं–कटुरसस्य । ['कड़ुवा'रस–जैसे नीम में] । (७) एकं तिक्तरसस्य । ['तीता' जैसे–मिर्चों में] । (८) अम्लरसस्य['खट्टा'] । (९) रसाः पुंसि, मधुरादयोऽपि गुणमात्रवाचकाः पुंसि । [रसनाम] ।

(१०) षण्णां रसानां वाचकास्तुवरादयो यदा–तद्वद्द्रव्यबोधकास्तदा त्रिलिङ्गाः ।

(११) घर्षण-विमर्दाद्युद्भूतस्य मनोहरस्य गन्धस्य । ['इत्र'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]आमोदः सोऽतिनिर्हारी, [2]वाच्यलिङ्गत्वमागुणात् १०
[3]समाकर्षी तु निर्हारी, [4]सुरभिर्घ्राणतर्पणः ।
इष्टगन्धः सुगन्धिः [5]स्यादामोदी मुखवासनः ॥११॥
[6]पूतिगन्धस्तु दुर्गन्धो, [7]विस्रं स्यादामगन्धि यत् ।
[8]शुक्ल-शुभ्र-शुचि-श्वेत-विशद-श्वेत-पाण्डराः ॥१२॥
अवदातः सितो गौरोऽवलक्षो धवलोऽर्जुनः ।

---

(१) अत्यन्तमनोहरस्य परिमलस्यैकम् । ['रूह' बढ़िया इत्र] । (२) 'गुणे शुक्लादयः' इत्यतः प्राक् सर्वे वाच्यलिङ्गाः । [त्रिलिङ्गाः] बोध्याः । (३) दूरगामिगन्धस्य द्वे । उभे नान्ते पुंसि । [मनोहर गन्ध का २ नाम] ।

(४) शोभनस्य गन्धस्य चत्वारि नामानि—त्रिषु । [सुगन्ध के ४ नाम] (५) मुखवासनगुटिकादेर्नामद्वयम् ,त्रिषु । ['सुगन्ध' 'गुटिका' 'पान का मसाला' 'किमाम' आदि के २ नाम] ।

(६) द्वे दुर्गन्धस्य—त्रिषु लिङ्गेषु ['बदबू'] ।

(७) अपक्वमांसगन्धस्य द्वे–त्रिषु लिङ्गेषु । [कच्चे मांस की गन्ध] । शब्दार्णवे तु–''कस्तूरिकायामामोदः, कर्पूरे मुखवासनः । बकुले स्यात्परिमलश्चम्पके सुरभिस्तथा ॥' इति विशेषः ।

(८) त्रयोदश शुक्लवर्णस्य । सर्वे त्रिलिङ्गाः । ['सफेद रंग']।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस्तु [2]धूसरः ॥१३॥
[3]कृष्णे नीला-ऽसित-श्याम-काल-श्यामल-मेचकाः ।
[4]पीतो गौरो हरिद्राभः, [5]पालाशो हरितो हरित् ॥१४॥
[6]रोहितो लोहितो रक्तः, [7]शोणः कोकनदच्छविः ।
[8]अव्यक्तरागस्त्वरुणः, [9]श्वेतरक्तस्तु पाटलः ॥ १५ ॥

---

(१) ईषत्पीतस्य शुक्लस्य त्रीणि—त्रिषु लिङ्गेषु ।

(२) धूसरवर्णस्यैकं नाम—त्रिषु लिङ्गेषु । पाण्डुस्तु पीतभागार्धः केतकीधूलिसन्निभः । धूसरस्तु सितः पीतलेशवान्बकुलच्छविः ॥" इति शब्दार्णवः । (३) सप्त कृष्णस्य नामानि—त्रिषु लिङ्गेषु । शब्दार्णवस्तु 'मेचकः कृष्णनीलः स्यादतसीपुष्पसंनिभः ।' इति—कृष्ण—मेचकयोर्भेदमाह । [काला रंग के ७ नाम] ।

(४) त्रीणि पीतस्य हरिद्राभस्य, त्रिषु लिङ्गेषु । [पीला रंग]

(५) हरितवर्णस्य त्रीणि त्रिषु [हरा रङ्ग] ।

(६) रक्तवर्णस्य त्रीणि त्रिषु । ['लाल' 'सुर्ख रङ्ग'] ।

(७) अत्यन्तरक्तस्य रक्तोत्पलाभस्य द्वयम्—त्रिषु । ['गहरा-लाल' 'गुलाबी रङ्ग'] । (८) ईषद्रक्तस्य नामद्वयम्—त्रिषु । ['हल्का लाल'] । "अरुणः कृष्णलोहितः" इति परे । (९) श्वेतरक्तस्य नामद्वयं—त्रिषु ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]श्यावः स्यात्कपिशो, [2]धूम्र-धूमलौ कृष्णलोहिते ।
[3]कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ॥१६॥
[4]चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे ।
[5]गुणे शुक्लादयः पुंसि, गुणिलिङ्गास्तु तद्वति ॥१७॥

* इति धीवर्गः ॥ ५ ॥ *

---

(१) कृष्णपीतस्य नामद्वयं—त्रिषु । [बन्दर का-सा रङ्ग] ।

(२) धूमवर्णस्य—कृष्णलोहितस्य त्रीणि त्रिषु । ['धूमिल रङ्ग'] ।(३) कपिलवर्णस्य षट्—त्रिषु । [भूरा रङ्ग] । शब्दार्णवे तु—' सितपीतहरिद्रक्तः कडारस्तृणवह्निवत् । अयन्तूद्रिक्तपीताङ्गः कपिलो गोविभूषणः ॥ हरितांशेऽधिकेऽसौ तु पिशङ्गः पद्मधूलिवत् । पिशङ्गस्त्वसितावेशात्पिङ्गो दीपशिखादिषु । पिङ्गलस्तु परच्छायः पिङ्गः शुक्लाङ्गखण्डवत् ॥" इत्याह ।

(४) षट् विचित्रवर्णस्य, त्रिषु । ['चितकबरा'] ।

(५) विशेष्योपादाने—'शुक्लं रूपं'मित्यादौ—गुणवाचकाः शुक्लादयः विशेष्यनिघ्नाः । विशेष्यानुपादाने—गुणवाचकाः शुक्लादयः पुंस्येव । यथा 'पटस्य शुक्लः' इत्यादौ । द्रव्यवाचकाः शुक्लादयस्तु गुणिलिङ्गा एव, यथा—'शुक्ला शाटी' 'शुक्लं वस्त्रं', 'शुक्लः पटः' इति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ अथ शब्दादिवर्गः ❀

[1]ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।
[2]व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥१॥
[3]अपभ्रंशोऽपशब्दः स्याच्छास्त्रे [4]शब्दस्तु वाचकः ।
[5]तिङ्-सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ।

(१) सप्त सरस्वत्या नामानि स्त्रियाम् । वाक् वाचौ वाचः । [सरस्वती के ७ नाम]। (२) षड् भाषणस्य । तत्र-उक्तिः स्त्रियाम्, व्याहारः पुंसि, शेषाः-क्लीबे । वचः, वचसी, वचांसि। केचित्तु ब्राह्म्याद्यास्त्रयोदश भाषणस्यैव पर्याया इत्याहुः । [बोलने के ६ नाम]। (३) अपभ्रंशशब्दस्य नामद्वयं-पुंसि। [अपभ्रंश के २ नाम] । (४) शास्त्रे = व्याकरणादौ, यः-वाचकः = साधुः, स 'शब्द' इत्युच्यते । एकं वाचकस्य। [वाचक शब्द का १ नाम]।

(५) तिङन्तचयः-तिङन्तसमुदायः, सुबन्तचयः = सुबन्त समुदायश्च वाक्यम् । एवं—कारकान्वितक्रियाबोधकः सुबन्ततिङन्तचयोऽपि-वाक्यम् । तत्र तिङन्तचयः- पचति-भवति' । सुबन्तचयो यथा-'प्रकृतिसिद्धमिदं हि महात्मनाम्'-इत्यादि । कारकान्वित-क्रियाबोधकं-'देवदत्तः पचती' त्यादि । अन्ये तु-वाशब्दश्चेदर्थे, 'क्रिया चेत् कारकान्विता तदा सुप्तिङन्तचयो वाक्य'मित्यर्थमाहुः । एकं वाक्यस्य नामधेयम् । [वाक्य का लक्षण एव १ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]श्रुतिः स्त्री वेद आम्नायस्त्रयी, धर्मस्तु[2] तद्विधिः ।
[3]स्त्रियामृक्सामयजुषी इति [4]वेदास्त्रयस्त्रयी ॥ ३ ॥
[5]शिक्षेत्यादि [6]श्रुतेरङ्गमोङ्कारप्रणवौ समौ ।

---

(१) चत्वारि वेदस्य नामानि। तत्र-श्रुति-त्रयीशब्दौ स्त्रियाम्। आम्नायः—पुंसि। [वेद के ४ नाम]

(२) तेन = वेदेन, विधीयते योऽसौ विधिः = यागादिः—स 'धर्मः'। एकं वेदबोधितकर्मणः-पुंसि। केचित्तु—आम्नायान्तानि त्रीणि वेदस्य नामानि, 'त्रयीधर्म' इत्येकं पदम्, त्रय्या धर्मः-त्रयी-धर्म इति च विग्रहः, तान्त्रिकधर्मादिव्यावृत्तये च 'त्रयी'ति धर्म-विशेषणमित्याहुः। [वेदबोधित धर्म का नाम]।

(३) वेदत्रयस्य प्रत्येकं नामैकैकम्। तत्र ऋक्शब्दः-चान्तः स्त्रियाम्। साम-नान्तं क्लीबे। यजुः सान्तं-क्लीबे। [वेदों का१-१ नाम] ।(४) वेदत्रयस्यैकं नाम—स्त्रियाम्। [तीनों वेदों का १ नाम]।(५) शिक्षेत्यादि—श्रुतेः = वेदस्य—अङ्गम्। तदुक्तं—

"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः।
छन्दोविचितिरित्येतैः षडङ्गो वेद उच्यते ॥" इति।—

एकं वेदाङ्गस्य। [वेदाङ्ग का १ नाम]।

(६) द्वे—ॐ कारस्य पुंसि नामनी। [प्रणव के २ नाम]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]इतिहासः पुरावृत्तमुदात्ताद्यास्त्रयः[2] स्वराः ॥ ४ ॥
[3]आन्वीक्षिकी दण्डनीतिस्तर्कविद्याऽर्थशास्त्रयोः ।
[4]आख्यायिकोपलब्धार्था, [5]पुराणं पञ्चलक्षणम् ॥५॥
[6]प्रबन्धकल्पना कथा, [7]प्रवह्लिका प्रहेलिका ।

---

(१) द्वे—इतिहासस्य । तत्र—इतिहासः पुंसि, पुरावृत्तं—क्लीबे । [इतिहास के २ नाम] ।

(२) एकमुदात्तादिस्वराणां नाम । तदुक्तम्—

'उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।
चतुर्थः प्रचितो नोक्तो यतोऽसौ छान्दसः स्मृतः ॥'इति ।

(३) तर्कविद्या = न्यायशास्त्रम्—'आन्वीक्षिकी'त्युच्यते । अर्थशास्त्रं=कौटल्यादिप्रणीतं राजनीतिशास्त्रम्—'दण्डनीति'रित्युच्यते । उभयं—स्त्रियाम् । [तर्कविद्या] । (४) उपलब्धार्था= सत्यार्थविषयिणी कथा-आख्यायिका—स्त्रियाम् । ['सच्ची कहानी] ।

(५) एकं पुराणस्य । तस्य—पञ्च लक्षणानि, यथा—

"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥' इति ।

(६) कल्पनायाः = किञ्चित्सत्यार्थाया नाम—'कथा'—सा च स्त्रियाम् । कथा—कादम्बर्यादिः । ['कहानी', 'उपन्यास'] ।

(७) द्वे प्रहेलिकायाः—स्त्रियाम् ['पहेली' के २ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्मृतिस्तु धर्मसंहिता, [2]समाहृतिस्तु सङ्ग्रहः ॥६॥
[3]समस्या तु समासार्था, [4]किंवदन्ती जनश्रुतिः ।
[5]वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वयः[6] ॥७॥
आख्याह्वे अभिधानञ्च नामधेयं च नाम च ।

---

(१) मन्वादिधर्मशास्त्रस्य—द्वे—स्त्रियाम् । [धर्मशास्त्र के २ नाम] ।

(२) द्वे सङ्ग्रहस्य । तत्र समाहृतिः स्त्रियाम् । [संग्रह का २ नाम] ।

तदुक्तं—

"विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः ।
निबन्धो यः समासेन सङ्ग्रहं तं विदुर्बुधाः ॥" इति ।

(३) द्वे समस्यायाः—स्त्रियाम् । [समस्या के २ नाम] ।

(४) लोकप्रवादस्य द्वे—स्त्रियाम् । ['लोकप्रवाद' किंवदन्ती के २ नाम] ।

(५) चत्वारि समाचारस्य । तत्र—आद्यौ स्त्रियाम्, अन्त्यौ पुंसि । [हालचाल के ४ नाम] ।

(६) षट् नाम्नः । तत्र—आह्वयः—पुंसि, आख्याऽऽह्वे-स्त्रियाम्, शेषं क्लीबे । नाम, नामनी, नामानि । [नाम के ६ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]हूतिराकारणाऽऽह्वानं, [2]संहूतिर्बहुभिः कृता ॥ ८ ॥
[3]विवादो व्यवहारः [4]स्यादुपन्यासस्तु वाङ्मुखम् ।
[5]उपोद्घात उदाहारः, [6]शपनं शपथः पुमान् ॥९॥
[7]प्रश्नोऽनुयोगः पृच्छा च, [8]प्रतिवाक्योत्तरे समे ।
[9]मिथ्याभियोगोऽभ्याख्यानमथ [10]मिथ्याभिशंसनम् ॥
अभिशापः, [11]प्रणादस्तु शब्दः स्यादनुरागजः ।

---

(१) त्रीणि—आह्वानस्य । हूतिराकारणा च स्त्रियाम्, आह्वानं क्लीबे । ['बुलाना'] ।

(२) बहुकर्तृकाह्वानस्यैकं—स्त्रियाम् [अनेकों द्वारा बुलाना] ।

(३) ऋणादिविवादस्य द्वे-पुंसि । ['मुकद्दमा'] ।

(४) द्वे वचनारम्भस्य । [वचन का प्रारम्भ] ।

(५) वक्ष्यमाणार्थोपयोग्यर्थवर्णनस्य द्वे । प्रकृतोपपादकस्य दृष्टान्तादेरित्येके [भूमिका का २ नाम] ।

(६) द्वे शपथस्य-['सौगन्ध खाना'] ।

(७) त्रीणि प्रश्नस्य । तत्र पृच्छा स्त्रियाम् [पूछना] ।

(८) द्वे—उत्तरस्य—क्लीबे । [उत्तर के २ नाम] ।

(९) मिथ्याभियोगस्य द्वे ['झूठा मुकद्दमा'] । (१०) मिथ्यापवादस्य द्वे । ['झूठा कलङ्क'] । (११) अनुरागजशब्दस्यैकं-पुंसि, ['पुचकारना' 'सीत्कार करना'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]यशः कीर्तिः समज्ञा च, [2]स्तवः स्तोत्रं स्तुतिर्नुतिः ११
[3]आम्रेडितं द्विस्त्रिरुक्तमुच्चैर्घुष्टन्तु[4] घोषणा ।
[5]काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः १२
[6]अवर्णा-ऽऽक्षेप-निर्वाद-परीवादा-ऽपवादवत् ।
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे १३॥
[7]पारुष्यमतिवादः स्याद्भर्त्सनं त्वपकारगीः ।

---

(१) त्रीणि कीर्तेः—स्त्रियाम् [कीर्त्ति के ३ नाम] ।

(२) चत्वारि स्तुतेः । तत्र स्तुतिनुती स्त्रियौ । स्तवः–पुंसि । स्तोत्रं–क्लीबे । [स्तुति के ४ नाम] ।

(३) द्विरुक्तेर्नामद्वयम् । [द्विरुक्ति का २ नाम] ।

(४) द्वे घोषणायाः । तत्र–घोषणा–स्त्रियाम् । [घोषणा का २ नाम] ।

(५) भीतिशोकादिना विकृतस्य शब्दविशेषस्य नामैकं—स्त्रियाम् । [काकुका नाम] ।

(६) दश निन्दायाः । तत्राद्याः षट पुंसि, त्रयः शब्दाः स्त्रियां, गर्हणं–क्लीबे । [निन्दाका १० नाम]

(७) द्वे अप्रियवचनस्य । [कडुवा वचन] ।

(८) 'ताडयिष्यामी'त्यादिभयजनकवाक्यस्य द्वे ['झिड़कना'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणम् ॥१४॥
[2]तत्र त्वाक्षारणा-यः स्यादाक्रोशो मैथुनं प्रति ।
[3]स्यादाभाषणमालापः, [4]प्रलापोऽनर्थकं वचः ॥१५॥
[5]अनुलापो मुहुर्भाषा, विलापः[6] परिदेवनम् ।
विप्रलापो विरोधोक्तिः, संलापो [8]भाषणं मिथः ॥१६॥
[9]सुप्रलापः सुवचनमपलापस्तु [10]निह्नवः ।

---

(१) सनिन्दभाषणस्यैकम्, ।-यथा—'बन्धकीपुत्रस्य तवोचितमेत'दिति । ['आक्षेप वचन' गाली देना] ।

(२) भगिनीजनन्याद्यभिगम—(मैथुन) परकाक्रोशस्यैकं नाम । [मा बहिन आदि की बुरी गाली] ।

(३) द्वे सम्भाषणस्य नामनी । [सम्भाषण २ नाम] ।

(४) उन्मत्तादिप्रलपितस्यैकम् । [पागलकी बकबक] ।

(५) वारंवारं भाषणस्य द्वे । तत्र-मुहुर्भाषा-स्त्रियाम् । [बार बार बोलना] ।

(६) विलापस्य द्वे । [विलाप करना] ।

(७) द्वे परस्परविरुद्धवचनस्य । [परस्पर विरुद्ध वचन का नाम] । (८) परस्परं भाषणस्यैकम् । (९) द्वे शोभनवचनस्य । (१०) निह्नववचनस्य द्वे । ['मुकर-जाना']

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]संदेशवाग्वाचिकं स्याद्वाग्भेदास्तु [2] त्रिषूत्तरे ॥१७॥
[3]रुशती वाग्कल्याणी स्यात्कल्या[4]तु शुभात्मिका।
[5]अत्यर्थमधुरं सान्त्वं, सङ्गतं[6] हृदयङ्गमम् ॥ १८ ॥
निष्ठुरं[7] परुषं, [8]ग्राम्य मश्लीलं, [9]सूनृतं प्रिये।
सत्येऽथ[10] सङ्कुलक्लिष्टे परस्परपराहते ॥ १९॥
[11]लुप्तवर्णपदं ग्रस्तं, निरस्तं [12]त्वरितोदितम्।

(१) सन्देशवचनस्य द्वे। ['सन्देशा']।
(२) उत्तरे = रुशत्यादयो वाग्भेदाः त्रिषु लिङ्गेषु।
(३) अकल्याणवचनस्य द्वे। [तीखे, बुरे वचन]।
(४) शुभवचनस्य द्वे। त्रिषु लिङ्गेषु [अच्छा वचन]।
(५) एकं सान्त्ववचनस्य त्रिषु। ['ढाढस देना]।
(६) युक्तियुक्तस्य वचनस्य द्वे। त्रिषु लिङ्गेषु। [युक्तियुक्त वचन]। (७) कठोरवचनस्य द्वे त्रिषुलिङ्गेषु [कठोर वचन]।
(८) अश्लीलवचनस्य त्रिषु। [गाली गलौज आदि]।
(९) प्रियसत्यवचनस्य, त्रिषु। [मीठा, सच्चा वचन]।
(१०) विरुद्धार्थवचनस्य त्रीणि-त्रिषु। [शीघ्रोच्चारित एवं पराहत वचन]।
(११) लुप्तवर्णपदस्य वचसो द्वे-त्रिषु। [लुप्ताअक्षर वाक्य]।
(१२) शीघ्रोच्चारितवचसः त्रिषु। [जल्दी २ बोला हुआ वाक्य]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अम्बुकृतं सनिष्ठीवमवद्धं [2]स्यादनर्थकम् ॥२०॥
[3]अनक्षरमवाच्यं स्यादाहतं तु [4]मृषार्थकम् ।
[5]सोल्लुण्ठनं तु सोत्प्रासं, [6]मणितं रतिकूजितम् ॥
[7]श्राव्यं हृद्यं मनोहारि, [8]विस्पष्टं प्रकटोदितम् ।
[9]अथ म्लिष्टमविस्पष्टं, [10]वितथं त्वनृतं वचः ॥२२॥
[11]सत्यं तथ्यमृतं [12]सम्यगमूनि त्रिषु तद्वति ।

---

(१) सथूत्कारवचसः-एकम् । [थूक से भरे वचन] ।
(२) समुदायार्थशून्यस्य वचसो द्वे,-त्रिषु [निरर्थकवचन]
(३) निन्दावचनस्य द्वे,-त्रिषु । [निन्दावाक्य] ।
(४) मिथ्यावचनस्यैकं त्रिषु । [झूठे वचन] ।
(५) सोपहासवचनस्य द्वे-त्रिषु । [हँसी-दिल्लगी भरे वाक्य]।
(६) द्वे रतिसमयोत्थितकण्ठध्वनेः-त्रिषु । [सुरतध्वनि] ।
(७) हृद्यवचनस्य त्रीणि । [मनोहर वचन] ।
(८) द्वे विस्पष्टवचनस्य । [साफ शब्द] ।
(९) अस्पष्टवचनस्य द्वे-त्रिषु । [अस्पष्ट वचन] ।
(१०) द्वे असत्यवचनस्य [असत्य वचन] ।
(११) चत्वारि सत्यवचनस्य । 'त्रिषु' इति निवृत्तम् । [सत्य-वचन] ।
(१२) अमूनि सत्यादीनि चत्वारि-तद्वति = उपचारादिना सत्यादिगुणवति -पुरुषादौ-वर्त्तमानान्येव-त्रिषु लिङ्गेषु भवन्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]शब्दे निनाद-निनद-ध्वनि-ध्वान-रव-स्वनाः ॥२३॥
स्वान-निर्घोष-निर्ह्राद-नाद-निस्वान-निस्वनाः ।
आरवा-ऽऽराव-संराव-विरावा, [2]अथ मर्मरः ॥२४॥
स्वनिते वस्त्रपर्णानां, [3]भूषणानां तु शिञ्जितम् ।
[4]निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि ॥२५॥
वीणायाः क्वणिते प्रादेः प्रक्वाण-प्रक्वणादयः ।
[5]कोलाहलः कलकलस्तिरश्चां [6]वाशितं रुतम् ॥२६॥
स्त्री [7]प्रतिश्रुत्प्रतिध्वाने, गीतं [8]गानमिमे समे ।

* इति शब्दादिवर्गः ॥६॥ *

---

(१) सप्तदश शब्दस्य नामानि—पुंसि । [शब्द के १७ नाम] ।

(२) एकं वस्त्रपर्णध्वनेः—पुंसि । ['कपड़ोंकी फड़फड़ाहट पत्तों की चरमराहट'] ।

(३) एकं भूषणध्वनेः [गहनों की झनकार] ।

(४) सप्त वीणाध्वनेः । [बीन की तान] ।

(५) द्वे कोलाहलस्य । ['हल्ला'] ।

(६) एकं पक्षिध्वनेः [पक्षियों की आवाज] ।

(७) द्वे—प्रतिध्वनेः । तत्र प्रतिश्रुत्—स्त्रियाम् । ['गूंज'] ।

(८) गीतस्य द्वे—नपुंसके । [गीत का २ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ अथ नाट्यवर्गः ❀

[1]निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥१॥
[2]काकली तु कले सूक्ष्मे, [3]ध्वनौ तु मधुराऽस्फुटे ।
कलो, [4]मन्द्रस्तु गम्भीरे, [5]तारोऽत्युच्चैस्त्रयस्त्रिषु ।
[7]समन्वितलयस्त्वेकतालो, [8]वीणा तु वल्लकी ।

(१) सप्त स्वराणामेकैकम् । [सात स्वरों का ७ नाम]

(२) सूक्ष्मध्वनेरेकं–स्त्रियाम् । 'काकलि'रित्यपि । [महीन व मीठी आवाज का १ नाम] ।

(३) एकम् –अव्यक्तमधुरध्वनेः—त्रिषु । [अस्पष्ट मधुर ध्वनि का १ नाम] ।

(४) एकं–गम्भीरशब्दस्य, त्रिषु । [गम्भीर शब्द का १ नाम] ।

(५) एकम्–उच्चशब्दस्य–त्रिषु लिङ्गेषु । [तेज, ऊँचे शब्द का १ नाम] ।

(६) त्रयः = कल–मन्द्र-तारशब्दाः, त्रिषु = त्रिषु लिङ्गेषु भवन्ति । विशेष्यनिघ्ना इति यावत् ।

(७) एकं–गीतवाद्यलयसाम्यस्य । [समा बन्धना] ।

(८) त्रीणि—वीणायाः–स्त्रियाम् । ['वीन' के ३ नाम]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विपञ्ची, [1]सा तु तन्त्रीभिः सप्तभिः परिवादिनी ॥३॥
[2]ततं वीणादिकं वाद्यमानद्धं [3]मुरजादिकम् ।
[4]वंशादिकं तु सुषिरं, [5]कांस्यतालादिकं घनम् ॥४॥
[6]चतुर्विधमिदं वाद्यं वादित्राऽऽतोद्यनामकम् ।
[7]मृदङ्गा मुरजा, [8]भेदास्त्वङ्कचालिङ्गयोर्ध्वकास्त्रयः ॥५॥

(१) सप्ततन्त्रीयुताया वीणाया एकम् । [७ तार वाली वीणा 'सतार' का १ नाम] ।

(२) वीणादिवाद्यं—'तत'मित्युच्यते । [वीणा आदि वाद्य का नाम] ।

(३) मुरजादिवाद्यम्—'आनद्ध'मित्युच्यते । ['तबला' 'मृदङ्ग' आदि] ।

(४) वंशादिवाद्यस्यैकं—क्लीबे । ['वंशी' 'अलगोजा' आदि का नाम] ।

(५) एकं—कांस्यतालादेर्नाम—क्लीबे । ['मंजीरा' 'झांझ' आदि का नाम] ।

(६) त्रीणि चतुर्विधवाद्यमात्रस्य—क्लीबे । ['बाजा' मात्र के ३ नाम] ।

(७) द्वे मृदङ्गस्य । [मृदङ्ग के २ नाम] ।

(८) वाद्यभेदस्यैकैकम् । [नाना प्रकार के वाद्यों का नाम] । तदुक्तं—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्याद्यशःपटहो ढक्का, [2]भेरी स्त्री दुन्दुभिः पुमान् ।
[3]आनकः पटहोऽस्त्री [4]स्यात्कोणो वीणादिवादनम् ॥६॥
[5]वीणादण्डः प्रवालः [6]स्यात्ककुभस्तु प्रसेवकः ।
[7]कोलम्बकस्तु कायोऽस्या, [8]उपनाहो निबन्धनम् ॥७॥

"हरीतक्याकृतिस्त्वङ्क्यो, यवमध्यस्तयोर्ध्वकः ।
आलिङ्ग्यश्चैव गोपुच्छो, मध्यदक्षिणवामगाः ॥"

(१) द्वे यशःपटहस्य । ['डुगडुगी' के २ नाम] ।

(२) त्रीणि भेर्याः । तत्र— आनको दुन्दुभिश्च-पुंसि, भेरी-स्त्रियाम् । ['नगाडा' 'भेरी' के ३ नाम] ।

(३) द्वे पटहस्य । तत्र पटहः-पुंसि क्लीबे च । ['तासा' के ३ नाम] ।

(४) द्वे धनुराद्याकृतेर्वीणादिवादनसाधनस्य । ['सारंगी' 'रावणहत्था' आदि बजाने का धनुषाकार डण्डाके २ नाम] ।

(५) द्वे वीणादण्डस्य । [बीणा के लम्बे दण्ड के २नाम] ।

(६) वीणाऽधःस्थितचर्मनद्धदारुभाण्डस्य, वीणाप्रान्तस्थवक्रकाष्ठविशेषस्य वा-एकम् । [वीणाके नीचेके चौड़े भागका नाम] ।

(७) तन्त्रीहीनवीणाशरीरस्यैकं-पुंसि । ['विना तार चढ़ी वीणा'] ।

(८) तन्त्रीबन्धनाधारस्योर्ध्वभागस्यैकम् । [वीणा के तारों को बान्धने के उपरी भाग का नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]वाद्यप्रभेदा डमरु-मुड्डु-डिण्डिम-झर्झराः ।
मर्दलः पणवोऽन्ये च, [2]नर्तकी-लासिके समे ॥८॥
[3]विलम्बितं द्रुतं, मध्यं तत्त्वमोघो घनं क्रमात् ।
[4]तालः कालक्रियामानं, [5]लयः साम्यमथास्त्रियाम्॥९॥
[6]ताण्डवं नटनं नाट्यं लास्यं नृत्यञ्च नर्तने ।
[7]तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं द्वयम् ॥१०॥
[8]भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चति नर्तकः ।

---

(१) एकैकं—वाद्यविशेषाणाम् । ['डमरू' 'झाँझ' आदि के नाम] ।

(२) द्वे नर्त्तक्याः । ['नाचनेवाली' के २ नाम] ।

(३) विलम्बितनृत्यगीतवाद्यं—ततम् । द्रुतं—नृत्यगीतादि—ओघः । मध्यं नृत्यगीतादि—घनम्—इत्युच्यते ।

(४) एकं तालस्य । [ताल स्वर का नाम] ।

(५) गीततन्त्रीलयस्यैकम् । [लय का १ नाम] ।

(६) षट् नृत्यस्य । तत्र ताण्डवं पुंसि—क्लीबे च । ['नाचने' के ६ नाम] ।

(७) नृत्यगीतवाद्यस्य नामद्वयम् । [नाचना, गाना, बजाना के २ नाम] ।

(८) स्त्रीवेषधारिनर्त्तकस्य त्रीणि । [स्त्रीवेषधारी नर्तक के ३ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्त्रीवेषधारी पुरुषो, नाट्योक्तौ [1]गणिकाऽज्जुका ॥११॥
[2]भगिनीपतिरावुत्तो, [3]भावो विद्वानथाऽऽवुकः[4] ।
जनको, [5]युवराजस्तु कुमारो भर्तृदारकः ॥१२॥
[6]राजा भट्टारको देवस्तत्सुता [7]भर्तृदारिका ।
देवी [8]कृताभिषेकायामितरासु[9] तु भट्टिनी ॥१३॥

'नाट्योक्ता' वित्यधिकारः—आ अङ्कहारात् ।

(१) नाट्ये—उक्तौ—गणिका—'अज्जुका' ज्ञेया । [वेश्या का नाम] ।

(२) नाट्योक्तौ—भगिनीपतिः—'आवुत्तः—इत्युच्यते । ['जीजा' 'बहनोई' का नाम] ।

(३) नाट्ये—विद्वान् 'भाव'—इत्युच्यते । [विद्वान् का नाम] ।

(४) नाट्ये—पिता—'आवुक' इत्युच्यते । [पिता का नाम] ।

(५) नाट्ये—युवराजः—'भर्तृदारकः' 'कुमार' इति चोच्यते । [राजकुमार नाम] ।

(६) नाट्योक्तौ द्वे—राज्ञः । [राजा] ।

(७) नाट्योक्तौ—राजपुत्र्या एकम् । [राजकुमारी नाम] ।

(८) नाट्योक्तौ—राज्ञ्या एकम् । [पटरानी का नाम] ।

(९) नाट्योक्तौ अनभिषिक्तराजपत्नीनामेकम् । [राजपत्नी नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अब्रह्मण्यमवध्योक्तौ, [2]राजश्यालस्तु राष्ट्रियः ।
[3]अम्बा माताऽथ [4]बाला स्याद्वामूरार्यस्तु [5]मारिषः।१४।
[6]अत्तिका भगिनी ज्येष्ठा, [7]निष्ठा-निर्वहणे समे ।
[8]हण्डे-हञ्जे-हलाऽऽह्वाने नीचां चेटीं सखीं प्रति।।१५।।

(१) नाम्योक्तौ–'नाहं वध्यः' इत्यादि–प्रार्थनायाम्–'अब्रह्मण्य'-मिति । [दुहाई देना] ।

(२) एकं राजश्यालस्य—नाम्योक्तौ । [राजा के साले का नाम] ।

(३) एकं मातुः–नाम्योक्तौ । [माता का नाम] ।

(४) एकं कुमार्या बालिकाया–नाम्योक्तौ । [उद्भिन्नयौवन कुमारी का नाम] ।

(५) एकं मान्यस्य–नाम्योक्तौ । [मान्य का नाम] ।

(६) एकं ज्येष्ठभगिन्याः–नाम्योक्तौ । [बड़ी बहिन नाम] ।

(७) निर्वहणाख्यस्य सन्धेः द्वे–नाम्योक्तौ । तत्र निर्वहणं क्लीबे, निष्ठा–स्त्रियाम् । ['निबह जाना' 'पूरा होना'] ।

(८) नाटके–नीचां प्रत्याह्वाने–'हण्डे' इत्यव्ययम् । चेटीं प्रत्याह्वाने—'हञ्जे'–इत्यव्ययम् । सखीं प्रत्याह्वाने–'हला' इत्यव्ययम् । तत्र 'हला'शब्दः स्त्रीलिङ्गेऽपि । 'आह्वानम्' इति पाठान्तरम् । इतो 'नाम्योक्ता'विति निवृत्तम् । [मजूरनी, नौकरानी, नी आदिका पृथक् २ सम्बोधन] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अङ्गहारोऽङ्गविक्षेपो, [2]व्यञ्जकाऽभिनयौ समौ ।
[3]निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके ॥१६॥
[4]शृङ्गार-वीर-करुणा-ऽद्भुत-हास्य-भयानकाः ।
बीभत्स-रौद्रौ च रसाः, [5]शृङ्गारः शुचिरुज्ज्वलः ॥१७॥
[6]उत्साहवर्द्धनो वीरः, [7]कारुण्यं करुणा घृणा ।
कृपा दयाऽनुकम्पा स्यादनुक्रोशोऽप्यथो हसः ।१८।
हासो हास्यञ्च, [9]बीभत्सं विकृतं त्रिष्विदं द्वयम् ।

---

(१) अङ्गहारस्य नृत्यविशेषस्य द्वे । [थिरकने का नाम] ।

(२) मनोगतभावाभिव्यञ्जकस्य द्वे । [अभिनय नाम]

(३) अङ्गेन निष्पन्नं भ्रूविक्षेपादि–'आङ्गिकम्' । सत्त्वेन= मनोवृत्त्या–सम्पन्नं स्वेदरोमाञ्चादि—सात्त्विकम्–इत्युच्यते । द्वयमपि–त्रिषु लिङ्गेषु । [सात्त्विक आदि भावों के नाम]

(४) शृङ्गारादीनां नवानां रसानामेकैकम् । [नवरस नाम] ।

(५) त्रीणि शृङ्गारस्य । [शृङ्गाररस के ३ नाम] ।

(६) द्वे वीररसस्य । [वीररस के २ नाम] ।

(७) सप्त करुणरसस्य । [करुणरस के ७ नाम] ।

(८) त्रीणि हास्यरसस्य । [हास्यरस के ३ नाम] ।

(९) बीभत्सरसस्य द्वे–त्रिषु लिङ्गेषु । [बीभत्सरस नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]विस्मयोऽद्भुतमाश्चर्यं चित्रमप्यथ [2]भैरवम् ॥१९॥
दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ।
भयङ्करं प्रतिभयं, रौद्रं [3]तूग्रमसौ[4] त्रिषु-॥ २० ॥
चतुर्दश, [5]दरत्रासो भीतिर्भीः साध्वसं भयम् ।
[6]विकारो मानसो भावोऽनुभावो [7]भावबोधकः ॥२१॥
गर्वोऽभिमानोऽहङ्कारो, [8]मानश्चित्तसमुन्नतिः ।
[[10]दर्पोऽवलेपोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः] ॥

(१) चत्वार्यद्भुतरसस्य, त्रिषु । [अद्भुतरस के ४ नाम]
(२) नव भयानकरसस्य-क्लीबे । [भयानकरस नाम] ।
(३) द्वे रौद्ररसस्य । [रौद्ररस के २ नाम]
(४) अमी अद्भुताद्याश्चतुर्दश शब्दास्तद्वति वर्त्तमानास्त्रिषु ।
(५) षड् भयस्य । [भय के ६ नाम] ।
(६) एकं मनोविकारस्य । [मनो विकार का नाम]
(७) एकं रत्यादिसूचकरोमाञ्चादेः । [रोमाञ्चादि का नाम]
(८) त्रीणि-अहङ्कारस्य-पुंसि । [अभिमान के ३ नाम] ।
(९) द्वे मानस्य । केचित्तु-गर्वादयः पञ्च पर्याया इत्याहुः । [मान के २ नाम] ।
(१०) षट् दर्पस्य प्रक्षिप्तानि नामानि । [घमण्ड के ६ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अनादरः परिभवः परीभावस्तिरस्क्रिया ॥ २२ ॥
रीढा-ऽवमानना-ऽवज्ञा-ऽवहेलनमसूर्क्षणम् ।
[2]मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा, [3]साऽपत्रपाऽन्यतः ॥
[4]क्षान्तिस्तितिक्षाऽभिध्या [5] तु परस्वविषये स्पृहा ।
[6]अक्षान्तिरीर्ष्याऽसूया[7] तु दोषारोपो गुणेष्वपि ॥२४ ।
[8]वैरं विरोधो विद्वेषो, [9]मन्युशोकौ तु शुक् स्त्रियाम् ।
[10]पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि ॥ २५ ॥

---

(१) नव अनादरस्य । तत्र रीढादयः क्लीबे । ['अपमान'] ।
(२) पञ्च लज्जायाः-स्त्रियाम् । [लज्जा के ५ नाम]
(३) अन्यतः = गुरुजनादितो, लज्जायाः एकम् । [गुरुजन आदि से लज्जा] ।
(४) द्वे क्षमायाः । [क्षमा के २ नाम] ।
(५) परधनापहरणेच्छाया एकं, स्त्रियाम् । [दूसरे के धन आदि के लेने की इच्छा का १ नाम] ।
(६) द्वे परोत्कर्षाऽसहिष्णुतायाः । [ईर्ष्या का २ नाम] ।
(७) परगुणेषु दोषारोपणस्यैकं-स्त्रियाम् [असूया का नाम] ।
(८) त्रीणि वैरस्य । [वैर का ३ नाम] ।
(९) त्रीणि शोकस्य । तत्र शुक् चान्तः-स्त्रियाम् । [शोक के ३ नाम] ।
(१०) त्रीणि पश्चात्तापस्य । [पश्चात्ताप के ३ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कोप-क्रोधा-ऽमर्ष-रोष-प्रतिघा रुट्क्रुधौ स्त्रियौ ।
[2]शुचौ तु चरिते शीलमुन्मादश्चित्तविभ्रमः ॥२६॥
[4]प्रेमा ना प्रियता हार्दं प्रेम [5]स्नेहोऽथ दोहदम् ।
इच्छाकाङ्क्षास्पृहेहातृड्वाञ्छालिप्सामनोरथः ॥२७॥
कामोऽभिलाषस्तर्षश्च, सोऽत्यर्थं[3] लालसा द्वयोः ।
[7]उपाधिर्ना धर्मचिन्ता, [8]पुंस्याधिर्मानसी व्यथा ।२८।

---

(१) सप्त क्रोधस्य । तत्र रुट् षान्ता,–स्त्रियां । क्रुत्–धान्ता स्त्रियाम् । शेषाः शब्दाः पुंसि । [क्रोध के ७ नाम] ।

(२) शोभनस्य चरितस्यैकं क्लीबे । [शील, विनय आदि का नाम] ।

(३) चित्ताभ्रमस्य द्वे । [पागलपन, चित्तभ्रम] ।

(४) स्नेहस्य पञ्च । तत्र–प्रेमशब्दः पुंसि, क्लीबे च नान्तः । प्रियता–स्त्रियाम् । [स्नेह के ५ नाम] ।

(५) इच्छाया द्वादश । [इच्छा के १२ नाम] ।

(६) अतिप्रीतेरेकं—स्त्रीपुंसयोः । [उत्कट इच्छा नाम] ।

(७) धर्मचिन्ताया द्वे । तत्रोपाधिः–पुंसि । [धर्म की चिन्ता] ।

(८) मानसिकपीडाया एकम्,–पंसि । [मानसिक पीडा नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्यच्चिन्ता स्मृतिराध्यानमुत्कण्ठोत्कलिके[2] समे ।
[3]उत्साहोऽध्यवसायः स्यात्स वीर्यमतिशक्तिमाक् ॥
कपटोऽस्त्री व्याजदम्भोपधयश्छद्म कैतवे ।
कृसृतिर्निकृतिः शाठ्यं, [6]प्रमादोऽनवधानता॥३०॥
[7]कौतूहलं कौतुकञ्च कुतुकञ्च कुतूहलम् ।
[8]स्त्रीणां विलास-विब्बोक-विभ्रमा ललितन्तथा ।३१।

---

(१) त्रीणि स्मरणस्य । [स्मरण के ३ नाम] ।

(२) उत्कण्ठाया द्वे स्त्रियाम् [उत्कण्ठा के २ नाम] ।

(३) द्वे उत्साहस्य । [उत्साह के २ नाम] ।

(४) अत्यन्ताध्यवसायस्यैकं क्लीबे । [वीर्य एवं पराक्रम का नाम] ।

(५) नव कपटस्य । तत्र-कपटः पुंनपुंसकयोः । व्याजदम्भोपधयः-पुंसि । छद्म-नान्तं-क्लीबे । कैतवं क्लीबे । एवं शाठ्यम् । कृसृतिनिकृती-स्त्रियाम् । [कपट के ९ नाम] ।

(६) अनवधानताया द्वे [असावधानी के २ नाम] ।

(७) चत्वारि कौतुकस्य-क्लीबे । [कौतूहल के ४ नाम] ।

(८) शृङ्गारात् = रत्यादेः, भावात् = मनोविकाराच्च-जाताः प्रमदानां क्रियाः = चेष्टाः-विलासादिकाः षट्-हावपदवाच्या-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः ।
[1]द्रवकेलिपरीहासाः क्रीडा लीला च नर्म च ॥३२॥
[2]व्याजोऽपदेशो लक्ष्यञ्च, [3]क्रीडा खेला च कूर्दनम् ।
[4]घर्मो निदाघः स्वेदः [5]स्यात्प्रलयो नष्टचेष्टता ॥३३॥
[6]अवहित्थाऽऽकारगुप्तिः, [7]समौ संवेग-संभ्रमौ ।
[8]स्यादाच्छुरितकं हासः सोत्प्रासः, [9]स मनाक् स्मितम् ॥

इत्यर्थः । [हाव-भाव के ६ नाम] ।

(१) षट् क्रीडायाः । [खिलवाड़-उपहास] । तत्र नर्म-नान्तं नपुंसके । ['खेलना'] ।

(२) त्रीणि-व्याजस्य [['छल' 'बहाना'] ।

(३) कन्दुकादिक्रीडयाः त्रीणि । ['कूदना' गेन्द खेलना'] ।

(४) त्रीणि प्रस्वेदस्य । घर्मस्येत्येके । ['पसीना' आना । एवं 'घाम' 'तावडा'] ।

(५) द्वे मूर्छायाः [मूर्च्छा नाम] ।

(६) आकारगोपनस्य द्वे स्त्रियाम् । ['मनोभाव को छिपाना'] ।

(७) हर्षादिना कर्मसु संवेगस्य द्वे ['हडबडी' 'उतावलापन'] ।

(८) एकममर्षजनकहासस्य । ['कलेजे में चुभने वाला उपहास'] ।

(९) एकम्-ईषद्धासस्य-छीबे । ['मुसकराना'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]मध्यमः स्याद्विहसितं, [2]रोमाञ्चो रोमहर्षणम् ।
[3]क्रन्दितं रुदितं क्रुष्टं, [4]जृम्भस्तु त्रिषु जृम्भणम् ३५
[5]विप्रलम्भो विसंवादो, [6]रिङ्गणं स्खलनं समे ।
[7]स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ३६
[8]तन्द्री प्रमीला, [9]भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम् ।
[10]अदृष्टिः स्यादसौम्येऽक्ष्णि, [11]संसिद्धिप्रकृती त्विमे ॥

---

(१) मध्यमहासस्यैकम् । [मध्यम हंसी ।]।
(२) द्वे रोमाञ्चस्य । [रोमाञ्च के २ नाम] ।
(३) त्रीणि रोदनस्य । [रोने के ३ नाम] ।
(४) द्वे जृम्भणस्य, त्रिषु लिङ्गेषु। [जभाई लेनेके२ नाम]।
(५) वञ्चनस्य द्वे । [ठगने के २ नाम]
(६) पिच्छिलादौ पतनस्य द्वे, क्लीवे । [फिसलना]। बालानां हस्तपादगमनस्येत्येके । ['घिसकना'-'गोडालियाँ चलना'] ।
(७) पञ्च निद्रायाः । [सोने के ५ नाम] ।
(८) द्वे तन्द्रायाः, कायावसादस्य वा ['तन्द्रा' 'हरारत' 'थकावट'] ।
(९) क्रोधादिना ललाटसङ्कोचनस्य त्रीणि । ['भृकुटी चढ़ाना']।
(१०) एकं क्रूरदृष्टेः स्त्रियाम् । ['टेढ़ी नजर' क्रूर दृष्टि]।
(११) पञ्च स्वभावस्य । तत्र संसिद्धिप्रकृती-स्त्रियाम् । [स्वभाव के ५ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वरूपश्च स्वभावश्च निसर्गश्चाऽथ वेपथुः[1] ।
कम्पोऽथ [2]क्षण उद्धर्षो मह उद्धव उत्सवः ॥३८॥

❀ इति नाट्यवर्गः ॥ ७ ॥ ❀

—(✕)—

❀ अथ पातालभोगिवर्गः ❀

[3]अधोभुवन-पातालं बलिसद्म रसातलम् ।
नागलोकोऽथ [4]कुहरं शुषिरं विवरं बिलम् ॥१॥
छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः ।
[5]गर्त्ताऽवटौ भुवि श्वभ्रे, [6]सरन्ध्रे शुषिरं त्रिषु ॥२॥

---

(१) कम्पस्य द्वे। [कँपकँपी के २ नाम]।

(२) पञ्च उत्सवस्य । सर्वे पुंसि । ['जलसा' 'उत्सव' के ५ नाम]।

(३) पञ्च पातालस्य । तत्र—बलिसद्म नान्तं क्लीबे । नागलोकः पुंसि, शेषाः-क्लीबे । [पाताल के ५ नाम]।

(४) एकादश बिलस्य नामानि । तत्र वपा स्त्रियां, शुषिः-पुंनपुंसकयोरिकारान्तः । शेषं क्लीबे । [बिल के ११ नाम]।

(५) छिद्रमात्रस्य द्वे। 'भुविभवेश्वभ्रे—गर्त्ताऽवटौ'--इत्यन्वयः। [गड्ढे के २ नाम]।

(६) छिद्रान्वितस्यैकं—त्रिषु । [छेदवाली वस्तुका नाम]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ।
[2]ध्वान्ते गाढेऽन्धतमसं, [3]क्षीणेऽवतमसं तमः ॥३॥
[4]विष्वक् सन्तमसं, [5]नागाः काद्रवेयास्तदीश्वरः[6] ।
शेषोऽनन्तो, [7]वासुकिस्तु सर्पराजोऽथ[8] गोनसे ॥४॥
तिलित्सः [9]स्यादजगरे शमुर्वाहस इत्युभौ ।

---

(१) पञ्चान्धकारस्य । तत्राऽन्धकारः—पुंनपुंसकयोः, शेषं क्लीबे । तमःशब्दः सान्तः क्लीबे । [अन्धेरे के ५ नाम] ।

(२) घनान्धकारस्यैकं नाम-क्लीबे । [गहरे अन्धेरेका नाम]।

(३) क्षीणाऽन्धकारस्यैकं क्लीबे । [मामूली (थोड़े) अन्धेरे का नाम] ।

(४) विष्वक् = सर्वतः—व्याप्तस्य तमस एकम् । [चारों ओर फैले हुए अन्धेरे का नाम] ।

(५) देवयोनिविशेषाणां नागानां द्वे । [नाग के २ नाम]

(६) शेषनागस्य द्वे । [शेषनाग के २ नाम] ।

(७) वासुकिसर्पस्य द्वे नामनी । [वासुकि के २ नाम] ।

(८) तिलित्साख्यसर्पभेदस्य द्वे । [तिलित्स सर्पके २ नाम]।

(९) अजगरसर्पस्य—त्रीणि नामानि । [अजगर के ३ नाम]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अलगर्दो जलव्यालः, [2]समौ राजिल-डुण्डुभौ ॥५॥
[3]मालुधानो मातुलाहिर्निर्मुक्तो मुक्तकञ्चुकः ।
[5]सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः ॥६॥
आशीविषो विषधरश्चक्री व्यालः सरीसृपः ।
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ॥७॥
दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ।
उरगः पन्नगो भोगी जिह्मगः पवनाशनः ॥८॥
[लेलिहानो द्विरसनो गोकर्णः कञ्चुकी तथा ।
कुम्भीनसः फणधरो हरिर्भोगधरस्तथा] ॥

---

(१) जलसर्पस्य द्वे । [जलसर्प-डेड़हा डुण्डुभ के २ नाम]।
(२) द्विमुखसर्पस्य द्वे नामनी । [दुमुहा साँप के २ नाम]।
(३) द्वे चित्रवर्णाञ्चितसर्पस्य । ['चितकवरा साँप']।
(४) त्यक्तकञ्चुकस्य द्वे । [केचुली छोड़े हुए साँप के २ नाम]।
(५) प्रक्षिप्तैः सह त्रयस्त्रिंशत् (३३) सर्पनामानि । तत्र चक्रि–फणि–भोगि–कञ्चुकि–कुण्डलिनो नान्ताः पुंसि । गूढपात्–दकारान्तः । [illegible] । [साँप के ३३ नाम] ।

Mumukshu Bhawan Varanasi Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अहेः शरीरं भोगः स्यादाशीरप्यहिदंष्ट्रिका[2]]।
[3]त्रिष्वाहेयं विषाऽस्थ्यादि, [4]स्फटायां तु फणा द्वयोः।
[5]समौ कञ्चुक-निर्मोकौ, [6]क्ष्वेडस्तु गरलं विषम् ॥९॥
[7]पुंसि क्लीबे च काकोल-कालकूट-हलाहलाः।
सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः ॥१०॥
दारदो वत्सनाभश्च विषभेदा अमी नव।
[8]विषवैद्यो जाङ्गुलिको, [9]व्यालग्राह्यहितुण्डिकः ॥११॥

इति पातालभोगिवर्गः ॥ ८ ॥

---

(१) एकं सर्पशरीरस्य। [साँप के शरीर का नाम]।
(२) द्वे विषपर्णदंष्ट्रायाः। [सांप की विषैली दाढ़]।
(३) सर्पविषादेरेकं नाम,-त्रिषु लिङ्गेषु। [सांप के विष आदि का नाम]।
(४) द्वे फणायाः। [सर्प के फन का नाम]।
(५) द्वे सर्पत्वचः। ['सांप की केचुली का नाम]।
(६) त्रीणि सामान्यविषस्य। [विष के ३ नाम]।
(७) नवानां विषभेदानामेकैकम्। तत्र काकोल-कालकूट-हलाहलाः पुंसि क्लीबे च। [विषों के ९ भेद]।
(८) विषवैद्यस्य द्वे। ['गारुडी' 'ओझा']।
(९) द्वे सर्पग्राहिणः। ['संपेरा' 'कालबेलिया']।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ अथ नरकवर्गः ❀

[1]स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम् ।
[2]तद्भेदास्तपना-ऽवीचि-महारौरव-रौरवाः ॥ १ ॥
सङ्घातः कालसूत्रश्चेत्याद्याः, [3]सत्त्वास्तु नारकाः ।
[4]प्रेता वैतरणी सिन्धुः [5]स्यादलक्ष्मीस्तु निर्ऋतिः ॥२॥
[6]विष्टिराजूः, [7]कारणा तु यातना तीव्रवेदना ।

---

(१) चत्वारि नरकस्य । तत्र–दुर्गतिः–स्त्रियाम् । [नरक के ४ नाम]।

(२) नरकभेदानां प्रत्येकं पृथक् पृथक् । 'अवीचि'रिति च्छेदः । स च पुंसि । [नरक के भेद] ।

(३) नरकवासिनां जन्तूनां द्वे । [नारकीय जीवों के २ नाम] ।

(४) वैतरणीनद्या एकम् । [नरक की नदी वैतरणी का नाम] ।

(५) अलक्ष्म्या नामद्वयम् । [दुर्गति का २ नाम] ।

(६) द्वे–निर्मूल्यं कर्मकरणस्य ['बेगार'] । नरके हठात्प्रक्षेपस्येत्येके । [नरक में जबरदस्ती ढकेलना] । भद्राख्यकरणस्य इत्यन्ये । द्वयमपि स्त्रियाम् । आजूरूकारान्तः । [भद्रा का नाम] ।

(७) त्रीणि नरकयातनायाः । तीव्रवेदनामात्रस्येत्येके । [नरक की पीडा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]पीडा बाधा व्यथा दुःख[2]मामनस्यं प्रसूतिजम् ॥३॥
[3]स्यात्कष्टं कृच्छ्रमाभीलं, त्रिष्वेषां[4] भेद्यगामि यत् ।

❀ इति नरकवर्गः ॥ ९ ॥

❀ अथ वारिवर्गः ❀

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ।
उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः ॥१॥
रत्नाकरो जलनिधिर्यादःपतिरपाम्पतिः ।

(१) त्रीणि मनःपीडायाः । [मानसिक पीडा] ।

(२) प्रसूतिसमयवेदनाया द्वे । [प्रसव वेदनाके २ नाम] ।

(३) त्रीणि शारीरिककष्टस्य—क्लीबे । 'पीडेत्यारभ्य नवापि दुःखस्येत्येके । [कष्टके ३ नाम] ।

(४) एषां = दुःखादीनां मध्ये यद् भेद्यगामि = उपचारादिना द्रव्यवाचि, तत्–त्रिषु लिङ्गेषु बोध्यम् । यथा—दुःखा सेना, 'दुःखः पुत्रो मूर्खः' 'दुःखं दारिद्र्यम्' इत्यादि ।

(५) पञ्चदशं समुद्रस्य नामानि, तत्रोदन्वान्–तकारान्तः । उदन्वान्, उदन्वन्तौ, उदन्वन्तः, उदन्वता । एवं सरस्वानपि । सर्वे पुंसि । [समुद्र के १५ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्य प्रभेदाः [1]क्षीरोदो लवणोदस्तथाऽपरे ॥ २ ॥
[2]आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।
पयः कीलालममृतं जीवनं भुवनं वनम् ॥ ३ ॥
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् ॥ ४ ॥
मेघपुष्पं घनरसस्त्रिषु द्वे [3]आप्यमम्मयम् ।
[4]भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु ॥ ५ ॥

---

(१) समुद्रभेदानामेकैकम् । पुंसि । [समुद्रके भेद] ।

(२) जलस्य सप्तविंशतिः–(२७) । तत्र आप्शब्दः स्त्रियां बहुवचनान्तः,--आपः, अपः, अद्भिरित्यादि रूपाणि । 'वार्'शब्दो रान्तो नपुंसके । वाः, वारी, वारि । वारिशब्दस्य—वारि, वारिणी, वारीणि–इति रूपाणि । पयो-ऽम्भः–पाथो-ऽर्णःशब्दाः सान्ताः क्लीबे । घनरसः–पुंसि शेषाः क्लीबे । [जलके २७ नाम] ।

(३) जलविकारस्य द्वे,–त्रिषु । [जल के विकार के नाम] ।

(४) तरङ्गस्य चत्वारि । तत्र—भङ्गतरङ्गौ पुंसि । ऊर्मिवीचिशब्दौ स्त्रियां, पुंसि च । ['लहर' 'तरङ्ग'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]महत्स्वल्लोल-कल्लोलौ, [2]स्यादावर्त्तोऽम्भसां भ्रमः ।
[3]पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम् ॥६॥
[4]चक्राणि पुटभेदाः स्युर्भ्रमाश्च[5] जलनिर्गमाः ।
[6]कूलं रोधश्च तीरञ्च प्रतीरञ्च तटं त्रिषु ॥७॥

---

(१) महातरङ्गस्य द्वे-पुंसि । [ऊँची २ लहर] ।

(२) द्वे जलावर्त्तस्य । ['उखली'] । परावर्त्तं जलागमनस्य वा—['औढ़ा'-'धारा का घुमाव'] ।

(३) चत्वारि जलकणस्य । तत्र-पृषच्छब्दः क्लीबे । बिन्दुपृषतौ—पुंसि । विप्रुट् शब्दः—स्त्रियाम् । 'पृषत'शब्दोऽकारान्तोऽप्यस्ति पुंसि । [जल के कणों के ४ नाम] ।

(४) द्वे चक्राकारेण जलभ्रमणस्य । ['भंवर 'नांद' के २ नाम] ।

(५) द्वे जलनिस्सरणजालकस्य ['फुंहारा'] । केचित्तु—वर्षर्त्तौ नद्यादेरधोदेशस्थजलस्य वेगादुपरि निस्सरणस्येत्याहुः । ['पानी का उबाल'] । अन्ये तु—'चक्राणी'स्यारभ्यैतानि चत्वारि समानार्थानीत्याहुः ।

(६) पञ्च तीरस्य । तत्र तटं—त्रिषु लिङ्गेषु । शेषं क्लीबे । रोधः, रोधसी, रोधांसि । [तीर के ५ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]पाराऽवारे पराऽर्वाची तीरे, [2]पात्रं तदन्तरम् ।
[3]द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् ॥८॥
[4]तोयोत्थितं तत्पुलिनं, [5]सैकतं सिकतामयम् ।
[6]निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ ॥९॥
[7]जलोच्छ्वासाः परीवाहाः, [8]कूपकास्तु विदारकाः ।

(१) परतीरऽवरतीरयोः प्रत्येकमेकैकम् । तत्र परं–पारम्, अर्वाक्तीरम्—अवारं—क्लीबे [आरपार के नाम] ।

(२) तटमध्यवर्तिप्रवाहस्यैकम् (पात्रं=पाट) ['नदीकापाट'] ।

(३) द्वे द्वीपस्य । तत्र द्वीपमन्तरीपं च पुंनपुंसकम् । ['समुद्र आदिमें बीच के निकली हुई जमीन, द्वीप] ।

(४) जलादचिरनिर्गततटस्यैकं क्लीबे । [नदीगर्भ से निकला हुआ किनारा, 'पुलिन'] ।

(५) बालुकामयतटस्य क्लीबे । [नदी का बालु का मय तीर] ।

(६) पञ्च कर्दमस्य । तत्र पङ्कं—पुंनपुंसकम् । [कीचड़ 'दलदल के ५ नाम] ।

(७) द्वे प्रवृद्धजलनिस्सरणमार्गस्य । समधिकजलस्येतस्ततो निस्सरणस्य वा । [पानी निकलना या उसका मार्ग] ।

(८) शुष्कनद्यादौ जलार्थं कृतस्य गर्त्तस्य द्वे । [सूखी नदी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]नाव्यं त्रिलिङ्गं नौतार्ये, स्त्रियां [2]नौस्तरणिस्तरिः १०
उडुपं तु प्लवः कोलः, [4]स्रोतोऽम्बुसरणं स्वतः ।
आतरस्तरपण्यं [5]स्याद्द्रोणी काष्ठाम्बुवाहिनी ११
[7]सांयात्रिकः [8]पोतवणिक्कर्णधारस्तु नाविकः ।

के गर्भ में जल प्राप्त्यर्थ किए हुए गडहे]।

(१) नौतरणयोग्यजलस्य द्वे । नाव्यं त्रिषु । [नाव चलने योग्य जल]।

(२) त्रीणि नौकायाः । सर्वे शब्दाः स्त्रियाम् । [नाव के ३ नाम]।

(३) त्रीणि तृणकाष्ठादिनिर्मिततरणसाधनस्य नौकाविशेषस्य । [डोंगी]।

(४) अकृत्रिमजलप्रवाहस्यैकम् । सान्तः क्लीबे स्रोतःशब्दः । ['झरना' 'सोता']।

(५) नद्यादितरणे देयस्य शुल्कस्य द्वे । ['घटहा' 'राजकीय महसूल']।

(६) क्षेत्रादौ जलप्रक्षेपसाधननौकाविशेषस्य, काष्ठपाषाणादिनिर्मितजलपात्रस्य वा द्वे । स्त्रियाम् । ['कुण्डी' 'नांद' 'डोंगी']।

(७) द्वे समुद्रयातुर्वणिजः । वणिक्—जान्तः पुंसि । [समुद्रयात्री बनिया, 'पोतदार']।

(८) द्वे कर्णधारस्य । ['पतवरिया,'-'पतवार पकड़ने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]नियामकाः पोतवाहाः, [2]कूपको गुणवृक्षकः ॥१२॥
[3]नौकादण्डः क्षेपणी [4]स्यादरित्रं केनिपातकः ।
[5]अभ्रिः स्त्री काष्ठकुदालः, [6]सेकपात्रं तु सेचनम् १३
[7]क्लीबेऽर्धनावं नावोऽर्धेऽतीत[8]नौकेऽतिनु त्रिषु ।

वाला 'माझी']।

(१) द्वे--पोतवाहानाम् , ['सारङ्ग' 'खेवैया' 'मल्लाह']।

(२) द्वे--नौमध्यस्थरज्जुबन्धनदण्डस्य पुंसि। ['गुनरखा']। [नौबन्धकीलकस्य--'पाढी' इत्याख्यस्य--इत्यन्ये]।

(३) नौकाचालनदण्डद्वयस्य । तत्र 'क्षेपणी', 'क्षिपणी' वा स्त्रियाम् । ['डांडा']।

(४) द्वे—नौपृष्ठस्थचालनसाधनस्य । ['पतवार']।

(५) काष्ठनिर्मितकुदालस्य द्वे । [काठ की खनति]। तत्र—अभ्रिः स्त्री ।

(६) जलप्रक्षेपपात्रस्य द्वे ।['नाव से, 'पानी फेकने का तसला', 'डोलची']।

(७) एकं नौकाया अर्द्धभागस्य क्लीबे। [नाव का अर्द्धभाग]।

(८) नौकामतिक्रान्तस्यातिगम्भीरजलादेरेकं--त्रिषु । [नाव से भी अगम्य गम्भीर जल]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]त्रिष्वागाधात्प्र[2]सन्नोऽच्छः, कलुषोऽनच्छ[3] आविलः।
[4]निम्नं गभीरं गम्भीरमुत्तानं[5] तद्विपर्यये।
[6]अगाधमतलस्पर्शे, [7]कैवर्ते दाशधीवरौ ॥१५॥
[8]आनायः पुंसि जालं स्याच्छणसूत्रं[9] पवित्रकम्।
[10]मत्स्याधानी कुवेणी स्याद्बडिशं[11] मत्स्यवेधनम् १६

---

(१) गाधशब्दपर्यन्तं—'त्रिषु' इत्यधिक्रियते।

(२) द्वे स्वच्छस्य। 'त्रिषु'। [साफ जल आदि का २ नाम]।

(३) त्रीणि मलिनस्य—त्रिषु। [मलिन के ३ नाम]।

(४) त्रीणि गम्भीरस्य–'त्रिषु लिङ्गेषु'। [गहरे के ३ नाम]।

(५) उत्तानस्यैकं–त्रिषु—[छिछला पानी का १ नाम]।

(६) अगाधस्य द्वे—त्रिषु। ['बहुत गहरा']।

(७) धीवरस्य त्रीणि। दासो दन्त्यान्तोऽपि। ['धीमर' 'केवट' 'मल्लाह के ३ नाम]।

(८) द्वे जालस्य। तत्रानायः पुंसि। जालं-क्लीबे। ['जाल']।

(९) शणसूत्रस्य द्वे। ['सूतली-डोरी']।

(१०) द्वे मत्स्यस्थापनभाण्डस्य-स्त्रियाम्। [मछली रखने की झोली या डलिया]।

(११) मत्स्यवेधनकण्टकस्य द्वे। ['कांटा' 'वंशी' 'अंकुडा']

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः ।
विसारः शकुली चाऽथ [2]गडकः शकुलार्भकः ॥१७॥
[3]सहस्रदंष्ट्रः पाठीन, [4]उलूपी शिशुकः समौ ।
[5]नलमीनश्चिलिचिमः,प्रोष्ठी तु [6]शफरी द्वयोः १८
[7]क्षुद्राण्डमत्स्यसङ्घातः [8]पोताधानमथो झषाः— ।
रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ॥१९॥

---

(१) अष्टौ मत्स्यस्य । तत्र पृथुरोम-शकलिनौ नान्तौ । सर्वे पुंसि । [मछली के ८ नाम] ।

(२) मत्स्यविशेषस्य द्वे । ['मछली के बच्चे'] ।

(३) द्वे पाठीनस्य । [पाठी मछली नाम] ।

(४) द्वे शिशुकस्य । तत्रोलूपी-नान्तः पुंसि । ['सूइंस'] ।

(५) द्वे नलमीनस्य । [नलमीन] ।

(६) द्वे शफर्याः । तत्र प्रोष्ठी-स्त्रियां । शफरी-स्त्रीपुंसयोः । ['छोटी मछली'के नाम] ।

(७) अण्डादचिरनिर्गतमत्स्यसमूहस्य द्वे । [मछली के छोटे २ बच्चे] ।

(८) मत्स्यविशेषाणामेकैकम् । [रोहू आदि मछलियों के नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तिमिङ्गिलादयश्चाऽथ[1] यादांसि जलजन्तवः ।
[2]तद्भेदाः शिशुमारोद्रशङ्खो मकरादयः ॥२०॥
[3]स्यात्कुलीरः कर्कटकः, [4]कूर्मे कमठ-कच्छपौ ।
[5]ग्राहोऽवहारो, [6]नक्रस्तु कुम्भीरोऽथ [7]महीलता २१
गण्डूपदः किञ्चुलको, [8]निहाका गोधिका समे ।
[9]रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः २२

---

(१) द्वे मकरादिजलजन्तूनाम् । तत्र—यादः—सान्तं क्लीबे । [मगर मच्छ] ।

(२) जलजन्तुभेदानामेकैकम् ।

(३) द्वे कुलीरस्य ['केकड़ा'] ।

(४) त्रीणि कच्छपस्य पुंसि । [कछुवा] ।

(५) द्वे ग्राहस्य— ['घड़ियाल'] ।

(६) द्वे-नक्रस्य—['नाका'] ।

(७) त्रीणि गण्डूपदस्य ['केंचुवा'] ।

(८) द्वे गोधायाः स्त्रियाम् । ['गोह'] ।

(९) त्रीणि—['जोंक'] इति ख्यातायाः । तत्र—नित्यं बहुवचनान्तः स्त्रीलिङ्गो 'जलौकाः' शब्दः सान्तः । 'जलौका' शब्दः टाबन्तोपि । [जोंक के ३ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]मुक्तास्फोटःस्त्रियां शुक्तिः, [2]शङ्खःस्यात्कम्बुरस्त्रियाम्।
[3]क्षुद्रशङ्खाः शङ्खनकाः, [4]शम्बूका जलशुक्तयः ॥२३॥
भेके [5]मण्डूक-वर्षाभू-शालूर-प्लव-दर्दुराः।
[6]शिली गण्डूपदी, भेकी[7] वर्षाभ्वी, [8]कमठी डुलिः२४
[9]मद्गुरस्य प्रिया शृङ्गी, [10]दुर्नामा दीर्घकोशिका।

(१) द्वे शुक्तिकायाः। तत्र शुक्तिः स्त्रियाम्। ['मोती की सींपी']। (२) द्वे शङ्खस्य, पुंनपुंसकयोः। [शङ्ख के नाम]।

(३) क्षुद्रशङ्खानां द्वे-पुंसि। [छोटे २ शङ्खों का २ नाम]।

(४) जलशुक्तिमात्रस्य द्वे। तत्र शम्बूकः स्त्रीपुंसयोः जलशुक्तिः स्त्रियाम्। ['मोती न उपजाने वाली साधारण सीप']।

(५) षट्-मण्डूकस्य। [मेंढक]। (६) द्वे क्षुद्रकिञ्चुलक-भेदस्य [केंचुवा-विशेष]। किञ्चुलकभार्याया इत्यन्ये।

(७) भेक्या द्वे स्त्रियाम्। [मेंडकी]। (८) कच्छप्याः स्त्रियां द्वे। [कछुई]। (९) मद्गुरमत्स्यपत्न्या एकम्। [मद्गुरी]।

तथा च—भागुरिः—

'भार्या भेकस्य वर्षाभ्वी, शृङ्गी स्यान्मद्गुरस्य तु।
शिली गण्डूपदस्यापि, कच्छपस्य डुलिः स्मृता॥' इति।

(१०) जलौकासदृशजलजन्तुभेदस्य द्वे। तत्र—दुर्नामशब्दो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]जलाशयो जलाधारस्तत्रा[2]ऽगाधजलो ह्रदः ॥२५॥
[3]आहावस्तु निपानं स्यादुपकूपजलाशये ।
[4]पुंस्येवाऽन्धुः प्रहिः कूप उदपानन्तु पुंसि वा ॥२६॥
[5]नेमिस्त्रिकाऽस्य, [6]वीनाहो मुखबन्धनमस्य यत् ।
[7]पुष्करिण्यान्तु खातं [8]स्यादखातं देवखातकम् ॥२७॥

नान्तोऽपि, आकारान्तोऽपि च स्त्रियाम्। [जोंक की तरह के वर्षाती जीव विशेष के २ नाम]।

(१)द्वे जलाशयानां तडागादीनां पुंसि। [तालाब आदि के नाम]

(२) अगाधजलस्य तडागस्य एकं। [झील का नाम]।

(३) कूपसमीपरचितजलाशयस्य—द्वे । तत्र आहावः पुंसि, निपानं क्लीबे । ['कूपसमीपस्थ जलाधार' 'खेल' 'कोठा']।

(४) चत्वारि कूपस्य। तत्रोदपानं-पुंसि, क्लीबे च, शेषाः पुंस्येव । [कूवाँ]। (५) अस्य=कूपस्य, नेमिः-रज्जुधारणयन्त्रं-त्रिका। उभे स्त्रियाम्। ['भूण' 'गडारी']।

(६) कूपमुखे-इष्टकादिबद्धस्य भागस्यैकम्। [कूए के सोते का मुखबन्ध, एवं 'कूएं की जगत' 'ढाणा' 'वाळो']।

(७) चतुष्कोणखातस्य द्वे । तत्र पुष्करिणी स्त्रियाम्। ['दिग्घी' पुष्करिणी']। (८) अकृत्रिमजलाशयस्य द्वे। देवद्वारस्थजलाशयस्य वा। [अकृत्रिम जलाशय 'ताल']।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]पद्माकरस्तडागोऽस्त्री, [2]कासारः सरसी सरः ।
[3]वेशन्तः पल्वलं चाल्पसरो, [4]वापी तु दीर्घिका २८
खेयन्तु परिखाऽऽधारस्त्वम्भसां[6] यत्र धारणम् ।
[7]स्यादालवालमावालमावापोऽथ [8]नदी सरित्॥२९॥
तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी ।
स्रोतस्वती द्वीपवती स्रवन्ती निम्नगाऽऽपगा ॥३०॥
[कूलङ्कषा निर्झरिणी रोधोवक्रा सरस्वती] ।

---

(१) पद्मसहिताऽगाधजलाशयस्य द्वे । तत्र तडागोऽस्त्रियाम् । [कमल वाला गहरा तालाब] ।

(२) त्रीणि कृत्रिमपद्माकरस्य । सरोवरस्येत्येके ['झील'] । तत्र सरः क्लीबे । सरसी-स्त्रियाम् । (३) स्वल्पसरोवरस्य त्रीणि । पल्वलोऽस्त्री । अल्पसरः सान्तं क्लीबे । [छोटी तलाई] ।

(४) द्वे वाप्याः । ['बावड़ी' 'डिग्गी'] ।

(५) द्वे—दुर्गादिवेष्टनखातस्य ['खाई'] ।

(६) एकं जलाधारस्य । ['बान्ध'] ।

(७) वृक्षमूलकृतजलाधारस्य त्रीणि । ['थाल' 'सिंचाई का पानी ठहरनेके लिए पेड़की जड़ में बनाया गया गढा'] ।

(८) प्रक्षिप्तैः सह षोडश नद्याः । [नदी के १६ नाम] ।

Dr. Kamla Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ।
भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ॥३१॥
[2]कालिन्दी सूर्यतनया यमुना शमनस्वसा ।
[3]रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका ॥३२॥
[4]करतोया सदानीरा, [5]बाहुदा सैतवाहिनी ।
[6]शतद्रुस्तु शुतुद्रिः [7]स्याद्विपाशा तु विपाट् स्त्रियाम् ॥
[8]शोणो हिरण्यवाहः स्यात्कुल्याऽल्पा कृत्रिमा सरित् ।

---

(१) अष्टौ गङ्गायाः । [गङ्गाजी के ८ नाम] ।

(२) चत्वारि यमुनायाः । तत्र शमनस्वसृशब्द ऋकारान्तः स्त्रियाम् । [यमुनाजी के ४ नाम] ।

(३) चत्वारि नर्मदानद्याः । [नर्मदा नाम] ।

(४) करतोयानद्या द्वे । [करतोया नाम] ।

(५) बाहुदानद्या द्वे । [कार्त्तवीर्यार्जुन कृत बाणगङ्गा]

(६) 'शतलज'नामकनद्या द्वे—स्त्रियाम् । [सतलज] ।

(७) विपाशानद्या द्वे स्त्रियाम् । तत्र विपाट्शब्दः शान्तः स्त्रियाम् । ['व्यास नदी'] ।

(८) शोणनदस्य द्वे पुंसि । ['शोणभद्र' 'सोन'] ।

(९) याऽल्पा कृत्रिमा सरित् सा—कुल्या । ['नहर'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]शरावती वेत्रवती चन्द्रभागा सरस्वती ॥३४॥
कावेरी, सरितोऽन्याश्च, [2]सम्भेदः सिन्धुसङ्गमः ।
[3]द्वयोः प्रणाली पयसः पदव्यां, [4]त्रिषु तूत्तरौ३५
देविकायां सरय्वां च भवे दाविक-सारवौ ।
[5]सौगन्धिकं तु कह्लारं, [6]हल्लकं रक्तसन्ध्यकम्॥३६॥
[7]स्यादुत्पलं कुवलयमथ[8] नीलाम्बुजन्म च ।

(१) पञ्च नदीविशेषाणां नामानि । अन्याश्चेत्यस्य अन्या अपि चर्मण्वती-गोदावरीप्रभृतयो नद्यः सन्तीत्यर्थः । ['रावी' 'वेतवा' 'चिनाब' 'सरस्वती' 'कावेरी' के १-१ नाम] ।

(२) नदीसङ्गमस्य द्वे । [नदी सङ्गम के २ नाम] ।

(३) पयोनिर्गमनमार्गस्यैकं । तत्र प्रणालशब्दः स्त्रीपुंसयोः । ['पनाला'] ।

(४) उत्तरौ-दाविक-सारवशब्दौ-त्रिषु इत्यर्थः । देविकानदीभवस्यैकं नाम,—'दाविक' इति । सरयूनदीजातस्य चैकं नाम—'सारव' इति । इमौ शब्दौ त्रिषु ।

(५) सन्ध्याविकाशिनः शुक्लसरोजस्य द्वे—क्लीबे [श्वेत कमल] । (६) रक्तसरोजस्य द्वे [लाल कमल] ।

(७) द्वे कुमुदस्य—क्लीबे ['कोई'] ।

(८) द्वे नीलोत्पलस्य क्लीबे । ['नीलोफर'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इन्दीवरञ्च नीलेऽस्मिन्, सिते [1]कुमुद-कैरवे ॥३७॥
[2]शालूकमेषां कन्दः [3]स्याद्वारिपर्णी तु कुम्भिका ।
[4]जलनीली तु शैवालं शैवलोऽथ [5]कुमुद्वती ॥३८॥
कुमुदिन्यां, [6]नलिन्यान्तु बिसिनी-पद्मिनीमुखाः ।
वा पुंसि [7]पद्मं नलिनमरविन्दं महोत्पलम् ॥३९॥
सहस्रपत्त्रं कमलं शतपत्त्रं कुशेशयम् ।
पङ्केरुहं तामरसं सारसं सरसीरुहम् ॥ ४० ॥
बिस-प्रसून-राजीव-पुष्करा-ऽम्भोरुहाणि च ।

---

(१) श्वेतोत्पलस्य द्वे [श्वेत कमल]।

(२) उत्पलकन्दस्यैकं—नपुंसके । [उत्पल कन्द के नाम] ।

(३) जलकुम्भिकाया द्वे स्त्रियाम् । [जलकुम्भी नाम]।

(४) त्रीणि शैवालस्य । ['सिवाल', 'काई'] ।

(५) द्वे कुमुदिन्याः ['कुमुद की लता'] ।

(६) त्रीणि कमललतायाः स्त्रियाम् । सरोजिन्यादयोऽपि बोध्याः [कमल की लता] ।

(७) षोडश भूम्युत्पन्नकमलस्य । तत्र—कमलादयः शब्दाः पुंनपुंसकयोः । परन्तु क्लीबे एव प्रयुज्यन्ते, पुंसि त्वप्रयुक्ताः । [स्थल कमल के १६ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]पुण्डरीकं सिताम्भोजमथ [2]रक्तसरोरुहे--॥ ४१ ॥
रक्तोत्पलं कोकनदं, [3]नालो नालमथाऽस्त्रियाम् ।
[4]मृणालं [5]बिसमब्जादिकदम्बे षण्डमस्त्रियाम्॥४२॥
[6]करहाटः बिसकन्दः, [7]किञ्जल्कः केसरोऽस्त्रियाम् ॥
संवर्तिका[8] नवदलं, [9]बीजकोशो वराटकः ॥ ४३ ॥
इति वारिवर्गः ॥ १० ॥

---

(१) श्वेतकमलस्य द्वे । [श्वेत कमल]।

(२) त्रीणि रक्तकमलस्य । [लाल कमल]।

(३) द्वे पद्मादिदण्डस्य । 'नाला' इति टाबन्तः, नालीति च शब्दोपि क्वचित् ['कमल की नाल' 'दण्डी']।

(४) मृणालस्य द्वे पुंनपुंसकयोः । [मृणाल के २ नाम]।

(५) एकं कमलादिसमूहस्य क्लीबे, पुंसि च । [कमल समूह का नाम]।

(६) पद्मादिमूलस्य द्वे । [पद्म की जड़ का नाम]।

(७) पद्मादिकेसरस्य द्वे । तत्र केसरोऽस्त्रियाम् [पद्म केसर]।

(८) पद्मादीनां नवीनपत्राणां द्वे । तत्र संवर्त्तिका—स्त्रियाम्, केशरोऽपि । [पद्म आदिकी नई पत्ती]

(९) द्वे कमलादिबीजकोशस्य । ['कर्णिका'—कमल के बीजकोश-का नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]उक्तं स्वर्व्योम[2]-दि कालधी-[5]शब्दादि[6] सनाट्यकम्[7] ।
पातालभोगि नरकं[9] [10]वारि चैषाञ्च सङ्गतम् ॥ १ ॥
इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
स्वरादिकाण्डः प्रथमः साङ्ग एव [2]समर्थितः ॥ २ ॥

(१) स्वरादयो दश वर्गा उक्ताः । सङ्गतम् = एषां मध्ये प्रसङ्गादन्यदप्युक्तमित्यर्थः । यथा स्वर्गप्रक्रमे-देवाऽसुरादीनामुक्तिः ।

(२) समर्थितः = सम्यक् कथितः । परिपूर्ण इति यावत् ।

इत्यमरसिंहकृतौ नामलिङ्गानुशासने प्रथमं काण्डम् ।

वादिकुम्भीन्द्रपञ्चास्य-स्नेहिरामजिशास्त्रिणाम् ।
पौत्रेणाऽमरकोशस्य टिप्पणीयं समर्थिता ॥ १ ॥

❀ इति स्नेहिरामशास्त्रिणां पौत्रेण, न्यायाचार्य-श्रीशिवनारायणशास्त्रिणां पुत्रेण, श्रीगुरुप्रसादशास्त्रिणामनुजेन, कविचक्र-चक्रवर्त्तिना-ऽऽशुकविना, कैलासवासि-श्रीरघुनन्दनप्रसादशास्त्रिणा विरचितायाम्—अमरकोशटीकायां प्रथमं काण्डम् । ❀

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ श्रीः ❀

अथ

अमरकोशस्य

द्वितीयं काण्डम् ।

❀ अथ भूमिवर्गः ❀

[1]वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः ।
नृब्रह्मक्षत्रविट्शूद्रैः साङ्गोपाङ्गैरिहोदिताः ॥ १ ॥

—❀—

[2]भूर्भूमिरचलाऽनन्ता रसा विश्वम्भरा स्थिरा ।
धरा धरित्री धरणिः क्षोणिर्ज्या काश्यपी क्षितिः ॥२॥
सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा ।
गोत्रा कुः पृथिवी पृथ्वी क्ष्माऽवनिर्मेदिनी मही ॥३॥

---

(१) इह द्वितीयकाण्डे पृथिव्यादयो दश वर्गाः—साङ्गोपाङ्गैः—उदिताः = वक्तुमारब्धाः । भूम्यादीनाम्—अङ्गानि—मृदादीनि । उपाङ्गानि—ऊषरादीनि । एवं सर्वत्रोन्नेयम् ।

(२) सप्तविंशतिर्भूमेर्नामानि । विपुलादिभिः प्रक्षिप्तैरेकाद-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[विपुला गह्वरी धात्री गौरिला कुम्भिनी क्षमा ।
भूतधात्री रत्नगर्भा जगती सागराऽम्बरा] ॥
मृन्मृत्तिका, प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका ।
उर्वरा सर्वसस्याढ्या, स्यादूषः क्षारमृत्तिका ॥ ४ ॥
ऊषवानूषरो द्वावप्यन्यलिङ्गौ, स्थलं स्थली ।
समानौ मरुधन्वानौ, द्वे खिलाऽप्रहते समे ॥५॥

शमिस्तु सहाष्टात्रिंशन्नामानि—स्त्रियाम् । [पृथ्वी के ३८ नाम] ।

(१) द्वे मृदः—स्त्रियाम् । तत्र मृद्वान्ता । [मट्टी के २ नाम]।

(२) प्रशस्तमृत्तिकाया द्वे,—स्त्रियाम् । [साफ और चिकनी मिट्टी] ।

(३) सर्वसस्योत्पत्तियोग्यमृद एकम् । [उपजाऊ मट्टी एवं भूमि का नाम] ।

(४) द्वे क्षारमृत्तिकायाः । तत्र—ऊषः—पुंसि । [खारी मिट्टी] ।

(५) द्वे क्षारमृद्विशिष्टभूम्यादेः, त्रिषु लिङ्गेषु ।
[खारी मिट्टी वाली भूमि] ।

(६) द्वे स्थलस्य—अकृत्रिमस्थानस्य । [स्थल, वनस्थली] ।

(७) द्वे—मरुदेशस्य—पुंसि । तत्र धन्वा नान्तः । [मरुभूमि] ।

(८) अकृष्टस्य क्षेत्रादेः द्वे—त्रिषु । ['बिना जोती हुई भूमि']

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्रिष्वेथो जगती लोको विष्टपं भुवनं जगत् ।
[2]लोकोऽयं भारतं वर्षं, [3]शरावत्यास्तु योऽवधेः॥६॥
देशः प्राग्दक्षिणः प्राच्य, [4]उदीच्यः पश्चिमोत्तरः ।
प्रत्यन्तो म्लेच्छदेशः स्यान्मध्यदेशस्तु मध्यमः ॥७॥

---

(१) जगतः पञ्च । तत्र जगती स्त्रियां, जगत् क्लीबे ।[संसार के ५ नाम] ।

(२) भारतवर्षस्यैकं नाम क्लीबे । [हिन्दुस्थान का नाम] ।

(३) शरावत्याः–['राप्ती नदी गोरखपुर प्रदेश']–अवधेर्यः–प्राग्दक्षिणो–देशः–स प्राच्यः [पूर्व-दक्षिण प्रदेश का नाम] ।

(४) शरावत्या अवधेर्यः पश्चिमोत्तरो देशः स–उदीच्यः । [पश्चिमोत्तर प्रदेश] । (५) भारतसीमाप्रदेशस्य द्वयम् । [सीमाप्रान्त 'भूटान' आदि का नाम] ।

(६) प्रयाग-कुरुक्षेत्र-हिमव-द्विन्ध्य-मध्यस्थदेशस्य द्वे । [मध्यप्रदेश-यू०-पी० का नाम] तदुक्तम्—

"हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः ॥" इति ।

अत्र—विनशनं–कुरुक्षेत्रम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आर्यावर्त्तः पुण्यभूमिर्मध्यं विन्ध्यहिमाऽगयोः ।
नीवृज्जनपदो, देशविषयौ तूपवर्त्तनम् ॥ ८ ॥
त्रिष्वागोष्ठान्नडप्राये नड्वान्नड्वल इत्यपि ।
कुमुद्वान् कुमुदप्राये, वेतस्वान् बहुवेतसे ॥ ९ ॥
शाद्वलः शादहरिते, स-जम्बाले तु पङ्किलः ।

(१) हिमगिरि-विन्ध्यगिरिमध्यदेशस्य द्वे । 'हिमागयो'-रिति पाठे-हिमस्याऽगः-पर्वतः-हिमाग इति विग्रहः । 'हिमालयो'रिति पाठेऽपि—हिमेनाऽल्यते—भूष्यते—इति हिमालः = हिमालय इत्यर्थः । [आर्यावर्त्त प्रदेश] ।

(२) जनपदस्य द्वे । तत्र नीवृत्स्त्रियाम् । ['जिला' 'राष्ट्र'] ।

(३) वङ्गादिदेशस्य त्रीणि । [प्रान्त-देश-का नाम] । इमे पञ्चैकार्था इत्येके । अत ऊर्ध्वं गोष्ठशब्दपर्यन्तं शब्दास्त्रिषु ज्ञेयाः ।

(४) द्वे नडबहुलप्रदेशस्य-त्रिषु [सरपत-नरसल बहुल प्रदेश] । (५) कुमुदबहुलदेशस्यैकं-त्रिषु [कुमुदबहुल भूमि] ।

(६) वेतसबहुलदेशस्यैकं-त्रिषु [वेतबहुल भूमि] ।

(७) नवतृणप्रचुरदेशस्यैकं-त्रिषु । [हरी २ घास से सुशोभित प्रदेश] । (८) कर्दमयुक्तप्रदेशस्यैकं-त्रिषु । [कीचड़-एवं दलदल वाला प्रदेश] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः ॥ १० ॥
स्त्री शर्करा शर्करिलः, शार्करः शर्करावति ।
देश एवादिमावेवमुन्नेयाः सिकतावति ॥ ११ ॥
देशो नद्यम्बुवृष्ट्यम्बुसम्पन्नव्रीहिपालितः ।
स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ॥ १२ ॥

---

(१) जलबहुलदेशस्य द्वे–त्रिषु । [जल बहुल देश—जैसे बंगाल आदि—का नाम]।

(२) तथाविधः=अनूपसदृशो नद्यादेः समीपस्थः प्रदेशः 'कच्छ' इत्युच्यते । स च—पुंसि [कच्छ]।

(३) शर्करा–(कंकरी)-युक्तदेशस्य द्वे । तत्र शर्करा स्त्रियाम् । [कंकरीली भूमि]।

(४) शर्करा–(कंकड़ी) युक्तवस्तुमात्रस्य द्वे ।

(५) आदिमौ–शर्कराशर्करिलौ–देश एवेत्यर्थः ।

(६) एवं सिकता [=बालुका]–वति देशे सिकता–सिकतिलौ द्वौ । तत्र सिकता स्त्रियाम् । सिकता–[बालुका]–वति वस्तुमात्रे–सैकतः सिकतावानित्युच्यते । [बलुई जमीन]।

(७) नदीजलनिष्पन्नव्रीहिपालितो देशः—'नदीमातृकः' इत्युच्यते । एवं वृष्ट्यम्बुनिष्पन्नव्रीहिपालितो–देशः–'देवमातृकः' इत्युच्यते । तौ च–त्रिषु । [नहर से और बर्षा से सींचे जाने-वाली भूमि व प्रदेश]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुराज्ञि देशे राजन्वान् स्यात्ततोऽन्यत्र राजवान् ।
गोष्ठं गोस्थानकं, तत्तु गौष्ठीनं भूतपूर्वकम् ॥१३॥
पर्यन्तभूः परिसरः, सेतुरालौ स्त्रियां पुमान् ।
वामलूरश्च नाकुश्च वल्मीकं पुन्नपुंसकम् ॥ १४ ॥
अयनं वर्त्म मार्गा-ऽध्व-पन्थानः पद्वी सृतिः ।
सरणिः पद्धतिः पद्या वर्तन्येकपदीति च ॥१५॥

(१) श्रेष्ठराजयुक्तदेशादेरेकं—त्रिषु । [सुराजा से सुशासित देश] । (२) साधारण दुष्टराजयुक्तदेशादेरेक—त्रिषु ।

(३) द्वे—गोष्ठस्य ['गौ का ठाण'] ।

(४) भूतपूर्वगोष्ठस्यैकम् [जहाँ कभी गौ आदि बँधती थी, उस जगह का नाम] । (५) द्वे ग्रामनगरनद्यादिसमीपभूमेः ।

(६) सस्यार्थजलधारणस्य सेतोर्द्वे । तत्राऽऽलिः स्त्रियां, सेतुः—पुंसि । ['जल बहने की नाली' 'पुलिया'] । तरणसाधनस्य तु—'सङ्क्रमो दुर्गसञ्चरः' इत्यमरमालोक्तं नामद्वयम् । [पार उतरने के पुल के २ नाम—सङ्क्रम और दुर्गसञ्चर] ।

(७) पिपीलिकादिनिष्कासितमृत्पुञ्जस्य त्रीणि । तत्र वल्मीकं पुन्नपुंसकं, शेषौ—पुंसि । [दीमक व चींटी आदि का ढूह] ।

(८) द्वादश मार्गस्य ['रास्ता'] । तत्र वर्त्म नान्त क्लीबे । वर्त्म, वर्त्मनी, वर्त्मानि । अध्वा—नान्तः पुंस । पथिशब्दोऽपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतिपन्थाः सुपन्थाश्च सत्पथश्चाऽर्चितेऽध्वनि ।
व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः॥१६॥
अपन्थास्त्वपथं तुल्ये, शृङ्गाटक-चतुष्पथे ।
प्रान्तरं दूरशून्योऽध्वा, कान्तारं वर्त्म दुर्गमम् ॥१७॥
गव्यूतिः स्त्री कोशयुगं, नल्वः किष्कुचतुःशतम् ।

नान्तः पुंसि । पन्थाः, पन्थानौ, पन्थानः । पथः, पथिभ्यामित्यादि । पदव्यादयः-स्त्रियाम् । (१) शोभनमार्गस्य त्रीणि-पुंसि । तत्रातिपथिसुपथिशब्दौ नान्तौ । [बढ़िया साफ रास्ता] ।

(२) दुष्टस्य मार्गस्य पञ्च पुंसि । तत्र कदध्वशब्दो नान्तः । [बीहड रास्ता] । (३) मार्गाऽभावस्य द्वे । तत्र अपथिशब्दो नान्तः पुंसि, अपथं-नपुंसकम् । [रास्ते का न होना, 'जहाँ रास्ता ही न हो'] । (४) द्वे चतुष्पथस्य क्लीबे—['चौराहा'] ।

(५) एकं छायादिशून्यनिर्जलदूरदेशस्य,-क्लीबे ['वियावान जङ्गल' बीहड़ रास्ता] । (६) दुर्गममार्गस्यैकं—नपुंसके । [दुर्गम बीहड़ रास्ता] । (७) क्रोशद्वयस्य द्वे । तत्र गव्यूतिः स्त्री । [दो कोश का नाम] । (८) किष्कूणां = हस्तानां-चतुश्शतस्यैकं पुंसि । [४०० हाथ जमीन का नाम-१ नल्व] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घण्टापथः संसरणं, तत्पुरस्योपनिष्करम् ॥१८॥
[द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी ।
दिवस्पृथिव्यौ, गङ्गा तु रुमा स्याल्लवणाकरः] ॥

❀ इति भूमिवर्गः ❀

❀ अथ पुरवर्गः ❀

पूः स्त्री पुरी-नगर्यौ वा पत्तनं पुटभेदनम् ।
स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात्पुरम् ॥१॥

---

(१) द्वे राजमार्गस्य । [चौड़ी 'सड़क'] ।

(२) नगरराजमार्गस्यैकं—नपुंसके । [शहर की बड़ी २ सड़क] । (३) भूम्याकाशयोः पञ्च-नित्यं द्विवचनान्ताः । [जमीन-आकाश] ।

(४) द्वे लवणखनेः । तत्र रुमा स्त्रियाम् । [निमक की खान] ।

❀ इति भूमिवर्गः ❀

(५) सप्त पुर्या नामानि । पूःशब्दो रान्तः स्त्रियाम् । पुरीनगर्यौ-स्त्रियां, पक्षे-क्लीबे च, पत्तनसाहचर्यात् । [पुरी के नाम] ।

(६) मूलनगरं = राजधानी, ततोऽन्यत् यन्नगरं तस्यैकं नाम । [शहरतली, 'नगर के निकट के कसबा' आदि] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तच्छाखानगरं, वेशो[1] वेश्याजनसमाश्रयः ।
आपणस्तु[2] निषद्यायां, विपणिः[3] पण्यवीथिका ॥२॥
रथ्या[4] प्रतोली विशिखा स्याच्चयो[5] वप्रमस्त्रियाम् ।
प्राकारो[6] वरणः सालः, प्राचीरं[7] प्रान्ततो वृतिः ॥३॥
भित्तिः स्त्री कुड्यमेड्कं[8] यदन्तर्न्यस्तकीकसम्[9] ।

---

(१) वेश्याजननिवासभूमेः । [वेश्याओं के रहने का चकला आदि] ।

(२) द्वे हट्टस्य । तत्र निषद्या-स्त्रियाम् । ['दुकान-हाट'] ।

(३) द्वे पण्यवीथ्याः-स्त्रियाम् । ['बाजार'] ।

(४) त्रीणि रथ्यायाः ['रास्ता, गली'] ।

(५) द्वे इष्टिकादिनिर्मितस्य प्राकार-मूलाधारस्य,-['पुस्ती' 'चबूतरा' या 'बुर्ज'] । तत्र वप्रः-पुंसि, नपुंसके च ।

(६) त्रीणि प्राकारस्य ['कोट' 'शहरपनाह'] ।

(७) एकंकण्टकादिवृतेः[प्राचीर'बाड़']।'प्राचीन'मित्यपि पाठः ।

(८) द्वे भित्तेः । तत्र भित्तिः स्त्री । ['भीत' 'दिवाल']

(९) अन्तर्निहितं कीकसं=अस्थि यस्मिन् तत् कुड्यम्-'एड्कम्' इति प्रोच्यते इत्यर्थः ।[जिस भित्ति में किसी की (बुद्ध आदि की) हड्डी रखी हो उस 'भीत' या 'चैत्य का नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]गृहं गेहोदवसितं वेश्म सद्म निकेतनम् ॥४॥
निशान्त-पस्त्य-सदनं भवना-ऽगार-मन्दिरम् ।
[2]गृहाः पुंसि च भूम्न्येव निकाय्य-निलया-ऽऽलयाः॥५॥
वासः कुटी द्वयोः शाला सभा, [3]मञ्जवनं त्विदम् ।
चतुःशालं, [4]मुनीनान्तु पर्णशालोटजोऽस्त्रियाम् ॥६॥
[5]चैत्यमायतनं तुल्ये, [6]वाजिशाला तु मन्दुरा ।

---

(१) षोडश गृहस्य । तत्र गृहान्तानि नामानि क्लीबे । वेश्म-सद्मनी-नान्ते । गृहशब्दः पुंसि तु नित्यं बहुवचनान्तः । निकाय्यादयश्च पुंसि । [घर, मकान] ।

(२) चत्वारि सभागृहस्य । ['हाल'–'कमरा'] तत्र-कुटी–स्त्रीपुंसयोः, शाला-सभे स्त्रियाम् ।

(३) द्वे चतुःशालस्य,–परस्पराभिमुखशालाचतुष्टयगृहस्य । [चौशाल] ।

(४) द्वे मुनिगृहस्य । तत्र–पर्णशाला—स्त्रियाम् , उटजोऽस्त्रियाम् । [मुनियों की पर्णकुटी] ।

(५) द्वे स्तूपस्य क्लीबे । [बौद्ध स्तूप और 'चैत्य = छतरी'] ।

(६) द्वे अश्वशालायाः । ['घुड़शाल,' 'अस्तबल'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आवेशनं शिल्पिशाला, प्रपा[2] पानीयशालिका ॥ ७ ॥
मठश्छात्रादिनिलयो, गञ्जो[4] तु मदिरागृहम् ।
गर्भाऽगारं[5] वासगृहमरिष्टं[6] सूतिकागृहम् ॥ ८ ॥
[कुट्टिमोऽस्त्री[7] निबद्धा भूश्चन्द्रशाला[8] शिरोगृहम्] ।
वातायनं[9] गवाक्षोऽथ मण्डपोऽस्त्री[10] जनाश्रयः ।

---

(१) द्वे–स्वर्णकारादिशिल्पिशालायाः ['कारखाना'] ।

(२) जलशालायाः ['पौसरा' 'प्याऊ'] ।

(३) संन्यासि-विद्यार्थि-जननिवासगृहस्यैकम् । ['छात्रावास' 'मठ'] ।

(४) मदिरागृहस्य द्वे । तत्र–गञ्जा–स्त्रियाम् । ['मद्य की भट्टी' 'कलवरिया'] । भाण्डागारे तु पुन्नपुंसकयोर्गञ्जः । ['गञ्ज'] ।

(५) मन्दिरादौ–देवप्रतिमानिवासगृहस्य द्वे । ['जगमोहन' 'सभामण्डप'] ।

(६) सूतिकागृहस्य द्वे ['सौरी'] । चत्वारः पर्याया इत्येके ।

(७) द्वे कुट्टिमस्य [-पक्का आंगन']

(८) द्वे चन्द्रशालायाः ['बंगला'–'चौबारा'] ।

(९) द्वे ['जाली' 'झरोखा' 'मोखा'] इत्याख्यातस्य ।

(१०) द्वे मण्डपस्य ['मण्डप' 'मांडा' 'मंडवा' 'बरामदा' 'तिबारी' 'दालान' आदि] । तत्र–मण्डपोऽस्त्रियाम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हर्म्यादि धनिनां वासः, प्रासादो देवभूभुजाम् ॥९॥
सौधोऽस्त्री राजसदनमुपकार्योपकारिका ।
स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयोऽपि च ॥१०॥
विच्छन्दकः प्रमेदा हि भवन्तीश्वरसद्मनाम् ।
स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनम् ॥११॥
शुद्धाऽन्तश्चाऽवरोधश्च, स्यादङ्कः क्षौममस्त्रियाम् ।
प्रघाण-प्रघणा-ऽलिन्दा बहिर्द्वारप्रकोष्ठके ॥ १२ ॥

---

(१) एकं धनिगृहस्य क्लीबे । आदिना स्वस्तिकादि । ['हवेली']

(२) राजगृहस्य, देवमन्दिरस्य चैकम् । ['महल'] ।

(३) द्वे गृहश्रेष्ठस्य, राजगृहस्य च । ['कोठी'] । तत्र सौधः-पुंनपुंसके ।

(४) द्वे राजगृहसामान्यस्य । [हवेली] ।

(५) राज-धनि-गृहविशेषणामेकैकम् [महल हवेली आदि]

(६) अन्तःपुरस्य चत्वारि । [जनानखाना] ।

(७) द्वे गृहस्थितस्योपरिगृहस्य । [अटारी'-बुर्जी'] तत्र क्षौमम्-क्षोमञ्च-अस्त्रियाम् ।

(८) त्रीणि द्वारप्रकोष्ठाद्बहिर्द्वाराग्रवर्तिचतुष्कस्य । ['दर्वाजे के आगे की छोटी वर्सांती, या आगे का चौक'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गृहाऽवग्रहणी देहल्यङ्गणं चत्वराऽजिरे ।
अधस्ताद्दारुणि शिला, नोसा दारूपरिस्थितम् १३॥
प्रच्छन्नमन्तर्द्वारं स्यात्पक्षद्वारं तु पक्षकम् ।
वलीक-नीध्रे पटलप्रान्तेऽर्थं पटलं छदिः ॥१४॥
गोपानसी तु वलभीच्छादने वक्रदारुणि ।

---

(१) द्वे देहल्याः स्त्रियाम् । [देहली] ।

(२) त्रीणि चत्वरस्य नपुंसके । [आंगण] ।

(३) एकं द्वारस्तम्भाधःस्थितकाष्ठस्य स्त्रियाम् । [शिल्ली] ।

(४) द्वारस्तम्भोर्ध्वकाष्ठस्यैकम् । 'पटिया' इत्याख्यातस्य भित्तिधारककाष्ठशिलादेर्वा । [पट्टी] ।

(५) 'खिड़की' त्याख्यातस्य [गुप्तद्वारस्य वा] द्वे ।

(६) पार्श्वद्वारस्य द्वे । [बगलका दर्वाजा] ।

(७) गृहाच्छादनपटलप्रान्तभागस्य त्रीणि क्लीबे । [छान का प्रान्त भाग, 'छोर'] ।

(८) द्वे छदिषः—क्लीबे, छदिः षान्तः ['छान'] । केचिच्छदिषः स्त्रीत्वमाहुः ।

(९) वलभ्याः = चन्द्रशालायाश्छादने वक्रे काष्ठे—गोपानसी । [छाजन या छज्जा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कपोतपालिकायान्तु विटङ्कं पुंनपुंसकम् ॥ १५ ॥
स्त्री [2]द्वाद्वारं प्रतीहारः [3]स्याद्वितर्दिस्तु वेदिका ।
तोर[4]णोऽस्त्री बहिर्द्वारं, पु[5]रद्वारं तु गोपुरम् ॥१६॥
कू[6]टं पूर्द्वारि यद्वस्तिनखस्तस्मिन्नथ त्रिषु ।
क[7]पाटमररं तुल्ये, तद्विष्कम्भोऽर्गलं न ना ॥१७॥

---

(१) कपोतपालिकाया द्वे । [कबूतरों की छतरी] ।

(२) त्रीणि द्वारस्य । तत्र द्वाःशब्दो रान्तः स्त्रियाम् । [दर्वाजा] ।

(३) वेदिकाया द्वे । ['चबूतरा' 'वेदी'] ।

(४) द्वारबहिर्भागस्य द्वे । तत्र तोरणोऽस्त्री । ['दर्वाजे के बाहर का छाया हुआ भाग'] ।

(५) नगरद्वारस्य द्वे । [नगर का द्वार] ।

(६) नगरद्वारेऽवतरणाय रचितस्य क्रमनिम्नस्य मृदादिकूटस्यैकम् । ['खुर्रा' 'ढालू फर्श'] ।

(७) 'कँवाड़ा'-इत्याख्यातस्य द्वे । तत्र कपाटं-त्रिषु, अररं न पुंसि । [किवाड़] ।

(८) कपाटरोधनदण्डस्य-अर्गलस्यैकं । तत्रार्गलं न पुंसि । ['आगल' 'डण्डा'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]आरोहणं स्यात्सोपानं, [2]निःश्रेणिस्त्वधिरोहणी ।
[3]संमार्जनी शोधनी स्यात्[4]सङ्करोऽवकरस्तया-॥१८॥
क्षिप्ते, [5]मुखं निःसरणं, [6]सन्निवेशो निकर्षणम् ।
समौ [7]संवसथ-ग्रामौ, [8]वेश्मभूर्वास्तुरस्त्रियाम् ॥१९॥
[9]ग्रामान्त उपजन्यं [10]स्यात्सीमसीमे स्त्रियामुभे ।

---

(१) द्वे पाषाणादिकृताऽऽरोहणमार्गस्य सोपानस्य। [सीढ़ी]।

(२) काष्ठादिकृतारोहणस्य द्वे, स्त्रियाम् । [काठ की सीढ़ी]।

(३) द्वे संमार्जन्याः—['झाड़ू' 'बुहारी']।

(४) संमार्जनीक्षिप्तधूल्यादेः । 'तया = समार्जन्या क्षिप्ते = प्रक्षिप्ते'—इत्यन्वयः। [झाड़ूसे बुहारा हुआ 'कूड़ा' 'कतवार']।

(५) निस्सरणवेशमार्गस्य द्वे । [जाने-आनेका मार्ग] ।

(६) पुरसम्बन्धिगृहादिपरिच्छिन्नदेशस्य । ['बस्ती'] ।

(७) द्वे ग्रामस्य । [गाँव]।

(८) गृहावच्छिन्नभूमेर्द्वे । तत्र वास्तुरस्त्रियां, वेश्मभूः स्त्रियाम् । [वास्तु—जितनी दूर में घर बना हुआ है—उसका नाम]।

(९) ग्रामसमीपदेशस्य द्वे, चत्वारि वा [गाँव की सीमा] ।

(१०) द्वे सीमायाः । तत्र सीमशब्दो नान्तः—सीमाशब्दश्चा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घोषे[1] आभीरपल्ली स्यात्पक्कणः[2] शबरालयः ॥२०॥

❀ इति पुरवर्गः ॥ २ ॥ ❀

❀ अथ शैलवर्गः ❀

महीध्रे[3] शिखरि-क्ष्माभृद-ऽहार्य-धर-पर्वताः ।
अद्रि-गोत्र-गिरि-ग्रावा-ऽचल-शैल-शिलोच्चयाः ॥
लोकालोकश्चक्रवालस्त्रिकूटस्त्रिककुत्समौ[4] ।
अस्तस्तु[6] चरमक्ष्माभृदुदयः[7] पूर्वपर्वतः ॥ २ ॥

ऽऽकारान्तः स्त्रियाम्। केचित्तु चत्वार्येव सीमाया इत्याहुः। [सीमा]।

(१) गोपग्रामस्य । ['अहिराना' 'अहीरों की बस्ती']।

(२) द्वे भिल्लग्रामस्य । 'पक्कण' इत्यपि पाठः । [भीलों का गाँव] ।

(३) त्रयोदश पर्वतानां नामानि—पुंसि । तत्र—शिखरी नान्तः, क्ष्माभृत्तान्तः । [पर्वत—पहाड़] । (४) लोकालोकपर्वतस्य द्वे । [भूमण्डल का लोकालोक पर्वत] ।

(५) लङ्कापर्वतस्य—त्रिकूटस्य=द्वे। तत्र—त्रिककुद् दान्तः पुंसि, [त्रिकूट पर्वत] ।

(६) अस्ताचलस्य द्वे [अस्ताचल] ।

(७) द्वे उदयाचलस्य । [उदय पर्वत] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हिमवान्निषधो विन्ध्यो मान्यवान् पारियात्रकः ।
गन्धमादनमन्ये च हेमकूटादयो नगाः ॥ ३ ॥
पाषाण-प्रस्तर-ग्रावोपलाऽश्मानः शिला दृषत् ।
कूटोऽस्त्री शिखरं शृङ्गं, प्रपातस्त्वतटो भृगुः ॥ ४ ॥
कटकोऽस्त्री नितम्बोऽद्रेः, स्नुः प्रस्थः सानुरस्त्रियाम् ।
उत्सः प्रस्रवणं, वारिप्रवाहो निर्झरो झरः ॥ ५ ॥

---

(१) पर्वतविशेषाणामेकैकम् । [नाना पर्वतों के १–१ नाम]।

(२) पाषाणस्य सप्त । तत्र–ग्रावा–ऽश्मानौ नान्तौ पुंसि । शिला–दृषदौ स्त्रियाम् । पाषाणादयः–पुंसि । [पत्थर]

(३) त्रीणि शिखरस्य । तत्र—कूट-शिखरौ पुंनपुंसकयोः । [शिखर] (४) त्रीणि प्रपातस्य । ['करारा' 'प्रपात'] ।

(५) पर्वतमध्यभागस्य द्वे । तत्र कटकोऽस्त्री । [पहाड़ का मध्यभाग]

(६) पर्वतसमभूभागस्य त्रीणि । तत्र स्नुः पुंसि, सानु-प्रस्थावस्त्रियाम् । [पठार]

(७) यतो जलस्य निर्गमस्तस्य स्थानस्य द्वे । [जल का निकास] ।

(८) निर्झरस्य त्रीणि । ['झरना'] । उत्सादयः पञ्च पर्याया इत्यन्ये ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दरी[1] तु कन्दरो वा स्त्री, देवखात[2]बिले गुहा— ।
गह्वरं, गण्डशैलास्तु[3] च्युताः स्थूलोपला गिरेः ॥६॥
[दन्तकास्तु[4] बहिस्तिर्यक्प्रदेशान्निर्गता गिरेः] ।
खनिः[5] स्त्रियामाकरः स्यात्[6]पादाः प्रत्यन्तपर्वताः ।
उपत्यकाऽद्रेरासन्ना[7] भूमिरूर्ध्वमधित्यका[8] ॥ ७ ॥
धातुर्मनःशिलाद्यद्रेर्गैरिकन्तु[9] विशेषतः ।

(१) द्वे कृत्रिमस्य गृहाकारस्य पर्वतविवरस्य । तत्र—कन्दरः—स्त्रीपुंसयोः । ['दर्री' 'खोह' 'कन्दरा' 'गुफा'] ।

(२) चत्वारि अकृत्रिमगुहायाः ['प्राकृतिक गुफा'] ।

(३) गिरेः पतितानां स्थूलपाषाणानामेकम् । ['पहाड़ से गिरी हुई चट्टान'] ।

(४) पर्वतनिर्गतशिलाखण्डस्यैकम् । ['पहाड़ के कोने']

(५) खनेर्द्वे । तत्र खनिः—स्त्रियाम् । ['खान'] ।

(६) पर्वतनिकटस्थाऽल्पपर्वतानां द्वे । [पर्वत के निकट के छोटे २ पहाड] । (७) अधोभागे—पर्वतसमीपस्था भूमिः—उपत्यका [पर्वतसमीपभूमि] । पर्वतोपरिस्था भूमिः—अधित्यका । [पर्वत के ऊपर की भूमि]

(८) पर्वतधातूनां मनःशिलादीनामेकम् पुंसि । (९) गैरिकस्यैकम् । ['गेरू'] । 'सुवर्णरूप्यताम्राणी'ति सार्द्धः प्रक्षिप्तः श्लोकः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[सुवर्ण-रौप्य-ताम्राणि हरितालं मनःशिला ।
गैरिका-ऽञ्जन-कासीस-सीस-लोहाः स-हिंगुलाः ॥
गन्धकोऽभ्रक इत्याद्या धातवो गिरिसम्भवाः] ।
निकुञ्जकुञ्जौ[1] वा क्लीबे लतादिपिहितोदरे ॥

❀ इति शैलवर्गः ॥ ३ ॥ ❀

❀ अथ वनौषधिवर्गः ❀

अटव्यरण्यं[2] विपिनं गहनं काननं वनम् ।
महारण्यमरण्यानी,[3] गृहारामास्तु[4] निष्कुटाः ॥१॥
आरामः[5] स्यादुपवनं कृत्रिमं वनमेव यत् ।
अमात्यगणिकागेहोपवने[6] वृक्षवाटिका ।२॥

---

(१) द्वे लतादिच्छन्नस्थानस्य 'कुञ्ज' इत्याख्यातस्य । तत्र निकुञ्जकुञ्जौ पुंनपुंसकयोः । [कुञ्ज] ।

(२) षट् काननस्य ['जङ्गल'] ।

(३) महतो वनस्य द्वे ['गहरा वन' 'वणी'] ।

(४) गृहसमीपोपवनस्य,-['गृहोद्यान''घर के समीप का बगीचा'] । (५) द्वे उपवनस्य । ['बगीचा'] ।

(६) एकं मन्त्रि-गणिकादि-गृहोपवनस्य । [मन्त्री,वेश्या

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम् ।
स्यादेतदेव प्रमदवनमन्तःपुरोचितम् ॥ ३ ॥
वीथ्यांऽऽलिरावलिः पङ्क्तिः श्रेणी, लेखास्तु राजयः ।
वन्या वनसमूहे स्यादङ्कुरोऽभिनवोद्भिदि ॥४॥
वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ।
अनोकहः कुटः सालः पलाशी द्रु-द्रुमा-ऽगमाः ॥ ५ ॥
वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः ।

आदि के घर के निकट के बगीचे का नाम]।

(१) सर्वसाधारणनगरोद्यानस्य द्वे । तत्राऽऽक्रीडः पुमान् । [नगर का बाग]।

(२) अन्तःपुरोद्यानस्यैकम् । [राजमहल का जनाना बाग]

(३) पङ्क्ति सान्तरपङ्क्तेः स्त्रियाम् । [दूर २ 'कतार' 'पाँति']।

(४) वृक्षादीनां समूहस्य-सघनतया स्थितस्य-स्त्रियाम् । [झुण्ड] । (५) एकं वनसमूहस्य स्त्रियाम् ।

(६) एकमङ्कुरस्य । अङ्कूरोऽपि । [अङ्कुर का नाम] ।

(७) वृक्षस्य त्रयोदश । तत्र-शाखिविटपिपलाशिनो नान्ताः पुंसि । [वृक्ष 'पेड'] । (८) एकं पुष्पागमाऽनन्तरोत्पन्नफलशालिवृक्षस्य । [आम आदि वृक्षविशेष 'वानस्पत्य'] ।

(९) एकं पुष्पं विना फलवत उदुम्बरादेः-पुंसि । [जिन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ओषध्यः फलपाकान्ताः, स्यादवन्ध्यः फलेग्रहिः ॥६॥
वन्ध्योऽफलोऽवकेशी च, फलवान् फलिनः फली ।
प्रफुल्लो-स्फुल्ल-संफुल्ल-व्याकोश-विकच-स्फुटाः ॥७॥
फुल्लश्चैते विकसिते स्युरवन्ध्यादयस्त्रिषु ।
स्थाणुर्वा ना ध्रुवः शङ्कुर्ह्रस्वशाखाशिफः क्षुपः ॥८॥
अप्रकाडे स्तम्ब-गुल्मौ, वल्ली तु ततिर्लता ।

वृक्षों में फूल के बिना ही फल आते हों उनका नाम]।

(१) फल पाक एव अन्तः अवसानं यासान्ताः—फलपाकान्ताः । फलपाकानन्तरं शुष्काणां व्रीहियवादीनामेकं—स्त्रियाम् [धान आदि ओषधि]। (२) ऋतौ फलप्रदस्य द्वे त्रिषु [।फल देनेवाला वृक्ष]।

(३) ऋतावपि फलरहितस्य त्रीणि त्रीषु । [निष्फल वृक्ष का नाम]।

(४) फलसहितस्य वृक्षादेस्त्रीणि—त्रिषु। [सफल वृक्ष]।

(५) अष्टौ विकसितवृक्षादेः—त्रिषु[फूले हुए वृक्षों के नाम]

(६) शाखापत्रादिरहितस्य वृक्षस्य त्रीणि- ['ठूँठ']। तत्र स्थाणुस्त्री । शङ्कुध्रुवौ पुंसि ।

(७) एकं ह्रस्वशाखायुतस्य पादपस्य । ['पौधा']।

(८) स्कन्धरहितद्रुमादेस्त्रीणि । [छोटे वृक्ष 'झाडी']।

(९) त्रीणि लतायाः स्त्रियाम् । [लता]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लता प्रतानिनी वीरुद्गुल्म्यन्युलप इत्यपि ॥९॥
नगाद्यारोह उच्छ्राय उत्सेधश्चोच्छ्रयश्च सः ।
अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः ।
समे शाखा-लते, स्कन्धशाखा-शाले, शिफा-जटे ।
शाखा शिफाऽवरोहः स्यान्मूलाच्चाग्रं गता लता ॥११॥

---

(१) शाखादिसहिताया विस्तृतलतायास्त्रीणि । तत्र उलपः पुंसि, शेषं स्त्रियाम् । [चमली आदि की बड़ी बेल] ।

(२) त्रीणि वृक्षादिदैर्घ्यस्य । ['वृक्ष, पर्वत आदि की ऊँचाई'] । (३) मूलमारभ्य शाखापर्यन्तस्य द्वे । तत्र-प्रकाण्डोऽस्त्रियाम् । ['पेड' 'तना'] ।

(४) द्वे शाखायाः स्त्रियाम् । ['डाली'] ।

(५) स्कन्धप्रदेशोत्पन्नप्रधानस्थूलशाखाया द्वे । ['मोटी प्रधान शाखा'] ।(६) द्वे वृक्षादिमूलस्य ['पेड़ की जड़'] ।

(७) शाखाऽवलम्बिनी शिफा-शाखाशिफा, तस्या 'अवरोह' इति नामधेयमित्यर्थः । द्वे शाखाशिफायाः । ['बड आदि की जटा'] ।

(८) 'वृक्षमूलात्प्रभृति वृक्षाग्रपर्यन्तं गता लताऽप्यवरोह' इति प्रसङ्गात् अवरोहपदस्यार्थान्तरमाह । केचित्तु—मूलादूर्ध्वं गता शिफा 'लते'त्युच्यते इत्यर्थ' इत्याहुः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिरोऽग्रं शिखरं वा ना, मूलं बुध्नोऽङ्घ्रिनामकः ।
सारो मज्जा नरि, त्वक्स्त्री वल्कं वल्कलमस्त्रियाम् ॥
कोष्ठं दार्विन्धनं त्वेध इध्ममेधः समित्स्त्रियाम् ।
निष्कुहः कोटरं वा ना, वल्लरिर्मञ्जरिः स्त्रियौ ॥१३॥

---

(१) वृक्षाग्रदेशस्य त्रीणि । तत्र–शिरः सान्तं क्लीबे । शिखरोऽस्त्रियाम् । ['पेड़ की चोटी'] ।

(२) वृक्षादिमूलस्य त्रीणि । [जड़] ।

(३) वृक्षकोमलत्वचः, सारभागस्य द्वे । ['पेड़ की पतली छाल'-'हीर'] । तत्र मज्जशब्दो नान्तः पुंसि । आकारान्तोऽपि मज्जाशब्दः स्त्रियाम् ।

(४) त्रीणि त्वचः । तत्र त्वक् चान्ता स्त्रियाम्, वल्कवल्कले–अस्त्रियाम् । [छाल] ।

(५) काष्ठमात्रस्य द्वे । तत्र–दारुकाष्ठे-क्लीबे । [काठके नाम]।

(६) त्रीणि वह्निसंधुक्षणतृणकाष्ठादेः । ['बलिंड़ा' 'फूस' 'लकड़ी'] । तत्र–एधः सान्तं नपुंसके ।

(७) द्वे यज्ञकाष्ठस्य । तत्राऽकारान्त एधशब्दः पुंसि । समित् स्त्रियाम् । पञ्चापि पर्याया इत्येके । ['समिधा'] ।

(८) वृक्षकोटरस्य द्वे । तत्र कोटरः पुंनपुंसकयोः ['खोडर'] ।

(९) द्वे मञ्जर्याः स्त्रियाम् । [मिंजर] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]पत्त्रं पलाशं छदनं दलं पर्णं छदः पुमान् ।
[2]पल्लवोऽस्त्री किसलयं, [3]विस्तारो विटपोऽस्त्रियाम् ॥१४॥
[4]वृक्षादीनां फलं सस्यं, [5]वृन्तं प्रसवबन्धनम् ।
[6]आमे फले शलाटुः स्या[7]च्छुष्के वानमुभे त्रिषु ॥१५॥
[8]क्षारको जालकं क्लीबे, [9]कलिका कोरकः पुमान् ।

---

(१) षट् पत्राणाम् । तत्र-छदशब्दः पुंसि, शेषं नपुंसके । [पत्तों का ६ नाम] ।

(२) द्वे पल्लवस्य । तत्र—पल्लवोऽस्त्री, किसलयं क्लीबे । ['कोंपल' 'नये पत्ते'] ।

(३) वृक्षविस्तारस्यैकम् । [वृक्ष की शाखा आदि का फलाव, 'घेरा'] ।

(४) वृक्षादिफलस्यैकम् । [फल] ।

(५) पुष्पादिबन्धनस्यैकम् । [फूलों का बन्धन 'नाका']

(६) एकमपक्वफलस्य त्रिषु । ['कच्चा फल'] ।

(७) एकं शुष्कफलस्य—त्रिषु । ['सूखाफल'—मेवा आदि] ।

(८) द्वे नूतनकलिकायाः । तत्र जालकं-क्लीबे । [नई कली] ।

(९) द्वे अविकसितस्य पुष्पस्य । तत्र कोरकः पुमान् । [बिना खिला फूल, कच्ची 'कली'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्याद् गुच्छकस्तु स्तबकः,[२] कुड्मलो मुकुलोऽस्त्रियाम् ॥
स्त्रियः सुमनसः[३] पुष्पं प्रसूनं कुसुमं सुमम् ।
[४]मकरन्दः पुष्परसः, [५]परागः सुमनोरजः ॥१७॥
द्विहीनं प्रसवे सर्वं, हरीतक्यादयः[७] स्त्रियाम् ।
आश्वत्थ-वैणव-प्लाक्ष-नैयग्रोधै-ड्गुदं फले ॥ १८ ॥

---

(१) द्वे गुच्छकस्य ['गुच्छा'] ।

(२) द्वे ईषद्विकसितकलिकायाः । ['अधखिली कली'] ।

(३) पञ्च पुष्पस्य । तत्र सुमनश्शब्दः स्त्रियां बहुवचनान्तः । एकवचनान्तोऽपि च —कोशान्तरप्रामाण्यात् [फूल] ।

(४) पुष्परसस्य द्वे [मकरन्द] ।

(५) पुष्परेणोर्द्वे । तत्र—रजस्सान्तं क्लीबे । [पराग] ।

(६) वक्ष्यमाणम्=अश्वत्थादि-फलपुष्पादिषु वर्त्तमानं द्वाभ्यां=स्त्रीपुंसाभ्यां हीनं—नपुंसकलिङ्गं ज्ञेयमित्यर्थः । विकारावयवयोरुत्पन्नस्य अणादिप्रत्ययस्य, फले लुक्—'पुष्पमूलेषु बहुल' मिति लुका लुप्तत्वात् ।

(७) परन्तु हरीतक्यादयः फले वाच्ये स्त्रियामेव, न क्लीबे । पूर्वनियमापवादोऽयम् । आदिना—कोशातकी-बदरी-कण्टकारिकादयः ।

(८) अश्वत्थस्य फलम्—आश्वत्थम् । 'एवं-वेणु-प्लक्ष-न्यग्रोधे-ड्गुदी-बृहतीनां फलानां नामैकैकम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बार्हतश्च, फले जम्ब्वा जम्बूः स्त्री जम्बु जाम्बवम् ।
पुष्पे[2] जातिप्रभृतयः स्वलिङ्गा, व्रीहयः[3] फले ॥१९॥
विदार्याद्यास्तु[4] मूलेऽपि, पुष्पे[5] क्लीबेऽपि पाटला ।
बोधिद्रुमश्चलदलः[6] पिप्पलः कुञ्जराऽशनः ॥२०॥
अश्वत्थेऽथ[7] कपित्थे स्युर्दधित्थ-ग्राहि-मन्मथाः ।

---

(१) त्रीणि-जम्बूफलस्य । तत्र-जम्बूः स्त्रियां, शेषं क्लीबे । ['जामुन'] ।

(२)जाति-मल्लिका-यूथिकाद्याः पुष्पे वाच्ये सति स्वलिङ्गाः । यथा-जात्याः पुष्पं-जातिः—स्त्रियाम् । [जूही आदि के फूल]

(३) एवं व्रीहयः-यवाद्याः-फले वाच्ये स्वलिङ्गाः । यथा—यवानां फलानि-यवाः,-पुंसि । एवं माषाः, मुद्गाः, गोधूमाः ।

(४) विदारीशब्दः-मूले, पुष्पे, फलेऽपि च-स्वलिङ्ग एव । यथा-विदार्याः पुष्पादि, मूलं, फलादि च-विदारी । एवं-गम्भारी, शालपर्णी ।

(५) पाटलाशब्दः पुष्पे क्लीबे, स्त्रीलिङ्गेऽपि च । पुंस्यपि च, शाश्वतकोशप्रामाण्यात् ।

(६) पञ्च पिप्पलस्य ['पीपल'] ।

(७) सप्त 'कैथ' इत्याख्यातस्य । [कैथ] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्मिन् दधिफलः पुष्पफल-दन्तशठावपि ॥२१॥
[1]उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ।
कोविदारे चमरिकः कुद्दालो युगपत्रकः ॥२२॥
[3]सप्तपर्णे विशालत्वक् शारदो विषमच्छदः ।
[4]आरग्वधे राजवृक्ष-शम्याक-चतुरङ्गुलाः ॥२३॥
आरेवत-व्याधिघात-कृतमाल-सुवर्णकाः ।
[5]स्युर्जम्बीरे दन्तशठ-जम्भ-जम्भीर-जम्भलाः ॥२४॥
[6]वरुणे वरणः सेतुस्तिक्तशाकः कुमारकः ।

---

(१) चत्वारि उदुम्बरस्य ['गूगल'] ।

(२) चत्वारि कोविदारस्य [कचनार'] ।

(३) चत्वारि सप्तपर्णस्य ['सतौना' 'छतिवन'] ।

(४) अष्टौ 'धनबहेड़ा' 'सोनालु' इत्याख्यातस्य । तत्र– 'सम्पाकः' इति, 'शम्पाक' इति च केचित्पठन्ति । 'सुपर्णकाः' इत्यपि पाठः।

(५) पञ्च–'जम्बीरी नीबू'–इति ख्यातस्य ।

(६) पञ्च वरणवृक्षस्य । 'वरणो वरुण' इत्यपि च पाठः । [बरुना] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]पुंनागे पुरुषस्तुङ्गः केसरो देववल्लभः ॥२५॥
[2]पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ।
[3]तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तकः ॥२६॥
वञ्जुलश्चित्रकृच्चाऽर्थे द्वौ पीतन-कपीतनौ ।
आम्रातके, [4]मधूके तु गुडपुष्प-मधुद्रुमौ ॥२७॥
वानप्रस्थ-मधुष्ठीलौ, [5]जलजेऽत्र मधूलकः ।
[7]पीलौ गुडफलः स्रंसी, [8]तस्मिंस्तु गिरिसम्भवे ॥२८॥

---

(१) पञ्च 'नागकेसर' इति ख्यातस्य ।

(२) चत्वारि निम्बतरुभेदस्य । ['बकाइन नीम'] ।

(३) सप्त तिनिशस्य । [तिनिस] ।

(४) त्रीणि आम्रातकस्य ['अम्बड़ा']

(५) पञ्च मधूकस्य ['महुआ'] ।

(६) एकंज लजमधूकस्य । [जल महुआ] । 'गिरिजेऽत्र' इति युक्तः पाठ इति केचित् । गिरिजः = पर्वतोद्भवः ।

(७) त्रीणि पीलुवृक्षस्य । [मरुदेशे-'पील' इति प्रसिद्धस्य] ।

(८) द्वे-'अखरोट' इति प्रसिद्धस्य [पहाडी पील] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अक्षोट-कन्दरालौ द्वावङ्कोटे तु निकोचकः ।
[2]पलाशे किंशुकः पर्णो वातपोथोऽथ[3] वेतसे-॥२९॥
रथा-ऽभ्रपुष्प-विदुल-शीत-वानीर-वञ्जुलाः ।
द्वौ [4]परिव्याध-विदुलौ नादेयी चाऽम्बुवेतसे ॥३०॥
शोभाञ्जने शिग्रु-तीक्ष्णगन्धका-ऽक्षीव-मोचकाः ।
[6]रक्तोऽसौ मधुशिग्रुः स्यादरिष्टः फेनिलः समौ ॥३१॥
बिल्वे शाण्डिल्य-शैलूषौ मालूर-श्रीफलावपि ।
[9]प्लक्षो जटी पर्कटी स्यान्न्य[10]ग्रोधो बहुपाद्वटः ॥३२॥

'कर्परालौ' इति पा० । (१) त्रीणि अङ्कोलस्य । ['ढेरा']
(२) चत्वारि पलाशस्य । ['ढाक' 'पलास'] ।
(३) सप्त वेतसस्य । ['बेत'] ।
(४) चत्वारि जलवेतसस्य । [जलवेत] ।
(५) पञ्च शिग्रुवृक्षस्य । ['सहेंजना'] ।
(६) रक्तशोभाञ्जनस्यैकम् । [लाल सहेंजना-'मगुना'] ।
(७) द्वे अरिष्टस्य ['रीठा'] ।
(८) पञ्च बिल्ववृक्षस्य ['बिल्व' बील] ।
(९) त्रीणि प्लक्षस्य-['पाकर'] ।
(१०) त्रीणि वटस्य ['बड'] । तत्र-बहुपाद्-दकारान्तः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गौलवः शाबरो लोध्रस्तिरीटस्तिन्व-मार्जनौ ।
आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः ॥३३॥
कुम्भोलूखलकं क्लीबे कौशिको गुग्गुलुः पुरः ।
शेलुः श्लेष्मातकः शीत उद्दालो बहुवारकः ॥३४॥
राजादनं प्रियालः स्यात्सन्नकद्रुर्धनुष्पटः ।
गम्भारी सर्वतोभद्रा काश्मरी मधुपर्णिका ॥३५॥
श्रीपर्णी भद्रपर्णी च काश्मर्यश्चाप्यथ द्वयोः ।

---

(१) षट् श्वेतलोध्रस्य । आद्यौ श्वेते, शेषा रक्तलोध्रे इति तु परे । [लाल व सफेद 'लोध'] ।

(२) त्रीणि आम्रस्य ['आम'] ।

(३) एकमतिसुरभितस्याम्रस्य । ['बढ़िया आम' 'लंगड़ा आम' आदि] ।

(४) पञ्च गुग्गुलुवृक्षस्य ['गूगल'] ।

(५) पञ्चोद्दालकस्य । ['ल्हेसुवा'–'लिसोडा'] ।

(६) चत्वारि प्रियालस्य । 'पियालः' इत्यपि पा० । ['चिरौंजी'] ।

(७) सप्त 'खम्भारी' ति ख्यातस्य । [गम्भारी] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्कन्धूर्बदरी कोली,[2] कोलं कुवल-फेनिले ॥३६॥
सौवीरं बदरं घोण्टाऽप्यथ[3] स्यात्स्वादुकण्टकः ।
विकङ्कतः सुवावृक्षो ग्रन्थिलो व्याघ्र पादपि ॥३७॥
ऐरावतो[4] नागरङ्गो, नादेयी[5] भूमिजम्बुका ।
तिन्दुकः[6] स्फूर्जकः कालस्कन्धश्च शितिसारके ॥३८॥
काकेन्दुः[7] कुलकः काकपीलुकः काकतिन्दुके ।
गोलीढो[8] झाटलो घण्टा-पाटलिर्मोक्ष-पुष्पकौ ॥३९॥

---

(१) त्रीणि बदर्याः । तत्र–कर्कन्धूः द्वयोः=स्त्रीपुंसयोः । ['झाडी'–'झड–बेरी'] ।

(२) षट् बदरीफलस्य । तत्र घोण्टा–इति लघुबदर्या नाम । ['बेर'–'घिटाल' । घोण्टा–'छोटा लाल बेर'] ।

(३) पञ्च विकङ्कतस्य ['टींट' 'कैर'] ।

(४) द्वे 'छोटी नारङ्गी' इत्याख्यातस्य ।

(५) नागरङ्गस्य द्वे ['बडी नारङ्गी'] । चत्वारि समानार्थानीत्येके ।

(६) चत्वारि तिन्दुकस्य–['तेंदु' 'आबनूस'] ।

(७) चत्वारि 'कुचला' इत्याख्यातस्य । 'कटुतिन्दुकस्ये'त्यन्ये ।

(८) पञ्च लोध्रभेदस्य ['मोखा'] । 'घण्टा' इत्यपि नाम । 'गोलिहः' इत्यपि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तिलकः[1] क्षुरकः श्रीमान्, समौ[2] पिचुल-झावुकौ ।
[3]श्रीपर्णिका कुमुदिका कुम्भी कैडर्य-कट्फलौ ॥४०॥
क्रमुकः[4] पट्टिकाख्यः स्यात्पट्टी लाक्षाप्रसादनः ।
तूदस्तु[5] यूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु च ॥४१॥
तूलश्च, नीपः[6]-प्रियक-कदम्बास्तु हलिप्रिये ।
वीरवृक्षोऽरुष्करोऽग्निमुखी[7] भल्लातकौ त्रिषु ॥४२॥
[8]गर्दभाण्डे कन्दराल-कपीतन-सुपार्श्वकाः ।

---

(१) त्रीणि तिलकवृक्षस्य। श्रीमच्छब्दस्तान्तः [तिलक]।

(२) 'झाबु' इत्याख्यस्य द्वे।

(३) पञ्च 'कायफल' इत्याख्यस्य। 'कैटर्य' इत्यपि पाठः।

(४) चत्वारि रक्तलोध्रस्य। ['पठानी लोध']। तत्र पट्टी स्त्री। नान्तो वा पट्टिशब्दः।

(५) षट् तूदस्य पिप्पलाकारवृक्षस्य। नूदः—इत्यपि पाठः। ['सहतूत']। (६) चत्वारि कदम्बस्य ['कदम्ब']।

(७) चत्वारि भल्लातकस्य ['भिलावा']। तत्र अग्निमुखी स्त्री।

(८) भल्लातकं-त्रिषु। पञ्च 'पिलखन' इत्याख्यस्य।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्लक्षश्च,तिन्तिडी[1] चिञ्चाऽम्बिलकाऽथो पीतसालके[2] ४३
सर्जका-ऽसन-बन्धूकपुष्प-प्रियक-जीवकाः ।
साले[3] तु सर्ज-कार्ष्या-ऽश्वकर्णकाः सस्यसंवरः ॥४४॥
नदीसर्जो[4] वीरतरुरिन्द्रद्रुः ककुभो-ऽर्जुनः ।
राजादनः[5] फलाध्यक्षः क्षीरिकायामथ[6] द्वयोः ॥४५॥
इङ्गुदी तापसतरुर्भूर्जे[7] चर्मि-मृदुत्वचौ ।
पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः ॥४६॥

---

(१) त्रीणि–'इमली'त्याख्यस्य [इमली]।

(२) षट् 'विजयसार' इत्याख्यस्य [विजैसार]।

(३) पञ्च सालस्य नामानि [साल]। अत्र 'कार्ष्यः' इति, 'कार्श्य' इत्यपि नामधेयम् ।

(४) पञ्चार्जुनवृक्षस्य ['अर्जुन' 'काहू']।

(५) त्रीणि 'खिरणी'ति ख्यातस्य । [खिरणी]।

(६) द्वे इङ्गुद्याः । तत्र इङ्गुदी स्त्रियां । पुंसि च इङ्गुदः । [हिंगोट' 'जियापोता']।

(७) त्रीणि—'भूर्जपत्रस्य' । ['भोजपत्र']।

(८) पञ्च 'सेमर' इत्याख्यस्य । [सेमर]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पिच्छा[1] तु शाल्मलीवेष्ट, रोचनः[2] कूटशाल्मलिः ।
[3]चिरबिल्वो नक्तमालः करजश्च करञ्जके ॥४७॥
प्रकीर्यः[4] पूतिकरजः पूतिकः कलिमारकः ।
करञ्जभेदाः[5] षड्ग्रन्थो मर्कट्यङ्गारवल्लरी ॥ ४८ ॥
[6]रोही रोहितकः स्रीहशत्रुर्दाडिमपुष्पकः ।
गायत्री[7] बालतनयः खदिरो दन्तधावनः ॥ ४९ ॥
अरिमेदो विट्खदिरे, कदरः[8] खदिरे सिते[9] ।

---

(१) द्वे 'सेमर का गोंद' इत्याख्यस्य । [मोचरस]
(२) द्वे कूटशाल्मलेः । [कूट सेमल] ।
(३) चत्वारि 'करञ्जवा' इत्याख्यस्य । 'रक्तमालः' पा० ।
(४) कण्टकि-करञ्जस्य चत्वारि । [डिठोरी] 'पूतीकः' पा० ।
(५) करञ्जभेदानामेकैकम् [करञ्जभेद] ।
(६) चत्वारि 'रोहिडा' इत्याख्यस्य । 'पर्पटी' त्यन्ये ।
(७) चत्वारि खदिरस्य । ['खैर'] ।
(८) द्वे विट्खदिरस्य [बिडखैर] ।
(९) द्वे श्वेतखदिरस्य [सफेद-खैर] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सोमवल्कोऽप्यथ व्याघ्रपुच्छ-गन्धर्वहस्तकौ ॥५०॥
एरण्ड उरुबूकश्च रुचकश्चित्रकश्च सः ।
चञ्चुः पञ्चाङ्गुलो मण्ड-वर्द्धमान-व्यडम्बकाः ॥५१॥
अन्पा शमी शमीरः स्याच्छमी सक्तुफला शिवा ।
पिण्डीतको मरुवकः श्वसनः करहाटकः ॥५२॥
शल्यश्च मदने, चक्रपादपः पारिभद्रकः ।
भद्रदारु दुकिलिमं पीतदारु च दारु च ॥ ५३ ॥
पूतिकाष्ठं च सप्त स्युर्देवदारुण्यथ द्वयोः ।
पाटलिः पाटला-ऽमोघा काचस्थाली फलेरुहा ॥५४॥

---

(१) एकादश—एरण्डस्य । ['अरण्ड' 'रेडी'] ।
(२) 'जाँटी' इत्याख्यस्यैकम् । [छोंकरा-जाटी] ।
(३) त्रीणि—'जाँट' इत्याख्यस्य ।
(४) मदनवृक्षस्य षट् । [मैनफलाख्यवृक्षस्य] ।
(५) अष्टौ देवदारुवृक्षस्य । [देवदार] ।
(६) सप्त 'पाडलि' इत्याख्यस्य । तत्र पाटलिः द्वयोः= स्त्रीपुंसयोः । ['कुबेराक्षी' 'पाडलि'] ।

Dr. Urmilā Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृष्णवृन्ता कुबेराक्षी, श्यामा तु महिलाह्वया ।
लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली ।५५।
विष्वक्सेना गन्धफली कारम्भा प्रियकश्च सा ।
मण्डूकपर्ण-पत्रोर्ण-नट-कट्वङ्ग-दुण्डुकाः ॥ ५६ ॥
स्योनाक-शुकनास-र्क्ष-दीर्घवृन्त-कुटन्नटाः ।
शोणकश्चाऽरलौ, तिष्यफला त्वामलकी त्रिषु ॥५७॥
अमृता च वयस्था च, त्रिलिङ्गस्तु विभीतकः ।
नाऽक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः ॥५८॥
अभया त्वव्यथा पथ्या कायस्था पूतनाऽमृता ।
हरीतकी हैमवती चेतकी श्रेयसी शिवा ॥५९॥

---

(१) द्वादश प्रियङ्गुवृक्षस्य । ['मालकांगुनी']। 'प्रियकश्च सः' पा० ।

(२) द्वादश स्योनाकस्य । ['सोनापाठा'] ।

(३) चत्वारि 'आंवला' इत्याख्यस्य वृक्षस्य । तत्र आमलकी-त्रिषु । [आँवला]

(४)'बहेड़ा'इत्याख्यस्य वृक्षस्य । तत्र बिभीतकः-त्रिलिङ्गः ।

(५) एकादश हरीतक्याः । [हर्रे] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पीतद्रुः सरलः पूतिकाष्ठं चाऽर्थं द्रुमोत्पलः ।
कर्णिकारः परिव्याधे, लकुचो लिकुचो डहुः ॥६०॥
पनसः कण्टकिफलो, निचुलो हिज्जलोऽम्बुजः ।
काकोदुम्बरिका फल्गुर्मलयूर्जघनेफला ॥६१॥
अरिष्टः सर्वतोभद्र-हिङ्गुनिर्यास-मालकाः ।
पिचुमन्दश्च निम्बेऽर्थं पिच्छिलाऽगुरुशिंशपा ॥६२॥
कपिला भस्मगर्भा सा, शिरीषस्तु कपीतनः ।

(१) त्रीणि–सरलस्य ['चीड़' 'देवदार'] ।
(२) कर्णिकारस्य त्रीणि । ['कठचम्पा' 'कर्णिकार'] ।
(३) त्रीणि 'बड़हर' इत्याख्यस्य ।
(४) द्वे 'कटहर' इत्याख्यस्य ।
(५) त्रीणि स्थलवेतसस्य । समुद्रफलस्येत्यन्ये । [स्थलवेत] ।
(६) चत्वारि–'कठूमर' इत्याख्यस्य । तत्र-मलपूः–स्त्रियाम् ।
मलयूरपि क्वचित्पठ्यते ।
(७) निम्बस्य षट्–['नीम'] ।
(८) 'सीसम' इत्याख्यवृक्षस्य त्रीणि । [सीसों]
(९) एकं कपिलवर्णायाः पिच्छिलायाः । [सीसम का भेद]
(१०) 'सिरस'–इत्याख्यस्य त्रीणि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भण्डिलोऽप्यथ चाम्पेयश्चम्पको हेमपुष्पकः ॥६३॥
एतस्य कलिका गन्धफली स्यादथ केसरे ।
बकुलो, वञ्जुलोऽशोके, समौ करक-दाडिमौ ॥६४॥
चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः ।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥६५॥
श्रीपर्णमग्निमन्थः स्यात्कणिका गणिकारिका ।
जयाऽथ कुटजः शक्रो वत्सको गिरिमल्लिका ॥६६॥
एतस्यैव कलिङ्गे-न्द्रयव-भद्रयवं फले ।

---

(१) त्रीणि–'चम्पा' इत्याख्यस्य ।
(२) एकं चम्पककलिकायाः । ['चम्पाकी कली'] ।
(३) 'मौलसिरी' इत्याख्यस्य द्वे ।
(४) द्वे अशोकस्य । ['अशोक'] ।
(५) द्वे दाडिमस्य । ['अनार'] ।
(७) पञ्च 'अरणी' इत्याख्यस्य ।
(८) पञ्च-'अगेथू' इत्याख्यस्य।दशापि अग्निमन्थपर्याया इत्येके।
(९) कुटजस्य चत्वारि ['कुरैया'] ।
(१०) त्रीणि कुटजबीजस्य ['इन्द्रजौ'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कृष्णपाकफला-ऽऽविश्न-सुषेणाः करमर्दके ॥६७॥
[2]कालस्कन्धस्तमालः स्यात्तापिच्छोऽप्यथ[3] सिन्दुकः ।
सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि ॥६८॥
[4]वेणी खरा गरी देवताडो जीमूत इत्यपि ।
श्रीहस्तिनी तु भूरुण्डी, तृणशून्यं तु मल्लिका ॥६९॥
भूपदी शीतभीरुश्च, सैवाऽऽस्फोता वनोद्भवा ।
शेफालिका तु सुवहा निर्गुण्डी नीलिका च सा ॥७०॥
सितोऽसौ श्वेतसुरसा भूतवेश्यथ [10]मागधी ।

---

(१) चत्वारि करमर्दस्य । ['करौंदा']
(२) त्रीणि तमालवृक्षस्य । [तमाल]
(३) पञ्च—'निर्गुण्डी' इत्याख्यातस्य । [गोरखमुण्डी] ।
(४) पञ्च देवतालस्य । [देवताड]
(५) द्वे भूरुण्ड्याः । [भूरुण्डी]
(६) चत्वारि मल्लिकायाः [बेला] ।
(७) एकं वनमल्लिकायाः । [वनबेला]
(८) चत्वारि शेफालिकायाः । ['नेवारी'] ।
(९) श्वेतनिर्गुण्ड्याः [सफेद निर्गुण्डी] ।
(१०) चत्वारि यूथिकायाः । ['जूही'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गणिका यूथिकाऽम्बष्ठा, सा[1] पीता हेमपुष्पिका ॥७१॥
अतिमुक्तः[2] पुण्ड्रकः स्याद्वासन्ती[3] माधवी लता ।
सुमना मालती जातिः, [4]सप्तला नवमालिका ॥७२॥
[5]माघ्यं कुन्दं, [6]रक्तकस्तु बन्धूको बन्धुजीवकः ।
[7]सहा कुमारी तरणिर्म्लानस्तु महासहा ॥७३॥
तत्र[8] शोणे कुरबकस्तत्र[10] पीते कुरण्टकः ।

---

(१) पीतयूथिकायाश्चत्वारि । ['पीली जूही'] ।
(२) अतिमुक्तकाख्यस्य पञ्च । [बासन्तीलता-कुन्दभेद] ।
(३) पञ्च जातेः । तत्र सुमनःशब्दः सान्तः स्त्रियाम् । ['चमेली'] ।
(४) नवमालिकाया द्वे । [शेफालिका]
(५) कुन्दस्य द्वे । [कुन्द] ।
(६) बन्धुजीवकस्य त्रीणि । ['दुपहरिया'] ।
(७) त्रीणि कुमार्याः । ['घीकुआर'-'ग्वारपाठा'] ।
(८) द्वे 'कटसरैया' इत्याख्यस्य ।
(९) एकं 'लाल कटसरैया' इत्याख्यस्य । ।
(१०) एकं-पीतपुष्पाया महासहायाः । ['पीली कटसरैया']

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]नीला झिण्टी द्वयोर्नाणा दासी चार्त्तगलश्च सा ७४
सैरेयकस्तु झिण्टी स्यात्[3]तस्मिन् कुरवकोऽरुणे ।
पीता कुरण्टको झिण्टी तस्मिन् सहचरी द्वयोः ७५
ओण्ड्रपुष्पं जपापुष्पं, [6]वज्रपुष्पं तिलस्य यत् ।
[7]प्रतिहास-चतप्रास-चण्डात-हयमारकाः ॥७६॥
करवीरे, [8]करीरे तु क्रकर-ग्रन्थिलावुभौ ।
उन्मत्तः कितवो धूर्तो धत्तूरः कनकाह्वयः ॥ ७७ ॥

---

(१) त्रीणि नीलझिण्टिकायाः [नीलझिण्टी]।
(२) झिण्टीसामान्यस्य द्वे [झिण्टी]।
(३) एकं रक्तकुरण्टकस्य [लाल कुरण्ट]।
(४) द्वे पीतकुरण्टकस्य [पीला कुरण्ट]। तत्र सहचरी-स्त्रीपुंसयोः।
(५) द्वे जपापुष्पस्य ['ओडहुल']।
(६) एकं तिलकपुष्पस्य [तिलपुष्प]।
(७) पञ्च करवीरस्य ['कनेर']।
(८) करीरस्य त्रीणि ['करील—कैर']।
(९) धत्तूरस्य सप्त नामानि। [धतूरा के ७ नाम]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मातुलो मदनश्चाऽस्य[1] फले मातुलपुत्रकः ।
फलपूरो[2] बीजपूरो रुचको मातुलुङ्गके ॥ ७८ ॥
समीरणो[3] मरुवकः प्रस्थपुष्पः फणिज्जकः ।
जम्बीरोऽप्यथ[4] पर्णासे कठिञ्जर-कुठेरकौ ॥ ७९ ॥
सिते-ऽर्जको[5]ऽत्र, पाठी[6] तु चित्रको वह्निसञ्ज्ञकः ।
अर्काह्व[7]-वसुका-ऽऽस्फोत-गणरूप-विकीरणाः ॥ ८० ॥
मन्दारश्चाऽर्कपर्णऽत्र शुक्लेऽलर्क-प्रतापसौ ।

---

(१) धत्तूरफलस्यैकम् । [धतूरे के फल का नाम] ।

(२) चत्वारि मातुलुङ्गस्य । [बिजौरा नींबू] । केचित्तु-आद्यद्वयं बीजपूरस्य, अन्त्यद्वयं मातुलुङ्गस्येत्याहुः ।

(३) पञ्च मरुवकस्य ['मरुवा' का ५ नाम] ।

(४) त्रीणि-पर्णासस्य । [मरुवा का भेद,अर्जक,बनतुलसी]

(५) एकं श्वेतपर्णासस्य ['सफेद बबरी' 'बनतुलसी' 'मरुवा का भेद'] ।

(६) चित्रकस्य त्रीणि ['चीतावृक्ष' 'चित्रक'] ।

(७) सप्त अर्कस्य ['आक'–'मदार'] ।

(८) द्वे श्वेतार्कस्य । [श्वेत आक] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिवमल्ली[1] पाशुपत एकाष्ठीलो बुको वसुः ॥८१॥
वन्दा[2] वृक्षादनी वृक्षरुहा जीवन्तिकेत्यपि ।
वत्सादनी[3] छिन्नरुहा गुडूची तन्त्रिकाऽमृता ॥८२॥
जीवन्तिका सोमवल्ली विशल्या मधुपर्ण्यपि ।
मूर्वा[4] देवी मधुरसा मोरटा तेजनी स्रवा ॥ ८३ ॥
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ।
पाठा[5]ऽम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी रसा ॥८४॥
एकाष्ठीला पापचेली प्राचीना वनतिक्तिका ।

---

(१) पञ्च–'गुल्मा' इत्याख्यस्य—'बक'पुष्पस्येत्येके । अर्कभेदस्येत्यन्ये । [आक का भेद] 'बक' इत्यपि नाम । क्वचित्तु-तथैव पाठः ।

(२) चत्वारि वृक्षोपरिजातस्य लता–(वृक्षा)न्तरस्य–'वन्दा' इत्याख्यातस्य [बन्दा] ।

(३) नव गुडूच्याः । [गुडच] ।

(४) दश–मूर्वायाः । स्रवा इति पाठः । स्रुवेत्यपि क्वचित् पाठः । ['मूर्वा' 'चुरनहार' 'मुरहरी' का १० नाम] ।

(५) दश–पाठायाः । [पाठा-'पाढ' का १० नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कटुः[1] कटम्भरा-ऽशोकरोहिणी कटुरोहिणी ॥ ८५ ॥
मत्स्यपित्ता कृष्णभेदी चक्राङ्गी शकुलादनी ।
आत्मगुप्ता[2]-ऽजडा-व्यण्डा कण्डूरा प्रावृषायणी ॥८६॥
ऋष्यप्रोक्ता शूकशिम्बिः कपिकच्छुश्च मर्कटी ।
चित्रोपचित्रा[3] न्यग्रोधी द्रवन्ती शम्बरी वृषा ॥८७॥
प्रत्यक्श्रेणी सुतश्रेणी रण्डा मूषिकपर्ण्यपि ।
अपामार्गः[4] शैखरिको धामार्गव-मयूरकौ ॥८८॥
प्रत्यक्पर्णी कीशपर्णी किणिही खरमञ्जरी ।
हञ्जिका[5] ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ॥८९॥
अङ्गारवल्ली बालेय-शाक-वर्वर-वर्द्धकाः ।

---

(१) अष्ट कटुरोहिण्याः । 'कटुंवरा' पा० । ['कुटकी'] ।
(२) नव मर्कट्याः । 'कण्डुरा'ऽपि । ['केवाँच' के ९ नाम]
(३) दश मूषिकपर्ण्याः [मूसाकर्णी के १० नाम] ।
(४) अष्टावपामार्गस्य । 'खरमञ्जरि' रित्यपि पाठः । ['अपामार्ग' 'ओंगा'] ।
(५) नव भार्ग्याः ['फञ्जी'] 'फञ्जिका' इति पा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ॥९०॥
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ।
यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ॥९१॥
रोदनी कच्छुराऽनन्ता समुद्रान्ता दुरालभा ।
पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिपर्णिका ॥९२॥
क्रोष्टुविन्ना सिंहपुच्छी कलशिर्धावनिर्गुहा ।
निदिग्धिका स्पृशी व्याघ्री बृहती कण्टकारिका ॥९३॥
प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि ।
नीली कोला क्लीतकिका ग्रामीणा मधुपर्णिका ॥९४॥
रञ्जनी श्रीफली तुत्था द्रोणी दोला च नीलिनी ।

---

(१) नव मञ्जिष्ठायाः 'भाण्डीरी' इत्यपि । ['मजीठ'] ।
(२) दश धन्वयासस्य । ['जवासा' के १० नाम]
(३) नव पृश्निपर्ण्याः [['पिठवन' के ९ नाम] ।
(४) दश कण्टकारिकायाः । ['भटकटया' 'सत्यानाशी' 'भडभाड' के १० नाम] ।
(५) एकादश नील्याः । [नील के ११ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अवल्गुजः[1] सोमराजी सुवल्लिः सोमवल्लिका ॥९५॥
कालमेषी कृष्णफला वाकुची पूतिफल्यपि ।
कृष्णोपकुल्या[2] वैदेही मागधी चपला कणा ॥९६॥
उषणा पिप्पली शौण्डी कोलाऽथ[3] करिपिप्पली ।
कपिवल्ली कोलवल्ली श्रेयसी वशिरः पुमान् ॥९७॥
चव्यं[4] तु चविकं, काकचिञ्चा[5]-गुञ्जे तु कृष्णला ।
पलङ्कषा[6] त्विक्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः ॥९८॥

---

(१) अष्टौ बाकुच्याः [बागची के ८ नाम] ।

(२) दश पिप्पल्याः । [छोटी एवं बड़ी पीपल के १० नाम] ।

(३) पञ्च–गजपिप्पल्याः । [चव्य फल, गज पीपल-के ५ नाम] ।

(४) द्वे चव्यस्य । [चव्य लता के २ नाम] । केचित्तु 'चव्यञ्च चविक'मिति पठन्तो गजपिप्पल्या एवेदं नाम द्वयमित्याहुः । तदुक्तं–'चविकायाः फलं प्राज्ञैः कथिता गजपिप्पली' इति निघण्टुः ।

(५) त्रीणि गुञ्जायाः । 'काकचिञ्ची' इति पाठान्तरम् । ['चिर्मी'–घोंघची के ३ नाम]

(६) सप्त गोक्षुरकस्य ['गोखरू' के ७ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ।
विश्वा[1] विषा प्रतिविषाऽतिविषोपविषाऽरुणा ॥९९॥
शृङ्गी महौषधं चाऽर्थे क्षीरावी दुग्धिका[2] समे ।
शतमूली[3] बहुसुताऽभीरुरिन्दीवरी वरी ॥१००॥
ऋष्यप्रोक्ताऽभीरुपत्त्री-नारायण्यः शतावरी ।
अहेरुरर्थे पीतद्रु-कालेयक-हरिद्रवः ॥१०१॥
दार्वी पचम्पचा दारुहरिद्रा पर्जनीत्यपि ।
वचोग्रगन्धा षड्ग्रन्था[4] गोलोमी शतपर्विका[5] ॥१०२॥
शुक्ला[6] हैमवती, वेद्यमातृ-सिंह्यौ तु वाशिका ।
वृषोऽटरूषः सिंहास्यो वासको[7] वाजिदन्तकः ॥१०३॥

---

(१) अष्टावतिविषायाः । ['अतीस' के ८ नाम] ।
(२) द्वे दुग्धिकायाः । [छोटी-बडी दुद्धी के २ नाम] ।
(३) दश शतमूल्याः । ['शतावरी' के १० नाम] ।
(४) सप्त दारुहरिद्रायाः । ['दारुहल्दी' के ७ नाम] ।
(५) पञ्च वचायाः । ['बच' के ५ नाम] ।
(६) एकं श्वेतवचायाः । ['सफेद बच'] ।
(७) अष्टौ वासकस्य ['अडूसा' के ८ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आस्फोटा[1] गिरिकर्णी स्याद्विष्णुक्रान्ता-ऽपराजिता ।
इक्षुगन्धा[2] तु काण्डेक्षु-कोकिलाक्षे-क्षुर-क्षुराः ॥१०४॥
शालेयः[3] स्याच्छीतशिवश्छत्रा मधुरिका मिसिः ।
मिश्रेयोऽप्यथ सीहुण्डो[4] वज्रद्रुः स्नुक्स्नुही गुडा१०५
समन्तदुग्धाऽथो वेल्लममोघा[5] चित्रतण्डुला ।
तण्डुलश्च कृमिघ्नश्च विडङ्गं पुंनपुंसकम् ॥१०६॥
बला[6] वाट्यालकी, घण्टारवा[7] तु शणपुष्पिका ।

---

(१) विष्णुक्रान्तायाश्चत्वारि । 'आस्फोता' इत्यपि नाम । स्वामी तु वासकस्यैवेमे पर्याया इति मन्यते । ['विष्णुक्रान्ता',-श्वेत एवं नीली 'कोयल'-के ४ नाम] ।

(२) कोकिलाक्षस्य पञ्च । ['तालमखाना' के ५ नाम] ।

(३) षट् मधुरिकायाः । ['सोंफ के ६ नाम] ।

(४) षट्-सेहुण्डस्य ['थूहर' के ६ नाम] ।

(५) षट्-विडङ्गस्य । 'तण्डूलः' 'तन्दूलः' इत्यपि पाठः । [वायविडंग के ६ नाम] ।

(६) द्वे बलायाः ['खिरेंटी'-बरिआरा' के २ नाम] ।

(७) द्वे शणपुष्प्याः ['बन का शण' 'घण्टा' 'झुनझुनिया' 'पटशण' 'सनई, 'शणपुष्पी' के २ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च ॥१०७॥
सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत् ।
त्रिभण्डी रोचनी, [3]श्यामा-पालिन्द्यौ तु सुषेणिका ॥
काला मसूरविदला-ऽर्धचन्द्रा कालमेषिका ।
[4]मधुकं क्लीतकं यष्टिमधुकं मधुयष्टिका ॥१०९॥
विदारी क्षीरशुक्लेक्षुगन्धा क्रोष्ट्री च या[ऽ]सिता ।
[5]अन्या क्षीरविदारी स्यान्महाश्वेत-र्षगन्धिका ॥११०॥

---

(१) पञ्च द्राक्षायाः ['दाख' 'किसमिस']।
(२) सप्त 'सफेद निसोथ' इति ख्यातायाः ।
(३) सप्त 'काली निसोत' इति प्रसिद्धस्य ।
(४) चत्वारि मधुकस्य । ['मुलेठी' के ४ नाम] ।
(५) चत्वारि शुक्लाया विदार्याः । 'कृष्णाया' इत्येके । [श्वेत या काला 'विदारीकन्द' 'बिलैया कन्द'] ।

(६) त्रीणि कृष्णविदार्याः । शुक्लाया वा । शुक्लाया इति–तु दीक्षिताः । [शुक्ल कृष्ण या 'भूमिकूष्माण्ड' 'भुई कुम्हड़ा' सफेद 'बिलैयाकन्द, या काला बिलैयाकन्द'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लाङ्गली शारदी तोयपिप्पली शकुलादनी ।
खराश्वा कारवी दीप्यो मयूरो लोचमस्तकः ॥१११॥
गोपी श्यामा शारिवा स्यादनन्तोत्पलशारिवा ।
योग्यमृद्धिः सिद्धिलक्ष्म्यौ, वृद्धेरप्याह्वया इमे ११२
कदली वारणबुसा रम्भा मोचा-शुमत्फला ।
काष्ठीला, मुद्गपर्णी तु काकमुद्गा सहेत्यपि ११३
वार्ताकी हिङ्गुली सिंही भण्टाकी दुष्प्रधर्षणी ।
नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली ११४

---

(१) चत्वारि शाकभेदस्य जलपिप्पल्याख्यस्य ['जलपीपल']
(२) पञ्च मयूरशिखायाः ['मोरशिखा'] ।
(३) पञ्च शारिवायाः ['गोरी सर'-'काली सर'-'साड']।
(४) चत्वारि ऋद्धेः । तत्र योग्यं क्लीबे । ['ऋद्धि']
(५) एतान्येव पञ्च वृद्ध्याख्यौषधेः । ['वृद्धि']
(६) षट्-कदल्याः ['केला'] ।
(७) त्रीणि मुद्गपर्ण्याः [मुंगौनी] ।
(८) पञ्च-भण्टाक्याः । 'दुष्प्रधर्षिणी'त्यपि ['बैंगन'-'भंटा]।
(९) नव रास्नायाः । ['रासना'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नकुलेष्टा भुजङ्गाक्षी छत्राकी सुवहा च सा ।
[1]विदारिगन्धा-ऽशुमती सालपर्णी स्थिरा ध्रुवा ११५
तुण्डिकेरी समुद्रान्ता कार्पासी बदरेति च ।
भारद्वाजी तु सा वन्या, शृङ्गी तु ऋषभो वृषः ११६
गोङ्गेरुको नागबला झषा हस्वगवेधुका ।
धामार्गवो घोषकः स्यान्महाजालो स पीतकः ११७
[5]ज्योत्स्नी पटोलिका जाली, नादेयी भूमिजम्बुका ।

---

(१) पञ्च शालपर्ण्याः [शालपर्णी] ।

(२) चत्वारि कार्पास्याः ['कपास'–'रूई'] ।

(३)वनकार्पास्या एकम् । ['नर्मा बाडी'कपास का भेद]।

(४) त्रीणि शृङ्ग्याः । ['काकडासिंगी'] ।

(५) चत्वारि नागबलायाः । ['गंगेरण' 'ककही' 'नागबला'] । (६) द्वे घोषकस्य [श्वेत पुष्प 'नेनुआ की बेल' और 'नेनुआ'] ।

(७) पीतघोषवल्ल्या एकम् । ['घीया तोरई' तोरूँ'] ।

(८) त्रीणि 'कडुवी तोरई' 'वनतोरई' इति प्रसिद्धायाः ।

(९) द्वे भूमिजम्बुकायाः । ['छोटी जामुन' 'फरेंदा जामुन'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्याल्लाङ्गलिक्यग्निशिखा, [2]काकाङ्गी काकनासिका ॥
[3]गोधापदी तु सुवहा, [4]मुसली तालमूलिका ।
[5]अजशृङ्गी विषाणी स्याद्, गोजिह्वा[6]दार्विके समे ११९
[7]ताम्बूलवल्ली ताम्बूली नागवल्ल्यप्यथ द्विजा ।
हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी ॥१२०॥
[8]एलावालुकमैलेयं सुगन्धि हरिवालुकम् ।
बालुकं चाथ [9]पालङ्क्यां मुकुन्दः कुन्द-कुन्दुरू ॥१२१॥

---

(१) द्वे लाङ्गल्याः ['कलिहारी'] ।

(२) द्वे काकजङ्घायाः ['काकजंघा' 'कौवाठोठी' 'कागा रोटी'] । (३) द्वे हंसपद्याः ['हंसपदी'] ।

(४) द्वे 'मुसली'ति ख्यातायाः ।

(५) द्वे अजशृङ्ग्याः । ['मेढासिंगी'] ।

(६) द्वे गोजिह्वायाः ['गोभी'] । 'दर्विके' इत्यपि पाठः ।

(७) त्रीणि 'नागरवेल' इत्याख्यातस्य ['नागर पान'] ।

(८) षट् हरेणुकायाः । ['संभालू के बीज'] ।

(९) पञ्च वालुकस्य ['एलवा'] । (१०) चत्वारि 'कुन्दरू' 'रूमी मस्तङ्गी' इत्याख्यस्य । सल्लकीनिर्यासस्य इति तु परे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वोलं हीबेर-बर्हिष्ठो-दीच्यं केशा-ऽम्बु-नाम च ।
कोलानुसार्य-वृद्धा-ऽश्मपुष्प-शीतशिवानि तु ॥१२२॥
शैलेयं, तालपर्णी तु दैत्या गन्धकुटी सुरा ।
गन्धिनी, गजभक्ष्या तु सुवहा सुरभी रसा ॥१२३॥
महेरणा कुन्दुरुकी सल्लकी ह्लादिनीति च ।
अग्निज्वाला-सुमिक्षे तु धातकी धातृपुष्पिका ॥१२४॥
पृथ्वीका चन्द्रबालैला निष्कुटिर्बहुलाऽथ सा ।
सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी त्रिपुटा त्रुटिः ॥१२५॥
व्याधिः कुष्ठं पारिभाव्यं व्याप्यं पाकलमुत्पलम् ।

---

(१) पञ्च हीबेरस्य ['नेत्रवाला']।

(२) पञ्च शैलेयस्य, न तु शिलाजतुनः। ['छडीला' 'पत्थर फूल']। (३) पञ्च सुरायाः। ['सुगन्ध-सुरा']।

(४) अष्टौ सल्लक्याः ['सलई']।

(५) चत्वारि धातक्याः ['धाय']।

(६) पञ्चैलायाः ['बड़ी एलायची' के ५ नाम]।

(७) पञ्च–सूक्ष्मैलायाः [छोटी इलायची के ५ नाम]।

(८) षट्–कुष्ठस्य ['कूठ' 'सुगन्धकूठ'] अत्र 'वाप्य'–मित्यपि पठन्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शङ्खिनी चोरपुष्पी स्यात्केशिन्यथ वितुन्नकः[2] ॥१२६॥
झटा-ऽमला-ऽज्झटा ताली शिवा तामलकीति च ।
प्रपौण्डरीकं[3] पुण्डर्यमथ तुन्नः[4] कुबेरकः[5] ॥१२७॥
कुणिः कच्छः कान्तलको नन्दिवृक्षोऽथ राक्षसी[6] ।
चण्डा घनहरी क्षेम-दुष्पत्र-गणहासकाः ॥१२८॥
व्याडायुधं[6] व्याघ्रनखं करजं चक्रकारकम् ।
शुषिरा[7] विद्रुमलता कपोताङ्घ्रिर्नटी नली ॥१२९॥
धर्मन्यञ्जनकेशी[8] च हनुर्हट्टविलासिनी ।

---

(१) शङ्खिन्यास्त्रीणि ['शङ्खपुष्पी' 'शङ्खाहुली'] ।
(२) सप्त भूम्यामलक्याः ['भुई आंवला'] ।
(३) द्वे पौण्डर्यस्य सुगन्धिद्रव्यस्य ['पुण्डरिया'] ।
(४) षट्-नन्दीवृक्षस्य ['तूणी'] । 'तुणिः कच्छः' पा० ।
(५) षट् चण्डायाः ['चोरक'] ।
(६) चत्वारि व्याघ्रनखस्य । 'व्यालायुध' मित्यपि । ['बघनखा'] ।
(७) पञ्च शुषिरायाः । 'मालकांगणी'त्याख्याताया इति व्याख्यासुधाकाराः ['नलिका' या 'मालकांगणी'] ।
(८) चत्वारि अञ्जनकेश्याः [अञ्जनकेशी] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शुक्तिः[1] वङ्गः खुरः कोलदलं नखमथाढकी[2] ॥१३०॥
काक्षी मृत्स्ना तुवरिका मृतालक-सुराष्ट्रजे ।
कुटन्नटं[3] दाशपुरं वानेयं परिपेलवम् ॥१३१॥
प्लव-गोपुर-गोनर्द-कैवर्ती-मुस्तकानि च ।
ग्रन्थिपर्णं[4] शुकं बर्हपुष्पं स्थौणेय-कुक्कुरे ॥१३२॥
मरुन्माला[5] तु पिशुना स्पृक्का देवी लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि ॥१३३॥
तपस्विनी[6] जटामांसी जटिला लोमशा मिसी ।
त्वक्पत्रमुत्कटं[7] भृङ्गं त्वचं चोचं वराङ्गकम् ॥१३४॥

---

(१) पञ्च नखाख्यद्रव्यस्य ['नखला']।
(२) षट् तुवर्याः । । ['अरहर' तूर']। मृत्तालके'त्यपि ।
(३) अष्टौ मुस्तकस्य [मोथा]।
(४) ग्रन्थिपर्णस्य पञ्च । ['थुनेर'-'कुकरौंधा' 'गठिवन']
(५) दश स्पृक्कायाः । ['असवर' 'कपूरी साग']।
(६) षट् जटामांस्याः [जटामांसी के ६ नाम]।
(७) त्वक्पत्रस्य षट् ['तज' 'दालचीनी' के ६ नाम]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्चूरको[1] द्राविडकः काल्पको वेधमुख्यकः ।
ओषध्यो[2] जातिमात्रे स्युरजातौ[3] सर्वमौषधम् ॥१३५॥
शाकाख्यं[4] पत्रपुष्पादि, तण्डुलीयो[5]ऽल्पमारिषः ।
विशल्या[6]ऽग्निशिखाऽनन्ता फलिनी शक्रपुष्प्यपि ॥
[7]स्यादक्षगन्धा छगलान्त्र्यावेगी वृद्धदारकः ।
जुङ्गो, ब्राह्मी तु मत्स्याक्षी वयस्था सोमवल्लरी १३७

---

(१) चत्वारि कर्चूरस्य ['कचूर'] ।

(२) पूर्वोक्तानि जातिमात्रविवक्षायामोषधय इत्युच्यन्ते। एषु ओषधिशब्दस्य प्रयोग इत्यर्थः ।

(३) द्रव्यमात्रविवक्षायान्तु एषु—औषध-शब्दप्रयोगः ।

(४) पत्रपुष्पादि—शाकाख्यम् । तदुक्तं—

"मूल[1]-पत्र[2]-करीरा[3] ग्र[4]-फल[5]-काण्डा[6] ऽधिरूढकम्[7] ।
त्वक्[8]पुष्पं[9] कवकञ्चैव[10] शाकं दशविधं स्मृतम् ॥" इति ।

(५) द्वे तण्डुलीयस्य । ['चौलाई का शाक'] ।

(६) पञ्च विशल्यायाः [इन्द्रपुष्पी] ।

(७) पञ्च 'विधारा' इत्याख्यस्य ।

(८) ब्राह्म्याश्चत्वारि । [ब्राह्मी के ४ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पटुपर्णी[1] हैमवती स्वर्णक्षीरी हिमावती ।
हयपुच्छी[2] तु काम्बोजी माषपर्णी महासहा ॥१३८॥
तुण्डिकेरी[3] रक्तफला बिम्बिका पीलुपर्ण्यपि ।
बर्बरा[4] कवरी तुङ्गी खरपुष्पाऽजगन्धिका ॥१३९॥
एलापर्णी[5] तु सुवहा रास्ना युक्तरसा च सा ।
चाङ्गेरी[6] चुक्रिका-दन्तशठा-ऽम्लष्ठा-म्ललोणिका १४०
सहस्रवेधी[7] चुक्रोऽम्लवेतसः शतवेध्यपि ।
नमस्कारी[8] गण्डकाली समङ्गा खदिरेत्यपि ॥१४१॥

---

(१) स्वर्णक्षीर्यश्चत्वारि । ['सत्यानाशी' 'मकोय' 'भडभाड' के ४ नाम]।

(२) चत्वारि माषपर्ण्याः [माषपर्णी के ४ नाम]।

(३) चत्वारि तुण्डिकेर्याः । 'तुण्डकेरी' पा० । [तुण्डिकेरी]।

(४) पञ्च खरपुष्पायाः । 'बर्बरी'त्यपि नाम ['बबरी']।

(५) चत्वारि एलापर्ण्याः । [एलापर्णी]।

(६) पञ्च अम्ललोण्याः [रास्ना 'चूक']।

(७) पञ्च चुक्रस्य । ['चूक'–विशेष, 'अमलवेत']।

(८) चत्वारि खदिरायाः । ['हाथा–जोड़ी']।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जीवन्ती[1] जीवनी जीवा जीवनीया मधुःस्रवा ।
कूर्चशीर्षो[2] मधुरकः शृङ्ग-ह्रस्वाङ्ग-जीवकाः ॥१४२॥
किरातितिक्तो[3] भूनिम्बोऽनार्यतिक्तोऽथ सप्तला[4] ।
विमला सातला भूरिफेना चर्मकषेत्यपि ॥ १४३ ॥
वायसोली[5] स्वादुरसा वयस्थाऽथ मकूलकः[6] ।
निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्यपि ॥१४४॥
अजमोदा[7] तूग्रगन्धा ब्रह्मदर्भा यवानिका ।
मूले पुष्कर-काश्मीर-पद्मपत्राणि पौष्करे[8] ॥ १४५ ॥

---

(१) जीवन्तिकायाः षट् ['जीवन्ती' अथवा 'लज्जालु']।
(२) जीवकौषधस्य पञ्च । [जीवक के ५ नाम]
(३) भूनिम्बस्य त्रीणि । [चिरायता] ।
(४) पञ्च सप्तलायाः ['सातला' 'थुहर' 'सेहुण्ड भेद'] ।
(५) त्रीणि वयस्थायाः । [ककोडी] ।
(६) पञ्च वज्रदन्त्याः । ['दन्तिका' 'दन्ती'] ।
(७) यवानीद्वयस्य द्वे द्वे नामनी । इमे चत्वारोऽपि शब्दाः पर्याया इत्येके । [अजवाइन] ।
(८) त्रीणि पुष्करमूलस्य । ['पोहकरमूल'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्यथाऽतिचरा पद्मा चारटी पद्मचारिणी।
कम्पिल्यः कर्कशश्चन्द्रो रक्ताङ्गो रोचनीत्यपि १४६
पुनाडस्त्वेडगजो दद्रुघ्न-श्चक्रमर्दकः।
पद्माटउरणाख्यश्च, पलाण्डुस्तु सुकन्दकः ॥१४७॥
तार्क्ष्य-दुर्द्रुमौ तत्र हरितेऽथ महौषधम्।
लशुनं गृञ्जना-ऽरिष्ट-महाकन्द-रसोनकाः ॥ १४८ ॥
पुनर्नवा तु शोथघ्नी, वितुन्नं सुनिषण्णकम्।
स्याद्वातकः शीतलोऽपराजिता शणपर्ण्यपि ॥१४९॥

---

(१) पद्म पद्मायाः [पद्माक]।
(२) पद्म रोचन्याः। [कबीला]।
(३) षट् चक्रमर्दस्य ['पवांड' 'चकवड़']।
(४) द्वे पलाण्डोः ['प्याज']।
(५) पलाण्डुभेदस्य द्वे। [प्याज का भेद]
(६) षट् लशुनस्य [लहसुन]।
(७) पुनर्नवाया द्वे। ['साँटी'-'गदहपुन्ना']।
(८) वितुन्नस्य द्वे। ['विसखपरा']।
(९) शतपर्ण्याश्चत्वारि ['पटशण']।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

पौराव्रताङ्घ्रिः कटभी पण्या ज्योतिष्मती लता ।
वार्षिकं त्रायमाणा स्यात्त्रायन्ती बलभद्रिका ॥१५०॥
विष्वक्सेनप्रिया गृष्टिर्वाराही बदरेत्यपि ।('बदरेति च')।
मार्कवो भृङ्गराजः स्यात्काकमाची तु वायसी ॥१५१॥
शतपुष्पा सितच्छत्रा-ऽतिच्छत्रा मधुरा मिसिः ।
अवाक्पुष्पी कारवी च, सरणा तु प्रसारिणी ॥१५२॥
तस्यां कटम्भरा राजबला भद्रबलेत्यपि। ('बलेति च')।
जनी जतूका रजनी जतुकृ-च्चक्रवर्तिनी ॥१५३॥

---

(१) पञ्च ज्योतिष्मत्याः । [मालकांगनी] ।
(२) चत्वारि त्रायमाणायाः । ['त्रायमाणा'] ।
(३) चत्वारि वाराहीकन्दस्य । ['सुथनी' 'वाराही कन्द'] ।
(४) द्वे भृङ्गराजस्य । ['भांगरा' 'भंगरैया'] ।
(५) द्वे काकमाच्याः । [मकोय] ।
(६) सप्त शतपुष्पायाः । ['सौंफ' या 'सोवा'] । केचित्तु—अन्त्यद्वयं 'अन्धाहुली'त्याख्यस्येत्याहुः ।
(७) पञ्च प्रसारण्याः । ['गन्धप्रसारणी' 'खींप'] ।
(८) षट्—चक्रवर्त्तिन्याः ['चक्रवत' 'चकवड़'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संस्पर्शाऽथ शेटी गन्धमूली षड्ग्रन्थिकेत्यपि ।
कर्चूरोऽपि पलाशोऽथ[1] कारवेल्लः[2] कठिन्लकः ॥१५४॥
सुषवी चाऽथ कुलकं[3] पटोलस्तिक्तकः पटुः ।
कूष्माण्डकस्तु कर्कारुरीर्वारुः[4] कर्कटी स्त्रियौ ॥१५५॥
इक्ष्वाकुः कटुतुम्बी स्याच्चुञ्च्यलाबूरुभे समे ।
चित्रा गवाक्षी गोडुम्बा, विशाला त्विन्द्रवारुणी ।
[10]अर्शोघ्नः सूरणः कन्दो, [11]गण्डीरस्तु समष्ठिला ।

(१) पञ्च कर्चूरस्य [कचूर] ।
(२) त्रीणि कारवेल्लस्य । [करेला] ।
(३) चत्वारि पटोलस्य ['परवल'] ।
(४) कूष्माण्डस्य द्वे । ['कोहड़ा' 'पेठा'] ।
(५) द्वे कर्कट्याः स्त्रियाम् । ['ककड़ी'] ।
(६) द्वे कटुतुम्ब्याः स्त्रियाम् । [गडतुम्बा, उसकी बेल] ।
(७) द्वे अलाब्वाः स्त्रियाम् ['तुम्बी'] ।
(८) द्वे चित्रायाः । कर्कटीभेदस्य ['जठेऊ ककड़ी'] ।
(९) द्वे इन्द्रवारुण्याः । [इन्द्रायण] ।
(१०) त्रीणि कन्दरस्य [सूरण] ।
(११) द्वे गण्डीरस्य ['गांडरदूर्वा' 'गडिनी'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कलम्ब्युपोदिकाऽस्त्री[1] तु मूलकं,[4] हिलमोचिका १५७
वास्तूकं,[5] शाकभेदाः स्युर्दूर्वा तु शतपर्विका[6] ।
सहस्रवीर्या-भार्गव्यौ रुहाऽनन्ताऽथ सा[7] सिता १५८
गोलोमी शतवीर्या च गण्डाली शकुलाक्षकः ।
कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम् ॥१५९॥
स्याद्भद्रमुस्तको गुन्द्रा,[10] चूडाला चक्रलो-चटा ।
वंशे[11] त्वक्सार-कर्मार-त्वचिसार-तृणध्वजाः ॥१६०॥

(१) एकं 'करेमु' इत्याख्यस्य । [करेमु का साग] ।
(२) एक 'पोई' इत्याख्यस्य । [पोई] ।
(३) एकं मूलकस्य स्त्रियाम् । [मूली] ।
(४) एकं हिलमोचिकायाः । [हिलमोचक] ।
(५) एकं वास्तुकस्य [बथुवा] । कलम्ब्याद्याः शाकभेदाः ।
(६) षट् दूर्वायाः । [दूब] ।
(७) चत्वारि शुक्लदूर्वायाः ['श्वेत दूब'] ।
(८) द्वे मुस्तकस्य [मोथा] ।
(९) द्वे मुस्तकभेदस्य ['नागरमोथा'] ।
(१०) त्रीणि मुस्ताविशेषस्य । [मोथा विशेष] ।
(११) दश वेणोः [बांस] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शतपर्वा यवफलो वेणु-मस्कर-तेजनाः ।
वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः ॥१६१॥
ग्रन्थिर्ना पर्व-परुषी, गुन्द्रस्तेनजकः शरः ।
नडस्तु धमनः पोटगलोऽथो काशमस्त्रियाम् ॥१६२॥
इक्षुगन्धा पोटगलः, पुंसि भूम्नि तु बल्वजाः ।
रसाल इक्षुस्तद्भेदाः पुण्ड्र-कान्तारकादयः ॥१६३॥
स्याद्वीरणं वीरतरं, मूलेऽस्योशीरमस्त्रियाम् ।

(१) वातपूर्णवेणूनामेकम् । [वायु से पूर्ण जंगली बांस] ।
(२) वंशादिग्रन्थेस्त्रीणि । तत्र ग्रन्थिः पुंसि, पर्व नान्तं नपुंसके । परुः षान्तं क्लीबे । ['बांस का गांठ' 'पेरुवा'] ।
(३) त्रीणि शरस्य ['कूँचा' 'सर'] ।
(४) त्रीणि नडस्य [नरसल 'डंठल'] ।
(५) त्रीणि काशस्य । तत्र–काशोऽस्त्रियाम् । [कास] ।
(६) पुंसि बहुत्वे बल्वजशब्दः । [बगई] ।
(७) द्वे इक्षोः [ईख] ।
(८) इक्षुभेदानामेकैकम् ['पौंडा'] ।
(९) द्वे तृणभेदस्य । [गांडर] ।
(१०) दशोशीरस्य वीरणमूलस्य । ['खस'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभयं नलदं सेव्यममृणालं जलाशयम् ॥१६४॥
लामज्जकं लघुलय-मवदाहे-ष्टकापथे ।
[1]नडादयस्तृणं गर्मुच्छयामाकप्रमुखा अपि ॥१६५॥
[2]अस्त्री कुशं कुथो दर्भः पवित्रमथ कत्तृणम् ।
पौर-सौगन्धिक-ध्याम-देवजग्धक-रौहिषम् ॥१६६॥
छत्त्रा-ऽतिच्छत्त्र-पालघ्नौ, मालातृणक-भूस्तृणौ ।
शष्पं बालतृणं, [6]घासो यवसं, तृणमर्जुनम् ॥१६७॥
तृणानां संहतिस्तृण्या, [9]नड्या तु नडसंहतिः ।

---

(१) नडादयः पूर्वोक्ता, नीवारगर्मुच्छायामाकादयश्च—तृणजातयः। [घास का भेद]।
(२) चत्वारि दर्भस्य ['डाभ' 'कुशा']।
(३) षट् रौहिषतृणस्य। ['रोहिष' लालतृण]।
(४) पञ्च जलजतृणभेदस्य। [जलज घासभेद]।
(५) द्वे नवतृणस्य। [नई घास]।
(६) द्वे घासस्य। [घास]।
(७) द्वे तृणमात्रस्य। ['घास-फूस']।
(८) एकं तृणसमूहस्य। [तृण समूह का नाम]।
(९) एकं नडसमूहस्य। ['डंठल का समूह' 'पूला']।

Dr. Urmila Sharma Collection, Varanasi

GC0. In Public Domain, Digitizagtion by eGangotri

तृणराजाह्वयस्तालो[1], नालिकेरस्तु[2] लाङ्गली ॥१६८॥
घोण्टा[3] तु पूगः क्रमुको[4] गुवाकः खपुरोऽस्य[5] तु।
फलमुद्वेगमेते च हिन्तालसहितास्त्रयः-॥१६९॥
खर्जूरः, केतकी, ताली, खर्जूरी च—तृणद्रुमाः।

❀ इति वनौषधिवर्गः ४ ॥ ❀

---

(१) द्वे तालस्य। [ताड]।
(२) द्वे नालिकेरस्य। [नारियल]।
(३) पञ्च पूगवृक्षस्य। [सुपारी का वृक्ष]।
(४) एकं—पूगफलस्य। [सुपारी]।
(५] एते नारिकेलादयस्त्रयो, हिन्तालेन चतुर्थेन सहिताः, एवं खर्जूरादयश्च चत्वारस्तृणजातय-इत्युच्यन्ते। [तृणजाति]।

❀ इति वनौषधिवर्गः ४ ॥ ❀

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ अथ सिंहादिवर्गः ❀

[1]सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः ।
[कण्ठीरवो मृगरिपुर्मृगदृष्टिर्मृगाशनः ।
पुण्डरीकः पञ्चनख-चित्रकाय-मृगद्विषः] ॥
[2]शार्दूलद्वीपिनौ व्याघ्रे, तरक्षुस्तु[3] मृगादनः ॥ १ ॥
[4]वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिः ।
दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि ॥२॥
[5]कपि-प्लवङ्ग-प्लवग-शाखामृग-बलीमुखाः ।
मर्कटो वानरः कीशो वनौका, अथ [6]भल्लुके ॥ ३ ॥

---

(१) षट्–सिंहस्य । अष्टौ कण्ठीरवाद्याः क्षेपकोक्ता अपि सिंहस्य । [सिंह के १४ नाम] ।

(२) त्रीणि व्याघ्रस्य । तत्र–द्वीपिशब्दो नान्तः । ['बाघ' 'बघेरा'] ।

(३) द्वे तरक्षोः ['तेन्दुवा' । 'हुण्डार'–इत्यस्येत्यन्ये] ।

(४) द्वादश सूकरस्य । ['सूअर'] । तत्र पोत्रि–घोणि–दंष्ट्रि–स्तब्धरोमाणो नान्ताः ।

(५) नव वानरस्य । तत्र वनौकःशब्दः सान्तः पुंसि । [बन्दर] । (६) चत्वारि भल्लूकस्य । ['भालू' 'रींछ'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ऋक्षा-ऽच्छभल्ल-भल्लूका, [1]गण्डके खड्ग-खड्गिनौ ।
[2]लुलायो महिषो वाहद्विष-त्कासर-सैरिभाः ॥ ४ ॥
स्त्रियां [3]शिवा भूरिमाय-गोमायु-मृगधूर्तकाः ।
मृगाल-वश्चक-क्रोष्टु-फेरु फेरव-जम्बुकाः ॥ ५ ॥
[4]ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक् ।
[5]त्रयो गौधार-गौधेर-गौधेया गोधिकात्मजे ॥ ६ ॥
[6]श्वावित्तु शल्यस्तं[7]ल्लोम्नि शलली शललं शलम् ।

(१) त्रीणि गण्डकस्य ['गैंडा'] तत्र–खड्गी नान्तः ।

(२) पञ्च महिषस्य । ['भसा'] । तत्र वाहद्विषत्–तान्तः ।

(३) दश जम्बूकस्य । [गीदड़] । तत्र–शिवा–स्त्रियाम् ।

(४) पञ्च मार्जारस्य [बिलाव, 'मंजार', बिल्ली का नाम] । तत्र–आखुभुक्–जान्तः पुंसि ।

(५) गौधेयस्य त्रीणि । ['घेरा' 'गोहटा' । काले नाग से गोह के गर्भ में उत्पन्न अत्यन्त भयङ्कर विषैला जन्तु, जिसके काटने पर मनुष्य कथमपि बच नहीं सकता है, तत्काल ही मर जाता है] । (६) द्वे शल्यस्य ['सेह'] ।

(७) शल्यरोम्णस्त्रीणि । तत्र–शलली स्त्रियाम् । [सेह का काँटा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वातप्रमीर्वातमृगः, कोकः ईहामृगो वृकः ॥ ७ ॥
मृगे कुरङ्ग-वातायु-हरिणा-ऽजिनयोनयः ।
ऐणेयमेण्याश्चर्माद्यमेणस्यैणमुभे त्रिषु ॥ ८ ॥
कदली कन्दली चीनश्चमूरु-प्रियकावपि ।
समूरुश्चेति हरिणा अमी अजिनयोनयः ॥ ९ ॥
कृष्णसार-रुरु-न्यङ्कु-रङ्कु-शम्बर-रौहिषाः ।
गोकर्ण-पृषतै-ण-र्श्य-रोहिताश्चमरो मृगाः ॥१०॥

---

(१) द्वे मृगभेदस्य पुंसि। [हवाकी ओर दौडनेवाला मृग]।

(२) त्रीणि वृकस्य । 'कोकस्त्वीहामृगः' पा० । [भेड़िया] ।

(३) पञ्च हरिणस्य [हरिण 'मृग'] ।

(४) एकं हरिणीचर्मादेः त्रिषु । [हरिणी का चमड़ा आदि] ।

(५) एकं हरिणचर्ममांसादेः त्रिषु । [हरिण का चमड़ा आदि] ।

(६) अजिनयोनि-हरिणभेदानामेकैकम् । [मृगचर्मोपयोगी नाना प्रकार के हरिणों का १-१ नाम] ।

(७) द्वादश मृगविशेषाणाम् । [हरिण विशेषों के १-१ नाम । 'शम्बर=बारहसिंगा' । 'रौहिष=रोज मृग'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गन्धर्वः शरभो रामः सृमरो गवयः शशः ।
इत्यादयो मृगेन्द्राद्या, गवाद्याः पशुजातयः ॥११॥
[अधोगन्ता तु खनको वृषः पुंध्वज उन्दुरः] ।
उन्दुरुर्मूषकोऽप्याखुर्गिरिकौ बालमूषिका ।
सरटः कृकलासः स्यान्मुसली गृहगोधिका ॥१२॥
लूता स्त्री तन्तुवायो-र्णनाभ-मर्कटकाः समाः ।
नीलङ्गुस्तु कृमिः, कर्णजलौकाः शतपद्युभे ॥१३॥

---

(१) उक्ताः—सिंहादयो मृगादयः, वक्ष्यमाणाः—गवादयश्च—पशुजाततः—पशवः । गन्धर्वादयो मृगजातयः । ['पशु' जाति नाम] ।

(२) प्रक्षिप्तैः पञ्चभिः सह त्रीणि मूषकस्य । ['चूहा'] ।

(३) स्वल्पमूषकजातेर्द्वे । [चुहिया] ।

(४) द्वे सरटस्य । ['किर्कोट' गिर्गिटान] ।

(५) द्वे मुसल्याः । गृहगोलिकाऽपि । ['छिपकली'—बिस्तोइया'] । (६) चत्वारि लूतायाः । ['मकड़ी'] ।

(७) द्वे नीलङ्गोः पुंसि । [सोनकीड़ा] ।

(८) द्वे कर्णजलौकायाः स्त्रियाम् । सा च सान्ताऽऽदन्ता वा । ['कंसला' कनखजूरा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृश्चिकः शूककीटः स्यादलि-द्रोणौ तु वृश्चिके ।
पारावतः कलरवः कपोतोऽथ शशादनः ॥१४॥
पत्त्री श्येन, उलूके तु वायसाऽराति-पेचकौ ।
[दिवान्धः कौशिको घूको दिवाभीतो निशाटनः] ।
व्याघ्राटः स्याद्भरद्वाजः, खञ्जरीटस्तु खञ्जनः ॥१५॥
लोहपृष्ठस्तु कङ्कः स्यादथ चाषः किकीदिविः ।
कलिङ्ग-भृङ्ग-धूम्याटा, अथ स्याच्छतपत्त्रकः॥१६॥

---

(१) द्वे वृश्चिकाख्यस्य ऊर्णादिभक्षकस्य भ्रमरभेदस्य ['ऊन का कीड़ा']। (२) त्रीणि वृश्चिकस्य। ['बिच्छू']। तत्र द्रुणोऽपि।
(३) त्रीणि पारावतस्य। [परेवा, 'कबूतर']।
(४) त्रीणि श्येनस्य। ['बाज'] तत्र पत्री नान्तः पुंसि।
(५) अष्टौ घूकस्य। ['उल्लू']।
(६) द्वे भारद्वाजस्य। ['भरदुआ']।
(७) द्वे खञ्जनस्य। ['खञ्जन']।
(८) द्वे कङ्कस्य। ['कङ्क' गृध्र विशेष, 'काँवला' 'कँकहड']।
(९) द्वे चाषस्य। ['चाष' 'नीलटांस']।
(१०) त्रीणि भृङ्गस्य [भौंरा। 'भृङ्ग' विशेष]।
(११) द्वे काष्ठकुट्टस्य। ['कटफोरा'-'खुडिया खाती']।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दार्वाघाटोऽथ सारङ्गः स्तोककश्चातकः समाः ।
कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ॥१७॥
चटकः कलविङ्कः स्यात्तस्य स्त्री चटका, तयोः- ।
पुमपत्ये चाटकैरः, स्त्र्यपत्ये चटकैव हि ॥१८॥
कर्करेटुः करेटुः स्यात्कृकण-क्रकरौ समौ ।
वनप्रियः परभृतः कोकिलः पिक इत्यपि ॥१९॥
[10]काके तु करटा-ऽरिष्ट-बलिपुष्ट-सकृत्प्रजाः ।

---

(१) त्रीणि चातकस्य । ['पपीहा'] ।
(२) चत्वारि कुक्कुटस्य । ['मुर्गा'] ।
(३) द्वे चटकस्य ['चिडा'] ।
(४) एकं चटकायाः । ['चिडी' 'गौरैया'] ।
(५) चटकपुमपत्यस्यैकम् । [चिडी का बच्चा] ।
(६) चटकस्य स्त्र्यपत्येऽपि-चटका एव । [चिडी की बच्ची] ।
(७) द्वे कर्करेटुपक्षिणः ['कोचरी'] ।
(८) द्वे कृकणस्य अशुभपक्षिभेदस्य । [कृकण, प्रायः रात में बोलने वाला अशुभ पक्षि विशेष] ।
(९) चत्वारि कोकिलस्य [कोयल] ।
(१०) त्रयोदश काकस्य । तत्र-चिरजीवीत्यपि । द्विकोऽपि । ['कौवा'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ध्वाङ्क्षा-ऽऽत्मघोष-परभृ-द्बलिभु-ग्वायसा अपि ॥२०॥
[स एव च चिरञ्जीवी चैकदृष्टिश्च मौकुलिः]।
द्रोण[1]काकस्तु काकोलो, दात्यूहः[2] कालकण्टकः।
आ[3]तायि-चिल्लौ, दा[4]क्षाय्य-गृध्रौ, कीर[5]-शुकौ समौ॥२१॥
[6]क्रुङ् क्रौञ्चोऽथ ब[7]कः कह्वः, पुष्करार्ह[8]स्तु सारसः।
कोक[9]श्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः ॥२२॥
[10]कादम्बः कलहंसः [11]स्यादुत्क्रोश-कुररौ समौ।

---

(१) द्वे द्रोणकाकस्य ['डोड-काक']।
(२) द्वे दात्यूहस्य। ['काका-तूआ']।
(३) द्वे चिल्लस्य। ['चील्ह']। तत्र आतायी नान्तः।
(४) द्वे गृध्रस्य। [गीध]।
(५) द्वे शुकस्य [सुग्गा]।
(६) द्वे क्रौञ्चपक्षिणः। क्रुङ्, कुञ्चौ, क्रुञ्चः। [क्रौंच]।
(७) द्वे बकस्य। [बगुला]।
(८) द्वे सारसस्य [सारस]।
(९) चत्वारि चक्रवाकस्य ['चकवा']।
(१०) द्वे कादम्बस्य। [बत्तक]।
(११) द्वे कुररस्य। ['कुरर' 'कुररी' पक्षी]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हंसास्तु[1] श्वेतगरुतश्चक्राङ्गा मानसौकसः ॥ २३ ॥
राजहंसास्तु[2] ते चञ्चुचरणैर्लोहितैः सिताः ।
मलिनैर्मल्लिकाक्षास्ते[3], धार्तराष्ट्राः[4] सितेतरैः ॥२४॥
शरारि-राटि-राडिश्च[5], बलाका[6] विसकण्ठिका ।
हंसस्य[7] योषिद्वरटा, सारसस्य[8] तु लक्ष्मणा ॥२५॥
जंतुका-ऽजिनपत्रा[9] [10]स्यात्परोष्णी तैलपायिका ।
[11]वर्वणा मक्षिका नीला, [12]सरघा मधुमक्षिका ॥२६॥

---

(१) चत्वारि हंसस्य [हंस के ४ नाम] ।
(२) एकं राजहंसस्य [राजहंस] ।
(३) एकं मलिनवर्णस्य हंसभेदस्य [हंसभेद] ।
(४) एकं कृष्णचञ्चुचरणस्य हंसविशेषस्य [हंस का भेद] ।
(५) त्रीणि 'आडि' इत्याख्यस्य ।
(६) द्वे बलाकायाः । विसकण्टकाऽपि । [बलाका] ।
(७) हंसस्त्रिया एकम् । [हंस की स्त्री–हंसी का नाम] ।
(८) सारसस्त्रिया एकम् । [सारसकी स्त्रीका नाम] ।
(९) द्वे चर्मचटकायाः ['चमचेड'] । (१०) द्वे ['चमगादड'] ।
(११) त्रीणि नीलमक्षिकायाः । [नीली मक्खी] ।
(१२) द्वे मधुमक्षिकायाः । ['मोमाखी' 'मधुमक्खी'

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पतङ्गिका पुत्तिका स्याद्दंशस्तु वनमक्षिका ।
[3]दंशी तज्जातिरल्पा स्याद्, गन्धोली वरटा द्वयोः ॥२७॥
भृङ्गारी झीरुका चीरी झिल्लिका च समा इमाः ।
समौ पतङ्ग-शलभौ, खद्योतो ज्योतिरिङ्गणः ॥२८॥
मधुव्रतो मधुकरो मधुलि-ण्मधुपा-ऽलिनः ।
द्विरेफ-पुष्पलिड्-भृङ्ग-षट्पद-भ्रमरा-ऽलयः ॥२९॥

'शहतकी मक्खी'] ।

(१) द्वे पतङ्गिकायाः । मक्षिकाभेदस्य 'तितली' त्याख्यस्य । ['पतङ्गा' 'फुद्दी' 'तितली'] ।

(२) वनमक्षिकाया द्वे । [वनमक्खी] ।

(३) मक्षिकाविशेषस्यैकम् ।['डंकवाली मक्खी' 'मच्छर'] ।

(४) द्वे वरटायाः । [बर्रे, 'भिरड'–टांटिया'] तत्र वरटा स्त्रीपुंसयोः । (५) चत्वारि झिल्लिकायाः । 'चीरुका' पाठा० । ['किसारी–झींगुर'] ।

(६) द्वे–पतङ्गस्य ['पतिङ्गा'] ।

(७) द्वे खद्योतस्य । ['पटबीजणा' 'जुगनू'] ।

(८) एकादश भ्रमरस्य । तत्र मधुलिट् हान्तः । एवं पुष्पलिट् । [काला-भौंरा, 'भ्रमर'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् ।
शिखावलः शिखी केकी मेघनादानुलास्यपि ॥३०॥
केका वाणी मयूरस्य, समौ चन्द्रक-मेचकौ ।
शिखा चूडा, शिखण्डस्तु पिच्छ-बर्हे नपुंसके ॥३१॥
खगे विहङ्ग-विहग-विहङ्गम-विहायसः ।
शकुन्ति-पक्षि-शकुनि-शकुन्त-शकुन-द्विजाः ॥ ३२ ॥

---

(१) नव मयूरस्य । तत्र—बर्हि-केकि-शिखण्डि-मेघनादाऽनुलासिनो नान्ताः । [मोरके ९ नाम] ।

(२) मयूरध्वनेरेकम् । [मोरकी ध्वनि, मोरकी आवाज] ।

(३) चन्द्रकस्य द्वे । [मोरकी पाँखका चन्दुवा । पाँखका चन्द्राकृति चिह्न] ।

(४) द्वे मयूरशिखायाः । [मोरकी शिखा, चोटीकी तरह खड़ा हुआ बालोंका गुच्छा] ।

(५) द्वे मयूरपिच्छस्य । ['मोरपांख'] ।

(६) सप्तविंशतिः पक्षिणाम् । तत्र—विहायाः सान्तः पुंसि । एवं नगौका अपि । पक्षि-वाजि-पतत्रि-पत्रिणो नान्ताः । 'पतति'—शब्द इकारान्तोऽपि । पतत्—पिल्सत्—गरुत्मच्छन्दास्तान्ताः । [पक्षीमात्र के २७ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पतत्रि-पत्रि-पतग-पत-त्पत्त्ररथा-ऽण्डजाः ।
नगौको-वाजि-विकिर-वि-विष्किर-पतत्त्रयः ॥ ३३ ॥
नीडोद्भवा गरुत्मन्तः पित्सन्तो नभसङ्गमाः ।
तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः ॥३४॥
तित्तिरिः कुक्कुभो लावो जीवञ्जीवश्चकोरकः ।
कोयष्टिक-ष्टिट्टिभको वर्त्तको वर्त्तिकादयः ॥३५॥
[2]गरुत्पक्षच्छदः पत्त्रं पतत्त्रञ्च तनूरुहम् ।
[3]स्त्री पक्षतिः पक्षमूलं, [4]चञ्चुस्त्रोटिरुभे स्त्रियौ ॥३६॥

---

(१) पक्षिजातिविशेषाणां नामानि । आदिना शारिकादयोऽपि ग्राह्याः । 'कोयष्टिष्टिट्टिभः कोकः क्रकरो वर्त्तिकादयः' । इति तु स्वामी पठति । [हारीत, 'मद्गु-कारण्डव-प्लव-'तीनों (जलचर पक्षी-विशेष), तीतर, कुक्कुभ ('मोड़ी','पिडकी'), लावक, जीवंजीव, चकोर, कोयष्टिक, टिटिहरी, वटेर, गोरैया, चिडिया, मैना, कोयल आदि पक्षि विशेषों का १-९ नाम] ।

(२) षट् पक्षाणाम् स्त्रियाम् । ['पांख' डैना] ।

(३) द्वे पक्षमूलस्य । तत्र पक्षतिः स्त्रियाम् । [बाजू] ।

(४) द्वे पक्षितुण्डस्य स्त्रियाम् । ['चोंच']

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]प्रैडीनो-ड्डीन-सण्डीनान्येताः खगगतिक्रियाः ।
[2]पेशी कोषो द्विहीनेऽण्डं, [3]कुलायो नीडमस्त्रियाम् ॥
पोतः[4] पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः ।
[5]स्त्रीपुंसौ मिथुनं द्वन्द्वं, [6]युग्मं तु युगलं युगम् ॥३८॥
[7]समूह-निवह-व्यूह-सन्दोह-विसर-व्रजाः ।
स्तोमौघ-निकर-व्रात-वार-सङ्घात-सञ्चयाः ॥ ३९ ॥
समुदायः समुदयः समवायश्चयो गणः ।

---

(१) पक्षिणां गतिविशेषाणामेकैकं नामधेयम् । [पक्षियों की उडान, गति विशेष का नाम] ।

(२) त्रीणि अण्डस्य–[अण्डा] । तत्र पेशी स्त्री । कोशः, कोषो वाऽस्त्री = पुंनपुंसकयोः ।

(३) पक्षिवासस्य द्वे–['घोंसला'] । तत्र नीडमस्त्रियाम् ।

(४) पक्षिबालकानां, बालकसामान्यस्य च सप्त नामानि । [बच्चों के ७ नाम] ।

(५) स्त्रीपुंसयुगलस्य ['नर-मादीका-जोड़ा'] ।

(६) त्रीणि युग्मस्य । ['जोडा'] ।

(७) द्वाविंशतिः समूहस्य नामानि ['झुण्ड' के २२ नाम] । तत्र—संहतिः–स्त्रियाम् । वृन्द–निकुरम्ब-कदम्बानि—क्लीबे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्त्रियां तु संहतिर्वृन्दं निकुरम्बं कदम्बकम् ॥ ४० ॥
वृन्दभेदाः,-समैर्वर्गः, सङ्घ-सार्थौ तु जन्तुभिः ।
सजातीयैः कुलं, यूथं तिरश्चां पुंनपुंसकम् ॥ ४१ ॥
पशूनां समजोऽन्येषां समाजोऽथ सधर्मिणाम् ।

---

(१) वृन्दविशेषा इदानीमुच्यन्ते । [वृन्द विशेष कहते हैं—]

(२) तत्र—समानां वृन्दं 'वर्ग' इत्युच्यते । [समान वस्तु और पदार्थ आदि का समूह, वर्ग] ।

(३) एवं सङ्घसार्थौ—जन्तूनां समूहे बोध्यौ । वणिक्-सङ्घोऽपि—सार्थ इत्युच्यते । [जन्तु एवं प्राणियों का तथा व्यापारियों का समूह-'सङ्घ' और 'सार्थ'] ।

(४) सजातीयानां समूहः-कुलम् । [सजातीयों का समूह = 'कुल']

(५) तिरश्चां = पक्ष्यादीनां समूहः-यूथम् इत्युच्यते । यूथं पुंनपुंसकयोः । [पशु पक्षी आदि का समूह-'यूथ']

(६) पशूनां समूहः-समजः [पशुओंका समूह 'समज'] ।

(७) अन्येषां = पशुभिन्नानां संघः-समाजः । [पशुभिन्न प्राणियों का-मनुष्यों का समूह-'समाज'] ।

(७) सधर्मिप्राणिसमूहो-निकाय इत्युच्यते । [समानधर्मा प्राणियों का समूह-'निकाय'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यान्निकायः, पुञ्ज-राशी तूत्करः कूटमस्त्रियाम् ॥४२॥
कापोत-शौक-मायूर-तैत्तिरादीनि तद्गणे ।
गृहाऽऽसक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते ॥४३॥

❀ इति सिंहादिवर्गः ॥ ५ ॥ ❀

❀ अथ मनुष्यवर्गः ❀

मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।
स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः ॥१॥

---

(१) धान्यादिराशेश्चत्वारि। तत्र–कूटमस्त्रियां, शेषाः पुंसि । [धान्य आदि की 'राशि', 'ढेरी' 'कुड्डी' का ४ नाम] ।

(२) कपोतादिसङ्घस्यैकैकम् पृथक्–पृथक् । [कबूतर, सुग्गा, मोर, तीतर आदि के समूह का १–१ नाम] ।

(३) द्वे गृहाश्रितपक्षिमृगादीनाम् ['पालतू पक्षी'–तोता–मैना एवं हरिण आदि] ।

* इति सिंहादिवर्गः *

(४) षट् मनुष्यजातिमात्रस्य नामानि । [मनुष्य का ६ नाम] ।

(५) पञ्च पुरुषस्य । [पुरुष 'मनसेधू' के ५ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ।
प्रतीपदर्शिनी वामा वनिता महिला तथा ॥२॥
विशेषा[2]स्त्वङ्गना, भीरुः, कामिनी, वामलोचना ।
प्रमदा, मानिनी, कान्ता, ललना च, नितम्बिनी ॥३॥
सुन्दरी, रमणी, रामा, कोप[3]ना सैव भामिनी ।
[4]वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥४॥
कृ[5]ताभिषेका महिषी, भोगि[6]न्योऽन्या नृपस्त्रियः ।
प[7]त्नी पाणिगृहीती च द्वितीया सहधर्मिणी ॥५॥

---

(१) एकादश स्त्रीमात्रस्य । [स्त्री के ११ नाम] ।

(२) अथ स्त्रीविशेषा उच्यन्ते । तत्र-उत्तमस्त्रीणां द्वादश भेदाः । [उत्तमोत्तम गुणवाली स्त्रियों के १-१ नाम] ।

(३) द्वे कोपनायाः । [कोपवती स्त्री के २ नाम] ।

(४) चत्वारि श्रेष्ठस्त्रियाः । [अतिश्रेष्ठ सुघड़-स्त्री के ४ नाम]।

(५) द्वे पट्टाभिषिक्तराजपत्न्याः ['पटरानी'] ।

(६) राजस्त्रीसामान्यस्यैकम् । [राजपत्नी-रानी का नाम]।

(७) सप्त विवाहितायाः स्त्रियाः । [विवाहिता स्त्री के ७ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भार्या जायाऽथ पुंभूम्नि दाराः, स्यात्तु[1] कुटुम्बिनी ।
पुरन्ध्री, [2]सुचरित्रा तु सती साध्वी पतिव्रता ॥६॥
कृतसापत्निका[3]-ऽध्यूढा-ऽधिविन्नाऽर्थे[4] स्वयंवरा ।
पतिंवरा च वर्या च, [5]कुलस्त्री कुलपालिका ॥७॥
कन्या[6] कुमारी, [7]गौरी तु नग्निका-ऽनागताऽऽर्तवा ।

---

(१) द्वे—पतिपुत्रशालिन्याः सौभाग्यवत्याः । [जीवितपति और पुत्रवाली स्त्री-सुहागिन-का नाम]।

(२) चत्वारि पतिव्रतायाः । [सुशील, पतिव्रता, पति की अनन्य भक्त स्त्री के ४ नाम]।

(३) त्रीणि—अनेकभार्यस्य—प्रथमविवाहितायाम् । [जिस स्त्री के पति ने दूसरा विवाह कर लिया हो, उस स्त्री के ३ नाम]।

(४) त्रीणि—स्वेच्छया कृतपतिवरणायाः । [जिस स्त्री ने पति को स्वयं ही वरण किया हो, उस स्त्री के ३ नाम]।

(५) कुलीनमहिलायाः सत्या द्वे । [कुलीन स्त्री-'कुलवन्ती सतीनारी' के २ नाम]।

(६) द्वे कुमार्याः । [अविवाहित कन्याके २ नाम]।

(७) त्रीणि—अदृष्टरजस्कायाः कन्यायाः । [स्त्री धर्म नहीं प्राप्त हुई ऐसी १२-१३ वर्ष की लड़की के ३ नाम]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यो[1]न्मध्यमा दृष्टरजास्तरुणी[2] युवतिः समे ॥ ८ ॥
समाः[3] स्नुषा-जनी-वध्वश्चिरिण्टी[4] तु सुवासिनी ।
इच्छावती[5] कामुका स्याद्, वृषस्यन्ती[6] तु कामुकी ॥९॥
कान्तार्थिनी[7] तु या याति सङ्केतं साऽभिसारिका ।
पुंश्चली धर्षिणी बन्धक्यसती कुलटे-त्वरी ॥१०॥

---

(१) सद्योजातरजोदर्शनायाः । [जो कन्या व युवति रजस्वला होने लगी हो, उसका २ नाम] ।

(२) द्वे-युवत्याः स्त्रियाम् । [युवती-जवान स्त्री-के २ नाम] । (३) त्रीणि पुत्रवध्वाः । [पुत्रवधू-पतोहू के ३ नाम] ।

(४) द्वे प्राप्तयौवनायाः सौभाग्यवत्याः । ['जवान सुहासणी'] 'प्राप्तयौवनाया अपि पितृगृहस्थाया' इति केचित् । [सौभाग्यवती] ।

(५) द्वे वस्त्राभूषणादीच्छावत्याः । [वस्त्र भूषण आदि की इच्छावाली स्त्री के नाम] ।

(६) द्वे-मैथुनेच्छावत्याः । [मैथुन की इच्छा वाली स्त्री का नाम] ।

(७) एकं स्वपरपुरुषमभिसरन्त्याः । [अभिसारिका स्त्री का नाम] ।

(८) अष्टौ-कुलटायाः । ['हरजाई' 'बदमाश' 'छिनाल' स्त्री का नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वैरिणी पांसुला च [1]स्यादशिश्वी शिशुना विना ।
[2]वीरा निष्पति-सुता, [3]विश्वस्ता-विधवे समे ॥ ११ ॥
[4]आलिः सखी वयस्याऽथ [5]पतिवत्नी सभर्तृका ।
[6]वृद्धा पलिक्नी, [7]प्राज्ञी तु प्रज्ञा, [8]प्राज्ञा तु धीमती ॥ १२ ॥
[9]शूद्री शूद्रस्य भार्या स्याच्छूद्रा [10]तज्जातिरेव च ।

---

(१) एकमपत्यरहितायाः । [बाँझ स्त्री का नाम] ।

(२) पतिपुत्ररहिताया एकम् । [पति पुत्र रहित स्त्री का नाम] ।

(३) द्वे विधवायाः । [विधवा स्त्री का नाम] ।

(४) त्रीणि सख्याः । [सखी-सहेली-भायली का नाम] ।

(५) द्वे जीवद्भर्तृकायाः । [सभर्तृका-जीवित पतिवाली स्त्री का नाम]।

(६) द्वे पक्वकेश्याः । [पके-सफेद-बालोंकी बुड्ढी स्त्री] ।

(७) द्वे पण्डितायाः । [पण्डिता स्त्री का नाम] ।

(८) द्वे-प्रशस्तबुद्धिशालिन्याः । [बुद्धिमती स्त्रीका नाम]।

(९) एकं भिन्नजातीयाया अपि शूद्रभार्यायाः । [शूद्र की स्त्री के नाम] ।

(१०) एकमन्यभार्याया अपि शूद्रजातीयायाः । [शूद्र जाति की स्त्री के नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आभीरी[1] तु महाशूद्री जातिपुंयोगयोः समा ॥१३॥
अर्याणी[2] स्वयमर्या, स्यात्[3]क्षत्रिया क्षत्रियाण्यपि ।
उपाध्यायाप्युपाध्यायी[4], स्यादाचार्यापि[5] च स्वतः ॥१४॥
आचार्यानी[6] तु पुंयोगे, स्यादर्यी[7] क्षत्रिणी[8] तथा ।
उपाध्यायान्युपाध्यायी[9], पोटा[10] स्त्रीपुंसलक्षणा ॥१५॥

---

(१) द्वे आभीर्याः, जातौ, पुंयोगे च । ['अहीरिन'] ।

(२) वैश्यजातीयाया द्वे । [वैश्य जाति की स्त्री के नाम] ।

(३) क्षत्रियजात्युद्भूताया द्वे । [क्षत्रिय जाति की स्त्री के नाम] । (४) द्वे स्वयं विद्योपदेशिन्याः । [उपदेशिका] ।

(५) एकं मन्त्रादिव्याख्यात्र्याः । [आचार्या । स्वयं पढ़ानेवाली स्त्री का नाम] ।

(६) आचार्यपत्न्या एकम् । [आचार्य की पत्नी का नाम] ।

(७) वैश्यपत्न्या अन्यजातीयाया अपि-एकम् । [वैश्य की स्त्री का नाम] ।

(८) अन्यजातीयाया अपि क्षत्रियपत्न्या एकम् । [क्षत्रिय की स्त्री का नाम] ।

(९) द्वे उपाध्यायपत्न्याः । [उपाध्याय की स्त्री का नाम] ।

(१०) एकं स्तनश्मश्रुलोमादिमत्याः । [मोंछ आदि पुरुष के चिह्नवाली स्त्री के नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वीरपत्नी[1] वीरभार्या, वीरमाता[2] तु वीरसूः ।
जातापत्या[3] प्रजाता च प्रसूता च प्रसूतिका ॥१६॥
स्त्री[4] नग्निका कोटवी स्याद्, दूती सञ्चारिके[5] समे ।
कात्यायन्यर्द्धवृद्धा[6] या कापायवसनाऽथवा ॥१७॥
सैरन्ध्री[7] परवेश्मस्था स्ववशा शिल्पकारिका ।

---

(१) द्वे वीरपत्न्याः । [वीर पुरुषकी स्त्रीका नाम] ।

(२) द्वे वीरजनन्याः । [वीर पुत्र की माताके नाम] ।

(३) चत्वारि जातापत्यायाः । [प्रसूता स्त्रीके ४ नाम] ।

(४) द्वे नग्नायाः । [नग्न 'नंगी' स्त्री के २ नाम] ।

(५) द्वे दूत्याः । [दूती के २ नाम] ।

(६) कापायवस्त्रधारिण्या विधवायाः अर्धजरत्या एकम् । [गेरुवा वस्त्र धारण करनेवाली, ढलती अवस्था की, विधवा स्त्री का नाम] ।

(७) परगृहे स्थित्वा शिल्पकर्म कुर्वाणायाः स्वतन्त्राया अदास्या एकं नाम । तदुक्तं काव्येन—

"चतुःषष्टिकलाभिज्ञा रूपशीलादिशालिनी ।
प्रसाधनोपचारज्ञा 'सैरन्ध्री' परिकीर्त्तिता ॥" इति ।

[दूसरे घरमें रहकर स्वतन्त्रतापूर्वक शिल्पकर्म करने वाली, चतुर और रूपवती सुशीला स्त्री का नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

असिक्नी[1] स्यादवृद्धा या प्रेष्या-ऽन्तःपुरचारिणी ॥१८॥
वारस्त्री[2] गणिका वेश्या रूपाजीवाऽर्थ[3] सा जनैः ।
सत्कृता वारमुख्या स्यात्कुट्टनी[4] शम्भली समे ॥१९॥
विप्रश्निका[5] त्वीक्षणिका दैवज्ञाऽर्थ[6] रजस्वला ।
स्त्रीधर्मिण्य-वि-रात्रेयी मलिनी पुष्पवत्यपि ॥२०॥

---

(१) अन्तःपुरवासिन्या युवत्या दास्या एकं नाम । [राजाके महल में काम-काज करनेवाली, युवति दासी का नाम] ।

(२) चत्वारि वेश्यायाः । [वेश्या, रण्डी, भगतन के चार नाम] ।

(३) लोकसत्कृताया वेश्याया एकम् । [ऊँची श्रेणीकी एवं नगरकी प्रधान, श्रेष्ठ वेश्या का नाम] ।

(४) द्वे कुट्टन्याः । ['कुटनी' । स्त्रियों को फँसाकर पर-पुरुष से मिलानेवाली स्त्री] ।

(५) त्रीणि दैवज्ञायाः । [हस्तरेखा, सामुद्रिक एवं ज्यौतिष आदिके आधार पर भूत भविष्यत् फल बताने वाली दैवज्ञ स्त्रीके ३ नाम] ।

(६) अष्टौ रजस्वलायाः । ['रजस्वला' । स्त्रीधर्म-रजो धर्म-हुई अशुद्ध स्त्री के ८ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ऋतुमत्यप्युदक्याऽपि, स्याद्रजः[1] पुष्पमार्त्तवम् ।
श्रद्धालुर्दोहदवती[2], निष्कला[3] विगतार्त्तवा ॥२१॥
आपन्नसत्त्वा[4] स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी ।
गणिकादेस्तु[5] गाणिक्यं, गार्भिणं, यौवतं-गणे ॥२२॥
पुनर्भूर्[6]दिधिषूरूढा द्विस्तस्या[7] दिधिषुः पतिः ।

---

(१) त्रीणि स्त्रीरजसः । तत्र रजः सान्तं—नपुंसके । [स्त्री के रज-रक्त के ३ नाम] ।

(२) द्वे-गर्भसम्बन्धादभिलाषशालिन्याः । [गर्भके कारण नाना प्रकार की वस्तुओं पर इच्छा रखनेवाली स्त्री] ।

(३) विगतार्त्तवाया द्वे । [जिसका ऋतुधर्म चला जाए ऐसी, प्रायः ४०-५० वर्ष के निकट की स्त्री का नाम] ।

(४) चत्वारि गर्भिण्याः । [गर्भिणी स्त्री के नाम] ।

(५) गणिकानां समूहः—गाणिक्यम् । गर्भिणीनां समूहो-गार्भिणम् । युवतीनां समूहो-यौवनम् । [वेश्या, गर्भिणी और युवतियों के झुण्ड का नाम] ।

(६) द्विवारं संस्कृताया द्वे । तदुक्तम्-'अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः।' इति । [पुनः पति करनेवाली विधवा का नाम । 'नाता' ('घरवासा') की हुई विधवा स्त्री] ।

(७) पुनर्भूपत्युरेकम् पुंसि । [विधवा से नाता करने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सै तु द्विजोऽग्रेदिधिषूः सैव यस्य कुटुम्बिनी ॥२३॥
कौनीनः कन्यकाजातः सुतोऽर्थ सुभगासुतः ।
सौभागिनेयः स्यात्पारस्त्रैणेयस्तु परस्त्रियाः ॥ २४ ॥
पैतृष्वसेयः स्यात्पैतृष्वस्रीयश्च पितृष्वसुः ।
सुतो, मातृष्वसुश्चैवं, वैमात्रेयो विमातृजः ॥ २५ ॥

वाले पुरुष का नाम]।

(१) पुनर्भूप्रधानभार्यस्य पुंस एकम् । [पुनर्भू-नाता करके लाई गई विधवा स्त्री-ही जिसके प्रधान स्त्री है, उस पुरुष का नाम]।

(२) द्वे-कन्यकासुतस्य । [अविवाहिता कन्या से ही जो उत्पन्न हो गया हो, ऐसे पुत्र का नाम]।

(३) सुभगापुत्रस्य द्वे । [सुभगा=सौभाग्यवती स्त्री-के पुत्र का नाम]।

(४) परभार्यायामुत्पादितस्य पुत्रस्यैकम् । [पराईस्त्री में उत्पादित पुत्र का नाम]।

(५) द्वे पितृष्वसुः पुत्रस्य । ['भुवा का पुत्र']।

(६) द्वे मातृष्वसुः सुतस्य । ['मौसी का पुत्र']।

(७) विमातुरपत्यस्य द्वे । [पिता की दूसरी स्त्री-विमाता से उत्पन्न पुत्र (-भाई-) का नाम]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ बान्धकिनेयः स्याद्बन्धुलश्चा-ऽसतीसुतः ।
कौलटेरः कौलटेयो, [2]भिक्षुकी तु सती यदि ॥२६॥
तदा कौलटिनेयोऽस्याः कौलटेयोऽपि चात्मजः ।
[3]आत्मजस्तनयः सूनुः सुतः पुत्रः, स्त्रियां त्वमी ॥२७॥
[4]आहुर्दुहितरं सर्वे-ऽपत्यं तोकं तयोः समे ।
[6]स्वजाते त्वौरसो-ऽस्यौ, तातस्तु जनकः पिता ॥२८॥

---

(१) पञ्च कुलटापुत्रस्य । [कुलटा—व्यभिचारिणी स्त्री—के पुत्र का नाम] ।

(२) सत्या भिक्षुक्याः पुत्रस्य द्वे । [घर २ घूमनेवाली भिखमंगी सती साध्वी स्त्री के पुत्र का नाम] ।

(३) पञ्च पुत्रस्य । [पुत्र के ५ नाम] ।

(४) अमी पुत्रादयः शब्दाः स्त्रियां पुत्रीमाहुः । यथा—आत्मजा, तनया, सुता, पुत्री । [पुत्री के नाम] ।

(५) तनयस्य, दुहितुश्च द्वे क्लीबे । [पुत्र और पुत्री दोनों के नाम] ।

(६) स्वस्मादुत्पन्नस्य पुत्रस्य । [अपना जाया हुआ—'सगा बेटा'] ।

(७) त्रीणि जनकस्य । ['पिता' 'बाप' 'बप्पा'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जनयित्री[1] प्रसूर्माता जननी, भगिनी[2] स्वसा ।
ननान्दा[3] तु स्वसा पत्युर्नप्त्री[4] पौत्री सुतात्मजा ॥२९॥
भार्यास्तु[5] भ्रातृवर्गस्य यातरः स्युः परस्परम् ।
व्रजावती[6] भ्रातृजाया, मातुलानी[7] तु मातुली ॥ ३० ॥
पतिपत्न्योः[8] प्रसूः श्वश्रूः, श्वशुरस्तु[9] पिता तयोः ।
पितुर्भ्राता पितृव्यः[10] स्यान्मातुर्भ्राता[11] तु मातुलः ।३१।

---

(१) चत्वारि मातुः ।['माता'] (२) द्वे भगिन्याः ['बहन'] ।

(३) एकं पत्युर्भगिन्याः । ['नँनद'] ।

(४) त्रीणि पुत्रस्य, दुहितुश्चाऽपत्यस्य । ['पोता' 'पोती' 'नाती' 'नतनी'] ।

(५) परस्परं भ्रातृपत्नीनां स्त्रियाम् । ['देवरानी-जेठानी'] ।

(६) द्वे भ्रातुर्धर्मपत्न्याः ['भौजाई'] ।

(७) द्वे—मातुलभार्यायाः । ['मामी'] ।

(८) पत्युर्माता, पत्न्याश्च माता—'श्वश्रूः'-स्त्रियाम् । ['सास'] । (९) एवं-पत्युः-पिता, पत्न्याश्च पिता-'श्वशुरः' पुंसि । [ससुर'] ।

(१०) द्वे पितृव्यस्य । ['चाचा'] ।

(११) द्वे मातुलस्य । ['मामा'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्यालाः[1] स्युर्भ्रातरः पत्न्याः, [2]स्वामिनो देवृ-देवरौ ।
स्वसीयो[3] भागिनेयः, स्याज्जामाता दुहितुः पतिः ॥
पितामहः[4] पितृपिता, तत्पिता[5] प्रपितामहः[6] ।
मातुर्मातामहाद्येवं, सपिण्डास्तु[8] सनाभयः ॥३३॥
समानोदर्य-सोदर्य-सगर्भ्य-सहजाः[9] समाः ।
[10]सगोत्र-बान्धव-ज्ञाति-बन्धु-स्व-स्वजनाः समाः ॥३४॥

---

(१) पत्नीभ्रातुरेकम् । [साला] ।
(२) स्वामिनः = पत्युः—कनिष्ठभ्रातुर्द्वे । [देवर] ।
पत्युर्ज्येष्ठभ्राता तु श्वशुर एव ['जेठ' 'भसुर'] ।
(३) द्वे भगिनीसुतस्य ['भानजा' 'भगिना'] ।
(४) द्वे जामातुः । ['जमाई' पुत्री का पति] ।
(५) द्वे पितामहस्य । ['दादा' 'आजा'] ।
(६) एकं प्रपितामहस्य । ['परदादा'] ।
(७) मातामहादेरेकैकम् । ['नाना' 'परनाना' आदि] ।
(८) द्वे—सपिण्डानाम् । [सपिण्ड, सात पीढी के भीतर के लोग] ।
(९) चत्वारि एकमातृजातानाम् । [सहोदर भाई का नाम] ।
(१०) षट् सगोत्राणाम्—पुंसि । ['सगोत्र' 'गोतिया'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ज्ञातेयं बन्धुता तेषां क्रमाद्भाव-समूहयोः ।
धवः प्रियः पतिर्भर्ता, जारस्तूपपतिः समौ ॥३५॥
अमृते जारजः कुण्डो, मृते भर्तरि गोलकः ।
भ्रात्रीयो भ्रातृजो, भ्रातृ-भगिन्यौ भ्रातरावुभौ ॥३६॥
मातापितरौ पितरौ मातरपितरौ प्रसू-जनयितारौ ।

---

(१) ज्ञातिभावस्य, बन्धुसमूहस्य चैकैकम् । तत्र बन्धुता-स्त्रियाम् । [बन्धुपना, 'बन्धुत्व' । और भाई बन्धुओं का समूह । 'भाईपा'] ।

(२) चत्वारि भर्त्तुः । [पति] ।

(३) जारस्य द्वे । ['यार' 'उपपति'] ।

(४) पत्यौ जीवति जारजातस्य पुत्रस्यैकम् । [पति के जीते ही जार से उत्पन्न पुत्र] ।

(५) एकं विधवायामुत्पन्नस्य । ['गोला' । पति के मरने के बाद दूसरे से उत्पन्न हुआ पुत्र] ।

(६) द्वे भ्रातुष्पुत्रस्य [भतीजा] ।

(७) सहोक्तौ-भ्रातृभगिन्योर्द्वे, द्विवचनान्ते । [भाई-बहिन] ।

(८) सहोक्तौ-मातापित्रोर्द्वे द्विवचनान्ते । [मां-बाप] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्वश्रू-श्वशुरौ श्वशुरौ, पुत्रौ पुत्रश्च दुहिता च ॥३७॥
दम्पती जम्पती जायापती भार्यापती च तौ ।
गर्भाशयो जरायुः स्यादुल्वं च कललोऽस्त्रियाम् ॥
सूतिमासो वैजननो, गर्भो भ्रूण इमौ समौ ।
तृतीया प्रकृतिः षण्ढः क्लीवः पण्डो नपुंसके ॥३९॥
शिशुत्वं शैशवं बाल्यं, तारुण्यं यौवनं समे ।

---

(१) सहोक्तौ—श्वश्रूश्वशुरयोर्द्वे । [सास-ससुर] ।

(२) सहोक्तौ—पुत्रकन्ययोर्द्वे । [लड़का—लड़की] ।

(३) सहोक्तौ—जायापत्योश्चत्वारि । [पति—पत्नी] ।

(४) द्वे गर्भाशयस्य । [गर्भाशय का नाम] ।

(५) द्वे शुक्रशोणितसम्पातस्य । 'चत्वारि गर्भवेष्टनस्ये'ति तु परे । तत्र—कललोऽस्त्रियाम् । [जेर] ।

(६) प्रसवमासस्य द्वे । [गर्भ का ९ या १० वाँ महीना । 'पूरा महीना'] । (७) द्वे गर्भस्य । [गर्भ] ।

(८) पञ्च नपुंसकस्य नामानि । तत्र—'तृतीया प्रकृतिः' स्त्रियाम् । 'शण्ढः' 'शण्डो'ऽपि । ['नपुंसक' 'हिंजड़ा' 'जनखा'] ।

(९) त्रीणि बाल्यावस्थायाः । ['बालकपन' 'बचपन'] ।

(१०) द्वे तारुण्यावस्थायाः ['जवानी'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यात्स्थाविरं तु वृद्धत्वं, वृद्धसङ्घेऽपि वार्द्धकम् ॥४०॥
पलितं जरसा शौक्ल्यं केशादौ, विस्रसा जरा ।
स्यादुत्तानशया डिम्भा स्तनपा च स्तनन्धयी ॥४१॥
बालस्तु स्यान्माणवको, वयस्थस्तरुणो युवा ।
प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि ॥४२॥

---

(१) द्वे वृद्धावस्थायाः ['बुढ़ापा'] ।

(२) द्वे वृद्धसमूहस्य, वृद्धत्वस्य च क्लीबे । [बुढापा और वृद्धों का समूह] ।

(३) जरया केशादौ शौक्ल्यस्यैकम् । ['पलित' । बुढापे से बालों का सफेद होना] ।

(४) द्वे जरायाः । ['जरा' 'बुढापा' जीर्णता] ।

(५) चत्वारि बालिकायाः—त्रिषु । ['दुधमुँही बच्ची' छोटी लड़की] ।

(६) द्वे बालस्य त्रिषु । [लड़का] ।

(७) त्रीणि यूनः त्रिषु । ['जवान'] ।

(८) षट् वृद्धस्य त्रिषु । तत्र प्रवयाः सान्तः पुंसि । जरन् तान्तः । [वृद्ध] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वर्षीयान्दशमी ज्यायान्, पूर्वजस्त्वग्रियो-ऽग्रजः ।
जवन्यजे स्युः कनिष्ठ-यवीयो-ऽवरजाऽ-नुजाः ॥४३॥
मांसो दुर्बलश्छातो, बलवा-न्मांसलो-ऽसलः ।
तुन्दिल-स्तुन्दिभ-स्तुन्दी बृहत्कुक्षिः पिचण्डिलः॥४४॥
वटीटो-ऽवनाटश्चा-ऽवभ्रटो नतनासिके ।
केशवः केशिकः केशी, बलिनो बलिभः समौ ॥४५॥

(१) त्रीणि अतिवृद्धस्य । तत्र वर्षीयो–ज्यायसौ सान्तौ पुंसि । दशमी च नान्तः पुंसि । [अत्यन्त वृद्ध] ।

(२) त्रीणि ज्येष्ठस्य भ्रात्रादेः त्रिषु । [बड़ा भाई] ।

(३) कनिष्ठस्य पञ्च त्रिषु । तत्र यवीयान् सान्तः पुंसि । [छोटा भाई] । (४) त्रीणि दुर्बलस्य–त्रिषु । ['दुबला'] ।

(५) बलवतस्त्रीणि–त्रिषु । तत्र बलवान्–तान्तः ।['बलवान्' 'जबरदस्त' 'ताकतवर'] ।

(६) पञ्च स्थूलस्य–त्रिषु । तत्र-तुन्दी-नान्तः । [मोटा] ।

(७) त्रीणि चिपिटनासस्य–त्रिषु । [चिपटी एवं बैठी हुई नाकवाला] । (८) प्रशस्तकेशस्य त्रीणि–त्रिषु । तत्र केशी नान्तः । [सुन्दर बालों वाला पुरुष] ।

(९) द्वे बलि–शालिनः–त्रिषु । [त्रिबली एवं झुर्री

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

विकलाङ्गस्त्वपोगण्डः, खर्वो ह्रस्वश्च वामनः ।
खुरणाः स्यात्खुरणसो, विग्रस्तु गतनासिकः ॥४६॥
खुरणाः स्यात्खुरणसः, प्रङ्गुः प्रगतजानुकः ।
ऊर्ध्वङ्गु-रूर्ध्वजानुः स्यात्संङ्गुः संहतजानुकः ॥४७॥

जिसके पड़ती हों, वह पुरुष]।

(१) विकलाङ्गस्य=न्यूनाधिकाङ्गस्य द्वे-त्रिषु। [विकलाङ्ग, अङ्गहीन-मनुष्य]।

(२) त्रीणि वामनस्य त्रिषु। ['बौना' 'बावना']।

(३) तीक्ष्णनासिकस्य द्वे-त्रिषु । तत्र खरणश्शब्दः सान्तः । ['नोकदार 'पैनी 'तीखी नाकवाला']।

(४) द्वे विगतनासिकस्य-त्रिषु । ['नकटा']।

(५) खुरसदृशनासिकस्य द्वे-त्रिषु । तत्र खुरणश्शब्दः सान्तः पुंसि।[खुर की तरह बीच से दबी हुई नाकवाले का नाम]।

(६) वातादिना विगतजानुकस्य द्वे त्रिषु।[लुञ्जा, पाँगला]।

(७) द्वे ऊर्ध्वजानुकस्य-त्रिषु।[ऊपर को जानु (गोडा) जिसके हो गए हों । 'लूला' 'लंगड़ा']।

(८) द्वे मिलितजानुकस्य पुंसः-त्रिषु। [जिसके गोड (जुड़) गए हों]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्यादेडे बधिरः, [2]कुब्जे गडुलः, [3]कुकरे कुणिः ।
[4]पृथ्विरल्पतनौ, [5]श्रोणः पङ्गौ, [6]मुण्डस्तु मुण्डिते ॥४८॥
[7]बलिरः केकरे, [8]खोडे खञ्जस्त्रिषु जराऽवराः ।
[9]जडुलः कालकः पिप्लु-स्तिलक-स्तिलकालकः[10] ॥४९॥
[11]अनामयं स्यादारोग्यं, [12]चिकित्सा रुक्प्रतिक्रिया ।

---

(१) द्वे श्रवणशक्तिहीनस्य–त्रिषु ['बहिरा']।

(२) द्वे कुब्जस्य–त्रिषु ['कुबड़ा']।

(३) रोगादिना दूषितहस्तस्य द्वे–त्रिषु । [टूँटा]।

(४) द्वे अल्पकायस्य पुंसि–त्रिषु । ['ठीगना' वामन, 'बौना']। (५) द्वे पङ्गोः त्रिषु । ['पाङ्गला' 'पङ्गुल' 'पङ्गु']।

(६) द्वे मुण्डितस्य–त्रिषु । [मुण्डित शिर वाला]।

(७) द्वे विकृतनेत्रस्य-त्रिषु । [आंखका ऐबी, ऐचाताना]।

(८) द्वे खञ्जस्य । तत्र जराशब्दादवराः = अर्वाचीनाः— उत्तानशयादयः—त्रिषु = त्रिषु लिङ्गेषु ज्ञेयाः । ['खोडा']।

(९) त्रीणि शरीरचिह्नभेदस्य । ['लहसुन' 'मस्सा']।

(१०) द्वे देहस्थस्य 'तिल' इत्याख्यचिह्नस्य । ['तिल']।

(११) द्वे आरोग्यस्य । ['आरोग्य' 'स्वस्थता']।

(१२) द्वे चिकित्सायाः स्त्रियाम् । ['चिकित्सा' 'दवा करना']।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भेषजौ-षध-भैषज्यान्यगदो जायुरित्यपि ॥ ५० ॥
स्त्री रु-ग्रुजा चोपताप-रोग-व्याधि-गदा-ऽऽमयाः ।
क्षयः शोषश्च यक्ष्मा च, प्रतिश्यायस्तु पीनसः ॥५१॥
स्त्री क्षुत्क्षुतं क्षवः पुंसि, कासस्तु क्षवथुः पुमान् ।
शोफस्तु श्वयथुः शोथः, पादस्फोटो विपादिका ॥५२॥

---

(१) पञ्चौषधस्य । ['औषध' 'दवाई'] ।

(२) सप्त रोगस्य । तत्र स्त्रियां रुक्छब्दो जान्तः । ['रोग' 'बीमारी'] ।

(३) त्रीणि राजयक्ष्मणः । तत्र यक्ष्मा-नान्तः पुंसि । ['राजयक्ष्मा' 'क्षय'] ।

(४) द्वे पीनसस्य । ['नाक बहना' 'जुकाम' 'सर्दी'] ।

(५) त्रीणि छिक्कायाः । ['छींक'] । तत्र क्षुत्-स्त्रियां तान्तः । क्षवः-पुंसि ।

(६) द्वे कासरोगस्य । तत्र क्षवथुः पुंसि । ['खांसी'] ।

(७) त्रीणि शोफस्य । ['सूजन'] ।

(८) पादस्फोटस्य द्वे । तत्र-विपादिका-स्त्रियाम् । ['बिवाई फटना' 'पैर फटना'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किलास-सिध्मे,[२] कच्छ्वान्तु पाम पामा विचर्चिका ।
कण्डूः खर्जूश्च कण्डूया,[३] विस्फोटः पिटकस्त्रिषु ॥५३॥
व्रणोऽस्त्रियामीर्मरुः क्लीबे, नाडीव्रणः पुमान् ।
कोठो मण्डलकं, कुष्ठ-श्वित्रे, दुर्नामका-ऽर्शसी ॥५४॥
[१०]आनाहस्तु विबन्धः [११]स्याद्ग्रहणीरुक् प्रवाहिका ।

---

(१) द्वे सिध्मस्य । ['सेहुँआ रोग' 'चमड़ा सफेद होना'] ।

(२) चत्वारि कच्छूरोगस्य । तत्र कच्छूः–स्त्रियाम् । पाम नान्तं क्लीबे । पामा च स्त्रियां–नान्तः, आवन्तो वा । ['पाँव रोग'] ।

(३) त्रीणि कण्डूरोगस्य, स्त्रियाम् । ['खुजली'] ।

(४) द्वे पिटकस्य त्रिषु । ['फोड़ा-फुन्सी'] ।

(५) त्रीणि व्रणस्य । तत्र–व्रणोऽस्त्रियाम्, अरुः सान्तं क्लीबे । ['व्रण' 'घाव'] ।

(६) एकं नाडीव्रणस्य । [नासूर] ।

(७) द्वे मण्डलकुष्ठस्य । ['कोढ' 'चकत्ता'] ।

(८) द्वे श्वेतकुष्ठस्य, क्लीबे । ['सफेद कोढ'] ।

(९) द्वे अर्शसः । तत्र–अर्शः सान्तं क्लीबे । ['बवासीर'] ।

(१०) द्वे आध्मानस्य । ['पेट फूलना' 'आफरा'] ।

(११) द्वे ग्रहणीरोगस्य । ['संग्रहणीरोग' 'दस्त लगना'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः ॥५५॥
व्याधिभेदाः,-विद्रधिः स्त्री ज्वर-मेह-भगन्दराः ।
[श्लीपदं पादवल्मीकं, केशघ्नस्त्विन्द्रलुप्तकः] ।
अश्मरी मूत्रकृच्छ्रं स्यात्पूर्वे शुक्रावधेस्त्रिषु ॥ ५६ ॥
रोगहार्य-गदङ्कारो भिष-ग्वैद्यौ चिकित्सके ।

---

(१) त्रीणि वमनस्य । तत्र वमिः स्त्री । वमथुः पुमान् । ['वमन' 'उल्टी होना'] ।

(२) अथ रोगविशेषा उच्यन्ते । विद्रध्यादिरोगविशेषाणामेकैकम् । तत्र विद्रधिः—स्त्रियाम् । 'अश्मरी, मूत्रकृच्छ्र'मिति पर्यायशब्दाविवेके । पृथग्रोगाविमाविति तु वैद्याः । ['विद्रधि', 'ज्वर' 'प्रमेह' 'भगन्दर' श्लीपद='फीलपाँव' 'हाथी पाँव' 'गंजापन' 'पथरी' 'मूत्रकृच्छ्र' आदि रोग विशेषों के नाम] ।

(३) द्वयं श्लीपदस्य ['हाथीपाँव' 'फीलपाँव'] ।

(४) द्वे इन्द्रलुप्तस्य ['गञ्ज'] ।

(५) द्वे मूत्रकृच्छ्रस्य ['पथरी'] ।

(६) इतः परं शुक्रावधेः 'त्रिषु' इत्यधिकारः ।

(७) पञ्च वैद्यस्य—नामानि । त्रिषु=त्रिषुलिङ्गेषु । वाच्यलिङ्गा इमे शब्दा इति यावत् । तत्र रोगहारी—नान्तः । भिषक्—जान्तः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वीतो निरामयः कल्य उल्लाघो निर्गतो गदात् ॥५७॥
ग्लानः-ग्लास्नू, आमयावी विकृतो व्याधितो-ऽपटुः ।
आतुरो-ऽभ्यमितो-ऽभ्यान्तः, समौ पामन-कच्छुरौ॥५८॥
दद्रुणो दद्रुरोगी स्यादर्शोरोगयुतो-ऽर्शसः ।
वातकी वातरोगी स्यात्साऽतिसारो-ऽतिसारकी ॥५९॥
स्युः क्लिन्नाक्षे चुल्ल-चिल्ल-पिल्लाः, क्लिन्नेऽक्ष्णि चाप्यमी।

['वैद्य' 'कविराज' 'डाक्टर' 'हकीम'] ।

(१) चत्वारि रोगमुक्तस्य–त्रिषु । ['नीरोग' 'रोगमुक्त'] ।

(२) द्वे ग्लानस्य–पुंसि । ['उदास' 'म्लानमुख' 'माडा'] ।

(३) सप्त रोगिणः त्रिषु । तत्र आमयावी–नान्तः । ['रोगी' 'बीमार'] ।

(४) द्वे पामनस्य । ['पाँवरोगी'] ।

(५) द्वे दद्रुरोगयुक्तस्य त्रिषु । ['दाद रोग वाला'] ।

(६) द्वे अर्शोरोगिणः—त्रिषु ['बवासीर का रोगी'] ।

(७) द्वे वातरोगिणः । नान्ताविमौ । ['वातरोगी'] ।

(८) द्वे अतिसाररोगिणः । ['जिसको दस्त लगते हों' । 'अतिसार का रोगी'] ।

(९) त्रीणि क्लिन्नाक्षे पुंसि । इमान्येव–क्लिन्ने नेत्रेऽपि क्लीबे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उन्मत्त उन्मादवति, श्लेष्मलः श्लेष्मणः कफी ॥६०॥
न्युब्जो भुग्ने रुजा, वृद्धनाभौ तुन्दिल-तुन्दिभौ ।
किलासी सिध्मलोऽन्धो-ऽदृङ्, मूर्च्छाले मूर्त-मूर्च्छितौ ।
शुक्रं तेजो-रेतसी च बीज-वीर्ये-न्द्रियाणि च ।

[जिसकी आँखों से मैल=कीचड़ ('गीड') निकलता हो, उसके नाम । एवं मैलसे भरी हुई आँखों के भी येही नाम हैं] ।

(१) द्वे उन्मत्तस्य त्रिषु । ['पागल'] ।

(२) त्रीणि कफरोगिणः, त्रिषु । ['कफरोगी] ।

(३) रुजा=रोगेण, भुग्ने न्युब्ज इति त्रिषु । ['कुबडा'] ।

(४) त्रीणि उन्नतनाभेः त्रिषु । ['बढ़ी हुई नाभिवाला' 'सण्डिया'] ।

(५) द्वे सिध्मरोगिणः त्रिषु । तत्र–किलासी नातः । ['सिध्म=सेहुँवारोग-वाला'] ।

(६) द्वे अन्धस्य त्रिषु । तत्र अदृक्–शान्तः ['अन्धा'] ।

(७) त्रीणि मूर्छितस्य ['मूर्च्छित' 'बेहोश' के ३ नाम] ।

(८) षड्वीर्यस्य । तत्र तेजो-रेतसी सान्ते क्लीबे । ['वीर्य' 'शुक्र' 'धातु' के ६ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पायुः पित्तं, कफः श्लेष्मा, स्त्रियान्तु त्वग-सृग्धरा॥६२॥
पिशितं तरसं मांसं पललं क्रव्यमामिषम् ।
उत्तमं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकम् ॥ ६३ ॥
रुधिरा-ऽसृ-ग्लोहिता-ऽस्र-रक्त-क्षतज-शोणितम् ।
बुक्का-ऽग्रमांसं, हृदयं हृ-न्मेदस्तु वपा वसा ॥६४॥

---

(१) द्वे पित्तस्य । [पित्त के नाम] ।

(२) द्वे कफस्य तत्र । श्लेष्मा—नान्तः । [कफ के नाम] ।

(३) द्वे चर्मणः । तत्र त्वक् स्त्रियां चान्ता । ['त्वचा' 'चमड़ी के नाम] ।

(४) षट्—मांसस्य । [मांस के ६ नाम] ।

(५) त्रीणि शुष्कमांसस्य । [सूखे हुए मांस के ३ नाम] ।

(६) सप्त रक्तस्य । तत्र । असृग् जान्तं क्लीबे । ['रुधिर' 'खून' के ७ नाम] ।

(७] द्वे हृदयान्तर्गतमांसविशेषस्य । [हृदयस्थमांस विशेष 'बुक्का' का नाम] ।

(८) द्वे हृदयस्य । तत्र हृत् दान्तं क्लीबे । चत्वारः पर्याया इमे शब्दा इत्येके । [हृदय के नाम] ।

(९) त्रीणि वपायाः । तत्र मेदः सान्तं क्लीबे । ['चर्बी'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

पश्चाद्ग्रीवाशिरा मन्या, [२]नाडी तु धमनिः शिरा ।
तिलकं[३] क्लोम, मस्तिष्कं[४] गोदं[५], किट्टं मलोऽस्त्रियाम् ६५
अन्त्रं[६] पुरीतत्, गुल्मस्तु[७] प्लीहा पुंस्यथ वंस्नसा[८] ।
स्नायुः स्त्रियां, कालखण्ड[९]-यकृती तु समे इमे ॥६६॥

---

(१) ग्रीवापश्चाद्भागे स्थितायाः शिराया एकं नाम । [गले के पीछे की नस का नाम] ।

(२) त्रीणि नाड्याः स्त्रियाम् । ['नाडी' नस के नाम] ।

(३) द्वे उदरस्थपक्वाशयस्य । तत्र क्लोम-नान्तं क्लीबे । [पक्वाशय-क्लोम का नाम] ।

(४) द्वे मस्तिष्कस्य । [मस्तिष्क का नाम] ।

(५) द्वे मलस्य । तत्र मलोऽस्त्रियाम् । ['मैल' 'कीट' का नाम] ।

(६) द्वे अन्त्रस्य । [आँतडी] । तत्र पुरीतत्-अस्त्रियाम्-इति वाचस्पतिकोशः ।

( ) द्वे गुल्मस्य । [तिल्ली-'गोला'] । तत्र प्लीहा-नान्तः पुंसि ।

(८) द्वे अङ्गबन्धनरूपायाः । तत्र-स्नायुः स्त्रियाम् । ['स्नायु, पतली नाड़ी] ।

(९) द्वे कुक्षिदक्षभागमांसखण्डस्य क्लीबे ['कलेजा' 'जिगर'] । तत्र यकृत्-क्लीबे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]सृणिका स्यन्दिनी लाला, दृषिका[2] नेत्रयोर्मलम् ।
[[3]नासामलं तु सिङ्घाणं, [4]पिञ्जूषः कर्णयोर्मलम् ।]
[5]मूत्रं प्रस्राव, [6]उच्चारा-ऽवस्करौ शमलं शकृत् ॥६७॥
पुरीषं गूथ-वर्चस्कमस्त्री विष्ठा-विषौ स्त्रियौ ।
स्यात्कर्परः कपालोऽस्त्री, कीकसं कुल्यमस्थि च ॥६८॥
[9]स्याच्छरीरास्थिन कङ्कालः, [10]पृष्ठास्थि तु कशेरुका ।

---

(१) त्रीणि लालायाः । ['लाक' 'लार'] ।
(२) एकं नेत्रमलस्य ['गीड 'आँख का कीचड़] ।
(३) द्वे नासामलस्य । ['नाक का मैल' 'सिणक'] ।
(४) द्वे कर्णमलस्य । [कान का मैल] ।
(५) द्वे मूत्रस्य । [मूत का २ नाम] ।
(६) नव विष्ठायाः । तत्र शकृत् क्लीबे । वर्चस्कमस्त्री, विष्ठा–विषौ स्त्रियां, तत्र विट् षान्ततः–['विष्ठा''टट्टी' 'वीठ'] ।
(७) द्वे कपालस्य । तत्र–कपालोऽस्त्रियाम् । [कपाल-खप्पर]
(८) त्रीणि अस्थिमात्रस्य । ['हड्डी'] ।
(९) एकं कङ्कालस्य । ['नरकङ्काल' 'अस्थिपञ्जर'] ।
(१०) एकं पृष्ठास्थ्नः । [पीठ की हड्डी, 'रीढ'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिरोऽस्थनि करोटिः स्त्री, पार्श्वास्थनि तु पर्शुका ॥
अङ्गं प्रतीको-ऽवयवो-ऽपघनोऽर्थे कलेवरम् ।
गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥ ७० ॥
कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः ।
पादाग्रं प्रपदं, पादः पदङ्घ्रिश्चरणोऽस्त्रियाम् ॥७१॥
तद्ग्रन्थी घुटिके गुल्फौ, पुमान्पार्ष्णिस्तयोरधः ।

---

(१) द्वे मस्तकास्थ्नः । [मस्तक-शिर-की खपरी] ।

(२) द्वे पार्श्वास्थ्नः । [पार्श्व की हड्डियाँ] ।

(३) चत्वारि देहावयवस्य । [शरीर के अवयव] ।

(४) एकादश शरीरस्य । तत-वपुः सान्तं क्लीबे । वर्ष्म नान्तं क्लीबे । देहः-पुंनपुंसकयोः । मूर्ति-तनू-तनवः—स्त्रियाम् । [शरीर के ११ नाम] ।

(५) द्वे पादाग्रभागस्य । [पंजा] ।

(६) चत्वारि चरणस्य । चरणोऽस्त्रियाम् । ['पैर'] ।

(७) तस्य = पादस्य, ग्रन्थी = घुटिके, गुल्फौ । तत्र-घुटिका स्त्रियाम् । पादग्रन्थ्योर्द्वे नामनी । ['टकणा'] ।

(८) एकं पादपश्चाद्भागस्य । तत्र पार्ष्णिः पुंसि । ['एड़ी'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जङ्घा तु प्रसृता, जानूरुपर्वा-ऽष्ठीवदस्त्रियाम् ॥ ७२ ॥
सक्थि क्लीबे पुमानूरुस्तत्सन्धिः पुंसि वङ्क्षणः ।
गुदं त्वपानं पायुर्ना, बस्तिर्नाभेरधो द्वयोः ॥७३॥
कटो ना श्रोणिफलकं, कटिः श्रोणिः ककुद्वती ।
पश्चान्नितम्बः स्त्रीकट्याः, क्लीबे तु जघनं पुरः॥७४॥

---

(१) द्वे जङ्घायाः ['पिण्डी']।

(२) त्रीणि जानूरुसन्धेः। ['गोडा' 'ठेहुना' पैरकी चक्की]। तत्र-जानु क्लीबे । ऊरुपर्वं नान्तं क्लीबे । अष्ठीवान् पुंसि, क्लीबे च ।

(३) द्वे जानूपरिभागस्य । ['जांघ' 'साथल']। तत्र सक्थि क्लीबे, ऊरुः पुंसि ।

(४) ऊरुसन्धेरेकम् पुंसि । ['काछ' 'बगली']।

(५) त्रीणि गुदस्य । [गुदा] ।

(६) नाभेरधोभागस्यैकं, पुंसि स्त्रियाञ्च । ['बस्ति' 'मूत्राशय' 'मूत्र की थैली का नाम]।

(७) कटिफलकस्य द्वे । तत्र कटः-पुंसि ।['कड' 'कटिकी पट्टी]।

(८) कटेस्त्रीणि नामानि स्त्रियाम् । कटादयः पञ्चापि पर्यायशब्दा इमे इत्यन्ये ।['कटि' 'कमर'] ।

(९) स्त्रीकट्या पश्चाद्भागस्यैकम् । ['स्त्री का नितम्ब भाग' । 'चूतड़'] । (१०) एकं स्त्रीकट्याः पुरोभागस्य । [स्त्रीकी नाभि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कूर्पकौ[1] तु नितम्बस्थौ द्वयहीने कुकुन्दरे ।
स्त्रियां स्फिचौ[2] कटिप्रोथावुपस्थो[3] वक्ष्यमाणयोः ॥७५॥
भगं[4] योनिर्द्वयोः, शिश्नो[5] मेढ्रो मेहन-शेफसी ।
मुष्को[6]-ऽण्डकोशो वृषणः, पृष्ठवंशाऽधरे[7] त्रिकम् ॥७६॥
पिचण्ड[8]-कुक्षी जठरो-दरं तुन्दं, स्तनौ[9] कुचौ ।

के नीचे, आगे के-सकेश गुह्य भाग का नाम] ।

(१) पृष्ठवंशादधोगर्त्तयोरेकं क्लीबे । [पीठ के नीचे के, चूतड़ के ऊपर के कूपाकार दो २ गड्ढों के नाम] ।

(२) द्वे कटिमांसपिण्डयोः । तत्र स्फिक् स्त्रियाम् । ['फींच'] ।

(३) वक्ष्यमाणस्त्रीपुंसचिह्नविशेषयोर्भगशिश्नयोरेकम् । [योनि और लिङ्ग का नाम] । (४) द्वे स्त्रीयोनेः । [स्त्री की योनि का नाम । 'जोन'] । तत्र-योनिः स्त्रीपुंसयोः ।

(५) चत्वारि शिश्नस्य । तत्र शेफः सान्तं क्लीबे, शेफशब्दः अदन्तोपि पुंसि क्वचिद् दृश्यते । [लिङ्ग] ।

(६) त्रीणि अण्डकोशस्य । ['अण्डकोश' 'पेल्हड़'] ।

(७) पृष्ठवंशाधोभागस्यैकम् । ['त्रिक' 'तिग' 'कडतू'] ।

(८) पञ्च जठरस्य । [पेट] तत्र-कुक्षिः पुंसि ।

(९) द्वे स्तनस्य । ['स्तन' 'थण'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]चूचुकन्तु कुचाग्रं स्यान्न[2] ना क्रोडं भुजान्तरम् ७७
उरो[3] वत्सं च वक्षश्च, पृष्ठन्तु[4] चरमं तनोः ।
स्कन्धो[5] भुजशिरोंऽसोऽस्त्री, सन्धी[6] तस्यैव जत्रुणी ॥
बाहुमूले[7] उभौ कक्षौ, पार्श्वमस्त्री[8] तयोरधः ।
मध्यमश्चावलग्नश्च मध्योऽस्त्री[9], द्वौ [10]परौ द्वयोः ॥७९॥

---

(१) द्वे स्तनाग्रभागस्य । ['चूंची' 'विटकणी'] ।

(२) द्वे अङ्कस्य । ['गोद'] । तत्र क्रोडं न पुंसि ।

(३) त्रीणि उरसः ['छाती'] । क्रोडाद्याः पञ्चापि उरस इत्येके । (४) पृष्ठस्यैकम् । [पीठ] ।

(५) त्रीणि स्कन्धस्य । अंसोऽस्त्रियाम् ।['कंध'] ।

(६) अंससन्धेरेकम् । तत्र जत्रु क्लीबे । ['हांस'] ।

(७) द्वे कक्षस्य ['बगल'] ।

(८) एकं कक्षाधोभागस्य । ['पार्श्वभाग' पाँसु] ।

(९) त्रीणि देहमध्यस्य । तत्र मध्योऽस्त्री । [शरीर का मध्य भाग] ।

(१०) चत्वारि भुजस्य । तत्र-द्वौ परौ = द्वौ भुजबाहुशब्दौ-स्त्रीपुंसयोः । तत्र दोःशब्दः षान्तः स्त्रियाम् । दोः, दोषौ दोषः । ['बाँह'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भुज-बाहू प्रवेष्टो दोः, स्यात्कफोणिस्तु कूर्परः ।
अस्योपरि प्रगण्डः स्यात्प्रकोष्ठस्तस्य चाप्यधः ॥८०॥
मणिबन्धादाकनिष्ठं करस्य करभो बहिः ।
पञ्चशाखः शयः पाणिस्तर्जनी स्यात्प्रदेशिनी ॥८१॥
अङ्गुल्यः करशाखाः स्युः, पुंस्यङ्गुष्ठः, प्रदेशिनी ।
मध्यमा,ऽनामिका चापि, कनिष्ठा चेति ताः क्रमात् ।८२।

---

(१) द्वे कफोणेः । तत्र कफोणिर्द्वयोः । ['कूँहनी' कूँणी'] ।

(२) कफोण्यूर्ध्वभागस्यैकम् । ['कोहनी से ऊपर का भाग' 'बाजूबन्द का प्रदेश'] ।

(३) कफोणेरधो मणिबन्धपर्यन्तस्य । ['कलाई' 'पोंहचा'] ।

(४) मणिबन्धात्कनिष्ठिकापर्यन्तं करबहिर्भागस्य । [कलाई से छोटी अँगुली तक का हाथ का किनारा] ।

(५) त्रीणि हस्तस्य । [हस्ततल='हथेली'] ।

(६) तर्जन्या द्वे । [अंगूठे के पास की तर्जनी अंगुलि] ।

(७) द्वे अङ्गुलेः स्त्रियाम् । [अङ्गुली का नाम] ।

(८)अङ्गुल्यङ्गुष्ठानां नामैकैकम् । [अङ्गुष्ठ से लेकर छोटी 'चिटली' 'कानी'अङ्गुली तक५पाँचों अङ्गुलियों का १-१ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम् ।
[2]प्रादेश-ताल-गोकर्णास्तर्जन्यादियुते तते ॥८३॥
[3]अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः ।
[4]पाणौ चपेट-प्रतल-प्रहस्ता विस्तृताङ्गुलौ ॥८४॥
[5]द्वौ संहतौ संहतल-प्रतलौ वाम-दक्षिणौ ।

---

(१) चत्वारि नखस्य । तत्र नखनखरावस्त्रियाम् । [नख] ।

(२) अङ्गुष्ठतर्जनीसंमितः विस्तृतो हस्तः—प्रादेशः। [अङ्गुष्ठ से तर्जनी तक फैलाया हुआ हाथ, या उसकी प्रायः ११ अंगुल की लम्बान—'प्रादेश'] । अङ्गुष्ठमध्यमासंमितो विस्तृतो हस्तः—तालः । [अंगूठे से मध्यमा तक लम्बा हाथ या उसकी ११¼ सवा ग्यारह अंगुल की लम्बान का नाम—ताल] । अङ्गुष्ठानामिकोन्माने—गोकर्णः । [अंगूठे से अनामिका तक हाथ और उसकी सवा बारह १२¼ अंगुल लम्बाई—गोकर्ण] ।

(३) सकनिष्ठेऽङ्गुष्ठे प्रसारिते सति द्वादशाङ्गुलः—वितस्तिः । ['बित्ता' 'बिलांद' १२ अंगुल' 'आधा हाथ'] ।

(४) विस्तृताङ्गुलौ पाणौ त्रीणि नामानि—पुंसि । सिंह-तलोऽपि क्वचित्पठ्यते । ['थप्पड'] ।

(५) विस्तृताङ्गुलिहस्तयुगलस्य मिलितस्य द्वे । ['दुहत्थड'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाणिर्निकुब्जः प्रसृतिस्तौ युतावञ्जलिः पुमान् ॥८५॥
प्रकोष्ठे विस्तृतकरे हस्तो, मुष्ट्या तु बद्धया ।
स रत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना ॥८६॥
व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम् ।
ऊर्ध्वविस्तृतदोःपाणि-नृमाने पौरुषं त्रिषु ॥ ८७ ॥

---

(१) एकं प्रसृतेः पुंसि ['पस्स' 'प्रसृति'] ।

(२) तौ = पाणी युतौ = संयुतौ-अञ्जलिर्भवति । एकमञ्जलेः पुंसि । ['अंजुलि'] ।

(३) विस्तृतकरे, प्रकोष्ठे हस्तः । ['एकहाथ=२४ अङ्गुल'] ।

(४) एकं बद्धमुष्टेः प्रकोष्ठस्य । तत्र मुष्टिर्द्वयोः, रत्निः-स्त्रियां, पुंसि च । [बद्ध मुष्टि हाथ का नाम] ।

(५) निष्कासितकनिष्ठिकेन मुष्टिनोपलक्षितो हस्तोऽरत्निः । [प्रसारित कनिष्ठिक जो बद्ध मुष्टि हस्त वह—'अरत्नि' कहलाता है] ।

(६) प्रसारितभुजदण्डयुगलमध्यस्थैकम् । [वाम दक्षिण ओर फैलाये हुए दोनों हाथों का बीच-'व्याम' कहलाता है] ।

(७) एकं पुरुषप्रमाणस्य, त्रिषु ['पुरसा'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कण्ठो गलोऽथ ग्रीवायां शिरोधिः कन्धरेत्यपि ।
कम्बुग्रीवा त्रिरेखा साऽवटुर्घाटा कृकाटिका ॥ ८८ ॥
वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।
क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका ॥८९॥
ओष्ठाऽधरौ तु रदनच्छदौ दशनवाससी ।
अधस्ताच्चिबुकं, गण्डौ कपोलौ, तत्परा हनुः ॥९०॥

---

(१) द्वे कण्ठस्य 'गला' ।

(२) त्रीणि ग्रीवायाः । तत्र शिरोधिः—स्त्रियाम् । ['नाड 'नटई' 'गरदन' 'ग्रीवा'] ।

(३) शङ्खाकाराया ग्रीवाया एकम् । [सुराहीदार गला, नटई व गर्दन] ।

(४) त्रीणि ग्रीवामध्यस्थोन्नतभागस्य । ['टेटुवा' 'घण्टी' 'घाटी'] । तत्र अवटुः पुंसि ।

(५) सप्त मुखगह्वरस्य, मुखमात्रस्य च क्लीबे । [मुँह] ।

(६) पञ्च नासिकायाः । [नाक] । तत्र घ्राणं—क्लीबे ।

(७) चत्वारि ओष्ठमात्रस्य । तत्र दशनवासः सान्तं क्लीबे । ['ओठ' 'होठ'] । (८) एकं चिबुकस्य ['ठोडी'] ।

(९) द्वे कपोलस्य । ['गाल'] ।

(१०) एकं कपोलाधोभागस्य । ['जबाडा'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

रदना दशना दन्ता रदास्तालु तु काकुदम् ।
रसज्ञा रसना जिह्वा, प्रान्तावोष्ठस्य सृक्किणी ॥९१॥
ललाटमलिकं गोधिरूर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ ।
कूर्चमस्त्री भ्रुवोर्मध्यं, तारकाऽक्षणः कनीनिका ॥९२॥
लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।

---

(१) चत्वारि दन्तस्य । ['दाँत'] ।

(२) द्वे तालुनः—नपुंसके । [तालुवा] ।

(३) त्रीणि जिह्वायाः । ['जीभ'] ।

(४) एकमोष्ठप्रान्तस्य—नान्तं क्लीबे । ['ओठों का कोना' 'सिकनी'] । 'सृक्किन्' शब्द इत्यन्ये । ङ्यन्ता सृक्कणी स्त्रियामित्यपरे । अदन्तं सृक्कमित्यन्ये । इकारान्तो वा क्लीबे । [ओष्ठोंका प्रान्तभाग] ।

(५) त्रीणि ललाटस्य । तत्र गोधिः पुंसि ['ललाट' 'माथा'] ।

(६) एकं नेत्ररोमपङ्क्तेः ['भौंह' 'भुँवारा'] । तत्र भ्रूः स्त्रियाम् ।

(७) नासिकोपरि भ्रूद्वयमध्यभागस्य । तत्र—कूर्चमस्त्री [भ्रूमध्य] । (८) द्वे नेत्रकनीनिकायाः । ['आँख का कोया'] ।

(९) अष्टौ नेत्रस्य । तत्र—चक्षुः सान्तं नपुंसके । दृक् शान्ता स्त्रियाम् ['आँख' 'नेत्र'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृ-ग्दृष्टी, चोऽस्रु नेत्राम्बु रोदनश्चा-ऽस्रमश्रु च ॥९३॥
अपाङ्गौ नेत्रयोरन्तौ, कटाक्षो-ऽपाङ्गदर्शने ।
कर्ण-शब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ॥ ९४ ॥
उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् ।
चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः ॥९५॥
तद्वृन्दे कैशिकं कैश्यमलकाश्चूर्णकुन्तलाः ।
ते ललाटे भ्रमरकाः, काकपक्षः शिखण्डकः ॥९६॥

---

(१) पञ्चाऽस्रुणः । [आँसू] ।
(२) नेत्रप्रान्तस्यैकम् । [नेत्र का प्रान्तभाग] ।
(३) द्वे कटाक्षस्य । [कटाक्ष] ।
(४) षट् कर्णस्य । तत्र श्रुतिः—स्त्रियाम् [कान] ।
(५) पञ्च शिरसः । तत्र मूर्धा नान्तः पुंसि । मस्तकोऽस्त्रियाम् । ['शिर' 'मस्तक'] ।
(६) षट् केशस्य । [बाल] ।
(७) केशसमूहस्य द्वे । [बालों का गुच्छा] ।
(८) कुटिल-केशानां द्वे । ['घुंघुराले बाल'] ।
(९) ललाटगतकेशानामेकम् । ['काकुल' पट्टा'] ।
(१०) काकपक्षकस्य द्वे । [कलम] । शिखाया इत्येके ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कबरी केशवेशोऽथ धम्मिल्लाः संयताः कचाः ।
शिखा चूडा केशपाशी, व्रतिनःसा जटा सटा ॥९७॥
वेणिः प्रवेणी, शीर्षण्य-शिरस्यौ विशदे कचे ।
पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ॥९८॥
तनूरुहं रोम लोम, तद्वृद्धौ श्मश्रु पुंमुखे ।

---

(१) केशरचनाया द्वे । ['मांग' 'पट्टी'] ।

(२) धम्मिल्लस्यैकम् । [जूडा] ।

(३) त्रीणि शिखायाः । ['चोटी'] ।

(४) व्रतिनः = ब्रह्मचारिणो, मुन्यादेश्च शिखा-सा जटा, सटा च इत्यन्वयः । क्वचित्तु-'व्रतिनस्तु-जटा सटा' इत्यपि पाठो दृश्यते । जटाया द्वे । ['जटा'] ।

(५) वेण्या द्वे । [गूथी हुई आटी] ।

(६) निर्मलकेशस्य द्वे । [स्वच्छ साफ बाल] ।

(७) केशपाशादिषु पाशादिशब्दाः समूहार्थाः ।

(८) त्रीणि रोम्णाम् । [रोआँ] । तत्र रोम-लोमनी नान्ते नपुंसके ।

(९) एकं मुखवर्त्तिकेशानाम् । ['दाढी-मोछ'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

औकल्प-वेषौ नेपथ्यं प्रतिकर्म प्रसाधनम् ॥९९॥
दशैते त्रिष्वलङ्कर्त्ताऽलङ्करिष्णुश्च, मण्डितः ।
प्रसाधितो-ऽलङ्कृतश्च भूषितश्च परिष्कृतः ॥१००॥
विभ्राड् भ्राजिष्णु-रोचिष्णू, भूषा तु स्यादलङ्क्रिया ।
अलङ्कारस्त्वाभरणं, परिष्कारो विभूषणम् ॥१०१॥
मण्डनं चाऽथ मुकुटं किरीटं पुंनपुंसकम् ।

---

(१) पञ्च प्रसाधनस्य । ['वेष बनाना' 'सजाना' शिंगारना'] । तत्र प्रतिकर्म नान्तम् । एते दश = वक्ष्यमाणा रोचिष्णु-पर्यन्ता दश, त्रिषु लिङ्गेषु । एते दश शब्दाः–त्रिषु लिङ्गेषु = अर्थादिमे विशेष्यनिघ्ना बोध्याः ।।

(२) अलङ्करणशीलस्य द्वे–त्रिषु । [अपना शृङ्गार करने का जिसका स्वभाव हो] ।

(३) पञ्च भूषितस्य । [भूषण पहिने हुए का ५ नाम] ।

(४) अलङ्कारादिना शोभमानस्य त्रीणि । [आभूषण आदि से शोभित होनेवाले का नाम] ।

(५) द्वे भूषणक्रियायाः । [भूषितकरना] ।

(६) पञ्चालङ्कारस्य ['गहना'] ।

(७) द्वे किरीटस्य–पुंनपुंसकयोः । [मुकुट] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चूडामणिः शिरोरत्नं, तरलो[2] हारमध्यगः ॥१०२॥
बालपाश्या[3] पारितथ्या, पत्रपाश्या[4] ललाटिका ।
कर्णिका[5] तालपत्त्रं स्यात्कुण्डलं[6] कर्णवेष्टनम् ॥१०३॥
ग्रैवेयकं[7] कण्ठभूषा, लम्बनं[8] स्याल्ललन्तिका ।

---

(१) द्वे चूड़ामणेः शिरोमुकुटमणेर्वा । ['शिरोमणि' 'बोरला'] ।

(२) हारमध्यगतः मणिस्तरलः । [हार के बीचो बीचके बढ़िया मणि का नाम] ।

(३) द्वे सीमन्तालङ्कारस्य स्वर्णपट्टिकाख्यस्य । प्रथमं केशबन्धनमुक्तावल्या इति केचित् । [सीमन्त भूषण, 'रत्न पट्टिका'] ।

(४) द्वे ललाटालङ्कारस्य । ['पात' 'फीणी' आदि शिरोभूषण] ।

(५) द्वे कर्णभूषणस्य । ['कर्णिका' 'मुरलिया' 'लौंग' 'बाली' आदि कान के आभूषण] ।

(६) द्वे कुण्डलस्य । [कानों के कुण्डल] ।

(७) द्वे कण्ठभूषणस्य । [कण्ठ भूषण 'गोप'-'कण्ठा'] । तत्र कण्ठभूषा स्त्रियाम् ।

(८) द्वे लम्बमानस्य मुक्तादिकण्ठभूषणविशेषस्य ['कण्ठी'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वर्णैः[1]प्रालम्बिकाऽथोरःसूत्रिका मौक्तिकैः[2] कृता१०४
हारो मुक्तावली[3], देर्वेच्छन्दोऽसौ शतयष्टिकः[4] ।
हारभेदा यष्टिभेदाद्गुत्स-गुत्सार्द्ध-गोस्तनाः[5] ॥१०५॥
अर्द्धहारो[6] माणवक, एकावल्येकयष्टिका ।
सैव नक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैः ॥१०६॥

---

(१) स्वर्णनिर्मितकण्ठिकायाः । [सोने की कण्ठी] ।

(२) मौक्तिकमालाया एकम् । [मोती की माला] ।

(३) मुक्ताहारस्य द्वे । [मोतियों का हार] ।

(४) द्वे शतयष्टिकहारस्य ['सौ लडा हार'] ।

(५) यष्टिभेदात्-हारभेदाः । तथा हि-

'द्वात्रिंशल्लतिको-(३२)-गुच्छो, गुच्छार्धस्तत्त्व—(२४)-संख्यकः । चतुस्त्रिंशल्लतो-(३४)-हारश्चतुर्यष्टिश्च गोस्तनः ॥' एकावली त्वेकयष्टिः ।" इति [३२ लडी का हार-'गुच्छक' । २४ लडी का हार-'गुच्छार्द्ध' । ३४ लडी का हार-'हार' । ४ लडी की माली-'गोस्तन' । एकी लडी की माला-'एकावली' । इस प्रकार लडों के भेद से हारों का भेद] ।

(६) विंशतियष्टिको हारो माणवक इत्युच्यते । एकयष्टिः-एकावली । सप्तविंशतिमौक्तिकैर्नक्षत्रमाला । [२० लडीका हार-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आवापकः पारिहार्यः कटको वलयोऽस्त्रियाम् ।
केयूरमङ्गदं तुल्ये, अङ्गुलीयकमूर्मिका ॥ १०७ ॥
साक्षराऽङ्गुलिमुद्रा स्यात्कङ्कणं करभूषणम् ।
स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा ॥१०८॥
क्लीबे सारसनं चाऽथ पुंस्कट्यां शृङ्खलं त्रिषु ।

'माणवक'। २७ मोतियों का कण्ठा-'नक्षत्रमाला']।

(१) चत्वारि प्रकोष्ठाभरणस्य। तत्र कटको वलयश्च-अस्त्रियाम्। ['चूड़ी' 'बन्द' 'पोंहची']।

(२) प्रगण्डभूषणस्य द्वे। ['भुजभूषण' 'बाजूबन्द']।

(३) अङ्गुलीयकस्य द्वे। [अंगूठी]।

(४) एकं साक्षराङ्गुलिमुद्रायाः। [नाम के अक्षरों से युक्त अंगूठी]। (५) मणिबन्धभूषणस्य कङ्कणस्य द्वे ['कङ्गन']।

(६) स्त्रीपुंसादिकटिभूषणस्य। ['करधनी' 'तागडी']।

तदुक्तम्-

'एकयष्टिर्भवेत्काञ्ची, मेखला त्वष्टयष्टिका।
रसना स्यात् षोडशभिः, कलापः पञ्चविंशकः' ॥ इति

(७) पुरुषकटीस्थकाञ्च्यास्त्रिषु। [पुरुष के कमर की 'तागडी']।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पादाङ्गुदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् ॥१०९॥
हंसकः पादकटकः, किङ्किणी क्षुद्रघण्टिका ।
त्वक्फल-कृमि-रोमाणि वस्त्रयोनिर्दश त्रिषु ॥११०॥
वाल्कं क्षौमादि, फालन्तु कार्पासं बादरञ्च तत् ।
कौशेयं कृमिकोशोत्थं, राङ्कवं मृगरोमजम् ॥१११॥

---

(१) चत्वारि नूपुरस्य । तत्र नूपुरोऽस्त्रियाम् । [पैंजनी] ।

(२) द्वे पादकटकस्य, 'कड़ा' इति ख्यातस्य । षडपि पर्याया इत्येके । ['कड़ा' 'कड़ी'] ।

(३) द्वे क्षुद्रघण्टिकायाः । [घुंघुरू] ।

(४) त्वक्फलादितन्तुभिर्वस्त्रं निर्मीयते । अतश्च त्वक्फलादिकं 'वस्त्रयोनि' रित्युच्यते । [जिनसे वस्त्र बनते हैं, 'वस्त्र योनि'] ।

(५) दश = वाल्क-क्षौम-फाल-कार्पास-बादर-कौशेय-राङ्कवा-ऽनाहत-निष्प्रवाणि-तन्त्रकाणीति नामानि, त्रिषु = त्रिषु लिङ्गेषु बोध्यानि । इमानि दश त्रिलिङ्गानीति यावत् ।

(६) क्षौमादि वाल्कं त्रिषु । ['शणिया' 'अरण्डी'] ।

(७) त्रीणि कार्पासवस्त्रस्य-त्रिषु । ['सूती वस्त्र'] ।

(८) एकं पीताम्बरादेः-त्रिषु । ['रेशमी वस्त्र' 'मुटकावस्त्र'] ।

(९) ऊर्णा-मृगरोमादि-निर्मितकम्बलादेरेकम् । ['बढ़िया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनाहतं[1] निष्प्रवाणि तन्त्रकञ्च नवाम्बरे ।
तत्स्यादुद्गमनीयं[2] यद्धौतयोर्वस्त्रयोर्युगम् ॥ ११२ ॥
पत्त्रोर्णं[3] धौतकौशेयं, बहुमूल्यं[4] महाधनम् ।
क्षौमं[5] दुकूलं स्याद्, द्वेतु[6] निवीतं प्रावृतं त्रिषु ॥११३॥
स्त्रियां[7] बहुत्वे वस्त्रस्य दशाः स्युर्वस्तयो द्वयोः ।

दुशाला' 'पश्मीना' 'अत्यन्त मृदु ऊनी वस्त्र'] ।

(१) अनाहतवस्त्रस्य चत्वारि–त्रिषु । ['कोरा कपड़ा'] ।

(२) एकं धौतवस्त्रयुगस्य । ['धोती–दुपट्टा' 'जोड़ा'] ।

(३) धौतकौशेयस्यैकं द्वे वा । [धोया हुआ रेशम या वस्त्र] ।

(४) द्वे महामूल्यवस्त्रादेः । [जरी, दुशाला, शाडी आदि बहुमूल्य वस्त्र] ।

(५) पट्टवस्त्रस्य द्वे । परे तु–बहुमूल्यमित्यादयश्चत्वारः पर्याया इत्याहुः । ['भागलपुरी रेशमी कपड़ा' 'रेशमी वस्त्र'] ।

(६) प्रावृतवस्त्रस्य द्वे—त्रिषु । [ओढा हुआ चदरा, दुशाला आदि] ।

(७) वस्त्रान्तावयवानां द्वे । दशा स्त्रियाम् । तत्र नित्यं बहुवचनान्तो दशाशब्दः । वस्तिः–स्त्रीपुंसयोः । ['कपड़े का किनारा, फलवा'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दैर्घ्यमायामे आनाहः, परिणाहो विशालता ॥११४॥
पटचरं जीर्णवस्त्रं, समौ नक्तक-कर्पटौ ।
वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम् ॥ ११५ ॥
सुचेलकः पटोऽस्त्री, नां वराशिः स्थूलशाटकः ।
निचोलः प्रच्छदपटः, समौ रल्लक-कम्बलौ ॥ ११६ ॥

---

(१) त्रीणि वस्त्रादेर्दैर्घ्यस्य । ['लंबाई'] ।

(२) द्वे विस्तारस्य । ['पनहा' 'अर्ज' 'चौड़ाई'] ।

(३) जीर्णवस्त्रस्य द्वे । [पुराना कपड़ा] ।

(४) प्रस्वेदादिमार्जनार्थं धृतस्य वस्त्रखण्डस्य । ['रुमाली' 'पञ्चा'] । केचित्तु इदं नामद्वयं रूढं 'नतना' 'छन्ना' इति प्रसिद्धस्येत्याहुः ।

(५) षट् वस्त्रस्य । तत्र वासः सान्तं क्लीबे । ['वस्त्र' 'कपड़ा'] ।

(६) द्वे शोभनवस्त्रस्य । तत्र–पटोऽस्त्री । [बढ़िया वस्त्र] ।

(७) द्वे स्थूलवस्त्रस्य, पुंसि । [मोटा कपड़ा] ।

(८) द्वे शिविकादिपिधानस्य 'पर्दा' इत्याख्यस्य । 'बुरका' इति प्रसिद्धस्येत्यन्ये । 'पलङ्गपोस' 'खोली' इति प्रसिद्धस्येत्येके । [पर्दा' 'खोली' 'सुजनी' 'चौतई' आदि] ।

(९) द्वे कम्बलस्य । [कम्बल] ।

Dr. Umila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्तरीयो-पसंव्यान-परिधानान्यधोंऽशुके ।
द्वौ प्रावारो-त्तरासङ्गौ समौ बृहतिका तथा ॥ ११७ ॥
संव्यानमुत्तरीयञ्च, चोलः कूर्पासकोऽस्त्रियाम् ।
नीशारः स्यात्प्रावरणे हिमाऽनिलनिवारणे ॥ ११८ ॥
अर्द्धोरुकं वरस्त्रीणां स्याच्चण्डातकमस्त्रियाम् ।
स्यात्त्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत् ॥११९॥
अस्त्री वितानमुल्लोचो, दूष्याद्यं वस्त्रवेश्मनि ।

(१) चत्वारि अधोवस्त्रस्य । ['धोती' 'शाडी'] ।
(२) पञ्च उपरिवस्त्रस्य । ['ओढना' 'दुपट्टा'] ।
(३) द्वे आप्रपदीनस्य चोलस्य । 'चोलकूर्पासकौ स्त्रियाः' इति पाठान्तरम् । ['चोला'] । स्त्रीकञ्चुकस्य इत्यन्ये । ['आंगी'] ।
(४) एकं हिमानिलनिवारणयोग्यप्रावरणस्य । ['रिजाई' 'दुलाई' 'सोड'] ।
(५) द्वे 'लहँगा' इति प्रसिद्धस्य । अस्त्रियाम् । ['लहंगा' 'घाघरा'] ।
(६) एकं पादाग्रपर्यन्तलम्बमानवस्त्रादेः—त्रिषु लिङ्गेषु । [शिर से पैर तक लम्बा वस्त्र 'बुर्का' 'चोगा'] ।
(७) द्वे वितानस्य । ['चन्दवा'] । अस्त्री वितानम् ।
(८) दूष्य—पटकुटी -पटवासादिकं वस्त्रगृहे । ['तम्बू' 'रावटी' 'खेमा']

Dr. Kamala Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा ॥१२०॥
[पर्यङ्किका परिकरः पर्यङ्कश्चावसक्थिका ।
अञ्चलन्त्वंशुकान्ते स्यान्नीवी सारसनश्च सः] ॥
परिकर्माऽङ्गसंस्कारः, स्यान्मार्ष्टि-मार्जना मृजा ।
उद्वर्तनो-त्सादने द्वे समे, आप्लाव आप्लवः ॥१२१॥
स्नानं, चर्चा तु चार्चिक्यं स्थासकोऽथ प्रबोधनम् ।
अनुबोधः, पत्रलेखा पत्राङ्गुलिरिमे समे ॥१२२॥

---

(१) त्रीणि जवनिकायाः । ['कनात' 'पर्दा'] ।
(२) द्वे शरीरशोभाधायकसंस्कारादेः । [अङ्गका संस्कार] ।
(३) त्रीणि मार्जनस्य । ['धोना' 'पोछना' 'सफाई'] ।
(४) उद्वर्तनेनाङ्गसंस्कारस्य द्वे । ['उबटन लगाना'] ।
(५) त्रीणि स्नानस्य । ['नहाना' 'स्नान करना'] ।
(६) चन्दनादिलेपनस्य त्रीणि । ['कस्तूरी केशर चन्दन आदि लगाना'] (७) गतगन्धादेर्वस्तुनः पुनर्गन्धानयनस्य द्वे । ['सुगन्धि को बढ़ाना'] । (८) द्वे स्तनकपोलादौ केसरादिना रचितस्य तिलकविशेषस्य । [पत्र रचना, स्तन कपोल आदि अङ्गों पर कस्तूरी-केसर आदि से चित्र रचना] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]तमालपत्त्र-तिलक-चित्रकाणि विशेषकम् ।
द्वितीयश्च[2] तुरीयश्च न स्त्रियामथ [3]कुङ्कुमम् ॥१२३॥
काश्मीरजन्मा-ऽग्निशिखं वरं बाह्लीक-पीतने ।
रक्त-सङ्कोच-पिशुनं धीरं लोहितचन्दनम् ॥१२४॥
[4]लाक्षा राक्षा जतु क्लीबे यावोऽलक्तो द्रुमामयः ।
[5]लवङ्गं देवकुसुमं श्रीसंज्ञमथ [6]जायकम् ॥१२५॥
कालीयकञ्च कालानुसार्यं चाथ [7]समार्थकम् ।
वंशिका-ऽगुरु-राजार्ह-लोहं कृमिज-जोङ्गकम् ॥१२६॥

---

(१) चत्वारि ललाटतिलकविशेषस्य । [ललाटपर किया हुआ तिलक आदि] ।

(२) तत्र चतुर्णां पूर्वोक्तानां तमालपत्त्रादीनां मध्ये तिलक-विशषकौ पुंनपुंसकयोः ।

(३) एकादश केसरस्य । [केसर] ।

(४) षट् यावकस्य । तत्र जतु क्लीबे । ['महावर' 'लाख'] ।

(५) त्रीणि लवङ्गस्य । [लौंग] ।

(६) त्रीणि सुगन्धद्रव्यभेदस्य । ['जायक' 'पीतचन्दन'] ।

(७) षट्—अगुरुणः । वंशकमपि नाम । ['अगर'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कालागुर्व-गुरु, स्यात्तन्मङ्गल्या[2] मल्लिगन्धि यत् ।
यक्षधूपः[3] सर्जरसो राल-सर्वरसावपि ॥ १२७ ॥
बहुरूपोऽप्यथ वृकधूप-कृत्रिमधूपकौ ।
तुरुष्कः पिण्डकः सिह्लो यावनोऽप्यथ पायसः ॥
श्रीवासो वृकधूपोऽपि श्रीवेष्ट-सरलद्रवौ ।
मृगनाभिर्मृगमदः कस्तूरी चाऽथ कोलकम् ॥१२९॥
कक्कोलकं कोशफलमथ कर्पूरमस्त्रियाम् ।

---

(१) द्वे कालागुरुणः । [काला अगर] ।

(२) द्वे—रोचनायाः । एकमित्येके । तत्=कालागुर्वेव । 'स्यात्तु' पाठा० । ['अगर विशेष'] ।

(३) पञ्च रालस्य । ['राल'] ।

(४) द्वे सुगन्धिनिर्मितदशाङ्गादिधूपस्य । ['धूपबत्ती' 'दशाङ्ग धूप'] ।

(५) चत्वारि यावनस्य । ['लोहबान'] ।

(६) पञ्च सरलद्रवस्य । ['गन्धा विरोजा'] ।

(७) त्रीणि कस्तूर्याः । [कस्तूरी] ।

(८) त्रीणि कक्कोलस्य । [कंकोल, 'गहुला'] ।

(९) पञ्च कर्पूरस्य । तत्र कर्पूरमस्त्रियाम् । [कपूर] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका ॥ १३० ॥
गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम् ।
तैलपर्णिक-गोशीर्षे हरिचन्दनमस्त्रियाम् ॥ १३१ ॥
तिलपर्णी तु पत्राङ्गं रञ्जनं रक्तचन्दनम् ।
कुचन्दनं चाऽथ जातीकोश-जातीफले समे ॥१३२॥
कर्पूरा-गुरु-कस्तूरी-कक्कोलैर्यक्षकर्दमः ।
गात्रानुलेपनी वर्तिर्वर्णकं स्याद्विलेपनम् ॥ १३३ ॥

---

(१) चत्वारि चन्दनस्य । तत्र-चन्दनोऽस्त्रियाम् । [चन्दन] ।

(२) चन्दनविशेषाणामेकैकम् । [मलयागिरिचन्दन आदि चन्दन के भेद]।

(३) पञ्च रक्तचन्दनस्य । अन्त्योऽस्त्रियाम् । [लालचन्दन] ।

(४) द्वे जातीफलस्य । 'जाति'रपि । कोषोऽपि ['जायफल']

(५) एकं लेपविशेषस्य । ['अङ्गराग' 'सुगन्धित उबटना' आदि] । तदुक्तं—

कुङ्कुमा-ऽगरु-कस्तूरी-कर्पूरं चन्दनन्तथा ।
'महासुगन्ध'मित्युक्तं नामतो यक्षकर्दमः ॥" इति ।

(६) चत्वारि गात्रानुलेपयोग्यसुगन्धिद्रव्यस्य । केचित्—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चूर्णानि[1] वासयोगाः स्युर्भावितं[2] वासितं त्रिषु ।
संस्कारो[3] गन्धमाल्याद्यैः स्यात्तदधिवासनम् ॥
माल्यं[4] माला-स्रजौ मूर्ध्नि, केशमध्ये[5] तु गर्भकः ।
प्रभ्रष्टकं[6] शिखालम्बि, पुरोन्यस्तं[7] ललामकम्॥१३५॥
प्रालम्बमृजुलम्बि स्यात्कण्ठाद्वैकक्षकं[8] तु तत् ।
यज्ञियक्[9] क्षिप्तमुरसि, [10]शिखास्वापीडशेखरौ॥१३६॥
[11]रचना स्यात्परिस्पन्द, [12]आभोगः परिपूर्णता ।
[13]उपधानन्तूपबर्हः [14]शय्यायां शयनीयवत् ॥१३७॥

आद्यद्वयं गात्रानुलेपनवर्त्तेः,वर्णकादिद्वयंचन्दनादिलेपस्येत्याहुः। (लेप)

(१) सुगन्धचूर्णस्य द्वे । [सुगन्धिचूर्ण] (२) वासितस्य द्वे । त्रिषु । (३)गन्धपुष्पादिभिर्वासितस्यैकम् । (४)त्रीणि मस्तकधृतमालायाः । [शिरोमाला] । (५)केशमध्ये धृतस्य पुष्पादेरेकम् । (६) एकं शिखायां लम्बमानस्य पुष्पादेः । (७) एकं ललाटस्थापितपुष्पादेः । (८) एकं कण्ठे ऋजु लम्बमानस्य मालादेः । [कण्ठमाला] (९) । एकं—यज्ञोपवीतवर्त्तियक्स्थापितस्य मालादेः । (१०) शिखास्थितमाल्यस्य द्वे । (११) द्वेपुष्पादिसंन्निवेशविशेषस्य । (१२) परिपूर्णताया द्वे । (१३) शिरोनिधानस्य द्वे । ['तकिया'] । (१४) त्रीणि शय्यायाः । ['गद्दी-सोडिया'] । केचित्तु—शय्यामात्रस्येत्याहुः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शयनं मञ्च-पर्यङ्क-पल्यङ्काः खट्वया[1] समाः ।
गेन्दुकः[2] कन्दुको, दीपः[3] प्रदीपः, पीठमासनम्[4] ॥१३८॥
समुद्गकः[5] सम्पुटकः, प्रतिग्राहः[6] पतद्ग्रहः ।
प्रसाधनी[7] कङ्कतिका, पिष्टातः[8] पटवासकः ॥ १३९ ॥
दर्पणे[9] मुकुरा-ऽऽदर्शौ, [10]व्यजनं तालवृन्तकम् ।

* इति मनुष्यवर्गः ६ *

(१) चत्वारि पर्यङ्कस्य । ['पलङ्ग'] ।
(२) कन्दुकस्य द्वे । ['गेंद'] । कन्दुकवदुपधानस्येत्येके । ['गाल-मसूरिया'-'छोटा तकिया'] ।
(३) द्वे दीपस्य । ['दीवा' 'दीप'] ।
(४) द्वे आसनस्य । ['पट्टा'-'कुर्सी'-'आसन'] ।
(५) द्वे सम्पुटस्य । ['डिब्बा'-'पिटारी'] ।
(६) द्वे पतद्ग्रहस्य । ['पीकदान'] ।
(७) द्वे 'कङ्घी' इति ख्यातायाः । ['कंघी']
(८) द्वे पिष्टातस्य । ['अबीर बुक्का'' गुलाल'] ।
(९) त्रीणि दर्पणस्य ['दर्पण' 'शीशा'] ।
(१०) द्वे व्यजनस्य । ['बीजणा-पङ्खा'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

* अथ ब्रह्मवर्गः ७ *

सन्ततिर्गोत्र-जनन-कुलान्यभिजना-ऽन्वयौ ।
वंशो-ऽन्ववायः सन्तानो, वर्णाः स्युर्ब्राह्मणादयः ॥१॥
विप्र-क्षत्रिय-विट्-शूद्राश्चातुर्वर्ण्यमिति स्मृतम् ।
राजबीजी राजवंश्यो, बीज्यस्तु कुलसम्भवः ॥ २ ॥
महाकुल-कुलीना-ऽऽर्य-सभ्य-सज्जन-साधवः ।
ब्रह्मचारी, गृही, वानप्रस्थो, भिक्षुश्चतुष्टये ॥ ३ ॥

❀ अथ ब्रह्मवर्गः ❀

(१) नव वंशस्य । सन्ततिः-स्त्रियाम् । ['कुल' 'खान्दान'] ।

(२) ब्राह्मणादेः सामान्यस्यैकम् । [ब्राह्मण आदि वर्णों का नाम] ।

(३) वर्णचतुष्टयस्यैकम् । [१ ब्राह्मण २ क्षत्रिय ३ वैश्य ४ शूद्र-इन चारों वर्णों का १ नाम] ।

(४) राजवंशोत्पन्नस्य द्वे । ['राजवंशी' 'राजपूत'] । तत्र-राजबीजी नान्तः ।

(५) कुलोत्पन्नस्य द्वे । ['कुलोत्पन्न'] ।

(६) षट्-कुलीनस्य । [सत्कुल में उत्पन्न] ।

(७) ब्रह्मचर्यादीनामेकम् । [१ ब्रह्मचारी, २ गृहस्थ, ३ वानप्रस्थ, ४ संन्यासी—इन चारों का १ नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आश्रमोऽस्त्री, द्विजोत्य[1]-ग्रजन्म-भूदेव-वाडवाः ।
विप्रश्च ब्राह्मणो-ऽ[2]सौ षट्कर्मा यागादिभिर्युतः ॥४॥
विद्वान्[3] विपश्चि-द्दोषज्ञः सन् सुधीः कोविदो बुधः ।
धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः ॥५॥
धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः ।
दूरदर्शी दीर्घदर्शी, [4]श्रोत्रिय-च्छान्दसौ समौ ॥६॥

---

(१) षट् ब्राह्मणस्य । [ब्राह्मण के ६ नाम] ।

(२) एकं षट्कर्मशीलस्य ब्राह्मणस्य । 'असौ ब्राह्मणः षट्-कर्मनिरतश्चेद्विप्र इत्युच्यते' इति वाऽन्वयः कार्यः । तदुक्तं स्मृतौ—

"इज्या-ध्ययन-दानानि याजना-ऽध्यापने तथा ।
प्रतिग्रहश्च तैर्युक्तः षट्कर्मा 'विप्र' उच्यते ॥" इति ।

['यज्ञ-याग, पठन-पाठन आदि करनेवाले कर्मठ ब्राह्मण का १ नाम] ।

(३) द्वाविंशतिः पण्डितस्य । तत्र विद्वान् सान्तः, विपश्चित्तान्तः । सन् तान्तः । संख्यावान्, धीमांश्च तान्तः, कृति-मनीषि-दूरदर्शि-दीर्घदर्शिनो नान्ताः । [पण्डित के २२ नाम] ।

(४) वेदाध्यायिनो द्वे । ['वेदपाठी' 'वेद पढ़ने वाला' 'वैदिक'] ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitized by eGangotri

[मीमांसको जैमिनीये, वेदान्ती ब्रह्मवादिनि ।
वैशेषिके स्यादौलूक्यः, सौगतः शून्यवादिनि ॥
नैयायिकस्त्वाक्षपादः, स्यात्स्याद्वादिक आर्हतः ।
चार्वाक-लौकायतिकौ, सत्कार्ये सांख्य-कापिलौ] ॥
उपाध्यायोऽध्यापकोऽथ स निषेकादिकृद्गुरुः ।
मन्त्रव्याख्याकृदाचार्य, आदेष्टा त्वध्वरे व्रती ॥७॥

---

(१) मीमांसकादेर्नामानि प्रक्षिप्तानि । [मीमांसक, वेदान्ती, वैशेषिक, बौद्ध, नैयायिक, जैन, नास्तिक एवं साङ्ख्यवादियों के नाम] ।

(२) द्वे उपाध्यायस्य । [उपाध्याय के २ नाम] तदुक्तं—

"एकदेशन्तु वेदस्य, वेदाङ्गान्यपि वा पुनः ।
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते ॥" इति ।

(३) एकं–(संस्कारादिकर्त्तुः) गुरोः । [गुरु का नाम] ।

(४) आचार्यस्य द्वे । [आचार्य के २ नाम] तदुक्तं–

'उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः ।
साङ्गं वा, सरहस्यं वा, तमाचार्यं प्रचक्षते ॥' इति ।

साङ्गोपाङ्ग, सरहस्य वेदों का अध्यापक-आचार्य कहलाता है । जैसे—द्रोणाचार्य] ।

(५) त्रीणियज्ञकर्त्तुर्यजमानस्य । [यज्ञकरनेवालायजमान] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यष्टा च यजमानश्च, स[1] सोमवति दीक्षितः ।
इज्याशीलो[2] यायजूको, यज्वा[3] तु विधिनेष्टवान् ॥८॥
सं[4] गीर्पतोष्ट्या स्थपतिः, सोमपीती[5] तु सोमपः ।
सर्ववेदाः[6] स येनेष्टो यागः सर्वस्वदक्षिणः ॥९॥
अनूचानः[7] प्रवचने साङ्गेऽधीती, गुरोस्तु यः— ।

---

(१) एकं सोमयाजिनः । [सोमयज्ञ करनेवाला] ।

(२) यागशीलस्य द्वे । [यज्ञशील के २ नाम] ।

(३) विधिना यज्ञं कृतवत एकम् । [विधिपूर्वक यज्ञ करनेवाला] ।

(४) 'बृहस्पतिसवन'नामकयज्ञकर्त्तुरेकम् । ['बृहस्पति सवन' यज्ञ करनेवाला] ।

(५) द्वे सोमयाजिनः । [सोमयाग करनेवाला] ।

(६) विश्वजिन्नामकयज्ञकर्त्तुरेकम् । ['विश्वजित्' नामक यज्ञ करनेवाला] ।

(७) साङ्गवेदाध्येतुरेकम् । [साङ्ग वेद अध्ययन करनेवाला] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लब्धानुज्ञः समावृत्तः, सुत्वा त्वभिषवे कृते ॥१०॥
छात्रा-न्तेवासिनौ शिष्ये, शैक्षाः प्राथमकल्पिकाः ।
एकब्रह्मव्रताऽऽचारा मिथः सब्रह्मचारिणः ॥११॥
सतीर्थ्यास्त्वेकगुरवश्चितवानग्निमग्निचित् ।
पारम्पर्योपदेशे स्यादैतिह्यमितिहाव्ययम् ॥१२॥

(१) समावृत्तस्यैकम् । [जिसका समावर्त्तन हुआ हो]।

(२) कृताभिषवस्नानस्यैकम् । तत्र–सुत्वा नान्तः पुंसि । [स्नातक, जिसनें सोम आदि यागों में अभिषव स्नान (अवभृथ स्नान) किया हो, उसका नाम]।

(३) त्रीणि शिष्यस्य । [शिष्य का नाम]।

(४) प्रथमारब्धवेदाद्यध्ययनानां द्वे । ['वटु', प्रारम्भिक शिक्षा पानेवाले छोटे २ छात्र, जिन्होंने पढ़ना अभी २ प्रारम्भ किया हो]।

(५) एकं समानशाखाध्येतॄणाम् । [वेद की एक ही शाखा पढ़नेवाले एक गुरु के शिष्य]।

(६) द्वे सहाध्यायिनाम् । [एक ही गुरु के शिष्य । सहपाठी' 'सहाध्यायी']।

(७) एकमग्निचितः । [अग्निचित् का नाम]।

(८) परम्पराऽऽगतोपदेशस्य द्वे । [पुरानी बातें,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]उपज्ञा ज्ञानमाद्यं स्याज्ज्ञात्वा[2]ऽऽरम्भ उपक्रमः ।
[3]यज्ञः सवो-ऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः ॥१३॥
[4]पाठो, होमश्चाऽतिथीनां सपर्या, तर्पणं, बलिः ।
एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः ॥१४॥
[5]समज्या परिष-द्गोष्ठी सभा-समिति-संसदः ।

परम्परागत उपदेश, व ऐतिहासिक बातें] ।

(१)आद्यज्ञानस्यैकम् । [प्रथम ज्ञान, प्रथम आविष्कार]।

(२) ज्ञात्वाऽऽरम्भस्यैकम् । 'यस्मात्प्रवृत्त आरम्भः स उपक्रम इष्यते' इति कात्यः । [नई बात का आविष्कार करके उसको चालू करना,जैसे नन्द राजानें 'द्रोण' तौल चलाया]।

(३) सप्त यज्ञस्य । [यज्ञ के ७ नाम] ।

(४) ब्रह्मयज्ञादेः--नामैकैकम् । तदुक्तम्-

"अध्यापनं ब्रह्मयज्ञः, पितृयज्ञस्तु तर्पणम् ।
होमो दैवो, बलिर्भौतो, नृयज्ञोऽतिथिपूजनम् ॥" इति ।

[नित्य के पञ्च महायज्ञ ब्रह्मयज्ञ आदि] ।

(५) नव सभायाः । तत्र आस्थानं क्लीबे । परिषत्-संसदौ समज्यादयोऽपि च स्त्रियाम् । सदः सान्तं--स्त्रीनपुंसकयोः । [सभा का नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

आस्थानी, क्लीबमास्थानं, स्त्रीनपुंसकयोः सदः ॥१५॥
प्राग्वंशः प्राग्वविर्गेहात्, सदस्या विधिदर्शिनः ।
सभासदः सभास्ताराः सभ्याः सामाजिकाश्च ते ॥१६॥
अध्वर्यू-द्रातृ-होतारो यजुः-साम-र्ग्विदः क्रमात् ।
आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते ॥१७॥
वेदिः परिष्कृता भूमिः, समे स्थण्डिल-चत्वरे ।

---

(१) हविर्गेहात् = यज्ञशालायाः, प्राक् सपत्नीकयजमानादिनिवासाय रचिते पत्नीशालाख्ये गृहे—प्राग्वंशः । ['प्राग्वंश' । यज्ञशाला से पूर्व में बना हुआ 'पत्नीशाला'नामक सपत्नीक यजमान के बैठने का स्थान] ।

(२) द्वे सदस्यानाम् । [सदस्यों का नाम] ।

(३) चत्वारि सभ्यानाम् । ['सभ्य' सभासदों का नाम] ।

(४) यजुर्विद्—अध्वर्युः, सामविद्उद्गाता-ऋत्विक्-होता । [अध्वर्यु उद्गाता और होता इन ऋत्विक् विशेषों के नाम] ।

(५) द्वे त्रीणि वा ऋत्विजां—ब्रह्मोद्गात्रादीनाम् । [होताओं का—१६ ऋत्विजों का—नाम] ।

(६) एकं यज्ञवेद्याः स्त्रियाम् । [यज्ञ की वेदी का नाम] ।

(७) यागार्थं संस्कृतभूमेर्द्वे—क्लीबे । [स्थण्डिल । याग के

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चैषालो यूपकटकः, [2]कुम्बा सुगहना वृतिः ॥१८॥
[3]यूपाग्रं तर्म, [4]निर्मन्थ्यदारुणि त्वरणिर्द्वयोः ।
[5]दक्षिणाग्निर्गार्हपत्याऽऽहवनीयौ त्रयोऽग्नयः ॥१९॥
[6]अग्नित्रयमिदं त्रेता, [7]प्रणीतः संस्कृतोऽनलः ।

लिए परिष्कृत चतुरस्र=चौरस—समतल भूमि]।

(१) यूपकटकस्य द्वे । [यूप=पशुबन्धार्थस्तम्भ के ऊपर का काष्ठ में ही खोदकर बनाया हुआ गोल कडा। वलयाकार भाग]।

(२) एकं सुगहनाया वृतेः । ['बाड' । अन्त्यज आदि की दृष्टि न पड़े इसलिए यज्ञभूमि के चारों ओर की गई गहरी ऊँची बाड़]।

(३) यूपाग्रभागस्य द्वे । तत्र तर्म नान्तं क्लीबे । [यूप-पशुबन्धार्थ स्तम्भ—का अग्रभाग]।

(४) एकम्-अरणेः । तत्र—अरणिर्द्वयोः । [अग्नि मन्थन काष्ठ-अरणि-का नाम]।

(५) एकैकमग्निविशेषस्य । [अग्नि विशेषों के १-१नाम]।

(६) एकमग्नित्रयस्य स्त्रियाम् । [तीनों अग्नियों का नाम]।

(७) एकं संस्कृतस्याग्नेः । [संस्कारों से संस्कृत अग्नि]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]समूह्यः परिचाय्यो-पचाय्यावग्नौ प्रयोगिणः ॥२०॥
यो [2]गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते ।
तस्मिन्नानाय्योऽथाऽऽग्नायी स्वाहा च हुतभुक्प्रिया२१
[4]ऋक् सामिधेनी धाय्या च या स्यादग्निसमिन्धने ।
गायत्रीप्रमुखं छन्दो, [6]हव्यपाके चरुः पुमान् ॥२२॥

---

(१) त्रीण्यग्निनामानि । (अग्नौ = अग्न्याधारस्थलविशेषे प्रयोगिणः = अग्न्याधारस्थलविशेषनामानि—इत्यर्थः । (ईंटों से चिना हुआ अग्न्याधारस्थलविशेष] ।

(२) गार्हपत्यादानीय संस्कृतस्य दक्षिणाग्नेरेकम् । [जो गार्हपत्य अग्नि से लाकर संस्कृत किया गया वह दक्षिणाग्नि] ।

(३) अग्निपत्न्यास्त्रीणि । [अग्नि की स्त्री स्वाहा के ३ नाम] ।

(४) समित्प्रक्षेपेण-अग्निसन्धुक्षणे प्रयुक्ताया ऋचो नामनी द्वे । [समिधाओं का प्रक्षेप करके अग्नि को प्रदीप्त करने में प्रयुक्त ऋचाओं का नाम] ।

(५) एकं छन्दसः । [गायत्री आदि छन्दों का नाम] ।

(६) एकं चरोः । हुंसि । अनस्रावितोऽन्तरूष्मपाक ओदनश्चरुरिति याज्ञिकाः । [हवन के लिये बनाया हुआ ओदन, दूध मेंमांडनिकाले विना अन्तर्धूम पक्व हवनार्थ चावल खीर] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः ।
[2]पवित्रं व्यजनं तद्यद्रचितं मृगचर्मणा ॥ २३ ॥
[3]पृषदाज्यं सदध्याज्ये, [4]परमान्नं तु पायसम् ।
[5]हव्य-कव्ये दैव-पैत्रे अन्ने, [6]पात्रं स्रुवादिकम् ॥२४॥
[7]ध्रुवो-पभृ-ज्जुहूर्ना तु स्रुवो भेदाः स्रुचः स्त्रियः ।

---

(१) क्वथिते उष्णे पयसि दधिनिक्षेपे सति यन्निष्पद्यते द्रव्यं, सा-आमिक्षा । [कढ़े उष्णदुग्धमें दहि देकर बनाया हविर्द्रव्य]।

(२) मृगचर्मरचितव्यजनस्यैकम् । [मृग चर्म का बना हुआ पंखा] ।

(३) दधिबिन्दुमिश्रितघृतस्यैकम् । [दहीके बिन्दुओं से मिला हुआ घृत] ।

(४) द्वे क्षीरान्नस्य । ['खीर'] ।

(५) दैवेऽन्ने हव्यं । [देवताओंके लिये दिया गया अन्न-हवि । हवनद्रव्य] । पैत्रेऽन्ने कव्यम् । [पितरों के लिये दिया गया अन्न-श्राद्धान्न] ।

(६) यज्ञपात्रादीनामेकैकम् । आदिना चमसोलूखलस्फ्यादयो ग्राह्याः । [यज्ञोपयोगी काष्ठ के पात्र] ।

(७) ध्रुवा-उपभृत्-जुहूः-स्रुक चएते स्रुचो भेदाः = स्रुग्विशेषाः,

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitized by eGangotri

[1]उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः ॥२५॥
[2]परम्पराकं शमनं प्रोक्षणं च वधार्थकम् ।
[3]वाच्यलिङ्गाः प्रमीतो-पसंपन्न-प्रोक्षिता हते ॥२६॥
[4]सौत्राम्यं हविरग्नौ[5] तु हुतं त्रिषु वषट्कृतम् ।

स्त्रियः = स्त्रियाम्। स्रुवस्तु-स्रुग्विशेषः—पुंसि । (स्त्रियामपि क्वचित्) । [ध्रुवा = वटपत्राकृति स्रुव विशेष । उपभृत् = चक्राकृति । जुहू = अर्द्धचन्द्राकृति स्रुव विशेष । हवन साधन पात्र] ।

(१) अभिमन्त्र्य यज्ञे हतस्य पशोरेकम् । [अभिमन्त्रित करके यज्ञ में बलि दिये गए पशु का नाम] ।

(२) यज्ञार्थं पशुमारणस्य । 'परम्पराकं शसनम्' इति पाठोऽत्र युक्त इति क्षीरस्वामी । 'प्रोक्षणं तत्र यो वधः' इति पाठान्तरम् । [यज्ञ के लिये पशु वध करने का नाम] ।

(३) यज्ञहतपशोस्त्रीणि नामानि वाच्यलिङ्गानि त्रिषु लिङ्गेषु । [यज्ञार्थ मारे गये पशु का नाम] ।

(४) द्वे हविषः । [हवि का नाम] ।

(५) अग्नौ हुतस्य एकं—त्रिषु । [अग्नि में हवन किये गये हविका नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दीक्षान्तोऽवभृथो यज्ञे, तत्कर्मार्हन्तु यज्ञियम् ॥२७॥
त्रिष्वथ क्रतुकर्मेष्टं, पूर्तं खातादिकर्मणि ।
अमृतं, विघसो यज्ञशेष-भोजनशेषयोः ॥ २८ ॥

(१) यज्ञे इति पाठे एकमवभृथस्नानस्य। 'दीक्षान्तोऽवभृथो यज्ञ'इति तु शोभनपाठः । तत्र तु नामद्वयम् । [यज्ञके अन्त में होनेवाले अवभृथ स्नान का २ नाम]।

(२) यज्ञार्हवस्तूनां विप्रादीनामेकं—त्रिषु । [यज्ञोपकरण द्रव्य और विद्वान् ब्राह्मणों का नाम] ।

(३) क्रतु = क्रतोः = यज्ञस्य, कर्म = कर्मणः, दानादेश्च-इष्टमिति नामेत्यर्थः । तदुक्तम्—

एकाग्निकर्म हवनं, त्रेतायां यच्च हूयते ।
'अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते ।' इति ।

[यज्ञ और दान का नाम] ।

(४) देवालयारामतडागादेर्निर्माणस्यैकम् । तदुक्तं—

'वापी-कूपतडागादि देवतायतनानि च ।
अन्नप्रदानमारामः पूर्तमार्याः प्रचक्षते ।' इति ।

[कुवां, बावड़ी, मन्दिर आदि बनवाने का नाम] ।

(५) यज्ञशेषः—पुरोडाशादिः—अमृतम् । गुर्वतिथिपित्रादिभुक्तशेषः = अन्नादिश्च-विघसः । [यज्ञ से अवशिष्ट और ब्राह्मणादि भुक्त से अवशिष्ट अन्न का नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्यागो विहापितं दानमुत्सर्जन-विसर्जने ।
विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् ॥ २९ ॥
प्रादेशनं निवपनमपवर्जनमंहतिः ।
[2]मृतार्थं तदहे दानं त्रिषु स्यादौर्ध्वदैहिकम् ॥३०॥
[3]पितृदानं निवापः स्या[4]च्छ्राद्धं तत्कर्म शास्त्रतः ।
[5]अन्वाहार्यं मासिकं[6]ऽशोऽष्टमोऽह्नः कुतपोऽस्त्रियाम् ॥

---

(१) दानस्य त्रयोदशनामानि । [दान का १३ नाम] ।

(२) मृताहे प्रेतदिने दानम् । पिण्डोदकादि दानम् । और्ध्वदेहिकं, त्रिषु लिङ्गेषु । [मरने के बाद ११ वें १२ वें दिन दिये जानेवाले दान । पददान आदि] ।

(३) द्वे सपिण्डनादूर्ध्वं पित्रुद्देशेन दानस्य । [सपिण्डन के बाद दिये गये पित्रर्थ दान का नाम] ।

(४) शास्त्रोक्तविधिना पितृकर्म श्राद्धम् । [श्राद्धका नाम] ।

(५) द्वे पितृणां मासिकस्य श्राद्धस्य । [मासिक श्राद्धनाम]।

(६) अह्नोऽष्टमोंऽशः—कुतप इत्यन्वयः । दिनस्याऽष्टमस्य भागस्यैकम् । [पञ्चदशमुहूर्तात्मक–दिन के आठवें भाग १५ अपराह्न का नाम] । तदुक्तं स्मृतौ—

"दिवसस्याष्टमे भागे मन्दीभवति भास्करे ।
यत्र पितृभ्यो दत्तमक्षयम् ॥" इति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पर्येषणा परीष्टिश्चा-ऽन्वेषणा च गवेषणा ।
सेनिस्त्वध्येषणा, याच्ञा-ऽभिशस्ति-र्याचना-ऽर्थना ॥
षट् तु त्रिष्वर्घ्यमर्घार्थे, पाद्यं पादाय वारिणि ।
क्रमादातिथ्या-ऽतिथेये अतिथ्यर्थेऽत्र साधुनि ॥३३॥

---

(१) चत्वारि श्राद्धे ब्राह्मणशुश्रूषायाः, धर्माद्यन्वेषणस्य च । [श्राद्ध में ब्राह्मणों की शुश्रूषा = सेवा, परिचर्या का नाम-पर्येषणा। तथा खोज, धर्म आदि के तत्त्व के अन्वेषण का नाम भी अन्वेषणा] ।

(२) गुर्वादेराराधनस्य द्वे । प्रार्थनापूर्वकं गुर्वादेः क्वचित्कर्मणि नियोजनस्येत्येके । [गुरु, पिता माता आदि बड़े लोगों को प्रार्थना-पूर्वक किसी कार्य में लगाना] ।

(३) चत्वारि याच्ञायाः । [मांगना 'प्रार्थना'] ।

(४) आगन्तुकशब्दपर्यन्ता वक्ष्यमाणाः षट्—त्रिषु = त्रिषु लिङ्गेषु बोध्या इत्यर्थः ।

(५) अर्घ्यपाद्ययोरेकैकम् । [अर्घ के लिए और पैर धोने के लिए जल का १-१ नाम] ।

(६) अतिथ्यर्थम्—आतिथ्यम् । अतिथौ साधु—आतिथेयम् । [अतिथि सत्कार आदि का नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्युरावेशिक आगन्तुरतिथिर्न गृहाऽऽगते ।
[प्राघूर्णिकः प्राघुणकश्चा-ऽभ्युत्थानं तु गौरवम् ॥ ३४ ॥]
[2]पूजा नमस्याऽपचितिः सपर्या-ऽर्चा-ऽर्हणाः समाः ।
[3]परिचर्या तु शुश्रूषा परिचर्याऽप्युपासना ॥ ३५ ॥
[4]व्रज्या-ऽटाट्या पर्यटनं, [5]चर्या त्वीर्यापथे स्थितिः ।
[6]उपस्पर्शस्त्वाचमनमथ [7]मौनमभाषणम् ॥ ३६ ॥
[[8]प्राचेतसश्चा-ऽऽदिकविः स्यान्मैत्रावरुणिश्च सः ।

---

(१) त्रीणि अतिथेः । ['पाहुन' 'बटाऊ'] ।
(२) षट् पूजनस्य । [पूजा का नाम] ।
(३) चत्वारि सेवायाः । [सेवा का नाम] ।
(४) त्रीणि पर्यटनस्य ['घूमना'] ।
(५) ईर्यापथे = ध्यानादि–मौनादिरूपे उपाये, स्थितिः–चर्या ॥ एकं सन्यासिनां ध्यानमौनादिव्रतस्य । [सन्यासियों के साधनावस्था के ध्यान, मौन, नियम आदि] ।
(६) द्वे आचमनस्य । [आचमन] ।
(७) द्वे मौनस्य । ['मौन' । नहीं बोलना] ।
(८) प्रक्षिप्तं–वाल्मीकिमुनिनाम । ['वाल्मीकि'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाल्मीकिश्चाऽथ गाधेयो विश्वामित्रश्च कौशिकः।
व्यासो द्वैपायनः पाराशर्यः सत्यवतीसुतः] ॥
आनुपूर्वी स्त्रियां वा(-ऽऽ)वृत्-परिपाटी अनुक्रमः।
पर्यायश्चाऽतिपातस्तु स्यात्पर्यय उपात्ययः ॥ ३७ ॥
नियमो व्रतमस्त्री, तच्चोपवासादि पुण्यकम्।
औपवस्तं तूपवासो, विवेकः पृथगात्मता ॥ ३८ ॥

(१) विश्वामित्रमुनिनाम। ['विश्वामित्र']। (२) व्यासनाम। ['व्यास']। (३) पञ्च क्रमस्य। तत्र आनुपूर्वी स्त्रियाम्। आनुपूर्व्यमपि। 'वा स्त्रिया' मित्यन्वयः। आवृत्-इति च्छेद इति तु स्वाम्यादयः। परे तु वावृतुधातुरप्यस्ति। 'ततो वावृत्यमाना सा' इति भट्टिप्रयोगश्चात्रानुकूलः। तेन 'वावृत्' इत्येव नाम। वावृत्-परिपाटिशब्दौ च स्त्रियाम्। परिपाटीशब्दोऽपि ङीषन्तोस्ति। द्विवचनत्वाद्गृह्यत्वान्न यण्।

[क्रम, आनुपूर्वी, नम्बरवार, पर्याय, परिपाटी नाम]।

(४) क्रमोल्लङ्घनस्य त्रीणि। [व्युत्क्रम, बेसिलसिलेवार]।

(५) द्वे व्रतमात्रस्य। [व्रतनाम]।

(६) तच्च-उपवासकृच्छ्रचान्द्रायणादिव्रतञ्च-पुण्यकमित्युच्यते। एकमुपवासादेः। [उपवास आदि पुण्य का १ नाम]।

(७) द्वे उपवासस्य। [उपवास का नाम]।

(८) द्वे-विवेकस्य=प्रकृतिपुरुषादिभेदज्ञानस्य। [विवेक नाम]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्याद् ब्रह्मवर्चसं वृत्ता-ऽध्ययनाद्धिरथाऽञ्जलिः[2] ।
पाठे ब्रह्माञ्जलिः, पाठे[3] विप्रुषो ब्रह्मबिन्दवः ॥ ३९ ॥
ध्यान-योगासने ब्रह्मासनं, कल्पे[4] विधि-क्रमौ[5] ।
मुख्यः[6] स्यात्प्रथमः कल्पोऽनुकल्पस्तु[7] ततोऽधमः॥४०॥

---

(१) आचार-वेदाध्ययनादितपः—सम्पत्तिः—'ब्रह्मवर्चस'मित्युच्यते । [ब्रह्मतेज, वेदाध्ययनादि कर्म सम्पत्ति] ।

(२) वेदाध्ययनावसरे कृतस्याऽञ्जलेरेकम् । [पढते समय गुरु के सामने की हुई अंजली] ।

(३) वेदपठनावसरे मुखान्निर्गतबिन्दूनामेकम्—पुंसि । [पढते समय मुख से निकले हुए बिन्दु] ।

(४) एकं ब्रह्मासनस्य । [ध्यान और योग के समय लगाए हुए 'पद्मासन' आदि आसनों का नाम] ।

(५) त्रीणि विधानस्य । [यज्ञ याग आदि की विधि, पद्धति का नाम] ।

(६) मुख्यकल्पस्यैकम् । [मुख्य विधि] ।

(७) गौणविधेरेकम् । [गौण विधि] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]संस्कारपूर्वग्रहणं स्यादुपाकरणं श्रुतेः ।
[2]समे तु पादग्रहणमभिवादनमित्युभे ॥ ४१ ॥
[3]भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी ।
[4]तपस्वी तापसः पारिकाङ्क्षी, [5]वाचंयमो मुनिः॥४२॥
[6]तपःक्लेशसहो दान्तो, [7]वर्णिनो ब्रह्मचारिणः ।
[8]ऋषयः सत्यवचसः, [9]स्नातकस्त्वासुतो व्रती ॥४३॥

---

(१) विशिष्टसंस्कारपूर्वकं श्रुतेर्ग्रहणम्—उपाकर्म । ['उपाकर्म' श्रावणी कर्म] ।

(२) द्वे यथावन्नामोच्चारणपूर्वकं गुर्वादिनमस्कारस्य । [गुरु का अभिवादन, पैर पकड़कर विधिवत् प्रणाम] ।

(३) पञ्च संन्यासिनाम् ।[संन्यासी, दण्डी स्वामी आदि]।

(४) त्रीणि तपस्विनः । [तपस्वी, तपस्या करनेवाला] ।

(५) द्वे मौनव्रतशालिनः । [मौनव्रती, मुनि] ।

(६) द्वे क्लेशसहनशीलस्य । [तपस्या के कष्ट को सहन करनेवाला] ।

(७) द्वे ब्रह्मचारिणः । [ब्रह्मचारी नाम] ।

(८) द्वे ऋषिसामान्यस्य । रिषिरपि । [ऋषियों का नाम] ।

(९) द्वे समावर्तितस्य । आश्रमान्तरमागतस्य । 'यो

Dr. Uma Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते ।
[2]यैः स्थण्डिले व्रतवशाच्छेते स्थण्डिलशाय्यसौ ॥४४॥
स्थाण्डिलश्चाऽर्थ[3] विरजस्तमसः स्युर्द्वयातिगाः ।

व्रती = वेदव्रतवान् ब्रह्मचारी, आप्लुतः = स्नातः, कृतसमावर्त्तन-संस्कारः, स स्नातक' इत्युच्यते इत्यक्षरार्थः ।

तदुक्तं—

'गुरवे तु वरं दत्त्वा स्नायात्तु तदनुज्ञया ।
वेदं, व्रतानि वा पारं नीत्वा, ह्युभयमेव वा ॥' इति ।

"यो व्रती = व्रतवान्, तीर्थेषु आप्लवते = स्नातीति-आप्लुतः-स 'स्नातक' इत्युच्यते इति तु क्षीरस्वामी । 'नित्यस्नायी' इतिमुकुटः ।

'आप्लवव्रती' ति 'आप्लुतव्रती, इति च पाठान्तरं दीक्षिता आहुः । [स्नातक । गुरुकुल में रहकर वेदाध्ययन समाप्त करलेनेवाले कृत-समावर्त्तन-संस्कार छात्र का नाम] ।

(१) निर्जितसर्वेन्द्रियाणां त्रीणि । [यती, जितेन्द्रिय]

(२) अनास्तृतभूमिशयनव्रतशालिनो द्वे । [भूमि पर सोने के व्रत को पालने वाले का नाम] ।

(३) निवृत्तरजस्तमोगुणानां द्वे । [सात्त्विक एवं शान्त वृत्ति महात्माओं के नाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पवित्रः प्रयतः पूतः; पाखण्डाः सर्वलिङ्गिनः ॥४५॥
पालाशो दण्ड आषाढो व्रते, रम्भस्तु वैणवः ।
अस्त्री कमण्डलुः कुण्डी, व्रतिनामासनं वृषी ॥४६॥
अजिनं चर्म कृत्तिः स्त्री, भैक्षं भिक्षाकदम्बकम् ।

(१) त्रीणि पवित्रस्य । [पवित्र, शुद्ध] ।

(२) वेदबाह्यपथवर्त्तिनां द्वे । वेदबाह्य-दुःशास्त्रोक्त-व्रताचाराः क्षपणकाद्याः, भङ्गव्रताश्च 'पाखण्डा' इत्युच्यन्ते । तदुक्तं-'स्वेच्छाव्रत-धरा नानावेषाः पाषण्डिनो मताः' । [पाखण्डी, वेदविरुद्ध आचार वाले, संसार को ठगने के लिए ही साधु सन्यासी ब्रह्मचारी आदि का वेष बनाकर झूठे ही घूमने वाले भिक्षुक । 'भिखमंगे'] ।

(३) एकं पालाशदण्डस्य । पालाशो दण्डो-व्रते = ब्रह्मचर्ये इत्यन्वयः । [ब्रह्मचारी के पलाश के दण्ड का नाम] ।

(४) एकं वैणवदण्डस्य । [बांस के दण्ड का नाम] ।

(५) द्वे यत्यादीनां जलपात्रस्य । तत्र कमण्डलुरस्त्रियाम् । [कमण्डलु का नाम] ।

(६) व्रतिनामासनस्यैकम् । वृसीत्यपि ।
[बेतका आसन, कुर्सी चौकी] ।

(७) त्रीणि मृगादिचर्मणः । [मृगछाला आदि चर्म] ।

(८) भिक्षासमूहस्यैकम् । [भिक्षाओं का समूह] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

[1]स्वाध्यायः स्याज्जपः, [2]सुत्याऽभिषवः सवनं च सा ॥
[3]सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणम् ।
[4]दर्शश्च पौर्णमासश्च यागौ पक्षान्तयोः पृथक् ॥४८॥
[5]शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः ।
नियमस्तु स यत्कर्माऽनित्यमागन्तुसाधनम् ॥४९॥
[क्षौरन्तु भद्राकरणं मुण्डनं वपनं त्रिषु] ।

---

(१) द्वे वेदाध्ययनस्य । [वेदपाठ आदि] ।

(२) सोमलताकण्डनस्य त्रीणि । [सोमयज्ञों में सोम लता को कूटकर रस निकालने का नाम] ।

(३) एकमघमर्षणस्य । [अघमर्षण, नाक से जल लगाकर, या गोता लगाकर मन्त्र विशेष का जप करना] ।

(४) दर्शपौर्णमासयोरेकैकम् । [दर्श और पौणमासयज्ञ] ।

(५) शरीरसाधनापेक्षस्य यावज्जीवं करणीयस्य नित्यकर्मण एकम् । [यम और शरीर द्वारा साधन किए जानेवाले सत्य-भाषण आदि नित्य नियम, व्रत आदि] ।

(६) अनित्यास्याऽऽगन्तुककर्मण एकम् । [शौच आदि नियम]।

(७) चत्वारि मुण्डनस्यत्रिषु । 'भद्राकरण'मपि । [मुण्डन] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उपवीतं[1] ब्रह्मसूत्रं प्रोद्धृते दक्षिणे करे ।
प्राचीनाऽवीतमन्यस्मिन्निवीतं[3] कण्ठलम्बितम् ॥५०॥

[अत्र-प्रक्षिप्ताः केचन श्लोकाः—]

'शैव' ऊर्ध्वस्रोतसिकः, 'सिद्धान्ती' ('समयी') शुद्धमार्गिकः ।
पाञ्चार्थिकः 'पाशुपतो' 'लाकुलो'-ऽथ महाव्रती ॥ १ ॥
'कापाली' सोमसिद्धान्ती, 'तान्त्रिकः' स्याद्विशेषदृक् ।
'यामलो'ऽद्वयमार्गी,स्या 'त्रिकभेदी' षडर्द्धिकः ॥ २ ॥
'पूर्वाम्नायी' महामार्गो, 'भैरवो' दक्षिणागमः ।
'शाक्तो' वामस्रोतसिकः, 'कौल' आन्वयिको मतः ॥ ३ ॥
एकायनः 'सात्वत'श्च 'वैष्णवः' पाञ्चरात्रिकः ।
रक्ताम्बरो भदन्तश्च 'शाक्य'—('बौद्ध') श्रमण-वन्दकौ ॥४॥
भिक्षुः श्वेतः 'श्वेतपटः' क्षपणर्षि 'र्दिगम्बरः' ।
नग्नाटः श्रावकोऽर्हीको 'निर्ग्रन्थो' जीव-जीवकौ ॥५॥
क्षौरन्तु भद्राकरणं मुण्डनं वपनं त्रिषु ।
कक्षापटी च कौपीनं, शाटी च स्त्रीति लक्ष्यतः" ॥ ६ ॥
—इति प्रक्षिप्ताः श्लोकाः षट् क्वचिद् दृश्यन्ते ।

अत्र शैवादिमतानुयायिनां पृथक्-पृथङ् नामानि बोध्यानि ।

(१) द्वे यज्ञोपवीतस्य वामस्कन्धार्पितस्यैकम् । [बाएं कन्धे पर रखा हुआ यज्ञोपवीत] ।

(२) दक्षिणस्कन्धार्पितयज्ञोपवीतस्यैकम् । [दक्षिण कन्धे पर रखा हुआ यज्ञोपवीत] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

अङ्गुल्यग्रे[1] तीर्थं दैवं, [2]स्वल्पाङ्गुल्योर्मूले कायम् ।
मध्येऽङ्गुष्ठाङ्गुल्योः[3] पित्र्यं, मूले[4]त्वङ्गुष्ठस्य ब्राह्मम् ॥
[5]स्याद् ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ।
देवभूयादिकं तद्वत्कृच्छ्रं सान्तपनादिकम् ॥५२॥
[7]संन्यासवत्यनशने पुमान् प्रायोऽथ [8]वीरहा ।

निवीतमिति कण्ठलम्बियज्ञोपवीतस्यैकम् । [गले में कण्ठी की तरह रखी हुई जनेऊ] ।

(१) एकं दैवतीर्थस्य । [अंगुलीके अग्र भागमें दैवतीर्थ] ।

(२) एकं कायतीर्थस्य । [दोनों कनिष्ठिका=छोटी अंगुलियों की जड़ में कायतीर्थ] ।

(३) एकं पितृतीर्थस्य । [अंगुष्ठ और तर्जनी के बीच में पितृतीर्थ] । 'मूलेह्यङ्गुष्ठस्ये'ति पाठान्तरम् ।

(४) एकं ब्राह्मतीर्थस्य । [अंगुष्ठ के मूल में ब्राह्मतीर्थ] ।

(५) ब्रह्मभावस्य त्रीणि । [मृत्यु] । एवमेव देवसायुज्यादिकमपि बोध्यम् ।

(६) एकं प्रायश्चित्तस्य । [प्रायश्चित्त नाम] ।

(७) मरणेच्छया भोजनादित्यागस्यैकम् । [आत्म-त्याग-मरण-के लिए अनशन करना] ।

(८) प्रमादादिनाशिताग्नेरग्निहोत्रिणो द्वे । [असावधानी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नष्टाग्निः, कुहना[1] लोभान्मिथ्येर्यापथकल्पना ॥५३॥
व्रात्यः[2] संस्कारहीनः स्यादस्वाध्यायो[3] निराकृतिः ।
धर्मध्वजी[4] लिङ्गवृत्तिरवकीर्णी[5] क्षतव्रतः ॥५४॥
[6]सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ।
अंशुमानभिनिर्मुक्ताभ्युदितौ च यथाक्रमम् ॥५५॥

एवं प्रमाद से अग्नि होत्र की अग्नि को जिस अग्निहोत्री ने नष्ट कर दिया है, बुता दिया उसका नाम]।

(१) दम्भेन ध्यानमौनाद्याश्रयणस्य । [लोभ से नया पन्थ चलाना, मांगने का नया ढंग निकालना, ढोंग रचना]।

(२) द्वे व्रात्यस्य । [पतित, संस्कार हीन, व्रात्य]।

(३) वेदाध्ययनरहितस्य द्वे । [वेदाध्ययन से रहित]।

(४) द्वे भिक्षार्थं जटादिधारिणः । [मांगने खाने के लिए झूठे ही जटा आदि बढ़ाने वाला, ढोंगी, धर्मध्वजी]।

(५) खण्डितव्रतस्य द्वे । [भग्नव्रत, खण्डितव्रत व्यक्ति, जिसन अपने ब्रह्मचर्य आदि व्रत का भङ्ग कर दिया हो]।

(६) यस्य सुप्तस्यैव सूर्य उदेति, अस्तमेति च तस्यैकैकम् । [प्रातः सूर्योदय होने के बाद उठने वाला, और सायं सूर्य अस्त होने तक सोने वाला व्यक्ति]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]परिवेत्ताऽनुजोऽनूढे ज्येष्ठे दारपरिग्रहात् ।
[2]परिवित्तिस्तु तज्ज्यायान्, विवाहो-[3]पयमौ समौ ॥
तथा परिणयो-द्वाहो-पयामाः पाणिपीडनम् ।
[4]व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम् ॥५७॥
[5]त्रिवर्गो धर्मकामार्थैश्च[6]तुर्वर्गः समोक्षकैः ।
[7]सबलैस्तैश्चतुर्भद्रं, [8]जन्याः स्निग्धा वरस्य ये ॥५८॥

* इति ब्रह्मवर्गः ७ ॥ *

(१) ज्येष्ठेऽनूढे कृतविवाहस्य कनिष्ठस्यैकम् । [बड़े भाई के विवाह होने से पहिले ही अपना विवाह कर लेना वाला छोटा भाई] ।

(२) परिवेत्तुर्ज्येष्ठभ्रातुरेकं नाम । [जिसके छोटे भाई का पहिले ही विवाह हो गया है, ऐसे बड़े भाई का नाम] ।

(३) षट्-विवाहस्य । [विवाह] ।

(४) पञ्च मैथुनस्य । [मैथुन का नाम] ।

(५) एकं त्रिवर्गस्य । [धर्म, अर्थ, काम] ।

(६) एकं चतुर्वर्गस्य । [धर्म, अर्थ, काम, मोक्ष] ।

(७) धर्मार्थकामबलैश्चतुर्भद्रमित्यर्थः । [धर्म, अर्थ, काम, बल] ।

(८) एकं वरपक्षीयाणाम् । [बराती] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ अथ क्षत्रियवर्गः ❀

मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ।
राज्ञि राट् पार्थिव-क्ष्माभृ-न्नृप-भूप-महीक्षितः ॥१॥
राजा तु प्रणताऽशेषसामन्तः स्यादधीश्वरः ।
चक्रवर्ती सार्वभौमो, नृपोऽन्यो मण्डलेश्वरः ॥२॥
येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः—।

---

(१) पञ्च क्षत्रियस्य नामानि । तत्र—विराट्—जान्तः । सर्वे पुंसि । [क्षत्रिय] ।

(२) सप्त राज्ञः । तत्र—राजा नान्तः, राट्—जान्तः, क्ष्माभृन्महीक्षितौ तान्तौ । क्ष्माभृगपि । [राजा] ।

(३) स्वदेशसमीपदेशाधिपवशीकारिणो राज्ञो नामैकम्—'अधीश्वर' इति । [स्वदेश समीपवर्ती नरेशों का अधीश्वर राजा, राजाधिराज] ।

(४) समुद्रान्तपृथिवीश्वरस्य द्वे नामनी । [चक्रवर्त्ती, सम्पूर्ण भूमण्डल का राजा] । तत्र चक्रवर्ती नान्तः ।

(५) स्वल्पभूभागाधिपतेरेकम् । [नरपति, मण्डलेश्वर, साधारण-छोटा-राजा] ।

(६) राजसूययज्ञकर्तुश्चक्रवर्त्तिन एकम् । केचित्तु—राजसूययज्ञ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शास्ति यश्चाज्ञया राज्ञः स सम्राडथ राजकम् ॥३॥
राजन्यकञ्च नृपति-क्षत्रियाणां गणे क्रमात् ।

कर्ता—सम्राट्, द्वादशराजमण्डलाधिपोऽपि—सम्राट्—जान्तः। [राजाधिराज राजराजेश्वर, चक्रवर्त्ती, सम्राट्]।

(१) एकं नृपतिसमूहस्य नाम। [राजाओं का समूह]। क्षत्रियसमूहस्य एकं नाम क्लीबे। [क्षत्रियों का समूह]।

"रामो दाशरथी रावणारि-काकुत्स्थ-राघवाः।
सौमित्रिर्लक्ष्मणो, लङ्कापति-पौलस्त्य-रावणाः ॥ १ ॥
दशास्योऽपीन्द्रजिन्मेघनादो मन्दोदरीसुतः।
आञ्जनेयस्तु हनुमान् हनूमान् मारुतात्मजः ॥ २ ॥
किष्किन्धाऽधिप-सुग्रीवौ, द्वौ जटायु-जटायुषौ।
अजातशत्रुः शल्यारिर्धर्मपुत्रो युधिष्ठिरः ॥ ३ ॥
राधेयोऽङ्गाधिपः कर्णो, भीमसेनो हिडिम्बजित्।
मारुतिः कीचकाऽरातिर्बकवैरी वृकोदरः ॥ ४ ॥
धनञ्जयोऽर्जुनः पार्थो विजयः शक्रनन्दनः।
गाण्डीवी फाल्गुनः सव्यसाची मध्यमपाण्डवः ॥ ५ ॥
जिष्णुः किरीटी बीभत्सुः श्वेतवाजी कपिध्वजः।
पृथा कुन्ती च, कृष्णा तु पाञ्चाली याज्ञसेन्यपि ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मन्त्री धीसचिवोऽमात्योऽन्ये कर्मसचिवास्ततः ॥४॥
महामात्राः प्रधानानि, पुरोधास्तु पुरोहितः ।
द्रष्टरि व्यवहाराणां प्राड्विवाका-ऽक्षदर्शकौ ॥५॥
प्रतीहारो द्वारपाल-द्वाःस्थ-द्वाःस्थित-दर्शकाः ।

द्रौपदी, विक्रमादित्यः साहसाङ्कः शकान्तकः ।
शूद्रकस्त्वग्निमित्रो वा, हालः स्याच्छालिवाहनः॥(स्यातवाहनः)।
वैरोचनो बलिः, कार्त्तवीर्योऽर्जुनः सहस्रदोः ॥"
—इति प्रक्षिप्तानि नामानि क्वचिदधिकानि दृश्यन्ते ।

(१) त्रीणि मन्त्रिणः । तत्र मन्त्री— नान्तः । [मंत्री नाम]।

(२) एकं प्रधानानां कर्मसहायानां नियोगिनाम् । [सहायक मन्त्री, शिक्षामन्त्री आदि] ।

(३) प्रधानमन्त्रिणो नामद्वयम् । तत्र—प्रधानशब्दः क्लीबे । पुंलिङ्गोऽप्ययं बोपालितकोशप्रामाण्यात् ।

(४) द्वे राजपुरोहितस्य–धर्माध्यक्षस्य । तत्र पुरोधाः सान्तः पुंसि । [धर्माध्यक्ष, राजपुरोहित] ।

(५) द्वे व्यवहारनिर्णायकानाम् [जज] ।

(६) पञ्च द्वारपालस्य । [दरवान] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]रक्षिवर्गस्त्वनीकस्थोऽ[2]ध्यक्षा-ऽधिकृतौ समौ ॥६॥
[3]स्थायुकोऽधिकृतो ग्रामे, [4]गोपो ग्रामेषु भूरिषु ।
भौरिकः[5] कनकाध्यक्षो, [6]रूप्याध्यक्षस्तु नैष्किकः ॥ ७॥
[7]अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः ।
[8]सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते ।८।

---

(१) द्वे रक्षकाणाम् । ['रखवाला' 'प्रहरी' सिपाही] ।
(२) द्वे अधिकारिणः । [अफसर] ।
(३) एकं ग्रामाध्यक्षस्य [स्थायुक=ठाकुर] ।
(४) बहुग्रामाधिकृतस्यैकम् । ['अनेकग्रामाधिपति' ।
(५) सुवर्णाध्यक्षस्य द्वे । [सुवर्णाध्यक्ष,कोशाध्यक्ष,अर्थ-मन्त्री आदि] ।
(६) रूप्याध्यक्षस्य द्वे । [चान्दी की मुद्रा व टकसाल का अधिकारी] ।
(७) एकमन्तःपुराधिकृतस्य । [महल का अफसर] ।
(८) चत्वारि राजान्तःपुररक्षकविशेषस्य । तत्र कञ्चुकी नान्तः । [महल के रक्षक, मुसाहिब, कर्मचारी, व्यवस्थापक, जमा-दार आदि] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शण्ढो[1] वर्षवरस्तुल्यौ, सेवका[2]-ऽर्थ्य-नुजीविनः ।
विषयानन्तरो[3] राजा शत्रुर्मित्रमतः[4] परम् ॥ ९ ॥
उदासीनः[5] परतरः, पार्ष्णिग्राहस्तु[6] पृष्ठतः ।
रिपौ वैरि-सपत्ना[7]-ऽरि-द्विषद्-द्वेषण-दुर्हृदः ॥ १० ॥

(१) द्वे वर्षवरस्य । ['खोजा' 'हिंजडा'] । तदुक्तं—
"येऽत्वल्पसत्त्वाः प्रथमाः क्लीबाश्च स्त्रीस्वभाविनः ।
जात्या न दुष्टाः कार्येषु ते वै वर्षवराः स्मृताः ॥" इति ॥
तत्र शण्ढः, षण्डोऽपि, षण्ढोऽपि च ।

(२) त्रीणि सेवकस्य त्रिषु । तत्र—अर्थ्यनुजीविनौ नान्तौ । [नौकर, चाकर] ।

(३) स्वदेशसमीपदेशस्थराज्ञ एकम् । [अपने राज्य की सीमा पर स्थित राजा-शत्रु] ।

(४) अतः = शत्रोः, परं-मित्रमिति एकं नाम क्लीबे । अतः = स्वदेशादिति तु गौडाः । [शत्रुका शत्रु = अपना मित्र] ।

(५) स्वदेशात्परतरस्य राज्ञ एकम् । [उदासीन-तटस्थ का नाम] ।

(६) विजिगीषुपृष्ठस्थितस्य राज्ञ एकम् । [विजिगीषु के पृष्ठ भाग में स्थित राजा] ।

(७) ऊनविंशतिः—(१९)—शत्रोः । तत्र वैरि-प्रत्यर्थि-परि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्विड्-विपक्षा-ऽहिता-ऽमित्र-दस्यु-शात्रव-शत्रवः ।
अभियाति-परा-ऽराति-प्रत्यर्थि-परिपन्थिनः ॥ ११ ॥
वयस्यः स्निग्धः सवया, अथ मित्रं सखा सुहृत् ।
सख्यं साप्तपदीनं स्यादनुरोधोऽनुवर्त्तनम् ॥ १२ ॥
यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः ।
चारश्च गूढपुरुषश्चाऽऽप्तः प्रत्ययितस्त्रिषु ॥ १३ ॥

पण्यभिघातिनो नान्ताः । द्विषत्—नान्तः । द्विट्—षान्तः । दुर्हृत्—दान्तः । [शत्रु, वैरी के २९ नाम] ।

(१) त्रीणि तुल्यवयसः । सवयाः सान्तः । [समानवयस्क मित्र, बराबर अवस्था—उमर—का मित्र] ।

(२) त्रीणि मित्रस्य । तत्र सखिशब्द इकारान्तः, सुहृद्दान्तः । [मित्र का ३ नाम] ।

(३) मित्रताया द्वे । [मित्रता] ।

(४) द्वे अनुरोधस्य, स्वजनानामिष्टसम्पादनस्य । ['अनुरोध स्वीकार करना' 'मुलाहिजा रखना' 'दूसरे की बात रखना'] ।

(५) सप्त चारस्य । ['खुफिया' 'भेदिया' 'जासूस'] ।

(६) द्वे विश्वस्तस्य त्रिषु । [विश्वासी] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सांवत्सरो ज्यौतिषिको दैवज्ञ-गणकावपि ।
स्युर्मौहूर्तिक-मौहूर्त-ज्ञानि-कान्तान्तिका अपि ॥१४॥
तान्त्रिको ज्ञातसिद्धान्तः, सत्त्री गृहपतिः समौ ।
लिपिङ्करोऽक्षरचणोऽक्षरचुञ्चुश्च लेखके ॥ १५ ॥
लिखिताऽक्षरविन्यासे लिपिर्लिबिरुभे स्त्रियौ ।
स्यात्संदेशहरो दूतो, दूत्यं तद्भावकर्मणी ॥१६॥

---

(१) अष्टौ ज्यौतिषिकस्य ['ज्यौतिषी' 'जोसी'] ।

(२) तत्त्वज्ञस्य द्वे । सिद्धान्तज्योतिश्शास्त्रवेत्तुरिति तु गौडाः । [सिद्धान्त ज्यौतिष का ज्ञाता । और वैद्यक, ज्यौतिष, तन्त्र, मन्त्र, झाड-फूँक, शास्त्र आदि का ज्ञाता] ।

(३) द्वे सर्वदाऽन्नादिदानकर्तुः । तत्र सत्त्री नान्तः । [सत्त्र =सदावर्त्त, सत्त्र लगाने वाला-सत्त्री, यजमान] ।

(४) चत्वारि लेखस्य । लिबिङ्कर इत्यपि नाम । 'लिपिकर' इत्यपि पाठः ['लिखारी' 'लेखक'] ।

(५) द्वे लेखनस्य । उभे अपि स्त्रियाम् । 'लिबि' रपि । [लिखना] । चत्वार्यपि नामानीति परे ।

(६) द्वे दूतस्य [राजदूत] ।

(७) एकं दूतकर्मणः, दूतभावस्य च । 'दौत्य'मित्यपि नाम । 'दूत्यं तद्भागकर्मणी' इत्यपि पाठः । [दूत का काम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि ।
स्वाम्य-मात्य-सुह्-त्कोष-राष्ट्र-दुर्ग-बलानि च ॥१७॥
राज्याङ्गानि प्रकृतयः, पौराणां श्रेणयोऽपि च ।
सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः ॥१८॥
षड्गुणाः, शक्तयस्तिस्रः प्रभावो-त्साह-मन्त्रजाः ।

---

(१) पञ्च पथिकस्य । ['पान्थ' 'बटाऊ'] ।

(२) राज–मन्त्रि–मित्र–कोश–देश–वनदुर्ग–सैन्यानि सप्त राज्याङ्गानि प्रकृतिपदवाच्यानि । पुरवासिलोकसङ्घरूपा श्रेणिरपि—अष्टममङ्गं, तदपि प्रकृतिपदवाच्यम् । तदेवं–राज्यमष्टाङ्गं प्रकृतिरित्यर्थः । [श्रेणी = 'कौंसिल' 'पञ्चायत' 'राज्य के ८ अङ्ग'] ।

(३) सन्ध्यादयः षट्–गुणाः । तत्र सन्धिः पुंसि । एव विग्रहाऽऽश्रयावपि । तत्र सन्धिः–मैत्री । विग्रहः–युद्धम् । यानं–शत्रुं प्रति युद्धाय यानम् । [चढ़ाई] । आसनं–स्वस्थान एव स्थितिः । द्वैधं–सन्धिरेकेन, युद्धमेकेन यथायथम् । सन्धिर्युद्धञ्चेति वा । अविश्वासश्च । आश्रयः–बलवदरिणा पीड्यमानस्य धार्मिकराजाश्रयणम् । [सन्धि, विग्रह (युद्ध) आदि ६ गुणों का १–१ नाम] ।

(४) कोश–सेना–बलं–मन्त्रशक्तिः, पराक्रमबलम्–उत्साह-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षयः[1] स्थानञ्च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम् ॥१९॥
स प्रतापः[2] प्रभावश्च यत्तेजः कोश-दण्डजम् ।
साम[3]-दाने भेद-दण्डावित्युपायचतुष्टयम् ॥२०॥
साहसन्तु[4] दमो दण्डः, साम[5] सान्त्वमथो समौ[6] ।

शक्तिः । सन्धिविग्रहादीनां, सामदानादीनाञ्च यथावदनुष्ठानं निश्चयो वा—मन्त्रशक्तिः । एकं तिसृणां शक्तीनाम् । [प्रभाव, उत्साह, सेना आदि शक्ति] ।

(१) राजनीतौ-क्षयः, साम्यं, वृद्धिश्चाष्टवर्गस्य त्रिवर्गपदेनोच्यते । अष्टवर्गश्च-'कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् । खन्याकरबलादानं शून्यानाञ्च निवेशनम् ॥' इति । [नीतिज्ञों का त्रिवर्ग] ।

(२) द्वे कोशसेनोत्थिततेजसः । ['प्रताप' 'दबदबा' 'रोब' 'प्रभाव'] ।

(३) उपायचतुष्टस्यैकैकम् । तत्र-साम नान्तं क्लीबे । [साम, दान, दण्ड, भेद-इन ४ उपायों का नाम] ।

(४) त्रीणि दण्डस्य । [दण्ड, जुर्माना, सजा आदि दण्ड] ।

(५) द्वे साम्नः । [साम-शान्ति उपाय का नाम] ।

(६) मिलितयोर्द्वैधीकरणस्य । [भेद=फूट डालना] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

भेदो-प्रजापोपधा धर्माद्यैर्यत्परीक्षणम् ॥२१॥
पञ्च त्रिष्वेषडक्षीणो यस्तृतीयाद्यगोचरः ।
विविक्त[3]-विजन-च्छन्न-निःशलाकास्तथा रहः ॥२२॥
रहस्योपांशु चाऽलिङ्गे, रहस्यं तद्भवे त्रिषु ।
समौ विस्रम्भ-विश्वासौ, [6]भ्रेषो भ्रंशो यथोचितात् ॥

---

(१) एकमात्यादेर्भयलोभादिना परीक्षणस्य । तत्र उपधा स्त्रियाम् । [परीक्षा] । वक्ष्यमाणा निश्शलाकान्ताः—पञ्च त्रिषु ।

(२) तृतीयपुरुषाद्यश्रुतस्य—द्वाभ्यामेव कृतस्य मन्त्रादेः—त्रिषु । [अत्यन्त गुप्त सलाह] ।

(३] सप्त एकान्तस्य । तत्र—रहः सान्तं क्लीबे, रहो निधुवनेऽपि स्याद्रहो गुह्ये नपुंसकम्, इति रभसकोशात् । अलिङ्गे अव्यये । तथा च—अव्ययमपि रहः । उपांशु—अव्ययम् । [एकान्त] ।

(४) रहसि भवस्यैकं—त्रिषु । [एकान्त की बात, 'गुप्त मन्त्रणा', 'गुप्त बात'] ।

(५) विश्वासस्य द्वे । तत्र विश्रम्भोऽपि । [विश्वास] ।

(६) द्वे यथोचितस्वरूपादधः पतनस्य । [गिरना, स्वरूप से च्युत होना] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभ्रेष-न्याय-कल्पास्तु देशरूपं समञ्जसम् ।
युक्तमौपयिकं लभ्यं भजमाना-ऽभिनीतवत् ॥२४॥
न्याय्यश्च, त्रिषु षट्, संप्रधारणा तु समर्थनम् ।
अववादस्तु निर्देशो निदेशः शासनञ्च सः ॥२५॥
शिष्टिश्चा-ऽऽज्ञा च, संस्था तु मर्यादा धारणा स्थितिः ।
आगोऽपराधो मन्तुश्च, समे तूद्दान-बन्धने ॥२६॥

---

(१) पञ्च उचितस्य । [उचित, योग्य] ।

(२) षट् न्यायागतस्य । ['न्यायानुमोदित' 'न्याय्य', 'युक्तिसङ्गत बात'] ।

इमानि युक्तादीनि षट्-त्रिषु = त्रिषु लिङ्गेषु ।

(३) इदमुचितमिदमनुचितमित्यादिनिश्चयस्य द्वे । [निश्चय, समर्थन] ।

(४) षट् आज्ञायाः । ['आज्ञा' हुक्म] ।

(५) न्याय्यमार्गस्थितेः-मर्यादायाश्चत्वारि नामानि ।[मर्यादा, वस्तु स्थिति] ।

(६) त्रीण्यपराधस्य । तत्राऽऽगः सान्तं क्लीबम् । [' अपराध' कसूर] ।

(७) द्वे बन्धनस्य क्लीबे । [गिरफ्तार करना, पकड़ना, बान्धना] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्विर्पाद्यो द्विगुणो दण्डो, भागधेयः करो बलिः ।
षट्टादिदेयं शुल्कोऽस्त्री, प्राभृतन्तु प्रदेशनम् ॥ २७ ॥
उपायनमुपग्राह्यमुपहारस्तथोपदा ।
यौतकादि तु यद्देयं सुदायो हरणञ्च तत् ॥२८॥

(१) शास्त्रबोधितदण्डात् द्विगुणस्य दण्डस्यैकम् । ['शास्त्रोक्त से दुगुना जुर्माना', 'दूना दण्ड'] ।

(३) त्रीणि कृषकादितो राजग्राह्यभागस्य । तत्र बलिः पुंसि । ['लगान, कर'] ।

(३) एकं षट्टादिदेयस्य—शुल्कस्य तत्र शुल्कः—अस्त्रियाम् । ['चुङ्गी' 'फीस' 'महसूल' 'लगान' 'लाग' आदि] ।

(४) षट् देवतागुरुमित्रादिभ्यो दीयमानस्य । उपहारादिवस्तुनः । केचित्तु—'प्राभृतादिद्वयं देवतामित्रादिभ्यो दीयमानस्य, उपायनादिचतुष्टयमुपहारमात्रस्ये'त्याहुः । ['भेंट' 'उपहार' 'नजर' 'सौगात'] ।

(५) 'उपदा' इति उत्कोचस्य नाम । तदुक्तम्—

उपप्रदानमुत्कोच उपदा लञ्चया समाः । इति । [घूस] ।

(६) कन्यादानकाले, पूजादौ च दीयमानस्य द्रव्यस्य द्वे । 'स दाय' इत्यपि प्रामाणिकः पाठः । [दहेज] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्कालस्तु तदात्वं स्यादुत्तरः काल आयतिः ।
साँदृष्टिकं फलं सद्य, उदर्कः फलमुत्तरम् ॥२९॥
अदृष्टं वह्नि-तोयादि, दृष्टं स्वपरचक्रजम् ।
महीभुजामहिभयं स्वपक्षप्रभवं भयम् ॥३०॥

---

(१) एकं वर्त्तमानकालस्य । [तत्काल वर्त्तमान समय]।

(२) एकमुत्तरकालस्य स्त्रियाम् । [उत्तरकाल, भविष्य] ।

(३) एकं सद्यो जायमानस्य फलस्य । [सद्यः फल, तुरन्त होनेवाला फल] ।

(४) भाविनः कर्मफलस्यैकम् । [परिणाम, भावीफल] ।

(५) एकमग्न्यादिभयस्य । [अग्न्यादि अदृष्ट भय] । तदुक्तं—

"हुताशनो जलं व्याधिर्दुर्भिक्षं मरकस्तथा ।
अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः ॥" इति ।

(६) स्वसैन्यात्, परसैन्यात्, चौरादेश्च भयस्यैकम् । [शत्रु आदि से भय-दृष्टभय] ।

(७) भ्रातृपुत्रस्वपक्षोत्थितस्य भयस्यैकम् । [गृहयुद्ध, विद्रोह, बगावत] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रेक्रिया त्वधिकारः स्याच्चामरन्तु प्रकीर्णकम् ।
नृपासनं यत्तद्भद्रासनं, सिंहासनन्तु तत् ॥३१॥
हैमं, छत्रं त्वातपत्रं, राज्ञस्तु नृपलक्ष्म तत् ।
भद्रकुम्भः पूर्णकुम्भो, भृङ्गारः कनकाऽऽलुका ॥३२॥

---

(१) द्वे राज्ञां छत्रधारणादिव्यापारस्य । अधिकारस्येत्येके । [राजा का रुतबा, राजकीय मानमर्यादा, आदर-सत्कार, अधिकार आदि] ।

(२) द्वे चामरस्य । [चँवर] ।

(३) द्वे मण्यादिकृतराजासनस्य । [राजा का रत्न आदि से निर्मित सिंहासन] ।

(४) सुवर्णनिर्मितराजासनस्यैकम् । [सोने का सिंहासन] ।

(५) द्वे छत्रमात्रस्य ['छत्र' 'छाता'] ।

(६) एकं राजचिह्नभूतस्य च्छत्रस्य । तत्र नृपलक्ष्म नान्तम् । [राजच्छत्र] ।

(७) द्वे पूर्णघटस्य । [जल से पूर्ण कलस] ।

(८) द्वे सुवर्णादिकृतजलपात्रविशेषस्य । [झारी] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निवेशः[1] शिबिरं षण्डे, सैन्यजनन्तूपरक्षणम्[2] ।
हस्त्य[3]-श्व-रथ-पादातं सेनाङ्गं स्याच्चतुष्टयम् ॥ ३३ ॥

[[1]अथ हस्तिप्रकरणम्–] ।

दन्ती[4] दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः ।
मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥ ३४ ॥

हैमनाममालादौ—'वार्द्धान्यातु गलन्त्यालूः कर्करी करकोऽस्त्रियाम्' इत्युक्तेः करकोऽपि। आलूरपिच। 'आलूर्गलन्तिका। वर्द्धनी करकः पुंसि' इति कल्पद्रुमकोशोक्तेर्वर्द्धन्यपि । गलन्तिकाऽपि च ।

(१) द्वे सेनानिवेशस्य स्कन्धावाराख्यस्य । तत्र शिबिरं षण्डे=क्लीबे । ['स्कन्धावार' 'पडाव' 'छावनी'] ।

(२) सैन्यरक्षणाय प्रहरिकादिन्यासस्य द्वे–क्लीबे । [सेनाके रक्षार्थ 'पहरा-चौकी का प्रबन्ध'] ।

(३) हस्तिनश्च, अश्वाश्च, रथाश्च, पादातञ्च सेनाङ्गम् । [सेनाके अङ्ग-हाथी घोड़ा सवार आदिका नाम] ।

(४) पञ्चदश हस्तिनः । तत्र दन्तिहस्तिकरिपद्मिनो नान्ताः । [हाथी] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इभः स्तम्बेरमः पद्वी, [1]यूथनाथस्तु यूथपः ।
[2]मदोत्कटो मदकलः, [3]कलभः करिशावकः ॥ ३५ ॥
[4]प्रभिन्नो गर्जितो मत्तः, [5]समावुद्वान्त-निर्मदौ ।
[6]हास्तिकं गजता वृन्दे, [7]करिणी धेनुका वशा ॥ ३६ ॥
[8]गण्डः कटो, [9]मदो दानं, [10]वमथुः करशीकरः ।

---

(१) यूथमुख्यस्य हस्तिनो द्वे । [झुंड का मुखिया हाथी] ।

(२) अन्तर्मदस्य हस्तिनो द्वे (अन्तर्मदावस्थस्य) । [मदोन्मत्त मस्त हाथी] ।

(३) द्वे हस्तिपोतस्य । ['हाथी का बच्चा'] ।

(४) जातमदस्य द्वे । [जिसके मद चूने लगा है- ऐसा हाथी] ।

(५) द्वे गतमदस्य । [गतमद हाथी] ।

(६) द्वे हस्तिवृन्दस्य । [हस्ती समूह] ।

(७) त्रीणि हस्तिन्याः स्त्रियाम् । [हथिनी] ।

(८) द्वे गजगण्डयोः । ['हाथीका गण्डस्थल' 'कपोल भाग' 'गाल'] ।

(९) द्वे गजमदस्य । [हाथी का मद । मद झरना] ।

(१०) द्वे शुण्डानिर्गतजलकणस्य । [हाथी द्वारा अपनी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कुम्भौ तु पिण्डौ शिरसस्तयोर्[2]मध्ये विदुः पुमान् ॥३७॥
[3]अवग्रहो ललाटं स्यादीषिका[4] त्वक्षिकूटकम् ।
[5]अपाङ्गदेशो निर्याणं, [6]कर्णमूलन्तु चूलिका ॥३८॥

सूंड से छोडे हुए जलके बिन्दु]।

(१) एकं गजकुम्भस्य । [हाथी के शिर के ऊपर के मांस पिण्ड]।

(२) गजकुम्भमध्यभागस्यैकम् । [हाथी की माँग । शिर के बीचका भाग]।

(३) एकं हस्तिललाटस्य । [हाथी का ललाट, मस्तक]।

(४) द्वे हस्त्यक्षिगोलकस्य । एकमेवेत्येके । इषीकापि । [हाथी की आखों का गोलक । 'आँखों का डोला']।

(५) गजापाङ्गदेशस्यैकम् । [हाथी के नेत्रों का प्रान्त भाग, नेत्र का कोना]।

(६) गजकर्णमूलस्यैकं स्त्रियाम् । [हाथी के कान की जड़, कर्ण का मूल प्रदेश]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अधः कुम्भस्य वाहित्थं, [2]प्रतिमानमधोऽस्य यत् ।
[3]आसनं स्कन्धदेशः स्यात्पर्यंकं बिन्दुजालकम् । ३९ ।
[5]पार्श्वभागः पक्षभागो, [6]दन्तभागस्तु योऽग्रतः ।
द्वौ पूर्व-पश्चाज्जङ्घादिदेशौ गात्रा-ऽवरे क्रमात् ॥४०॥

---

(१) एकं गजकुम्भमध्याऽधोभागस्य ।-कुम्भस्य-वातकुम्भाख्यस्य, अधः । तदुक्तम् हैमनाममालायां-'कुम्भयोरन्तरं विदुः । वातकुम्भस्तु तस्याधो, वाहित्थन्तु ततोऽप्यधः' इति ।

[हाथी के कुम्भस्थल के मध्य भाग से नीचे का प्रदेश] ।

(२) एकं वाहित्थाधोभागस्य दन्तमध्यस्य । [वाहित्थ से नीचे का दाँतों के समीप का भाग] ।

(३) द्वे गजस्कन्धदेशस्य । [हाथी की पीठ-पर बैठने की जगह] ।

(४) द्वे गजमुखादिस्थबिन्दुसमूहस्य । [हाथी के शरीर व मुख पर के बिन्दु, चकत्ते] ।

(५) द्वे गजपार्श्वभागस्य । [हाथी का पार्श्वभाग] ।

(६) एकं गजाग्रभागस्य । [हाथी का अग्र भाग, दन्तोपलक्षित भाग] ।

(७) गजस्य जङ्घायाः पूर्वभागो—गात्रं, गजस्य जङ्घायाः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]तोत्त्रं वैणुकमालानं[2] बन्धस्तम्भेऽथ शृङ्खला[3] ।
अन्दुको निगडोऽस्त्री स्याद[4]ङ्कुशोऽस्त्री सृणिः स्त्रियाम् ॥
दूष्या[5] कक्ष्या वरत्रा स्यात्कल्पना[6] सज्जना समे ।
प्रवेण्यास्तरणं[7] वर्णः परिस्तोमः कुथो द्वयोः ॥४२॥
[8]वीतं त्वसारं हस्त्यश्वं, [9]वारी तु गजबन्धनी ।

पश्चाद्भागः-अवरम् । [हाथी की जंघा (पिण्डी) का अग्रिम भाग 'गात्र' । हस्तिजंघा का पीछे का भाग-'अवर'] ।

(१) द्वे ताडनदण्डस्य । 'वेणुक'मपि । ['चाबुक' 'छड़ी'] ।

(२) द्वे गजबन्धनस्तम्भस्य । [हाथी बान्धनेका खम्भा, खूँटा] ।

(३) त्रीणि शृङ्खलायाः । शृङ्खलं त्रिषु । ['साँकल' 'बेडी'] ।

(४) द्वे अङ्कुशस्य । तत्र-अङ्कुशोऽस्त्रियाम् । सृणिः स्त्रियाम् । [अंकुश] ।

(५) त्रीणि गजमध्यबन्धनस्य ['पेटी' 'कमरबन्द'] ।

(६) द्वे पल्याणाद्यारोपणेन सज्जीकरणस्य । ['कटेडा लगाना' 'पिलाणमांडना' 'कूँची माँडणा'] ।

(७) पञ्च गजास्तरणचित्रकम्बलस्य । तत्र प्रवेणी स्त्रियां, कुथः स्त्रीपुंसयोः । कुथं केचित्क्लीबेप्याहुः । ['हाथीकी झूल'] ।

(८) एकं निर्बलहस्त्यादिसमूहस्य । [असार = निर्बल हाथी घोड़े] ।

(९) गजबन्धनशालायां द्वे-इति दीक्षिताः । [हस्तिशाला]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[[2]अथा-ऽश्वप्रकरणम्] ।

घोटके वीति-तुरग-तुरङ्गा-ऽश्व-तुरङ्गमाः ॥४३॥
वाजि-वाहा-ऽर्व-गन्धर्व-हय-सैन्धव-सप्तयः ।
आजानेयाः[3]कुलीनाः[2]स्युर्विनीताः[3] साधुवाहिनः ॥
वनायुजाः पारसीकाः, काम्बोजा वाह्लिका हयाः ।
ययुरश्वोऽश्वमेधीयो, जवनस्तु जवाधिकः ॥४५॥

गजबन्धनभूमेरिति तु हेमचन्द्रः । तत्र–'वारि'रपि । 'वारिस्तु गजबन्धभूः' इति हैमात् । गजग्रहणगर्तस्येति तट्टीका । ['हाथी पकड़ने की भूमि, 'हाथी पकड़ने का गड़हा'] ।

(१) त्रयोदशाश्वानाम् । पीतिर्वीतिश्च । वाजी नान्तः [घोड़ा] ।

(२) द्वे कुलीनाश्वानाम् । [उत्तम जाति के घोड़े] ।

(३) द्वे शिक्षितानां साधु गच्छतामश्वादीनाम् । [सिखाये हुए अच्छे चलने वाले घोड़े आदि] ।

(४) चतुर्षु नामसु एकैकं वनायुजादिदेशोद्भवानाम् । केचित्तु-द्वे पारसीकदेशाश्वानाम्, द्वे–काम्बोजाश्वानामित्याहुः । [अरबी, फारसी एवं काबुली घोड़े] ।

(५) द्वे–अश्वमेधार्हाश्वस्य पुंसि । [अश्वमेधयज्ञार्ह घोड़ा] ।

(६) द्वे अधिकवेगस्याश्वस्य । [वेगवान् घोड़ा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृष्ठ्यः[1] स्थौरी, सितः[2] कर्को, रथ्यो[3] वोढारथस्य यः।
बालः[4] किशोरो, वाम्यश्वा[5] वडवा, वाडवं[6] गणे ॥
त्रिष्वाश्वीनं[7] यदश्वेन दिनेनैकेन गम्यते।
कश्यन्तु[8] मध्यमश्वानां, हेषा[9] हेषा च निःस्वनः ॥
निगालस्तु[10] गलोद्देशो, वृन्दे[11] त्वश्वीयमाश्ववत्।

(१) भारवाहिनोऽश्वस्य द्वे। तत्र-स्थौरी नान्तः। [लद्दू घोड़ा]।

(२) एकं शुक्लाश्वस्य। [श्वेत घोड़ा]।

(३) रथवाहकस्याश्वस्यैकम्। [रथ, गाड़ी आदि में जुतने वाला घोड़ा]।

(४) अश्वबालकस्यैकम्। ['बछेरा']।

(५) त्रीणि वडवायाः। ['घोड़ी']।

(६) एकं वडवासमूहस्य। [घोड़ियों का समूह]।

(७) अश्वेन दिनैकेन गमनार्हस्य प्रदेशस्यैकं-त्रिषु। [घोड़े का १ दिनका मार्ग, प्रायः ५० कोश]।

(८) अश्वमध्यभागस्यैकम्। [घोड़े का मध्यभाग]।

(९) द्वे अश्वशब्दस्य स्त्रियाम्। ['हिनहिनाना']।

(१०) एकं गलजत्रुसन्धेः। [गले के समीप का प्रदेश]।

(११) द्वे अश्वसमूहस्य। ['घोड़ों का झुण्ड']।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् ॥४८॥
गतयोऽमूः पञ्च धारा, घोणा तु प्रोथमस्त्रियाम् ।
कविका[2] तु खलीनोऽस्त्री, शफं[3] क्लीबे खुरः[4] पुमान् ॥
[5]पुच्छोऽस्त्री लूम-लाङ्गूले, बालहस्तश्च बालधिः ।
त्रिषू[6]पावृत्त-लुठितौ[7] परावृत्ते मुहुर्भुवि ॥ ५० ॥

---

(१) अश्वगतिविशेषाणां पञ्चानां 'धारा' इति नामधेयम् । गतिविशेषाणामेकैकम् । [घोड़ोंकी ५ प्रकार की चाल । कुदान, सरपट, बीख, ढाण आदि] ।

(२) एकमश्वनासिकायाः । तत्र प्रोथमस्त्रियाम् । [घोड़े की नाक] ।

(३) द्वे कविकायाः । ['लगाम का कडा'] ।

(४) द्वे खुरस्य । तत्र शफं क्लीबे, खुरः पुमान् । [खुर, टाप] ।

(५) त्रीणि पुच्छस्य । तत्र पुच्छोऽस्त्रियां, लूम-लाङ्गूले क्लीबे । [पोंछ] ।

(६) लोमवल्लाङ्गूलस्य द्वे । [पोंछ का झब्बा, एवं झब्बेदार पोंछ] ।

(७) द्वे श्रमापनोदनाय मुहुर्मुहुर्भूमौ लुठितस्याऽश्वादेः त्रिषु । [जमीन में इधर-उधर लोटा हुआ घोड़ा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(३ अथ रथप्रकरणम्—) ।

यानें[1] चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो रथः ।
असौ[2] पुष्यरथश्चक्रयानं न समराय यत् ॥५१॥
कर्णीरथः[3] प्रवहणं डयनञ्च समं त्रयम् ।
क्लीबेऽनः[4] शकटोऽस्त्री स्याद्, गन्त्री[5] कम्बलिवाह्यकम् ॥
शिबिका[6] याप्ययानं स्याद्दोला[7] प्रेङ्खादिका स्त्रियाम् ।

---

(१) त्रीणि युद्धयानस्य रथस्य । [युद्धोपयोगी रथ] ।

(२) एकं सुखभ्रमणार्थस्य यानस्य । [यात्रा एवं घूमने का रथ, गाड़ी] ।

(३) त्रीणि पुरुषस्कन्धवाह्ययानस्य । ['तामजाम' 'डोला' 'डोली'] ।

(४) द्वे शकटस्य । तत्र अनः सान्तं क्लीबे । शकटोऽस्त्रियाम् । ['सग्गड़' 'बैलगाड़ी'] ।

(५) कम्बलपरिवृतैर्वृषैरुह्यमानस्य रथस्य द्वे । ['रथ'-'बहली'] ।

(६) द्वे शिबिकायाः । ['पालकी'] ।

(७) द्वे दोलायाः । ['हिंडोला'] । तत्र-प्रेङ्खः पुंसि, प्रेङ्खा स्त्रियाम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उभौ तु द्वैप-वैयाघ्रौ द्वीपिचर्मावृते रथे ॥ ५३ ॥
पाण्डुकम्बलसंवीतः स्यन्दनः पाण्डुकम्बली ।
रथे काम्बल-वास्त्राद्याः कम्बलादिभिरावृते ॥५४॥
त्रिषु द्वैपादयो, रथ्या रथकट्या रथव्रजे ।
धूः स्त्री, क्लीबे यानमुखं, स्याद्रथाङ्गमपस्करः ॥५५॥

---

(१) व्याघ्रचर्मग्रावृतस्य रथस्य द्वे । [व्याघ्रचम से आच्छादित रथ]।

(२) शुक्लकम्बलपरिवेष्टितस्य रथस्यैकं त्रिषु लिङ्गेषु । नान्तोऽयम् । [श्वेत कम्बल व जरीदार झूल से ढका हुआ रथ]।

(३) वस्त्र-कम्बलादिभिरावृतस्य रथस्यैकैकं त्रिषु । [वस्त्र एवं कम्बल आदि से ढका हुआ रथ]।

(४) तत्र द्वैपादयो वास्त्रान्ताः-त्रिषु ।

(५) त्रीणि रथसमूहस्य । [रथोंका समूह]।

(६) द्वे वृषादिबन्धनस्थानस्य । तत्र-धूःशब्दो रान्तः स्त्रियाम् । [गाड़ी, शकट रथ आदि के अग्रभाग 'धुरी' का नाम]।

(७) द्वे चक्रभिन्नस्य रथाऽङ्गस्य । [रथ एवं गाड़ी के अवयव, पुर्जे ।]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चक्रं[1] रथाङ्गं, तस्याऽन्ते[2] नेमिः स्त्री स्यात्प्रधिः पुमान् ।
पिण्डिका[3] नाभिरक्षाग्रकीलके[4] तु द्वयोरणिः ॥५६॥
रथगुप्तिर्[5]रूथो ना, कूबरस्तु[6] युगन्धरः ।
अनुकर्षो[7] दार्वधःस्थं, प्रासङ्गो[8] ना युगान्तरम् ॥५७॥

---

(१) द्वे रथचक्रस्य क्लीबे । ['पहिया' 'चक्का'] ।

(२) चक्रप्रान्तभागस्य द्वे । तत्र नेमिः स्त्रियाम्, प्रधिः पुंसि । ['पुट्ठी' । पहिए का नीचे का गोल भाग, जो भूमिपर लगा हुआ चलता है] ।

(३) द्वे चक्रमध्यस्थमण्डलाकारपिण्डिकायाः । तत्र—नाभिः पुंसि । [रथनाभि, रथकी 'पिण्डी'] ।

(४) नाभिप्रक्षेप्याक्षाग्रकीलकस्य द्वे । तत्र—अणिर्द्वयोः । [कीली]।

(५) परप्रहाररक्षार्थं कृतस्यावृतस्थानस्य द्वे । [रथ का रक्षार्थ आवरण, एवं छप्पर] ।

(६) युगकाष्ठबन्धनकाष्ठस्य द्वे । [जूवे का आधार लम्बा काष्ठ] ।

(७) रथाधस्तलभागदारुण एकम् । तत्र अनुकर्षा नान्तोऽपि पुंसि । [रथके नीचे का काष्ठ] ।

(८) रथाङ्गभूतयुगकाष्ठादन्यत् युगं। वृषदमनकाले यदासज्यते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वं स्याद्वाहनं यानं युग्यं पत्त्रं च धोरणम् ।
परम्परावाहनं यच्चद्वनीतकमस्त्रियाम् ॥५८॥
आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ।
नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः ॥५९॥

तस्यैकं नामधेयम् । केचित्तु–वृषयुग्मान्तरबन्धनायं स्थापितस्य युगान्तरस्येत्याहुः । [दूसरा जूवा, जो बछडों को गाड़ी चलाना सिखाने के समय या तीसरा बैल बान्धने को गाडीमें बान्धा जाता है] ।

(१) पत्त्रं वाहनमात्रस्य । [सवारी] ।

(२) एकं परम्परावाहनस्य । यथा रथारूढं शकटं परम्परावाहनम् । अस्त्रियाम् । [घोडे, खच्चर, बैल, ऊँट, मनुष्य आदि के पीछे जोड़कर जो रथ, पालकी, गाडी आदि–सवारी के काम में आते हैं, उनका नाम] ।

(३) चत्वारि हस्तिपकस्य । ['महावत' 'फीलवान'] ।

(४) अष्टौ सारथेः । ['रथवान' 'सूत' 'गाड़ीवान' 'कोचवान'] । तत्र नियन्तृ–प्राजितृ–यन्तृ–क्षत्तृ–सव्येष्टारः–ऋकारान्ताः । सव्येष्टोऽकारान्तोऽपि । रथकुटुम्बी च नान्तः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सव्येष्टृ-दक्षिणस्थौ च संज्ञा रथकुटुम्बिनः ।
रथिनः[1] स्यन्दनारोहा, अश्वारोहास्तु[2] सादिनः ।६०॥

[४ अथ भट-(योध)-प्रकरणम्] ।

भटा[3] योधाश्च योद्धारः, सेनारक्षास्तु[4] सैनिकाः ।
सेनायां[5] समवेता ये सैन्यास्ते सैनिकाश्च ते ॥६१॥
बलिनो[6] ये सहस्रेण साहस्रास्ते सहस्रिणः ।
परिधिस्थः[7] परिचरः, सेनानीर्वाहिनीपतिः[8] ॥६२॥

---

(१) रथारूढस्य योधस्य द्वे । ['रथी' 'रथस्थयोद्धा']
(२) द्वे अश्वारोहस्य । ['असवार'] ।
(३) त्रीणि भटानाम् । ['फ़ौजी सिपाही'] ।
(४) सेनारक्षकाणां द्वे । ['सन्तरी'] ।
(५) सेनासमवेतानां सैनिकानां द्वे । [सेना के सिपाही] ।
(६) सहस्राधिपानां सेनापतीनाम् । ['हजारी' 'सूबेदार'] । तत्र–सहस्री नान्तः ।
(७) द्वे दण्डधारस्य । गजपाद–रथचक्रादिरक्षकस्येत्यन्ये । [रखवाला, जमादार] ।
(८) द्वे सेनापतेः । [सेनापति] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कञ्चुको वारवाणोऽस्त्री, [2]यत्तु मध्ये सकञ्चुकाः ।
बध्नन्ति तत्सारसनमधिकाङ्गोऽथ [3]शीर्षकम् ॥६३॥
शीर्षण्यश्च शिरस्त्रेऽथ [4]तनुत्रं वर्म दंशनम् ।
उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियाम् ॥६४॥
[5]आमुक्तः प्रतिमुक्तश्च पिनद्धश्चाऽपिनद्धवत् ।
[6]सन्नद्धो वर्मितः सज्जो दंशितो व्यूढकङ्कटः ॥६५॥
त्रिष्वामुक्तादयो, [7]वर्मभृतां कावचिकं गणे ।

---

(१) द्वे चोलकाकृतिसन्नाहस्य । तत्र वारवाणोऽस्त्रियाम् । ['चोला' 'कवच'] ।

(२) कञ्चुकदार्ढ्याय मध्ये बद्धस्य । [कमरबन्दा] । तत्र—अधिपाङ्गमपि । धिपाङ्गञ्चाप्यत्रैव ।

(३) त्रीणि शिरस्त्रस्य । [फौलादी टोप] ।

(४) सप्त कवचस्य । तत्र वर्म नान्तं क्लीबे । [कवच] ।

(५) परिहितवस्त्रकञ्चुकादेश्चत्वारि त्रिषु । ['पहिना हुआ वस्त्र, कवच आदि'] ।

(६) धृतकवचस्य पुंसः पञ्च-त्रिषु । [कवचधारी । सन्नद्ध सिपाही] । तत्र आमुक्तादयस्त्रिषु ।

(७) कवचिसमूहस्यैकम् । [कवचधारियों का समह] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पदाति-पत्ति-पदग-पादातिक-पदाजयः ॥६६॥
पद्गश्च पदिकश्चाऽथ पादातं पत्तिसंहतिः ।
शस्त्राजीवे काण्डपृष्ठा-ऽऽयुधीया-ऽऽयुधिकाः समाः ॥
कृतहस्तः सुप्रयोगविशिखः कृतपुङ्खवत् ।
अपराद्धपृषत्कोऽसौ लक्ष्याद्यश्च्युतसायकः ॥ ६८ ॥
धन्वी धनुष्मान् धानुष्को निषङ्ग्यक्षो धनुर्धरः ।

---

(१) सप्त पदातेः । ['पैदल सिपाही आदि'] ।

(२) द्वे पदातिसमूहस्य । [पैदल सिपाहियोंका जत्था] ।

(३) चत्वारि शस्त्राऽऽजीविनाम्—त्रिषु । ['शस्त्राजीवी' 'शस्त्रधारी'] ।

(४) सम्यक्कृतबाणाभ्यासस्य योधस्य त्रीणि । [निशाना साधने व बाण आदि चलाने में निपुण योद्धा का नाम] ।

(५) एकं लक्ष्यच्युतबाणस्य योधस्य पुंसि-त्रिषु । [जिसके बाण का निशाना चूक गया हो ऐसा धनुर्धर] ।

(६) षड् धनुर्धरस्य । तत्र–धनुष्मान् तान्तः, धन्वि-निषङ्गिणौ नान्तौ । तत्र–निषङ्गी अस्त्रियाम् । [धनुर्द्धारी सिपाही] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यात्काण्डवांस्तु काण्डीरः, शाक्तीकः शक्तिहेतिकः ॥
यष्टीक-पार्श्वधिकौ यष्टि-पर्श्वध-हेतिकौ ।
नैस्त्रिंशिकोऽसिहेतिः स्यात्समौ प्रासिक-कौन्तिकौ ॥
चर्मी फलकपाणिः स्यात्पताकी वैजयन्तिकः ।
अनुप्लवः सहायश्चा-ऽनुचरो-ऽभिसरः समाः ॥७१॥
पुरोगा-ऽग्रेसर-प्रष्ठा-ऽग्रतःसर-पुरःसराः ।

---

(१) बाणकाण्डधारस्य द्वे–त्रिषु । ['काण्डधारी', धनुष्काण्ड या बाणके काण्ड (डण्डा) को धारण करनेवाला]।

(२) शक्त्याख्यायुधधारिणो द्वे, त्रिषु । ['सांगधारी'] ।

(३) यष्टिधारिण एकम् । ['लठैत' 'गुडैत'] ।
परशुधारिणश्चैकं, त्रिषु । ['गडांसाधारी', 'फर्शाधारी'] ।

(४) द्वे खड्गायुधस्य, त्रिषु । [तलवारिया] ।

(५) प्रासकुन्तायुधधारिणोरेकैकं, त्रिषु । [प्रासिकः='बल्लमधारी' । कौन्तिकः='भालाधारी'] ।

(६) चर्मधारिणो द्वे, त्रिषु । ['ढलैत', 'ढालवाला'] ।

(७) द्वे ध्वजधारकस्य त्रिषु । ['झण्डेवाला'] ।

(८) चत्वारि अनुचरस्य । [सहायक, अनुचर] ।

(९) सप्त युद्धादावग्रेसरस्य, त्रिषु । ['अग्रगामी' 'अगुआ']।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरोगमः पुरोगामी, मन्दगामी[1] तु मन्थरः ॥७२॥
जङ्घालो-ऽतिजवस्तुल्यौ[2], जङ्घाकरिक-जाङ्घिकौ[3] ।
तरस्वी[4] त्वरितो वेगी प्रजवी जवनो जवः ॥७३॥
जय्यो[5] यः शक्यते जेतुं, जेयो[6] जेतव्यमात्रके ।
जैत्रस्तु[7] जेता, यो गच्छत्यलं[8] विद्विषतः प्रति ॥७४॥

---

(१) शनैर्गमनशीलस्य द्वे, त्रिषु । [धीरे २ चलनेवाला] ।

(२) द्वे अतिवेगवतः, त्रिषु । ['तेज' अत्यन्त वेगवान्] ।

(३) द्वे जङ्घाजीविनः, त्रिषु । ['हरकारा', शीघ्र दूर जा सकने वाला] ।

(४) षड् वेगशालिनः । तत्र तरस्वि-वेगि-प्रजविनो नान्ताः । [वेगवान्] ।

(५) एकं जेतुं शक्यस्य (रावणादेः) त्रिषु । [जीतने में शक्य-शत्रु] ।

(६) एकं जेतुं योग्यस्य मन आदेः । त्रिषु । [जीतने योग्य मन आदि] ।

(७) द्वे जयशक्तस्य जेतुः, त्रिषु । [जीतनेवाला] ।

(८) त्रीणि सामर्थ्येन शत्रुसंमुखं गच्छतः, त्रिषु । [शत्रु पर चढ़ाई करनेवाला] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सोऽभ्यमित्र्यो-ऽभ्यमित्रीयो-ऽप्यभ्यमित्रीण इत्यपि ।
ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जाऽतिशयान्वितः ॥७५॥
[2]स्यादुरस्वानुरसिलो, [3]रथिनो रथिको रथी ।
[4]कामंगाम्यनुकामीनो, [5]ह्यत्यन्तीनस्तथा भृशम् ७६
[6]शूरो वीरश्च विक्रान्तो, [7]जेता जिष्णुश्च जित्वरः ।
सांयुगीनो रणे साधुः, शस्त्राजीवादयस्त्रिषु ॥ ७७ ॥
ध्वजिनी वाहिनी सेना पृतना-ऽनीकिनी चमूः ।

---

(१) त्रीणि अतिबलशालिनः, त्रिषु । 'ऊर्जोऽतिशयान्वित' इति पाठान्तरम् । [अति बलवान्, 'हिम्मती'] ।

(२) द्वे विशालवक्षसः त्रिषु । [विशालवक्षःस्थलवाला] ।

(३) त्रीणि रथस्वामिनः-त्रिषु । अत्र 'रथिन' इत्यपपाठः । 'रथिर' इत्येवयुक्तः पाठः । [रथ स्वामी, रथवाला, रथवान्] ।

(४) यथेष्टं गमनशीलस्य द्वे । [यथेच्छ चलनेवाला] ।

(५) अतिगमनशीलस्यैकं त्रिषु । [अत्यन्त चलनेवाला] ।

(६) त्रीणि शूरस्य, त्रिषु । [शूरवीर] ।

(७) जयशीलस्य त्रीणि त्रिषु । [विजयशील] ।

(८) रणकुशलस्यैकम् । [युद्ध करने में चतुर] ।

(९) एकादश सेनायाः । तत्र ध्वजिन्यादयः सप्त पर्यायाश्चतु-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वरूथिनी बलं सैन्यं चक्रं चाऽनीकमस्त्रियाम् ॥७८॥
व्यूहस्तु[1] बलविन्यासो, भेदा[2] दण्डादयो युधि ।
प्रत्यासारो[3] व्यूहपार्ष्णिः, सैन्यपृष्ठे[4] प्रतिग्रहः ॥७९॥
एकैकैकरथा त्र्यश्वा पत्तिः[5] पञ्चपदातिका ।

रङ्गिण्याः सेनायाः । बलादयश्चत्वारः सामान्यसेनायाः, सेनाङ्गस्य चेति बोध्यम् । अनीकमस्त्रियाम् । [सेना-पल्टन] ।

(१) द्वे व्यूहरचनायाः । तदुक्तं—

मुखे रथा, हयाः पृष्ठे, तत्पृष्ठे च पदातयः ।
पार्श्वयोश्च गजाः कार्या, व्यूहोऽयमुच्यते बुधैः ॥

[विशेष रूप से विभागपूर्वक सेना को युद्ध के लिये मोर्चे पर खड़ी करना] ।

(२) दण्ड-चक्र-भोग-मण्डल-शकटादयो व्यूहविशेषाः । [व्यूह विशेष] ।

(३) द्वे व्यूहपृष्ठभागस्य । तत्र—व्यूहपार्ष्णिर्द्वयोः । [व्यूह के पीछे खड़ी सेना] ।

(४) सैन्यपृष्ठे राजसमीपे स्थितस्य सैन्यस्यैकम् । [सेनाके पीछे राजाके साथ खड़ी ताजा दम सहायक सेना, 'कुमक'] ।

(५) 'पत्ति'रिति स्त्रियां सेनाविशेषस्यैकं नाम । तदुक्तम्—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥८०॥
सेनामुखं गुल्म-गणौ वाहिनी पृतना चमूः ।
अनीकिनी, दशानीकिन्योक्षौहिण्यथ सम्पदि ॥८१॥
सम्पत्तिः श्रीश्च लक्ष्मीश्च, विपत्त्यां विपदा-ऽऽपदौ ।

'एको रथो, गजश्चको, नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥' इति ।
[सेना की छोटी सी टुकड़ी] ।

(१) तिस्रः पत्तयः—सेनामुखम् । त्रीणि सेनामुखानि—गुल्मः । त्रयो गुल्मा—गणः । त्रयो गणाः—वाहिनी । तिस्रो वाहिन्यः—पृतना । तिस्रः पृतनाश्चमूः । तिस्रश्चम्वोऽनीकिनी । [सेना की टुकड़ियाँ] ।

(२) दशानीकिन्यः—अक्षौहिणी । अक्षौहिण्याः प्रमाणन्तु—खागाष्टैकाक्षिभिर्गजैः [हाथी २१८७०], रथैरेतैः [रथ २१८७०], हयैस्त्रिघ्नैः—[अश्वारोही ६५६१०], पञ्चघ्नैश्च पदातिभिः [पैदल—१०९३५०] ।

(३) चत्वारि धनोत्कर्षस्य स्त्रियाम् । [धन की वृद्धि, समृद्धि, सम्पत्ति, शोभा] ।

(४) त्रीणि विपत्तेः । 'विपत्तौ' इति पा० । [विपत्ति, आपत्ति] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public.Domain, Digitizagtion by eGangotri

[अथ शस्त्राऽस्त्रप्रकरणम्—]

[1]आयुधन्तु प्रहरणं शस्त्रमस्त्रमथाऽस्त्रियौ ॥८२॥
धनु-श्चापौ, धन्व-शरासन-कोदण्ड-कार्मुकम् ।
इष्वासोऽप्यथ[3] कर्णस्य कालपृष्ठं शरासनम् ॥ ८३ ॥
[4]कपिध्वजस्य गाण्डीव-गाण्डिवौ पुंनपुंसकौ ।
[5]कोटिरस्याऽटनी, [6]गोधे तले ज्याघातवारणे ॥८४॥
[7]स्तकस्तु धनुर्मध्यं, [8]मौर्वी ज्या शिञ्जिनी गुणः ।

---

(१) चत्वारि शस्त्राणाम् । [हथियार] ।

(२) सप्त धनुषः । तत्र धनुः षान्तं पुंनपुंसकयोः । उकारान्तोपि धनुः पुंसि । दीर्घान्तो धनूरपि स्त्रियाम् । धन्व नान्तं क्लीबे । धन्वादि कार्मुकान्तं क्लीबे । [धनुष] ।

(३) एकं कर्णस्य धनुषः । [कर्ण का धनुष] ।

(४) द्वे अर्जुनधनुषः । [अर्जुन का धनुष] ।

(५) अस्यधनुषोऽन्त्यभागस्य द्वे स्त्रियाम् । [धनुष का कोना] ।

(६) ज्याऽऽघातवारणस्य द्वे । [धनुष की डोरी की चोट से बचने के लिए हाथ में बान्धने के चमडे के २ पट्टा] ।

(७) द्वे धनुर्मध्यभागस्य । [धनुष का मध्य भाग] ।

(८) चत्वारि धनुषो गुणस्य । [धनुष की 'डोरी'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यात्प्रत्यालीढमालीढमित्यादि स्थानपञ्चकम् ॥८५॥
लेक्षं लक्ष्यं शरव्यञ्च, शरा[3]ऽभ्यास उपाऽऽसनम् ।
पृषत्क-बाण-विशिखा अजिह्मग खगा-ऽऽशुगाः ॥८६॥
कलम्ब-मार्गण-शराः पत्री रोप इषुर्द्वयोः ।
प्रेक्ष्वेडनास्तु नाराचाः, पक्षो वाजस्त्रिषूत्तरे ॥८७॥

(१) पञ्च धन्विनां स्थानभेदानाम् । आदिपदेन समपद-विशाख-मण्डलादयः । [बायें पैर को आगे फैलाकर और दहिने पैरको मोड कर खड़े होना–'प्रत्यालीढ' । दहिने पैर को आगे पसार कर बाएं पैरको मोडना–'आलीढ' । दोनों पैर बराबर रखना–'समपद' । पैरों को थोडे से (१०–१२ अंगुल के) अन्तर पर रखना–'विशाख' । मण्डलाकार (गोल) पैरों को रखना–'मण्डल' । ये–धनुषधारियों के बाण आदि चलाने के ५ पैतरे हैं] ।

(२) त्रीणि लक्ष्यस्य । [निशाना] ।

(३) शरक्षेपाभ्यासस्य द्वे । [बाण आदि से निशाना मारने का अभ्यास] ।

(४) द्वादश बाणस्य । पत्री नान्तः । इषुर्द्वयोः । [बाण] ।

(५) द्वे सर्वलोहमयस्य शरस्य । [संपूर्ण लोहे का बना हुआ बाण] ।

(६) द्वे शरपक्षस्य । [बाणके पीछे बाँधनेकी गृध्र की पांख] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निरस्तः प्रहिते बाणे, [2]विषाक्ते दिग्ध-लिप्तकौ ।
[3]तूणो-पासङ्ग-तूणीर-निषङ्गा इषुधिर्द्वयोः ॥८८॥
तूण्यां, [4]खड्गे तु निस्त्रिंश-चन्द्रहासा-ऽसि-रिष्टयः ।
कौक्षेयको मण्डलाग्रः करवालः कृपाणवत् ॥८९॥
त्सरुः खड्गादिमुष्टौ स्यान्मेखला तन्निबन्धनम् ।
फलकोऽस्त्री फलं चर्म, संग्राहो मुष्टिरस्य यः ॥९०॥

उत्तरे = वक्ष्यमाणा लिप्तकान्ताः-त्रिषु ।

(१) एकं प्रक्षिप्तस्यबाणस्य त्रिषु । [फेंका हुआ बाण] ।

(२) द्वे विषलिप्तबाणस्य त्रिषु । [विषलिप्त बाण] ।

(३) षट् तूणीरस्य । तत्र इषुधिः स्त्रीपुंसयोः । तूणी स्त्रियाम् । [बाण रखने की भाथी] ।

(४) नव खड्गस्य । [खड्ग, तलवार, नैजा] ।

(५) एकं खड्गमुष्टेः । [तलवार की मूठ] ।

(६) खड्गादेश्चर्मादिनिर्मितकटिबन्धनस्य । [तलवार को कमर में बान्धने का पट्टा] । युद्धे खड्गस्य हस्तात्पतनवारणाय मणिबन्धे बध्यमानस्य चर्मादेर्वा ।

(७) त्रीणि चर्मणः । ['ढाल'] । तत्र चर्म नान्तं क्लीबे ।

(८) एकं फलकमुष्टेः । [ढाल की मूठ] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]द्वयोः मुद्गर-घनौ, [2]स्यादीली करवालिका।
भिन्दि[3]पालः सृगस्तुल्यौ, [4]परिघः परिघातनः ॥९१॥
द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः।
[5]स्याच्छस्त्री चाऽसिपुत्री च च्छुरिका चाऽसिधेनुका ९२
[7]वा पुंसि शल्यं शङ्कुर्ना, [8]शर्वला तोमरोऽस्त्रियाम्।
[9]प्रासस्तु कुन्तः, [10]कोणस्तु स्त्रियः पाल्य-श्रि-कोटयः ॥

---

(१) त्रीणि मुद्गरस्य। ['मोगरी']।

(२) द्वे करवालिकायाः। ['करौली' 'तलवार' 'गुप्ती']।

(३) द्वे अश्मप्रक्षेपसाधनस्य भिन्दिपालस्य। नालिकाऽस्त्रस्य गुलिकाप्रक्षेपयन्त्रस्येत्येके। ['गोफण' और 'बन्दूक']।

(४) लोहवद्धलगुडभेदस्य द्वे। ['लोहांगी लाठी']।

(५) चत्वारि कुठारस्य। तत्र स्वधितिः स्त्री। [कुल्हाडी]।

(६) चत्वारि क्षुरिकायाः। ['छुरी']।

(७) द्वे बाणाग्रभागस्य, शल्यस्य। तत्र शल्यं वा पुंनपुंसकयोः, शंकुः पुंसि। ['बाण का फल' या 'बर्छी' या 'सेल']।

(८) द्वे तोमरस्य। 'सर्वला' इत्यपि पाठः। ['गंडासा']।

(९) द्वे प्रासस्य। ['भाला']।

(१०) चत्वारि खड्गादिप्रान्तभागस्य। तत्र पाल्यादयः स्त्रियाम्। ['अणी' 'कोना']।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वाभिसारः सर्वौघः सर्वसंनहनाऽर्थकः ।
लोहाभिसारोऽस्त्रभृतां राज्ञां नीराजनाविधिः ॥९४॥
यत्सेनयाऽभिगमनमरौ तदभिषेणनम् ।
यात्रा व्रज्या-ऽभिनिर्याणं प्रस्थानं गमनं गमः ॥९५॥
स्यादासारः प्रसरणं, प्रचक्रं चलितार्थकम् ।
अहितान्प्रत्यभीतस्य रणे यानमभिक्रमः ॥९६॥

---

(१) सर्वसैन्यसंनाहस्य त्रीणि । [सम्पूर्ण सेना की तैयारी, एक साथ धावा-चढाई] ।

(२) एकं शारदनवरात्रमहानवम्यां सर्वशस्त्रवाहनादिपूजायाः । [आश्विन में घोड़े शास्त्र आदि की पूजा व आरती] ।

(३) अरिं प्रति सेनया सह गमनस्यैकम् । [शत्रु पर 'चढ़ाई'] ।

(४) षट् यात्रायाः । ['यात्रा', 'प्रस्थान' 'कूच'] ।

(५) सर्वतोव्यापिसैन्यप्रसरणस्य द्वे । [चारों ओर से सेना की व्यापक कारबारी, व फैलाव] ।

(६) द्वे प्रस्थितस्य सैन्यस्य । [प्रस्थित सेना] ।

(७) युद्धे शत्रून्प्रति निर्भयं यानस्यैकम् । [शत्रु पर निर्भय होकर झपटना] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]वैतालिका बोधकराश्चा[2]क्रिका घाण्टिकाऽर्थकाः ।
स्यु[3]र्मागधास्तु मगधा, [4]बन्दिनः स्तुतिपाठकाः ॥९७॥
संश[5]प्तकास्तु समयात्संग्रामादनिवर्त्तिनः ।
रेणुर्द्वयोः स्त्रियां धू[6]लिः पांशुर्ना न द्वयो रजः ॥९८॥
चू[7]र्णे क्षोदः, स[8]मुत्पिञ्ज–पिञ्जलौ भृशमाकुले ।

---

(१) द्वे राज्ञां प्रातर्जागरादिकारिणः । [राजा को प्रातः मङ्गल गानकर जगानेवाले, स्तुति पाठक, भाट चारण आदि]।

(२) द्वे घटिकावादकस्य । ['घंटा, घडियाल बजाने वाला'] । 'घटिकार्थका' इत्यपि पाठः ।

(३) द्वे वंशावलिस्तुतिपाठकानाम् । ['जागा' 'मागध' 'वंशावली पाठक'] ।

(४) द्वे बन्दिनाम् । चत्वार एकार्था इति तु परे । ['भाट']।

(५) युद्धादनिवर्त्तिनां कृतशपथानां भटानामेकम् । [युद्ध में पीछे न हटने की शपथ खाए हुए योद्धा] ।

(६) चत्वारि धूलेः । ['गर्द'–'धूल'] । तत्र रेणुः स्त्री-पुंसयोः, धूलिः स्त्रियां, पांशुः पुंसि, रजः सान्तं क्लीबे । पांसुरपि ।

(७) द्वे पिष्टस्य रजसः । षडेव रजस इत्येके । [चूरण, चूरा]।

(८) अतिव्याकुलस्य द्वे । ['घबड़ाया हुआ'] ।

CC-0. Jangamwadi Math Collection. Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पताका[1] वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम् ॥९९॥
सा[2] वीराशंसनं युद्धभूमिर्याऽतिभयप्रदा ।
अहंपूर्वमहंपूर्वमित्यहंपूर्विका[3] स्त्रियाम् ॥१००॥
आहोपुरुषिका[4] दर्पाद्या स्यात्संभावनाऽऽत्मनि ।
अहमहमिका[5] तु सा स्यात्परस्परं यो भवत्यहङ्कारः ॥
द्रविणं[6] तरः सहो-बल-शौर्याणि स्थाम शुष्मश्च ।
शक्तिः पराक्रम-प्राणौ, विक्रमस्त्वतिशक्तिता[7] ॥१०२॥

---

(१) चत्वारि पताकायाः ध्वजमस्त्री । ['पलाका' 'झण्डी'] ।

(२) एकं भयङ्करयुद्धभूमेः । [भयंकर युद्ध की भूमि] ।

(३) एकमहम्पूर्विकायाः । ['मैं पहिले मैं पहिले' ऐसे उत्साह से युद्ध में कूदना आदि क्रिया] ।

(४) आत्मसम्भावनाया एकम् । ['मैं भी कुछ हूं' ऐसा घमण्ड करना'] ।

(५) परस्परमहङ्कारस्यैकम् । ['परस्पर घमण्ड दिखाना' 'अपने को भी कुछ लगाना'] ।

(६) दश सामर्थ्यस्य । तत्र तरः-सहसी सान्ते क्लीबे, स्थाम नान्तं क्लीबे । शक्तिः स्त्रियाम् । 'पराक्रमः प्राणः' पा० । [सामर्थ्य, शक्ति, पराक्रम] ।

(७) द्वे अतिपराक्रमस्य । [अत्यन्त पराक्रम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वीरपोणन्तु यत्पानं वृत्ते, भाविनि वा रणे ।
युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ॥१०३॥
मृधमास्कन्दनं सङ्ख्यं समीकं सांपरायिकम् ।
अस्त्रियां समराऽनीक-रणाः कलह-विग्रहौ ॥१०४॥
सम्प्रहारा-ऽभिसम्पात-कलि-संस्फोट-संयुगाः ।
अभ्यामर्द-समाघात-संग्रामा-ऽभ्यागमा-ऽऽहवाः॥१०५॥
समुदायः स्त्रियः संय-त्समित्या-जि-समि-द्युधः ।
नियुद्धं बाहुयुद्धेऽथ तुमुलं रणसङ्कुले ॥ १०६ ॥

---

(१) युद्धावसरे आदावन्ते च मद्यादिपानस्य । [आवेश लानेको व थकावट मिटानेको युद्धके आद्यन्तमें मद्यपान] ।

(२) एकत्रिंशत् ३१ युद्धस्य नामानि । तत्र समरा-ऽनीक-रणाः पुंनपुंसकयोः । संयत्समितौ–तान्ते स्त्रियाम् । युत्–धान्तः स्त्रियाम् । आजि-समिती–स्त्रियाम् । सम्परायकमित्यपि । 'संस्फेट' इत्यपि पाठः । ['युद्ध'] ।

(३) द्वे बाहुयुद्धस्य । 'नियुद्धं बाहुयुद्धे स्यात्'–इति पाठान्तरम् । ['कुस्ती'] ।

(४) द्वे रणसङ्कुलस्य [घमासान युद्ध] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]क्ष्वेडा तु सिंहनादः स्यात्[2]करिणां घटना घटा ।
[3]क्रन्दनं योधसंरावो, बृंहितं [4]करिगर्जितम् ॥१०७॥
विस्फोरो धनुषः स्वानः, [5]पटहा-ऽऽडम्बरौ समौ ।
[6]प्रसभन्तु बलात्कारो हठोऽथ [7]स्खलितं छलम् १०८
[8]अजन्यं क्लीब उत्पात उपसर्गः समं त्रयम् ।

---

(१) द्वे योधानां सिंहनादस्य । तत्र क्ष्वेडा स्त्रियाम् । [शूरवीरों की गर्जना] ।

(२) हस्तिसंघस्य द्वे । [हाथियों का जत्था, जमघट] ।

(३) अन्योन्यमाह्वानस्य । [परस्पर ललकारना] ।

(४) द्वे हस्तिगर्जनस्य । [हाथियोंका गर्जना, चिग्घाड़ना] ।

(५) एकं धनुषः शब्दस्य । ['धनुष की टंकार'] ।

(६) द्वे युद्धपटहस्य । ['लड़ाई के बाजे' 'दमदमा' 'मारू बाजा'] ।

(७) त्रीणि बलात्कारस्य । तत्र प्रसभं क्लीबे । [बलात्कार, जबरदस्ती] ।

(८) द्वे युद्धमर्यादाभङ्गस्य । [छल, कपट से युद्धकी मर्यादा को तोड़ना] ।

(९) त्रीणि शुभाऽशुभसूचकोत्पातस्य । 'क्लीबम्' इति पा० । [शुभ और अशुभ सूचक उत्पात] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]मूर्च्छा तु कश्मलं मोहोऽप्य[2]वमर्दस्तु पीडनम् १०९
[3]अभ्यवस्कन्दनं त्वभ्यासादनं, [4]विजयो जयः ।
[5]वैरशुद्धिः प्रतीकारो वैरनिर्यातनञ्च सा ॥११०॥
[6]प्रद्रावो-द्द्राव-सन्द्राव-सन्दावा विद्रवो द्रवः ।
अपक्रमो-ऽपयानञ्च, [7]रणे भङ्गः पराजयः ॥ १११ ॥
[8]पराजित-पराभूतौ, त्रिषु नष्ट-तिरोहितौ ।

---

(१) त्रीणि मूर्च्छायाः । [मूर्च्छा, बेहोशी] ।

(२) द्वे सेनादिना शत्रुदेशादिपीडनस्य । [शत्रु के देश व प्रजा को तहस-नहस करना, कष्ट देना, लूटना, घेरा डालना] ।

(३) द्वे प्रहारादिना शत्रोर्निःशक्तीकरणस्य, छलादाक्रमणस्य च । [शत्रु को काबू में करना] ।

(४) विजयस्य द्वे । [विजय, जीत] ।

(५) त्रीणि वैरशोधनस्य । ['बदला लेना'] ।

(६) अष्टौ पलायनस्य ['भागना'] ।

(७) द्वे पराजयस्य । [हार, हारना, पराजय] ।

(८) द्वे पराजितस्य । [हारा हुआ] ।

(९) द्वे तिरोहितस्य त्रिषु । [छिपा हुआ] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रमापणं निबर्हणं निकारणं विशारणम् ॥ ११२॥
प्रवासनं पराऽसनं निषूदनं निहिंसनम् ।
निर्वासनं संज्ञपनं निर्ग्रन्थनमपाऽसनम् ॥ ११३ ॥
निस्तर्हणं निहननं क्षणनं परिवर्जनम् ।
निर्वापणं विशसनं मारणं प्रतिघातनम् ॥ ११४ ॥
उद्वासन-प्रमथन-क्रथनो-त्त्रासनानि च ।
आलम्भ-पिञ्ज-विशर-घातो-न्माथ-वधा अपि ॥११५॥
[2]स्यात्पञ्चता कालधर्मो दिष्टान्तः प्रलयो-ऽत्ययः ।
अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम् ॥११६॥
[3]परासु-प्राप्तपञ्चत्व-परेत-प्रेत-संस्थिताः ।
मृत-प्रमीतौ त्रिष्वेते, चिता[4] चित्या चितिः स्त्रियाम् ॥

(१) त्रिंशन्मारणस्य । [मारने के ३० नाम] । तत्र-अन्त्याः षट् पुंसि । शेषाः क्लीबे ।

(२) दश मरणस्य । तत्र पञ्चता—स्त्रियाम् । मृत्युः-स्त्री-पुंसयोः । निधनं पुंनपुंसकयोः । [मरना] ।

(३) सप्त मृतस्य त्रिषु । एते = परास्वादयः-त्रिषु । 'मृत' मुर्दा] ।

(४) त्रीणि चितायाः । ['चिता'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कबन्धोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरम् ।
[2]श्मशानं स्यात्पितृवनं, [3]कुणपः शवमस्त्रियाम् ॥११८॥
[4]ग्रहो-पग्रहौ बन्द्यां, [5]कारा स्याद्बन्धनाऽऽलये ।
पुंसि [6]भूम्न्यसवः प्राणाश्चैवं, [7]जीवोऽसुधारणम् ॥११९॥
[8]आयुर्जीवितकालो ना, [9]जीवातुर्जीवनौषधम् ।

❀ इति क्षत्रियवर्गः ॥ ८ ॥ ❀

(१) छिन्नशिरसो देहस्यैकम् । तत्र–कबन्धोऽस्त्रियाम् । [शिर कटा धड़] ।

(२) द्वे श्मशानस्य । ['मरघट, 'मसाण'] ।

(३) द्वे शवस्य । [मुर्दा] । तत्र–शवमस्त्रियाम् ।

(४) त्रीणि–बन्द्याः । तत्र बन्दी स्त्रियाम् । बन्दीत्यपि । [बंद करके लाई हुई स्त्री और बाल बच्चे, तथा बन्दी बनाना] ।

(५) द्वे बन्धनगृहस्य । [कैदखाना] ।

(६) द्वे प्राणवायूनाम् । पुंसि बहुत्वे च प्राणाः । एवं = पुभूम्नि-असुशब्दः । [प्राण] ।

(७) द्वे जीवनक्रियायाः । [जीना] ।

(८) जीवनकालस्य द्वे । तत्र आयुः सान्तं क्लीबे । [आयु] ।

(९) मृतसञ्जीवनस्यौषधस्य द्वे । [मरे हुए को भी जिला सकने वाली औषधि] ।

❀ इत्यमरकोशाभिनवराजलक्ष्म्यां क्षत्रियवर्गः ॥ ८ ॥ ❀

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ अथ वैश्यवर्गः ॥ ९ ॥ ❀

ऊरव्या[1] ऊरुजा अर्या वैश्या भूमिस्पृशो विशः ।
आजीवो[2] जीविका वार्त्ता वृत्तिर्वर्त्तन-जीवने ॥१॥
स्त्रियां[3] कृषिः, पाशुपाल्यं, वाणिज्यञ्चेति वृत्तयः ।
सेवा[4] श्ववृत्तिरनृतं[5] कृषिरुञ्छशिलं[6] त्वृतम् ॥२॥

❀ अथ वैश्यवर्गः ❀

(१) षड् वैश्यस्य नामानि । तत्र-अन्त्यौ द्वौ शान्तौ । भूमिस्पृक्-ग्, विट्-ड् इत्येवं च रूपाणि । [वैश्य, बनिया] ।

(२) षड् जीवनोपायस्य । [जीविका 'रोजगार'] ।

(३) कृष्यादिवृत्तीनामेकैकम् । तत्र कृषिः स्त्री । [कृषि आदि जीविका] ।

(४) द्वे सेवायाः । ['सेवा' 'नौकरी' 'खुशामद'] ।

(५) द्वे कृषेः । [खेती] ।

(६) क्षेत्रादिपतितधान्यानां कणश आदानम्-उञ्छः । क्षेत्रपतितमञ्जर्यादिसंग्रहः-शिलम् । उञ्छः, शिलञ्च ऋतमित्यभिधीयते । [खेत में छूटे हुए अन्न का १-१ कण बीनना-'उञ्छ' । खेत में गिरे हुए अन्न की 'फली' 'बाल' 'सिट्टा' आदि को बीनना-'शिल' । 'शिला करना'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वे याचिता-ऽयाचितयोर्यथासङ्ख्यं मृता-ऽमृते ।
सत्याऽनृतं वणिग्भावः स्यादृणं पर्युदञ्चनम् ॥३॥
उद्धारोऽर्थप्रयोगस्तु कुसीदं वृद्धिजीविका ।
याञ्चयाऽऽप्तं याचितकं, निमयादापमित्यकम् ॥४॥
उत्तमर्णा-ऽधमर्णौ द्वौ प्रयोक्तृ-ग्राहकौ क्रमात् ।

---

(१) याचितस्यैकम् । [मांगने का नाम, व मांगे हुए द्रव्य का १ नाम] । अयाचितस्यैकम् । [बिना मांगे मिले हुए का नाम] ।

(२) द्वे वाणिज्यस्य । ['वाणिज्य' 'व्यापार'] ।

(३) त्रीणि ऋणस्य । ['ऋण' 'कर्जा'] ।

(४) वृद्धये धनादिदानस्य त्रीणि । [ब्याजपर रुपये देना, 'उधार देना'] ।

(५) याच्ञाप्राप्तस्यैकम् । [मांगने से मिली हुई वस्तु का नाम] ।

(६) निमयात् = परिवर्त्तनात्–प्राप्तस्यैकम् । [बदले में ली हुई वस्तु । बदले में प्राप्त] ।

(७) ऋणव्यवहारे धनदाता—उत्तमर्णः । ['धनदाता' महाजन] । ऋणग्राहकः-अधमर्णः । ['आसामी'–'कजदार'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कुसीदिको वार्द्धुषिको वृद्ध्याजीवश्च वार्द्धुषिः ॥५॥
[2]क्षेत्राजीवः कर्षकश्च कृषकश्च कृषीवलः ।
[3]क्षेत्रं व्रैहेय-शालेयं व्रीहि-शाल्युद्भवोचितम् ॥६॥
यॅव्यं यवक्यं षष्टिक्यं यवादिभवनं हि यत् । ['तत्']।
तिॅल्य-तैलीनवन्माषो-मा-णु-भङ्गाद् द्विरूपता ॥७॥

---

(१) चत्वारि कुसीदोपजीविनः । ['सूदखोर']।

(२) चत्वारि कृषीवलस्य । ['किसान'] ।

(३) व्रीहिसामान्यस्य, कलमादेश्चोत्पत्तियोग्यस्य क्षेत्रस्यैकैकम् । [धान, तथा उत्तम २ प्रकार के चावल उत्पन्न करने वाला खेत] ।

(४) यव-यवक-षष्टिकभवनक्षेत्रस्यैकम् । ['जौ' 'साठी चावल' आदि के योग्य खेत] ।

(५) तिलानां भवनं क्षेत्रं-तिल्यं, तैलीनम् । माषाणां भवनं—माष्यं, माषीणम् । उमानाम्—भवनं क्षेत्रम्—उम्यम्, औमीनम् । अणूनाम्-भवनम् अणव्यम् , आणवीनम् । भङ्गानां भवनं क्षेत्रं-भङ्ग्यं, भाङ्गीनम् । [तिल, उडद, तीसी, चीना धान, शण आदिकी उत्पत्ति करने वाला खेत] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]मौद्गीन-कौद्रवीणादि शेषधान्योद्भवक्षमम् ।
[[2]शाकक्षेत्रादिकं शाकशाकटं शाकशाकिनम्] ।
बीजा[3]कृतन्तूप्तकृष्टं, सीत्यं [4]कृष्टश्च हल्यवत् ॥८॥
त्रिगु[5]णाकृतं तृतीयाकृतं त्रिहल्यं त्रिसीत्यमपि तस्मिन् ।
द्विगु[6]णाकृते तु सर्वं पूर्वं, शम्बाकृतमपीह ॥ ९ ॥

---

(१) व्रीह्याद्यतिरिक्तमुद्गादिशेषधान्योद्भवक्षेत्रं यथायथं—मौद्गीनं, कौद्रवीणम्, गौधूमीनम्, कालायीनम्, कौलत्थीनम्, प्रियङ्गवीणं, चाणकीनमित्यादि बोध्यम् । [मूंग, कोदों, गेहूँ, किसारी, कुलथी, प्रियङ्गु=ककुनी, चणा, मोठ आदि होने के योग्य खेत] ।

(२) शाकक्षेत्रस्य द्वे । [साक की बाडी] ।

(३) बीजवापोत्तरं कृष्टस्य क्षेत्रस्य द्वे । [बीज बोने के बाद जोता हुआ खेत] ।

(४) त्रीणि कृष्टमात्रस्य क्षेत्रस्य । [जोता हुआ खेत] ।

(५) वारत्रयं कृष्टस्य क्षेत्रस्य । [तीन बार जोता हुआ खेत] ।

(६) द्विवारं कृष्टस्य पञ्च । [दोबार जोता हुआ खेत]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आशुव्रीहिः[1] पाटलः स्याच्छितशूक[2]-यवौ समौ ॥१५॥
तोक्मस्तु[3] तत्र हरिते, कलायस्तु[4] सतीनकः ।
हरेणु-खण्डिकौ चाऽस्मिन्, कोरदूषस्तु[5] कोद्रवः ॥१६॥
मङ्गल्यको[6] मसूरोऽथ मकुष्ठक[7]-मयुष्ठकौ ।
वनमुद्गे, सर्षपे[8] तु द्वौ तन्तुभ-कदम्बकौ ॥१७॥
सिद्धार्थस्त्वेष धवलो, गोधूमः[10] सुमनः समौ ।

---

(१) व्रीणि आशुव्रीहेः । तत्र-आशु क्लीबपुंसोः [शीघ्र पकने वाले साठी धान आदि का नाम] ।
(२) द्वे यवानाम् । तत्र-सितशूकोऽपि । [जव 'जौ'] ।
(३) अपक्वयवस्यैकम् । [हरे यव] ।
(४) चत्वारि कलायस्य । [मटर] ।
(५) द्वे कोद्रवस्य । [कोदों] ।
(६) द्वे मसूरस्य । [मसूर] ।
(७) वनमुद्गस्य त्रीणि । [मोठ] ।
(८) त्रीणि सर्षपस्य । [सरसों] ।
(९) गौरसर्षपस्यैकम् । [पीली सरसों] ।
(१०) द्वे गोधूमस्य तत्र सुमनशब्दः-अदन्तः । [गेहूँ] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यो[1]द्यावकस्तु कुल्माषश्चणको हरिमन्थकः ॥१८॥
[3]द्वौ तिले तिलपेजश्च तिलपिञ्जश्च निष्फले ।
क्षवः क्षुताभिजननो राजिका कृष्णिका-ऽऽसुरी ॥१९॥
स्त्रियौ कङ्गु-प्रियङ्गू द्वे, अतसी स्यादुमा क्षुमा ।
मातुलानी तु भङ्गायां, [8]व्रीहिभेदस्त्वणुः पुमान् ॥२०॥
किंशारुः शस्यशूकं स्यात्कणिशं[10] शस्यमञ्जरी ।

---

(१) द्वे अर्धस्विन्नयवादेः । [घुघरी] ।
(२) द्वे चणकस्य । [चणा] ।
(३) द्वे तैलरहितनिष्फलतिलानाम् । [तेलरहित जङ्गली तिल]
(४) पञ्च राजिकायाः । [राई] ।
(५) द्वे प्रियङ्गोः स्त्रियाम् । तत्र-कंगूरपि । [ककुनी] ।
(६) त्रीणि अतस्याः । [तीसी] ।
(७) द्वे भङ्गायाः । [शण, शणभेद, भाँग] ।
(८) एकं व्रीहिविशेषस्य । ['चीना'] ।
(९) द्वे यवाद्यग्रभागस्य । [यव आदि का तीखा अग्र भाग–सली'] ।
(१०) द्वे धान्यमञ्जर्याः । [धान्य, यव आदि की मञ्जरी, 'बाल'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धान्यं व्रीहिःस्तम्बकरिः,स्तम्बो गुच्छस्तृणादिनः २१
नाडी नालश्च काण्डोऽस्य, पलालोऽस्त्री स निष्फलः।
कडङ्गरो बुसं क्लीबे, धान्यत्वचि तुषः पुमान् ॥२२॥
शूकोऽस्त्री श्लक्ष्णतीक्ष्णाग्रे, शमी शिम्बा, त्रिषूत्तरे।

(१) त्रीणि धान्यसामान्यस्य। ['धान']। तत्र व्रीहिः, स्तम्बकरिश्च पुंसि। व्रीहिपदेन च सप्तदश धान्यान्युच्यन्ते। तदुक्तं-
"व्रीहिर्यवो मसूरो गोधूमो मुद्ग माष-तिल-चणकाः।
अणवः प्रियंगु-कोद्रव-मयुष्टकाः शालिका-ऽऽढक्यः ॥
किञ्च कलाय-कुलत्थौ शणश्च सप्तदश धान्यानि।" इति।

(२) यवादिमूलगुच्छस्य द्वे। [तृणधान्य आदिका गुच्छा]।

(३) त्रीणि तृणादिकाण्डस्य। ['डण्ठल'-'फरड' 'कडबी']।

(४) गृहीतधान्यस्य काण्डस्यैकम्। [धान्य निकालने के बाद बचा हुआ भाग, पुआल]।

(५) द्वे बुसस्य। ['भूसा']।

(६) द्वे तुषस्य। 'पुमांस्तुषः' इति पाठान्तरम्। ['भूसी' 'चोकर']।

(७) तीक्ष्णाग्र(धान्य)स्य द्वे। [धान्य के तीक्ष्णाग्र भाग का नाम]।

(८) द्वे शिम्ब्याः। तत्र-शिमिःशिम्बिः-इत्यपि('छीमी','फली')।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]ऋद्धभावसितं धान्यं, [2]पूतन्तु बहुलीकृतम् ॥२३॥
[3]माषादयः शमीधान्ये, [4]शूकधान्ये यवादयः ।
[5]शालयः-कलमाद्याश्च षष्टिकाद्याश्च, पुंस्यमी ॥२४॥
[6]तृणधान्यानि नीवाराः, [7]स्त्री गवेधुर्गवेधुका ।

उत्तरे=बहुलीकृतान्ताः शब्दाः, त्रिषु=त्रिषु लिङ्गेषु बोध्याः ।

(१) मर्दितस्यापनीततृणस्य धान्यराशेर्द्वे-त्रिषु । [मर्दन करके बर्साने योग्य किया हुआ धान्य] ।

(२) अपनीततुषादेर्धान्यस्य द्वे । त्रिषु=त्रिषु लिङ्गेषु । [वर्षाकर सफा किया हुआ धान] ।

(३) माषादयः शमीधान्यानि । तदुक्तं रत्नकोशे—

'माषो मुद्गो राजमाषः कुलत्थश्चणकस्तिलः ।
कलायस्तूवर इति शमीधान्यगणः स्मृतः' ॥ इति ।

(४) यवगोधूमादयः-शूकधान्यानि । [शूकधान्य-गेहूं आदि] ।

(५) कलमादयः, षष्टिकाद्याश्च शालिपदवाच्याः ।

अमी=माषाद्याः शाल्यन्ता.-पुंसि ।

(६) नीवार-श्यामाकादयस्तृणधान्यानीत्यर्थः । द्वे तृण-धान्यानाम् । [तृण धान्य, 'तिन्नी' 'सांवा' आदि] ।

(७) द्वे गवेधुकायाः । [मन्यन्नविशेषस्य । 'गिरडी'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

अयोऽग्रं मुसलोऽस्त्री स्यादुदूखलमुलूखलम् ॥ २५ ॥
प्रस्फोटनं शूर्पमस्त्री, चालनी तितउः पुमान् ।
स्यूत-प्रसेवौ, कण्डोल-पिटौ, कट-किलिञ्जकौ ॥२६॥
समानौ, रसवत्यान्तु पाकस्थान-महानसे ।
पौरोगवस्तदध्यक्षः, सूपकारास्तु वल्लवाः ॥२७॥

(१) द्वे मुसलस्य । ['मूसल'] ।
(२) द्वे उलूखलस्य । [ऊखल] ।
(३) द्वे शूर्पस्य । सूर्यमपि । ['शूप' 'छाज'] ।
(४) द्वे चालन्याः । [चालनी] ।
(५) द्वे वस्त्रादिकृतप्रसेवस्य । 'स्यूत प्रसेवौ समानौ' इत्यन्वयः । एवमग्रेऽपि । ['थैली' 'थैला' 'बोरी' 'बोरा'] ।
(६) वंशादिनिर्मितस्य पात्रस्य द्वे । ['दौरी'-'डलिया'] ।
(७) द्वे कटस्य । [चटाई] ।
(८) त्रीणि रसवत्याः । [रसोईघर] ।
(९) महानसाध्यक्षस्य द्वे । ['पाकशालाध्यक्ष' । नाना प्रकार के व्यञ्जन = पक्वान्न बनाने वाला श्रेष्ठ रसोइया] ।
(१०) सप्त पाककर्त्तुः । [रसोइया] । आद्यद्वयं व्यञ्जन-कर्त्तुरित्यन्ये ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आरालिका आन्धसिकाः सूदा औदनिका गुणाः ।
औपूपिकः कान्दविको भक्ष्यकार, इमे त्रिषु ॥२८॥
अश्मन्तमुद्धानमधिश्रयणी चुल्लिरन्तिका ।
अङ्गारधानिका-ऽङ्गारशकट्यपि हसन्त्यपि ॥२९॥
हसन्त्यप्यर्थं न स्त्री स्यादङ्गारोऽलातमुल्मुकम् ।
क्लीबेऽम्बरीषं भ्राष्ट्रो, ना कन्दुर्वा स्वेदनी स्त्रियाम् ।

---

(१) त्रीणि कान्दविकस्य । ['हलवाई'–कन्दोई'] । इमे=पौरोगवादयस्त्रिषु = त्रिषु लिङ्गेषु ज्ञेयाः ।

(२) पञ्च चुल्ल्याः । [चूल्हा] ।

(३) चत्वारि हसन्त्याः । ['सिगडी' बोरसी 'अंगीठी'] ।

(४) त्रीणि अङ्गारस्य । परेतु–एकमङ्गारस्य । 'अलात'–मित्यादि द्वयन्तूल्मुकस्येत्याहुः । ['मुसाल' 'लुकाठी' 'जलती हुई लकड़ी' मसाल आदि । अङ्गारा–'कोयला'] ।

(५) केचित्तु–अलातमित्यादि द्वयमर्धदग्धकाष्ठस्येत्याहुः । ['जलती हुई लकड़ी' 'मसाल' आदि] । अङ्गारः पुंनपुंसकयोः ।

(६) द्वे भाष्ट्रस्य । ['भाड़'] ।

(७) द्वे लोहपात्रविशेषस्य । [कड़ाही] । तत्र कन्दुः स्त्रीपुंसयोः । स्वेदनी वा–विकल्पेन स्त्रियां, तेन पुंस्यपि च-स्वेदनः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अलिञ्जरः स्यान्मणिकः, [2]कर्कर्यालुर्गलन्तिका ।
पिठरः[3] स्थाल्युखा कुण्डं, कलशस्तु[4] त्रिषु द्वयोः ॥
घटः कुट-निपावस्त्री[5] शरावो वर्द्धमानकः ।
ऋजीषं[6] पिष्टपचनं, [7]कंसोऽस्त्री पानभाजनम् ॥३२॥
[8]कुतूः कृत्तेः स्नेहपात्रं, सैवाऽल्पा कुतुपः पुमान् ।

(१) द्वे महाघटस्य । ['मूंण' 'मांट' 'कमोरा'] ।

(२) त्रीणि कर्कर्याः । ['करवा'-तूतिया' 'करी'] ।

(३) चत्वारि स्थाल्याः । 'उषा' इत्यपि । [बटलोही] ।

(४) चत्वारि घटस्य । तत्र कलशस्त्रिषु । 'कलस' इत्यपि । द्वयोः = स्त्रीपुंसयोर्घटः । ['घड़ा' 'गगरा' 'कलसा'] । 'अस्त्री'ति कुट-निपाभ्यां नैव सम्बद्ध्यते, किन्तु शरावेणैव सम्बद्ध्यते ।

(५) द्वे शरावस्य पुंनपुंसकयोः । 'सराव' इत्यपि । ['सराई'-परई'] ।

(६) द्वे ऋजीषस्य । ['तवा'] ।

(७) द्वे कंसस्य । ['कटोरा'-'कचोला'] ।

(८) द्वे चर्मनिर्मितस्य घृत-तैलादिपात्रस्य । तत्र कुतूः स्त्रियाम् । [ऊंट के चमड़े का तथा अन्यान्य चमड़े का बना हुआ कुप्पा] ।

(९) एकं कुतुपस्य । ['कुप्पी'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वभावपनं भाण्डं पात्रा-ऽमत्रं च भाजनम् ॥३३॥
दर्विः कम्बिः खजाका च, स्यात्तर्दूर्दारुहस्तकः ।
अस्त्री शाकं हरितकं शिग्रुरस्य तु नाडिका ॥३४॥
कलम्बश्च कडम्बश्च, वेसवार उपस्करः ।
तिन्तिडीकं च चुक्रश्च वृक्षाम्लमथ वेल्लजम् ॥३५॥

---

(१) पञ्च भाण्डस्य । ['भाण्डा' 'बर्तन' 'वासन' आदि] ।

(२) त्रीणि दर्व्याः स्त्रियाम् । ['डब्बू' 'करछुल'—कडछी] ।

(३) द्वे दर्विविशेषस्य । तत्र तर्दूः पुंसि उत्तरसाहचर्यादिति दीक्षिताः । इमे पञ्चापि पर्याया इत्यन्ये । ['चाटू' 'पलटा'] ।

(४) त्रीणि शाकस्य । तद्र—शाकमद्यी । ['शाक] ।

(५) त्रीणि शाकनालस्य । [शाकका डंठल] ।

(६) द्वे वेसवारस्य । ['बेसवार' 'मुसाला'] । तदुक्तं—
'चित्रकं, पिप्पलीमूलं, पिप्पली, चव्य-नागरम् ।
धान्याकं, रजनी, श्वेततण्डुलाश्च समांशकाः ।
'बेसवार' इति ख्यातः शाकादिषु नियोजयेत् ।" इति ।
तत्र—श्वेततण्डुलाः = श्वेतजीरकः ।

(७) त्रीणि तिन्तिडीकस्य । ['चूक'] ।

(८) षट् मरिचस्य । [काली मरिच] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मरीचं कोलकं कृष्णमूषणं धर्मपत्तनम् ।
[1]जीरको जरणो-ऽजाजी कणा, [2]कृष्णे तु जीरके ॥३६॥
सुषवी कारवी पृथ्वी पृथुः कालोपकुञ्चिका ।
[3]आर्द्रकं शृङ्गवेरं स्यादथ [4]च्छत्रा वितुन्नकम् ॥३७॥
कुस्तुम्बुरु च धान्याकमथ [5]शुण्ठी महौषधम् ।
स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजम् ॥३८॥
[6]आरनालक-सौवीर-कुल्माषा-ऽभिषुतानि च ।
अवन्तिसोम-धान्याम्ल-कुञ्जलानि च काञ्जिके ॥३९॥
[7]सहस्रवेधि-जतुकं बाह्लीकं हिङ्गु रामठम् ।

---

(१) चत्वारि जीरकस्य । [सफेद जीरा] ।
(२) षट् कृष्णजीरकस्य । ['कालाजीरा' 'मगरैला'] ।
(३) द्वे आर्द्रकस्य । ['आदी'] ।
(४) चत्वारि धान्याकस्य । [धनिय़ां] ।
(५) पञ्च शुण्ठ्याः । [सोंठ] । तत्र विश्वं स्त्रीनपुंसकयोः ।
(६) अष्टौ काञ्जिकस्य । ['कांजी'] ।
(७) पञ्च हिङ्गुनः । ['हींग'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0: In Public Domain, Digitizagtion by eGangotri

तत्पत्री[1] कारवी पृथ्वी बाष्पिका कबरी पृथुः ॥४०॥
निशाख्या[2] काञ्चनी पीता हरिद्रा वरवर्णिनी ।
सामुद्रं[3] यत्तु लवणमक्षीवं वशिरं च तत् ॥४१॥
सैन्धवोऽस्त्री[4] शीतशिवं माणिमन्थं च सिन्धुजे ।
रौमकं[5] वसुकं, पाक्यं[6] बिडञ्च कृतके द्वयम् ॥४२॥
सौवर्चलेऽक्ष-रुचके[7], तिलकं[8] तत्र मेचके ।
मत्स्यण्डी[9] फाणितं खण्डविकारे, शर्करा[10] सिता ॥

(१) पञ्च हिङ्गुपत्र्याः । ['डिकेमाली' दालचीनी, हिंगुपत्री] । 'त्वक्पत्री'ति पाठः क्वचित् ।

(२) पञ्च हरिद्रायाः । ['हलदी'] ।

(३) द्वे सामुद्रलवणस्य । ['समुद्रलवण'] ।

(४) चत्वारि सैन्धवलवणस्य । [सेन्धा निमक] ।

(५) द्वे शाकम्भरीलवणस्य । [साम्भर निमक] ।

(६) द्वे कृतकलवणस्य । ['खारी नोन'] ।

(७) त्रीणि सौवर्चलस्य । [सौंवर काला निमक] ।

(८) कृष्णवर्णस्य सौवर्चलस्य एकम् ['कालानोन'] ।

(९) त्रीणि फाणितस्य । ['चीनी की राब'] ।

(१०) द्वे शर्करायाः । ['सफेद चीनी' 'मिश्री'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कूर्चिका[1] क्षीरविकृतिः स्याद्रसाला[2] तु मार्जिता ॥४३॥
[दध्ना[3] सह पयः पक्वं यत्तत्स्याद्दधिकूर्चिका ।
तक्रेण[4] पक्वं यत्क्षीरं सा भवेत्तक्रकूर्चिका] ॥
[5]स्यात्तेमनन्तु निष्ठानं, त्रिलिङ्गा वासितावधेः ॥४४॥
शूलाकृतं[6] भटित्रं स्याच्छूल्यमुख्यन्तु[7] पैठरम् ।

---

(१) द्वे किलाटिकायाः । ['खोवा' 'मांवा'] ।

(२) द्वे मार्जितायाः । [शिखरण] ।

(३) एकं दधिकूर्चिकायाः ।

(४) एकं तक्रकूर्चिकायाः ।

(५) द्वे व्यञ्जनस्य । ['कढी' 'रसा' 'झोल'] । वासितशब्दपर्यन्तं त्रिलिङ्गाः ।

(६) लोहशलाकया पक्वस्य मांसस्य त्रीणि । [लोहे के सींखचे में डालकर भूंजा हुआ मांस] ।

(७) 'उख्य' मित्यादि स्थालीपक्वस्यौदनादेर्द्वे । [बटुवा में बना हुआ अन्न आदि] ।

---

४५ श्लोके—'शूलाकृतं भटित्रं च' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रणीतमुपसंपन्नं, प्रयस्तं स्यात्सुसंस्कृतम् ॥४५॥
स्यात्पिच्छिलन्तु विजिलं, संमृष्टं शोधितं समे ।
चिक्कणं मसृणं स्निग्धं, तुल्ये भावित-वासिते॥४६॥
आपकं पौलिरभ्यूषो, लाजाः पुम्भूम्नि चाऽक्षताः ।

---

(१) संस्कृतस्य व्यञ्जनादेर्द्वे । [बढिया बनाया हुआ व्यञ्जन पक्वान्न आदि] ।

(२) द्रव्यान्तरसंस्कृतस्य । [मेवा आदि डालकर प्रयत्न से बढिया बनाया हुआ पक्वान्न आदि] ।

(३) जलाविलव्यञ्जनादेर्द्वयम् । [झोलदार] ।

(४) केशकीटाद्यपनयनेन शोधितस्यान्नादेर्द्वे । [साफ किया हुआ अन्न आदि] ।

(५) त्रीणि चिक्कणस्य । ['स्निग्ध' 'चिकणा'] ।

(६) वासितस्य द्वे । [हींग एवं पुष्प आदि से सुगंधित किया हुआ, भावना व वासना दिया हुआ, छौंक दिया हुआ] ।

(७) ईषन्नर्जितयवादेस्त्रीणि । ['आधे भूंजे एवं अधकच्चे सिके हुए यव बजड़ा आदि के सिट्टा आदि'] ।

(८) भृष्टव्रीह्यादेर्द्वयम् । पुंसि बहुत्वेऽक्षताः । ['लावा'] । केचित्तु—अखण्डितपृथुकस्य द्वे इत्याहुः । ['अक्षत'] ।

Dr. Usmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृथुकः[1] स्याच्चिपिटको, धाना[2] भृष्टयवे स्त्रियः ॥४७॥
पूपोऽपूपः[3] पिष्टकः स्यात्कँरम्भो[4] दधिसक्तवः ।
भिस्सा[5] स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः ।
भिस्सटा[6] दग्धिका, सर्वरसाग्रे[7] मण्डमस्त्रियाम् ।
मासरा-ऽऽचाम-निस्रावा[8] मण्डे भक्तसमुद्भवे ॥४९॥
यवागूरुष्णिका[9] श्राणा विलेपी तरला च सा ।

---

(१) द्वे पृथुकस्य । [चिउडा] ।

(२) द्वे भर्जितयवानाम् । 'धानाः' स्त्रियाम् । ['धाणी'] ।

(३) त्रीणि अपूपस्य । ['पूडा'] ।

(४) द्वे दधिमिश्रितसक्तुनः । [दही से सना हुआ सत्तू] ।

(५) षट् भक्तस्य । तन्न अन्धः सान्तं क्लीबे । ओदन-दीदिवी अस्त्रियाम् । ['भात'] ।

(६) दग्धान्नस्य द्वे । [बर्त्तन में लगा हुआ, जला हुआ भात आदि] ।

(७) सर्वद्रवस्य मण्डस्य । ['रसा'] ।

(८) भक्तमण्डस्य त्रीणि । [भात का मांड] ।

(९) पञ्च यवाग्वाः । [लपसी] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[[1]अक्षणाऽभ्यञ्जने तैलं, [2]कृसरस्तु तिलौदनः]।
[3]गव्यं त्रिषु गवां सर्वं, [4]गोविड् गोमयमस्त्रियाम् ५०
[5]तत्तु शुष्कं करीषोऽस्त्री, [6]दुग्धं क्षीरं पयः समम् ।
[7]पयस्याज्यदध्यादि, [8]द्रप्सं दधि घनेतरत् ॥५१॥
[9]घृतमाज्यं हविः सर्पिर्नवनीतं [10] नवोद्धृतम् ।

---

(१) त्रीणि तैलस्य । ['तैल'] ।

(२) तिलौदनस्य द्वे । ['तिलभात' 'तिलतण्डुल' खिचड़ी] ।

(३) गोरसस्यैकम् । [गोरस, गोदुग्ध आदि] ।

(४) द्वे गोमयस्य [गोबर] । तत्र गोविट् शान्ता, षान्ता वा स्त्रियाम् । गोमयमस्त्रियाम् ।

(५) एकं शुष्कगोमयस्य । ['सूखा गोबर' 'करस' 'छाणा']।

(६) त्रीणि दुग्धस्य । तत्र पयः सान्तं क्लीबे । [दूध,]

(७) एकं घृतदध्यादेः । [घी, दहि छाछ आदि] ।

(८) शिथिलस्य दध्न एकम् । 'सर'मित्यपि नाम । [पतला दही] ।

(९) चत्वारि घृतस्य । तत्र–हविःसर्पिषी क्लीबे । [घी] ।

(१०) एकं नवनीतस्य । ['मक्खन' 'नौनी घी'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्तु[1] हैयङ्गवीनं यत् द्योगोदोहोद्भवं घृतम् ॥५२॥
[2]दण्डाहतं कालशेयमरिष्टमपि गोरसः ।
[3]तक्रं ह्युदश्वित्मथितं पादाम्बुवर्धाम्बु निर्जलम् ॥५३॥
मण्डं[4] दधि भवं मस्तु, [5]पीयूषोऽभिनवं पयः ।
अशनाया[6] बुभुक्षा क्षुद्, [7]ग्रासस्तु कवलः पुमान् ॥५४॥

---

(१) एकं हैयङ्गवीनस्य । ['नौनी घी', 'चूँटिया घी' 'बिना तपाया हुआ छाछ सहित घृत'] ।

(२) चत्वारि सामान्यतक्रस्य । ['मठा' 'छाछ'] ।

(३) चतुर्थांशजलं—तक्रम् । [चतुर्थांश जलयुक्त-तक्र] । अर्धजलम्—उदश्वित्—छीबे । [आधा जल मिली हुई छाछ] । निर्जलं-मथितं । ['मठा' 'बिना जलकी छाछ'] ।

(४) वस्त्रनिस्सारितदधिजलस्यैकम् । ['दही का तोड़'] ।

(५) नवप्रसूताया गोर्दुग्धस्य द्वे । [८-१० दिन के भीतर की नई ब्याई हुई गौ का दूध, 'पीयूष'] ।

(६) त्रीणि क्षुधायाः । तत्र-क्षुत् धान्ता स्त्रियाम् । [भूख] ।

(७) द्वे ग्रासस्य । ['ग्रास' 'कौर' 'गासिया'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संपीतिः स्त्री तुल्यपानं, संग्धिः स्त्री सह भोजनम् ।
उदन्या तु पिपासा तृट् तर्षो, जग्धिस्तु भोजनम् ।
जेमनं लेह आहारो निघासो न्याद इत्यपि ।
सौहित्यं तर्पणं तृप्तिः, फेला भुक्तसमुज्झितम् ॥
कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।
गोपे गोपाल-गोसङ्ख्य-गोधुगा-भीर-वल्लवाः ॥५७॥

---

(१) द्वे बहुभिर्मिलित्वा पानस्य । [अनेक व्यक्तियों का एक साथ पीना] ।

(२) सहभोजनस्य द्वे । [साथ भोजन, 'सहभोज'] ।

(३) चत्वारि पिपासायाः । तत्र—तृट् षान्ता स्त्रियाम् । ['प्यास' 'तिस'] ।

(४) सप्त भोजनस्य । ['भोजन'] ।

(५) त्रीणि तृप्तेः । [तृप्ति, धापना] ।

(६) द्वे भुक्तसमुज्झितस्य । ['जूठ'] ।

(७) षट् यथेप्सितस्य । ['मनोऽनुकूल' 'यथेच्छ'] ।

(८) षट् गोपालस्य । [ग्वाला] ।

CC-0. Omkar Nath Shastri Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गोमहिष्यादिकं[1] पादबन्धनं, [2]द्वौ गवीश्वरे ।
गोमान् गोमी, [3]गोकुलन्तु गोधनं स्याद्गवां व्रजे ॥
[4]त्रिष्वाशितङ्गवीनं तद्गावो यत्राऽशिताः पुरा ।
[5]उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः ॥५९॥
अनड्वान् सौरभेयो गौरुक्ष्णां[6] संहतिरौक्षकम् ।
[7]गव्या गोत्रा गवां, [8]वत्स-धेन्वोर्वात्सक-धैनुके ॥६०॥

(१) गोमहिष्यादेरेकम् । अत्र 'यादवं धन'मिति प्राचीनो मनोहरश्च पाठः । तत्र-यदूनाम् = आभीरगोपालादीनामिदं धनं यादवम् । [जो भैंस आदि धन] ।

(२) त्रीणि गोस्वामिनः । ['गौओं का मालिक'] ।

(३) द्वे गोसमूहस्य [गौओं का समूह] ।

(४) भूतपूर्वगोचरभूमेरेकम् । त्रिषु लिङ्गेषु । [पहिले जो भूमि गोचर भूमि रही हो उसका नाम] ।

(५) नव वृषभस्य । [बैल, 'बलद'] । तत्र-उक्षा नान्तः, अनड्वान् हान्तः ।

(६) एकं वृषसङ्घस्य । [बैलों का झुण्ड] ।

(७) गोसङ्घस्य द्वे । [गौओं का झुण्ड] ।

(८) वत्सधेनुसमूहस्यैकैकम् । [बछड़ों का समूह=वात्सक । धेनुओं का समूह = धनुक] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृषो महान् महोक्षः [२]स्याद्, वृद्धोक्षस्तु जरद्गवः ।
[३]उत्पन्न उक्षा जातोक्षः, [४]सद्यो जातस्तु तर्णकः ६१
[५]शकृत्करिस्तु वत्सः [६]स्याद्द्व्य-वत्सतरौ समौ ।
[७]आर्षभ्यः षण्डतायोग्यः, [८]षण्डो गोपतिरिट्चरः ॥६२॥
[९]स्कन्धदेशे त्वस्य वहः, [१०]सास्ना तु गलकम्बलः ।

---

(१) महोक्षस्यैकम् । [बड़ा बैल] ।

(२) वृद्धवृषभस्य द्वे । [बूढा बैल] ।

(३) यूनो वृषभस्यैकम् । [जवान बैल] ।

(४) एकं सद्योजातस्य वत्सस्य । [सद्यः जन्मा हुआ बछड़ा] । (५) द्वे वत्सस्य । [बछड़ा] ।

(६) बालयुवावस्थयोर्मध्ये वर्त्तमानस्य वृषभस्य द्वे । [सिखाने लायक-कुछ बड़ा-बछड़ा] ।

(७) एकं तारुण्यं प्राप्तस्य वत्सस्य । [बधिया करने योग्य अवस्था वाला । 'जवान बछड़ा] ।

(८) त्रीणि षण्डस्य । [सांड] ।

(९) वृषभस्कन्धदेशस्यैकम् । [बैल का कन्धा] ।

(१०) द्वे गलकम्बलस्य । तत्र—सास्ना स्त्रियाम् । [गाय वगैरह का लटकता हुआ चमड़ा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्यान्नस्तितस्तु नस्योतः, [2]प्रष्ठवाड्युगपार्श्वगः ॥६३॥
[3]युगादीनां तु वोढारो युग्य-प्रासङ्ग्य-शाकटाः ।
[4]खनति तेन तद्वोढाऽस्येदं हालिक-सैरिकौ ॥६४॥
[5]धूर्वहे धुर्य-धौरेय-धुरीणाः स-धुरन्धराः ।

---

(१) द्वे नासारज्जुयुक्तस्य । [जिसके नाक में रज्जु (नाथ) डाली गई हो ऐसा बैल। नाथ डाला हुआ बैल]।

(२) दमनकाले स्कन्धारोपितयुगकाष्ठस्य द्वे । 'पष्ठवा'-डित्यपि पाठः । [सिखाने के लिए जिसके कन्धे पर 'जूवा' रक्खा गया हो, ऐसा बैल]।

(३) युगं वहति—युग्यः । प्रासङ्गं वहति—प्रासङ्ग्यः । शकटं वहति—शाकटः । [जूवा, तथा सिखाने का काष्ठ और गाड़ी सग्गड़ खीचने वाले बैलों का १-१ नाम]।

(४) हलेन खनति—हालिकः । हलं वहति—हालिकः । हलस्यायं—हालिकः । एवं—सीरेण खनति, सीरं वहति, सीरस्यायं वा—सैरिकः । [हल से खुद निकालने वाला, और हल चलाने वाला, एवं हलका बैल, तथा 'हाली' कृषक आदि का नाम]।

(५) पञ्च धुरन्धरस्य वृषभस्य । [धुरी उठानेवाला बैल]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]उभावेकधुरीणैकधुरावेकधुरावहे ॥ ६५ ॥
[2]स तु सर्वधुरीणः स्याद्यो वै सर्वधुरावहः ।
[3]माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी ॥६६॥
अर्जुन्यघ्न्या रोहिणी स्यादुत्तमा[4] गोषु नैचिकी ।
वर्णादिभेदात्[5]संज्ञाः स्युः शबली-धवलादयः ॥६७॥
द्विहायनी द्विवर्षा गौरेकाब्दा[6] त्वेकहायनी ।
चतुरब्दा चतुर्हायण्येवं त्र्यब्दा त्रिहायणी ॥६८॥

---

(१) त्रीणि एकधुरावहस्य। [एक धुरीमें चलनेवाले बैल]।
(२) द्वे सर्वधुरावहस्य। [सब धुरी में चलनेवाला बैल]।
(३) नव गोः। [गाय]।
(४) एकं श्रेष्ठाया गोः। [उत्तम गौ]।
(५) वर्णादिभेदात्—कपिला, धवला, धवली, शबलेत्यादीनि नि गवाम्। ['कपिला' 'धोली' लाल काली आदि गौके नाम]
(६) द्वे द्विवर्षायाः गोः। [दो वर्ष की गौ]।
(७) एकवर्षाया द्वे। [एक वर्ष की गौ]।
(८) द्वे चतुर्वर्षायाः गोः। [चार वर्ष की गौ]।
(९) त्रिवर्षायाः। [तीन वर्ष की गौ]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वेशा वन्ध्याऽवतोका[2] तु स्रवद्गर्भाऽथ[3] सन्धिनी ।
आक्रान्ता वृषभेणाऽथ वेहद्गर्भोपघातिनी[4] ॥६९॥
[5]काल्योपसर्या प्रजने, [6]प्रष्ठौही बालगर्भिणी ।
[7]स्यादचण्डी तु सुकरा, [8]बहुसूतिः परेष्टुका ॥७०॥

---

(१) द्वे वन्ध्यायाः गोः । [बाँझ गाय] ।

(२) द्वे स्रवद्गर्भाया गोः । [अस्कमात् जिसका गर्भ गिर गया हो ऐसी गौ] ।

(३) वृषभाक्रान्ताया गोरेकम् । [जिस गौ के पीछे सांड लगा हो ऐसी, एवं कृतमैथुना-गौ] ।

(४) गर्भघातिन्या द्वे । [सांड से पुनः संसर्ग करके गर्भ गिराने वाली गाय] ।

(५) गर्भग्रहणयोग्याया एकम् । [गर्भ ग्रहणयोग्य गौ] ।

(६) बालगर्भिण्या द्वे । [पहिले पहिल गर्भ धारण करने वाली बछिया] ।

(७) सुशीलाया गोर्द्वे । ['सूधी गौ'] ।

(८) द्वे बहुप्रसूताया गोः । [बहुत बार व्याई हुई गौ] ।

टि०-७० श्लोके प्रष्ठौही बालगर्भिणीत्यत्र-'पष्ठौही'ति पा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

चिरप्रसूता[1] वष्कयणी, धेनुः[2] स्यान्नवसूतिका ।
सुव्रता[3] सुखसन्दोह्या, पीनोध्नी[4] पीवरस्तनी ॥७१॥
द्रोणक्षीरा[5] द्रोणदुग्धा, धेनुष्या[6] बन्धके स्थिता ।
समांसमीना[7] सा यैव प्रतिवर्षं प्रसूयते ॥ ७२ ॥
ऊधस्तु[8] क्लीबमापीनं, संभौ शिवक-कीलकौ[9] ।

(१) चिरप्रसूताया द्वे । 'बष्कयिणी' इत्यपि नामधेयम् । [जिसको ब्याए हुए ज्यादा समय ६-७ मास हो गए हों ऐसी गौ, 'बकैना', 'बैडकी'] ।

(२) द्वे नूतनप्रसूतायाः । [नई ब्याई गौ, 'धेन'] ।

(३) द्वे सुखदोह्याया गोः । [सुखसे दूही जा सकनेवाली गौ]।

(४) द्वे पीवरस्तन्याः । [मोटे व स्थूल, दूधसे भरे हुए थण व 'ऊडी' ('ऐन') वाली गौ] ।

(५) द्रोणदुग्धाया द्वे । [धूण = १५ सेर कच्चा, अर्थात् पक्का १० सेर दूध देने वाली गौ] ।

(६) एकं बन्धके स्थिताया गोः । [बन्धक रखी हुई गौ] ।

(७) प्रतिवर्षं प्रसवित्र्याया गोरेकम् । [प्रतिवर्ष ब्यानेवाली गौ] ।

(८) द्वे दुग्धाशयस्य । ['ऊडी', 'ऐन'] ।

(९) द्वे कीलकस्य । [खूँटा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

[1]न पुंसि दाम सन्दानं, [2]पशुरज्जुस्तु दामनी ॥ ७३ ॥
[3]वैशाख-मन्थ-मन्थान-मन्थानो मन्थदण्डके ।
[4]कुठरो दण्डविष्कम्भो, [5]मन्थनी गर्गरी समे ॥७४॥
[6]उष्ट्रे क्रमेलक-मय महाङ्गाः, [7]करभः शिशुः ।

(१) दोहनकाले पादबन्धनरज्जोः । [दूध दूहने के समय गौ के पैर बान्धने की रस्सी, न्याणां] ।

(२) द्वे पशुबन्धनरज्ज्वाः । [गौ आदि पशुओं के बान्धने की रस्सी] ।

(३) पञ्च मन्थनदण्डनस्य । ['झेरणा' 'रई'] ।

(४) मन्थनदण्डधारकस्य काष्ठस्य, सूत्रस्य वा । [दूध बिलोवनेका दण्डा ('झेरणा' 'रई') जिस खम्भेसे, या काष्ठसे, या पांच काष्ठोंसे निर्मित ग्रामीणजन प्रसिद्ध आधार विशेषके ऊपर निकले हुए दण्डे से बांधा जाए,- उसका नाम] ।

(५) द्वे मन्थनपात्रस्य । ['दही विलोवणी' 'गगरी'] ।

(६) चत्वारि उष्ट्रस्य । [ऊँट] ।

(७) एकमुष्ट्रशिशोः । ['टोरडो' 'ऊँटका बच्चा'] ।

टि०—७३ श्लोके 'पशुरज्जुस्तु बन्धनी' इति पाठन्तरम् ।
७४ श्लोके 'कुटरो दण्डविष्कम्भे' इत्यपि पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

करभाः स्युः शृङ्खलका दारवैः पादबन्धनैः ॥७५॥
अजा छागी, [3]स्तभ-च्छाग-बस्त-च्छगलका अजे ।
[4]मेढ्रो-रभ्रो-रणो-र्णायु-मेष-वृष्णय एडके ॥ ७६ ॥
उष्ट्रो-रभ्रा-ऽजवृन्दे स्यादौष्ट्रकौ-रभ्रका-ऽऽजकम् ।
चक्रीवन्तस्तु वालेया रासभा गर्दभाः खराः ॥७७॥
वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक् ।

(१) दारवैः=काष्ठमयैः पादबन्धनैरुपलक्षितः करभः 'शृङ्खलक' इत्युच्यते इत्यर्थः । दारुयन्त्रशृङ्खलादिबद्धस्य करभस्य 'शृङ्खलक' इत्येकं नाम । [काठ से या लोहे के सिक्कड़ों से बँधा हुआ ऊँट या ऊँटका बच्चा] ।

(२) द्वे अजायाः । [बकरी] ।
(३) पञ्च-अजस्य [बकरा] ।
(४) सप्त मेषस्य । [मेंढा] ।
(५) उष्ट्रादिवृन्दस्यैकैकम् । [ऊँट, मेढा, एवं बकरों के झुंड का १-१ नाम] ।
(६) पञ्च गर्दभस्य । तद्र-चक्रीवान् तान्तः । [गदहा] ।
(७) वणिजोऽष्टौ । ['बिणजारा' 'बनिया'] ।

७६ श्लोके छागनामसु 'स्तभ' पद स्थाने 'तुभ' इति 'शुभ' इति च पाठः क्वचित् ।

Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

पण्याजीवो ह्यापणिकः क्रयविक्रयिकश्च सः ॥७८॥
विक्रेता[1] स्याद्विक्रयिकः, क्रायक[2]-क्रयिकौ समौ ।
[3]वाणिज्यन्तु वणिज्या स्यान्मूल्यं[4] वस्तोऽप्यवक्रयः ॥
[5]नीवी परिपणो मूलधनं, लाभो[6]ऽधिकं फलम् ।
परिदानं[7] परीवर्त्तो नैमेय-निमयावपि ॥ ८० ॥
पुमानुपनिधिर्न्यासः[8], प्रतिदानं[9] तदर्पणम् ।

(१) विक्रेतुर्द्वे । ['बेचने वाला'] ।
(२) द्वे क्रयिकस्य । ['खरीददार' 'ग्राहक'] ।
(३) द्वे वाणिज्यस्य । [वाणिज्य = वणिज-व्यापार, 'व्योहार'] ।
(४) त्रीणि मूल्यस्य । ['मूल्य' 'दाम'] ।
(५) त्रीणि मूलधनस्य । ['रकम' 'मूलधन'] ।
(६) त्रीणि लाभस्य । ['लाभ' 'फायदा' 'नफा'] ।
(७) चत्वारि परिवर्तनस्य । ['अदला-बदला'] ।
(८) द्वे निक्षेपस्य । ['धरोहर'] ।
(९) निक्षेपार्पणस्य द्वे । [घन एवं धरोहर को वापिस देना]

७९ श्लोके-'क्रायकः क्रयिकः समौ' इत्यपि पाठः क[illegible]सक ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]क्रये प्रसारितं क्रय्यं, [2]क्रेयं क्रेतव्यमात्रके ॥ ८१ ॥
[3]विक्रेयं पणितव्यञ्च पण्यं, क्रय्यादयस्त्रिषु ।
[4]क्लीबे सत्यापनं सत्यङ्कारः सत्याकृतिः स्त्रियाम् ॥
[5]विपणो विक्रयः, [6]सङ्ख्याः सङ्ख्येये द्वादश त्रिषु ।

(१) आपणे बहिः स्थापितस्य द्रव्यस्यैकम् । [दूकानमें बेचने को बाहर फैलाया हुआ माल] ।

(२) क्रयणयोग्यस्यान्तःस्थितस्य द्रव्यस्य । [खरीदने लायक भीतर रखा हुआ माल] ।

(३) विक्रेयवस्तुनस्त्रीणि । [बिक्री करने का माल, पण्य वस्तु] ।

क्रय्यादयः पण्यान्ताः—त्रिषु लिङ्गेषु ।

(४) त्रीणि सत्यापनस्य । ['बयाना देना'–'साई देना'] ।

(५) विक्रयकर्मणो द्वे । ['बेचना'] ।

(६) एकादिका दशान्ता [अष्टादशान्ता] सङ्ख्या सङ्ख्येये वर्त्तते । सा च त्रिषु लिङ्गेषु ज्ञेया । यथा–एका शाटी, एको घटः, एकं कुलमिति । दश पुरुषाः । दश स्त्रियः । अष्टादश कुलानि चेति । दशशब्दश्रवणपर्यन्तम्–(अष्टादशशब्दं) [illegible]त्–एकादिका सङ्ख्या सङ्ख्येये=द्रव्ये वर्तते । तेन सामाना-[illegible]नैव प्रयोगः—एकः घटः, एका शाटीति । न तु भवति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

विंशत्याद्याः सदैकत्वे सर्वाः सङ्ख्येयसङ्ख्ययोः ॥
सङ्ख्यार्थे द्विबहुत्वे स्तस्तासु चाऽऽनवतेः स्त्रियः ।

'घटानां विशति'रितिवत् 'पटस्यैक' इति प्रयोग इति भावः । [एक से दशान्त शब्द तक जो सङ्ख्यावाचक शब्द हैं. वे सङ्ख्येयवस्तु कोही कहते हैं केवल सङ्ख्याको नहीं कहते हैं.]।

(१) विंशतिशब्दमारभ्य याः सङ्ख्यास्ताः सङ्ख्येये, सङ्ख्यायाञ्च-उभयत्रापि-वर्त्तन्ते, एकवचनान्ताश्च भवन्ति । यथा- 'विंशतिर्घटाः', 'घटानां विंशति' रित्युभयथापि प्रयोगः । [विंशति शब्दसे लेकर जो सङ्ख्यावाचक शब्द हैं, वे सङ्ख्या और सङ्ख्येय वस्तु-दोनों को कहते हैं, और सङ्ख्येय-वाचक होने पर एक-वचनान्त ही होते हैं] ।

(२) विंशत्यादिशब्दानां यदा सङ्ख्या अर्थस्तदा ततो द्विवचन-बहुवचने अपि भवतः । यथा 'द्वे विंशती', 'तिस्रो विंशतय' इति । ['विंशति' आदि सङ्ख्यावाचकशब्द जब केवल सङ्ख्या को ही कहते हैं,तब उनसे द्विवचन बहुवचन भी होता है] ।

तासु = विंशत्यादिषु सङ्ख्यासु, आनवतेः = नवतिशब्दम् अभिव्याप्य स्त्रियः = स्त्रीलिङ्गाः । यथा 'विंशतिर्वस्त्राणि', 'विंशतिः स्त्रियः' इति । ['विंशति' से 'नवति' शब्दपर्यन्त शब्द स्त्रीलिङ्ग होते है] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

पङ्क्तेः शत-सहस्रादि क्रमाद्दशगुणोत्तरम् ॥८४॥
यौतवं द्रुवयं पाल्यमिति मानार्थकं त्रयम् ।
मानं तुलाऽङ्गुलिप्रस्थैर्गुञ्जाः पञ्चाऽऽद्यमाषकः ॥८५॥
ते षोडशाऽक्षः कर्षोऽस्त्री, पलं कर्षचतुष्टयम् ।

(१) दशानां पङ्क्ति'रिति नाम । ततः—पङ्क्तेः=दशगुणोत्तरं—शतम्, ततो दशगुणोत्तरं सहस्रमित्यादि रीत्या बोध्यम् । [एकाई से 'दहाई' 'सैकड़ा' 'हजार' 'दश हजार' आदि संख्याएं क्रमसे दशगुनी होती हैं] ।

(२) चत्वारि मानार्थकानि । ['नाप' 'तौल' 'बटखरा']

(३) तुलया, अङ्गुल्यादिभिः, प्रस्थैः=सेटकादितपात्रादिभिश्च मानं भवति । [तराजू से, एवं अङ्गुली व हाथ आदि से, तथा प्रस्थ (१सेर) आदि के बर्त्तनों से भी नाप होता है] ।

(४) पञ्च गुञ्जाः-आद्यः=शास्त्रीयो—माषको भवतीति । [५ रत्ती का शास्त्रीय १ मासा] ।

(५) ते=षोडशमाषकाः-कर्षः-अस्त्रियाम् । [शास्त्रीय १६ मासा अर्थात्-८० रत्ती का=१ तोला] ।

(६) कर्षचतुष्टयं-पलम् । [४ तोला का=१ पल शास्त्रीय । अथवा ४ मासा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

[1]सुवर्ण-बिस्तौ हेम्नोऽक्षे, [2]कुरुविस्तस्तु तत्पले ॥८६॥
[3]तुला स्त्रियां पलशतं, [4]भारः स्याद्विंशतिस्तुलाः ।
[5]आचितो दश भाराः स्युः, [6]शाकटो भार आचितः ॥
[7]कार्षापणः कार्षिकः स्यात्कार्षिके ताम्रिके पणः ।
[8]अस्त्रियामाढक-द्रोणौ खारी वाहो निकुञ्चकः ॥८८॥

(१) सुवर्णकर्षस्य नामद्वयम् । [१ तोला सुवर्ण] ।

(२) सुवर्णपलस्यैकम् । [१ पल = १ छटांक सोना] ।

(३) पलशतं-तुला । [४०० तोला=५ सेर । ९६ रत्ती के तोले से ४ सेर १२ छटाँक की=१ तुला] ।

(४) एकं भारस्य । [२॥ मन की १ बोरी] ।

(५) आचितस्यैकम् । [२५ मन = १० बोरी=१ भार] ।

(६) शाकटो भार 'आचित'—उच्यते । [१ बैलगाडी का बोझा=२५ मन]

(७) कर्षमितरजतरूप्यस्य द्वे । [१ भरी चाँदी का सिक्का=१ रुपया] ।

(८) कर्षमिततान्रनिर्मितमुद्राया एकम् । [१ भरी ताँबे का सिक्का=पुराना मोटा एक पैसा] ।

(९) एकैकं प्रस्थादिप्रमाणानाम् । [प्रस्थ आदि मा[illegible] प्रस्थ=१ सेर] । तदुक्तं— [illegible]त्सक ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक् ।
[1]पादस्तुरीयो भागः स्यादंश[2]-भागौ तु वण्टके ॥८९॥
[3]द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु ।
हिरण्यं द्रविणं द्युम्नमर्थ-रै-विभवा अपि ॥ ९० ॥
[4]स्यात्कोषश्च हिरण्यञ्च हेम-रूप्ये कृता-ऽकृते ।
[5]ताभ्यां यदन्यत्तत्कुप्यं, [6]रूप्यं तद्द्वयमाहतम् ॥९१॥
[7]गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः ।

"पलं प्रकुञ्चकं मुष्टिः, कुडवस्तच्चतुष्टयम् ।
चत्वारः कुडवाः प्रस्थः, चतुःप्रस्थमथाढकम् ॥" इति ।
(१) एकं चतुर्थभागस्य । [चौथा भाग] ।
(२) त्रीणि विभागस्य । [हिस्सा] ।
(३) त्रयोदश धनस्य । ['धन' द्रव्य] ।
(४) घटिताऽघटितस्वर्णरूप्ययोर्द्वे : [सोना-चान्दी, और उनके बने हुए आभूषण एवं रुपए मोहर आदि] ।
(५) हेमरूप्याभ्यामन्यस्य ताम्रादेर्धातोरेकम् । [ताम्बा आदि धातु] ।
(६) आहतहेमरूप्यादेरेकम् । ['रुपया' 'मोहर' आदि] ।
(७) [illegible]त्वारि मरकतस्य मणेः । ['पन्ना'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]शोणरत्नं लोहितकः पद्मरागोऽथ[2] मौक्तिकम् ॥९२॥
मुक्ताऽथ[3] विद्रुमः पुंसि प्रवालं पुं-नपुंसकम् ।
रत्नं[4] मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च ॥९३॥
[5]स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् ।
तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम् ॥ ९४ ॥
चामीकरं जातरूपं महारजत-काञ्चने ।
रुक्मं कार्त्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम् ॥९५॥
[6]अलङ्कारसुवर्णं यच्छृङ्गीकनकमित्यदः ।

---

(१) त्रीणि पद्मरागस्य । ['माणिक' 'चुन्नी' 'लाल'] ।

(२) द्वे मौक्तिकस्य । ['मोती'] ।

(३) द्वे प्रवालस्य । तत्र–विद्रुमः पुंसि, प्रवालं पुंक्लीबयोः । ['मूँगा'] ।

(४) द्वे रत्नस्य । तत्र मणिः–द्वयोः=स्त्रीपुंसयोः । [रत्न, जवाहिरात] ।

(५) एकोनविंशतिः सुवर्णस्य । तत्र–हेमभर्मणी नान्ते क्लीबे । [सोना] ।

(६) एकमलङ्कारसुवर्णस्य । तत्र 'शृङ्गिः' इति, 'शृङ्गी' ति च पृथगपि नाम । [आभूषणों का सोना] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि ॥ ९६ ॥
रीतिः स्त्रियामारकूटो न स्त्रियामथ ताम्रकम् ।
शुल्बं म्लेच्छमुखं द्व्यष्ट-वरिष्ठो-दुम्बराणि च ॥९७॥
लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसा-ऽयसी ।
अश्मसारोऽथ मण्डूरं सिंहाणमपि तन्मले ॥ ९८ ॥
सर्वञ्च तैजसं लौहं, विकारस्त्वयसः कुशी ।
[सुवर्णं रजतं ताम्रं रीतिः कांस्यं तथा त्रपु ।
सीसं कालायसञ्चैवमष्टौ लोहानि चक्षते] ॥

---

(१) पञ्च रजतस्य । ['चांदी'] ।

(२) द्वे पित्तलस्य । तत्र-रीतिः स्त्रियाम् । आरकूटः-अस्त्रियाम्=पुंनपुंसकयोः [पीतल] ।

(३) षट् ताम्रस्य । ['ताम्बा'] ।

(४) सप्त लोहस्य । तत्र-अयः सान्तं क्लीबे । [लोहा] ।

(५) द्वे लोहकिट्टस्य । ['मण्डूर' 'लोहमल'] । तत्र-'सिंहाण'मित्यपि ।

(६) एकं सर्वधातूनाम् । [धातु मात्र का १ नाम] ।

(७) लोहविकारस्यैकम् । ['कुश' 'रम्भा'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षारः काचोऽथ चपलो रसः सूतश्च पारदे ॥९९॥
गवलं माहिषं शृङ्गमभ्रकं गिरिजा-ऽमले ।
स्रोतोऽञ्जनन्तु सौवीरं कापोताञ्जन-यामुने ॥१००॥
तुत्थाऽञ्जनं शिखिग्रीवं वितुन्नक-मयूरके ।

---

(१) द्वे काचस्य । ['शीशा' 'काच'] ।

(२) चत्वारि पारदस्य । ['पारा'] ।

(३) एकं महिषशृङ्गस्य । ['भैंसे के सींग की कूपी' 'गवला'] पूर्वं महिषशृङ्गे एव वैद्याः प्रायः सूतं स्थापयन्ति स्म, अतोऽत्रास्य निर्देशः ।

(४) त्रीणि अभ्रकस्य । तत्र गिरिजम्, अमलं च क्लीबे । 'गिरिजामल'मिति समुदितमपि नाम । [अभ्रक] ।

(५) चत्वारि सौवीराञ्जनस्य । ['सुर्मा'] ।

(६) चत्वारि तुत्थाञ्जनस्य ['तूतिया'] । 'दार्विका' इत्यपिनाम । स्वामी तु-तुत्थाञ्जनादि-कर्पर्यन्तान् पञ्च पर्यायानुक्त्वा, दार्विकाक्काथोद्भवादि तार्क्ष्यशैलान्तं पञ्चकं रसाञ्जनपर्यायतया ब्रूते ।

---

१०० श्लोके-'अभ्रकं गिरिजामलम्' इति स्वामि-मुकुटा[illegible]सक । मिमतः पाठः । तत्र तु—अभ्रकस्य नामद्वयं बोध्यम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्परी[1] दार्विका-काथोद्भवं तुत्थं, रसाञ्जनम्[2] ॥१०१॥
रसगर्भं तार्क्ष्यशैलं, गन्धाश्मनि[3] तु गन्धकः ।
सौगन्धिकश्च, चतुष्या[4]-कुलाल्यौ तु कुलत्थिका १०२
रीतिपुष्पं[5] पुष्पकेतु पुष्पकं कुसुमाञ्जनम् ।
पिञ्जरं पीतनं तालमालञ्च हरितालके[6] ॥१०३॥
गैरेयमथ्यं गिरिजमश्मजञ्च शिलाजतु[7] ।
बोलं[8]-गन्धरस-प्राण-पिण्ड-गोपरसाः समाः ॥१०४॥

(१) रसाञ्जनभेदस्य त्रीणि । ['खपरिया'] ।
(२) त्रीणि रसाञ्जनस्य । ['रसौत'] ।
(३) गन्धकस्य त्रीणि । [गन्धक] ।
(४) तुत्थविशेषस्य त्रीणि । ['नीला सुर्मा' तूतिया भेद] ।
(५) चत्वारि रीतिपुष्पस्य । ['सफेद मली'] ।
(६) पञ्च हरितालस्य । 'तालम्-आलम्'-इ'तच्छेदः । 'हरताल'] ।
(७) पञ्च शिलाजतुनः । ['शिलाजीत'] ।
(८) षड् गन्धरसस्य । तत्र-'गोपः 'रस' इति पृथङ् नामद्वयम् । 'गोपरस' इत्येकमपि नामेति स्वामी । 'गोसः' इति नाम इति तु [illegible] मन्यते । ['बोल'] ।

[illegible]लोके-'कुलाल्यौ च'-पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]हिण्डीरो-ऽब्धिकफः फेनः, सिन्दूरं[2] नागसम्भवम् ।
नाग[3]-सीसक-योगेष्ट-वप्राणि, त्रपु[4] पिच्चटम् ॥१०५॥
रङ्ग-वङ्गे, अथ[5] पिचुस्तूलोऽथ कमलोत्तरम्[6] ।
स्यात्कुसुम्भं वह्निशिखं महारजनमित्यपि ॥१०६॥
[7]मेषकम्बल ऊर्णायुः, [8]शशोर्णं शशलोमनि ।
[9]मधु क्षौद्रं माक्षिकादि, [10]मधूच्छिष्टं तु सिक्थकम् ॥

(१) त्रीणि समुद्रफेनस्य । [समुद्रफेन] । 'हिण्डीरः' इति, 'हिण्डिरः' इति 'डिण्डीरः' इति च पाठभेदाः ।

(२) द्वे सिन्दूरस्य । ['सिन्दूर'] ।

(३) चत्वारि सीसकस्य ['सीसा'] ।

(४) चत्वारि वङ्गस्य । ['राँगा'] ।

(५) द्वे कार्पासस्य । ['कपास' 'रूई'] ।

(६) कुसुम्भस्य चत्वारि । ['कसुम्भा'] ।

(७) द्वे कम्बलस्य । [भेड़ के ऊन का कम्बल] ।

(८) द्वे शशलोमकम्बलस्य । [मुलायम ऊन का कम्बल, या मुलायम ऊन, पशमीना] । शशलोम्नां वा नाम ।

(९) त्रीणि मधुनः । ['सहत'] ।

(१०) द्वे मधूच्छिष्टस्य । ['मोम'] ।

१०५ श्लोके 'डिण्डीरोऽब्धिकफः' इति पाठान्तर[illegible]क ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका ।
नैपाली कुनटी गोला, [2]यवक्षारो यवाग्रजः ॥१०८॥
पाक्योऽर्थं [3]स्वर्जिकाक्षारः कापोतः सुखवर्चकः ।
सौवर्चलं स्याद्रुचकं, त्वक्क्षीरी [4]वंशरोचना ॥१०९॥
शि[5]ग्रुजं श्वेतमरिचं, मो[6]रटं मूलमैक्षवम् ।
ग्रन्थिकं पिप्पलीमूलं [7]चटकाशिर इत्यपि ॥११०॥
[8]गोलोमी भूतकेशी ना, [9]पत्राङ्गं रक्तचन्दनम् ।

---

(१) सप्त मनःशिलायाः । ['मैनशिल'] ।
(२) त्रीणि यवक्षारस्य । [जवाखार'] ।
(३) पञ्चरुचकस्य क्षारभेदस्य । ['सज्जीखार'] ।
(४) द्वे वंशलोचनस्य । [वंशलोचन] ।
(५) द्वे शोभाञ्जनबीजस्य । [शिग्रुबीज । गोल सफेद मिर्च] ।
(६) इक्षुमूलस्यैकम् । [ईख की जड़] ।
(७) त्रीणि पिप्पलीमूलस्य । ['पिपरामूल'] ।
(८) द्वे गोलोम्याः । ['जटामांसी'] ।
(९) द्वे रक्तचन्दनसदृशस्य रक्तसारस्य । ['पतंग'] ।

श्लोके -'सर्जिकाक्षारः' इत्यपि पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्रिकटु[1] त्र्यूषणं व्योषं, त्रिफला[2] तु फलत्रिकम् ।१११।

❀ इति वैश्यवर्गः ❀ ॥ ९ ॥

अथ शूद्रवर्गः ॥ १० ॥

शूद्राश्चाऽवरवर्णाश्च[3] वृषलाश्च जघन्यजाः ।
आ[4] चण्डालात्तु सङ्कीर्णा अम्बष्ठ-करणादयः ॥१॥

(१) त्र्यूषणस्य त्रीणि । [सोंठ मरीच पीपल इन तीनों मिलितों के ३ नाम] ।

(२) त्रिफलाया द्वे । ['हर्रे, बहेरा, आंवला' तीनों मिलितों का १ नाम] ।

❀ इति वैश्यवर्गः ❀

(३) चत्वारि शूद्रस्य 'आचाण्डाला'दिति पाठान्तरम् [शूद्र के ४ नाम] ।

(४) एकं वर्णसङ्कराणाम् । [सङ्कीर्ण, वर्णसङ्करोंका नाम]

१ श्लोके 'आ चाण्डालात्तु' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शूद्रा-विशोस्तु करणोऽम्बष्ठो[1] वैश्या-द्विजन्मनोः ।
शूद्रा-क्षत्रिययोरुग्रो, मागधः[2] क्षत्रिया-विशोः ॥२॥
माहिष्योऽर्या-क्षत्रिययोः, क्षत्ताऽर्या[3]-शूद्रयोः सुतः ।
ब्राह्मण्यां[4] क्षत्रियात्सूतस्तस्यां[5] वैदेहको विशः ॥३॥

---

(१) वैश्याच्छूद्रायामुत्पन्नस्यैकम्। [वैश्यसे शूद्रामें उत्पन्न]।

(२) विप्राद्वैश्यायामुत्पन्नस्यैकम्। [ब्राह्मणसे वैश्यामें उत्पन्न]

(३) क्षत्रियाच्छूद्रायामुत्पन्नस्यैकम् । [क्षत्रिय से शूद्रा में उत्पन्न]।

(४) वैश्यात् क्षत्रियायामुत्पन्नस्यैकम् । [वैश्यसे क्षत्रिया में उत्पन्न]।

(५) क्षत्रियाद्वैश्यायामुत्पन्नस्यैकम् । [क्षत्रिय से वैश्या में उत्पन्न]।

(६) शूद्राद्वैश्यायामुत्पन्नस्यैकम्। [शूद्र से वैश्यामें उत्पन्न]।

(७) ब्राह्मण्यां क्षत्रियादुत्पन्नस्यैकम् । [क्षत्रिय से ब्राह्मणी में उत्पन्न]।

(८) ब्राह्मण्यां वैश्याज्जातो वैदेहकः । [वैश्यसे ब्राह्मणी में उत्पन्न]।

---

[1] [illegible]लोके–'माहिषोऽर्याक्षत्रिययोः' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]रथकारस्तु माहिष्यात्करण्यां यस्य सम्भवः ।
[2]स्याच्चण्डालस्तु जनितो ब्राह्मण्यां वृषलेन यः ॥४॥
[3]कारुः शिल्पी, संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः ।
[तक्षा च तन्तुवायश्च नापितो रजकस्तथा ।
पञ्चमश्चर्मकारश्च कारवः शिल्पिनो मताः] ॥

---

(१) करण्यां=शूद्रावैश्यपुत्र्यां-माहिष्यात्=वैश्याक्षत्रियपुत्रात्-उत्पन्नो रथकारः । [वैश्यपिता, और शूद्रामाता से उत्पन्न हुई स्त्री में, क्षत्रियपिता और वैश्या मातासे उत्पन्न पुरुषद्वारा जो उत्पन्न हो वह-'रथकार' कहाता है] ।

(२) ब्राह्मण्यां शूद्रादुत्पन्नः-चण्डालः । [ब्राह्मणीमें शूद्रसे उत्पन्न- 'चण्डाल' कहाता है] ।

(३) द्वे चित्रकारादेः । [बढई-लुहार आदि 'कारीगर' 'कमीण' 'कारु'] । तदुक्तम्—

'तक्षा च, तन्तुवायश्च, नापितो, रजकस्तथा ।
पञ्चमश्चर्मकारश्च, कारवः शिल्पिनो मताः ॥' इति

(४) सजातीयशिल्पिसङ्घस्यैकं द्वयोः=स्त्रीपुंसयोः । [शिल्पिक । का सङ्घ] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुलकः[1] स्यात्कुलश्रेष्ठी, मालाकारस्तु[2] मालिकः ॥५॥
कुम्भकारः[3] कुलालः स्यात्पलगण्डस्तु[4] लेपकः ।
तन्तुवायः[5] कुविन्दः स्यात्तुन्नवायस्तु[6] सौचिकः ॥६॥
रङ्गाजीवश्चित्रकरः[7], शस्त्रमार्जोऽसिधावकः[8] ।
पादुकृच्चर्मकारः[9] स्याद्द्व्योकारो[10] लोहकारकः ॥७॥

(१) शिल्पिसंघाधिपतेर्द्वे । 'कुलिकः' इति पाठान्तरम् । तत्र कुलश्रेष्ठी नान्तः । [सङ्घका चौधरी, मुखिया सर्दार] ।

(२) मालाकारस्य द्वे । ['माली'] ।

(३) द्वे कुलालस्य । [कुम्भार'] ।

(४) गृहादौ लेपकारस्य द्वे । ['राज' 'मिस्त्री' चितेरा, चेजारा] ।

(५) द्वे तन्तुवायस्य । ['जुलाहा'] ।

(६) सौचिकस्य द्वे । ['दर्जी'] ।

(७) द्वे चित्रकारस्य । ['चितेरा' 'रंगरेज' 'छिपी' 'नीलगर'] ।

(८) द्वे शस्त्रमार्जस्य । ['सिकलीगर' 'शान धरनेवाला'] ।

(९) द्वे चर्मकारस्य । ['मोची' 'चमार'] ।

(१०) द्वे लोहकारस्य । ['लोहार'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नाडिन्धमः स्वर्णकारः कलादो रुक्मकारकः ।
[2]स्याच्छाङ्खिकः काम्बविकः, [3]शौल्बिकस्ताम्रकुट्टकः ॥८॥
[4]तक्षा तु वर्द्धकिस्त्वष्टा रथकारश्च काष्ठतट् ।
[5]ग्रामाधीनो ग्रामतक्षः, कौटतक्षोऽनधीनकः ॥९॥
[7]क्षुरी मुण्डी दिवाकीर्ति-नापिताऽन्तावसायिनः ।

---

(१) चत्वारि स्वर्णकारस्य । ['सुनार'] । कलादादिद्वयं ['जड़िया' पञ्चीकारी करनेवाला'] इति प्रसिद्धयोर्नामेति परे ।

(२) द्वे शाङ्खिकस्य । ['शंख की चूड़ी आदि बनाने वाला'] ।

(३) द्वे शौल्बिकस्य । ['ठठेरा'] ।

(४) पञ्च वर्द्धकेः । ['बढ़ई' 'खाती' 'सुतार'] । तत्र-काष्ठतट्-क्षान्तः ।

(५) द्वे ग्रामसेवकस्य वर्द्धकेः । [ग्रामवासियों के अधीन रहनेवाला ग्राम सेवक बढ़ई] ।

(६) एकं स्वतन्त्रस्य रथकारस्य । [स्वतन्त्र बढई, स्वतन्त्र खाती] ।

(७) पञ्च नापितस्य । [नाई] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]निर्णेजकः स्याद्रजकः, [2]शौण्डिको मण्डहारकः ॥१०॥
[3]जाबालः स्यादजाऽऽजीवो, देवाऽऽजीवस्तु देवलः ।
[5]स्यान्माया शाम्बरी, [6]मायाकारस्तु प्रातिहारिकः॥११॥
शैलालिनस्तु शैलूषा जायाऽऽजीवाः कृशाश्विनः ।
भरता इत्यपि नटाश्चारणास्तु कुशीलवाः ॥ १२ ॥

---

(१) द्वे रजकस्य । ['धोबी'] ।

(२) द्वे शौण्डिकस्य । ['शुण्डी' 'कलवार'] ।

(३) द्वे जाबालस्य । [भेड़-बकरी आदि रेवड़ पालने वाला, 'गड़रिया' 'अजापाल'] ।

(४) द्वे देवलस्य । ['देवल' 'मूर्त्तिपाल' पुजारी] ।

(५) द्वे इन्द्रजालादिमायायाः । [जादू-टोना] ।

(६) द्वे मायिकस्य । ['गारुडी' 'बाजीगर' 'जादूगर' 'ओझा'] ।

(७) षट् नटानाम् । ['नट' बाजीगर] । तत्र शैलालि-कृशाश्विनौ नान्तौ ।

(८) चारणस्य द्वे । ['चारण' भाट'] ।

---

१० श्लोके-'क्षुरि-मुण्डि-दिवाकीर्त्ति' इति पाठान्तरम् ।

११ श्लोके-'देवाजीवी तु' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मार्दङ्गिका[1] मौरजिकाः, पाणिवादास्तु[2] पाणिघाः ।
वेणुध्माः[3] स्युर्वैणविका, वीणावादास्तु[4] वैणिकाः ।१३।
जीवान्तकः[5] शाकुनिको, द्वौ[6] वागुरिक-जालिकौ ।
वैतंसिकः[7] कौटिकश्च मांसिकश्च समं त्रयम् ॥ १४ ॥
भृतको[8] भृतिभु-कर्मकरो वैतनिकोऽपि सः ।
वार्ताहरो[9] वैवधिको, भारवाहस्तु[10] भारिकः ॥१५॥

(१) मृदङ्गवादनशीलस्य द्वे । ['मृदङ्गी' 'पखावजी' तबलची'] ।

(२) हस्तवादनोपजीविनः । ['ताल देने वाला' 'चुटकी' व 'ताली' बजाने वाला] ।

(३) द्वे वेणुवादनशीलस्य । [बंशी बजाने वाला] ।

(४) द्वे वीणावादकस्य । ['वीनकार' 'वीन बजानेवाला'] ।

(५) द्वे जीवान्तकस्य । ['पारधी' 'शिकारी' बहेलिया'] ।

(६) द्वे जालिकस्य । [जाल फैलाने वाला, व्याध'] ।

(७) त्रीणि मांसविक्रयोपजीविनः । ['चिकिया' 'खटिक'] ।

(८) चत्वारि भृतकस्य । ['चाकर' 'मजूर' 'नौकर'] ।

(९) वार्ताहरस्य द्वे । ['कासीद' 'खबर-नेस' 'कावडिया' 'बंहगी वाला'] ।

(१०) द्वे भारवाहकस्य । ['पल्लेदार' 'बोझा ढोने वाला'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विवर्णः[1] पामरो नीचः प्राकृतश्च पृथग्जनः ।
निहीनोऽपसदो जाल्मः क्षुल्लकश्चे-तरश्च सः ॥ १६ ॥
भृत्ये[2] दासेय-दासेर-दास-गोप्यक-चेटकाः ।
नियोज्य-किङ्कर-प्रैष्य-भुजिष्य-परिचारकाः ॥ १७ ॥
पराचित[3]-परिस्कन्द-परजात-परैधिताः ।
मन्द[4]-स्तुन्दपरिमृज आलस्यं शीतको-लसोऽनुष्णः॥१८॥
दक्षे[5] तु चतुर-पेशल-पटवः सूत्थान उष्णश्च ।
चण्डाल[6]-श्व-मातङ्ग-दिवाकीर्ति-जनङ्गमाः ॥ १९ ॥
निषाद-श्वपचा-वन्तेवासि-चाण्डाल-पुक्कसाः ।

---

(१) दश नीचस्य । ['नीच' 'पामर' 'क्षुद्र'] ।
(२) एकादश दासस्य । ['गुलाम' 'गोला' 'दुरुग्र' 'द्विरुग्र' दरोगा'] ।
(३) चत्वारि परपुष्टस्य । ['परपुष्ट' 'दूसरे से पालित'] ।
(४) षट् अलसस्य । ['आलसी'] ।
(५) षट् चतुरस्य । ['चतुर' 'चालाक'] ।
(६) दश चाण्डालस्य । ['डोम' 'चाण्डाल']

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मेदाः[1] किरात-शबर-पुलिन्दा म्लेच्छजातयः ॥ २० ॥
व्याधो[2] मृगवधाऽऽजीवो मृगयुर्लुब्धकोऽपि सः ।
कौलेयकः[3] सारमेयः कुक्कुरो मृगदंशकः ॥ २१ ॥
शुनको भषकः श्वा स्यादलर्कस्तु[4] स योगितः ।
श्वा विश्वकद्रुर्मृगयाकुशलः, सरमा[5] शुनी ॥ २२ ॥
विट्चरः[6] सूकरो ग्राम्यो, वर्करस्तरुणः[7] पशुः ।
आच्छोदनं[8] मृगव्यं स्यादाखेटो[9] मृगया स्त्रियाम् ॥२३॥

---

(१) चाण्डालविशेषाणामेकैकम् । [चाण्डाल विशेष, किरात, शबर, कोल, भील, डोम' आदि] ।

(२) चत्वारि व्याधस्य । ['मुसहर' 'पारधी' बावरिया'] ।

(३) सप्त कुक्कुरस्य । ['कुत्ता'] ।

(४) एकं मत्तशुनः । 'अलक' इत्यपि नाम । ['पागल कुत्ता' 'हडकाया कुत्ता'] ।

(५) एकं मृगयापटोः कुक्कुरस्य । ['शिकारी कुत्ता'] ।

(६) द्वे शुन्याः । ['कुत्ती'] ।

(७) एकं ग्राम्यशूकरस्य । ['गाँव का सूअर'] ।

(८) एकं तरुणपशोः । ['मेमना' पशुका 'छोटा बच्चा'] ।

(९) चत्वारि आखेटस्य । ['शिकार'] तत्र मृगया स्त्रियाम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दक्षिणारुर्लुब्धयोगाद्दक्षिणेर्मा कुरङ्गकः ।
[2]चौरै-कागारिक-स्तेन-दस्यु-तस्कर-मोषकाः ॥ २४ ॥
प्रतिरोधि-परास्कन्दि-पाटच्चर-मलिम्लुचाः ।
[3]चौरिका स्तैन्य-चौर्ये च स्तेयं,[4]लोप्त्रं तु तद्धनम् ॥२५॥
[5]वीतंसस्तूपकरणं बन्धने मृग-पक्षिणाम् ।
[6]उन्माथः कूटयन्त्रं स्याद्वागुरा[7] मृगबन्धनी ॥२६॥

(१) लुब्धकयोगात् दक्षिणभागजातव्रणस्य मृगस्यैकम् । ['जिस हरिन के दहिने ओर शिकारी की गोली या बाण आदि से घाव लगा हो वह, मृग'] ।

(२) चौरस्य दश । ['चौर' 'उठाई गिरा']

(३) चत्वारि चौर्यकर्मणः । ['चोरी']

(४) एकं स्तेयद्रव्यस्य । 'लोप्त्र' मित्यपि नाम 'तध्दने' । इति पाठान्तरम् । ['चोरी का धन'] ।

(५) मृगादिबन्धनसाधनस्यैकम् । ['मृग और पक्षियों को फसाने के बहेलियेके साधन 'जाल' 'पाश' 'आदि'] ।

(६) मृगादिबन्धनयन्त्रभेदस्य द्वे । ['हरिण आदि के पकड़ने का औजार'] ।

(७) द्वे वागुरायाः । ['मृग आदि जीवों को पकड़ने का जाल विशेष, 'शक्कर फाँसी'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]शुल्वं वराटकः स्त्री तु रज्जुस्त्रिषु वटी गुणः ।
[2]उद्घाटनं घटीयन्त्रं सलिलोद्वाहनं ग्रहेः ॥ २७ ॥
[3]पुंसि वेमा वायदण्डः, [4]सूत्राणि नरि तन्तवः ।
[5]वाणिर्व्यूतिः स्त्रियौ तुल्ये, [6]पुस्तं लेप्यादिकर्मणि ॥२८॥

(१) पञ्च रज्जोः । तत्र वराटकः । पुंसि, रज्जुः स्त्रियाम् । वटी-त्रिषु । ['रस्सी' 'डोरी']

(२) द्वे उद्घाटनयन्त्रस्य । [कूँवे से जल निकालने का यन्त्र, 'अरहट'] ।

(३) द्वे वस्त्रव्यूतिदण्डस्य । वेमा, वेमानौ । 'वापदण्डः' इति पाठान्तरम् । ['वस्त्र बुनने का दण्डा'] ।

(४) सूत्रस्य द्वे । तत्र-सूत्रं क्लीबे, तन्तुः नरि=पुंसि ['सूत'] ।

(५) वस्त्रवानस्य द्वे स्त्रियाम् । ['कपड़ा बुनना'] ।

(६) एकं लेप्यादिकर्मणः । ['कपड़े आदि में मांडी लगाना, पाण देना' लकड़ी आदि पर वार्निश आदि का लेप चढ़ाकर सुन्दर २ नाना प्रकार के पुतली हाथी, घोड़ा, खिलौने आदि बनाना'] । तदुक्तम्—

'मृदा वा, दारुणा वाऽथ, वस्त्रणाऽप्यथ चर्मणा ।
लोहरत्नैः कृतं वाऽपि 'पुस्त' मित्यभिधीयते ॥' इति ।

२७ श्लोके-शुल्व वटाकरः- इति तुवामिसंमतः पाठः । शुल्वं वराटकं । इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाञ्चालिका पुत्रिका स्याद्वस्त्र-दन्तादिभिः कृता ।
[जंतु-त्रपुविकारे तु जातुषं त्रापुषं त्रिषु] ॥ २९ ॥
पिटकः पेटकः, पेटा मञ्जूषाऽथ विहङ्गिका ।
भारयष्टिस्तदालम्बि शिक्यं काचोऽथ पादुका ॥३०॥
पादूरुपानत्स्त्री, सैवा-ऽनुपदीना पदाऽऽयता ।
नंध्री वर्ध्री वरत्रा स्यादथांदेस्ताडनी कशा ॥३१॥

---

(१) वस्त्रगजदन्तादिकृतपञ्चालिकाया द्वे । ['पुतली' 'गुडिया' 'गुड्डी'] ।

(२) त्रपुजतुविकारस्यैकम् ।

(३) द्वे पेटकस्य । ['पिटारा' 'झाँपी'] । द्वे च मञ्जूषायाः ['सन्दूक'] इति स्वामी । केचित्तु चत्वारि समानार्थानीत्याहुः ।

(४) द्वे भारयष्टेः । ['बंहगी' 'कावड़'] ।

(५) द्वे भारयष्टिबद्धरज्जूनाम् । ['छीका'] ।

(६) त्रीणि पादत्राणस्य । ['जूती' 'पाद त्राण'] ।

(७) एकं पादप्रमाणाऽऽयतपादत्राणस्य । [जङ्घातक पूरे पैर की जूती । 'बूट'] ।

(८) त्रीणि चर्ममयरज्जोः [चमड़े की रस्सी] ।

(९) एकं कशायाः । ['चाबुक'] ।

Dr. Umila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चाण्डालिका[1] तु कण्डोलवीणा चण्डालवल्लकी ।
नाराची[2] स्यादेषणिका, शाणस्तु[3] निकषः कषः ॥३२॥
व्रश्चनः पत्त्रपरशुरेषिका[4] तूलिका[5] समे ।
तैजसाऽऽवर्त्तनी[6] मूषा, भस्त्रा[7] चर्मप्रसेविका ॥३३॥
आस्फोटनी[8] वेधनिका, कृपाणी[9] कर्त्तरी समे ।

---

(१) चण्डालवीणायास्त्रीणि । [किंनरी । सँपेरे की बीन । 'तुम्बी' पूंगी] ।

(२) सुवर्णतुलाया द्वे । [सोने का कांटा] ।

(३) त्रीणि शाणस्य । ['शान धरने का यन्त्र'] । निकषोपलस्यच ['कसौटी'] ।

(४) द्वे पत्त्रपरशोः ['छेनी' 'करौती'] ।

(५) तृणशलाकाया द्वे । ['तुली'] ।

(६) द्वे मूषायाः । ['घड़िया'] ।

(७) द्वे भस्त्रायाः । ['भाथी'] ।

(८) द्वे मुक्तादिवेधिन्याः । [मोती आदि में छेद निकालनेवाला यन्त्र = वर्मी] ।

(९) द्वे कर्त्तर्याः । ['कैंची' 'कत्ती'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0: In Public Domain, Digitizagtion by eGangotri

[1]वृक्षाऽदनी वृक्षभेदी, [2]टङ्कः पाषाणदारणः ॥ ३४ ॥
[3]क्रकचोऽस्त्री करपत्त्रमारा[4] चर्मप्रभेदिका ।
[5]सूर्मी स्थूणा-ऽयःप्रतिमा, शिल्पं कर्म कलादिकम् ॥ ३५ ॥
[6]प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया ।
प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात् ३६
[7]वाच्यलिङ्गाः, समस्तुल्यः सदृशः सदृक्षः सदृक् ।
साधारणः समानश्च स्युरुत्तरपदे त्वमी ॥ ३७ ॥
[8]निभ-सङ्काश-नीकाश-प्रतीकाशो-पमादयः ।

(१) द्वे वृक्षादन्याः । तत्र वृक्षादनी स्त्रियाम् । ['वसूला'] ।
(२) द्वे टङ्कस्य । ['टाँकी' 'छेनी' 'हथौड़ा'] ।
(३) द्वे करपत्रस्य । ('आरा' 'आरी' 'करौती'] ।
(४) द्वे चर्मप्रभेदिकायाः । [आरी] ।
(५) लौहप्रतिमायाः त्रीणि । [लोहे की मूर्ति] ।
(६) कलाकौशलादि कर्म-शिल्पम् । [शिल्प कला] ।
(७) अष्टौ प्रतिमायाः । ['तसवीर' 'फोटो' 'मूर्ति'] ।
(८) एकमुपमायाः । एकमुपमानस्य च । दश प्रतिमाया इत्येके ।
(९) सदृशस्य सप्त । वाच्यलिङ्गाः । [सदृश नाम] ।
(१०) निभादय उत्तरपदगताः सदृशवचनाः । यथा 'पितृ-निभः, देवसङ्काश' इत्यादौ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्मण्या[1] तु विधा-भृत्या-भृतयो भर्म वेतनम् ॥३८॥
भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि ।
सुरा[2] हलिप्रिया हाला परिस्रुद्वरुणात्मजा ॥ ३९ ॥
गन्धोत्तमा प्रसन्ने-रा-कादम्बर्यः परिस्रुता ।
मदिरा कश्य-मद्ये चाऽप्यवदंशस्तु[3] भक्षणम् ॥४०॥
शुण्डापानं[4] मदस्थानं, मधुवारा[5] मधुक्रमाः ।
मध्वासवो[6] माधवको मधु माध्वीकमद्वयोः ॥४१॥

---

(१) एकादश वेतनस्य । ['वेतन' 'तनखाह' 'नौकरी' भाड़ा, पेटिया आदि] ।

(२) त्रयोदश मद्यस्य । ['शराब' 'मदिरा'] ।

(३) एकं मद्याऽवदंशस्य । [मद्य पीने के बाद खाने की चाट,–'गजक'] ।

(४) मद्यगृहस्य त्रीणि । ['कलवरिया 'मद्यशाला'] ।

(५) मद्यपानावसरस्य द्वे । ['शराब के दौर' 'मदिरा के दौर' 'पारी २ से पीना'] ।

(६) मद्यभेदस्य चत्वारि ['सीराजी' आदि मदिरा के भेद] । तत्र–मधु क्लीबे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मैरेयमासवः,[1] [2]सीधुर्मेदको जगलः समौ ।
[3]सन्धानं स्यादभिषवः किण्वं पुंसि तु नग्नहूः ॥४२॥
[5]कारोत्तरः सुरामण्ड [6]आपानं पानगोष्ठिका ।
[7]चषकोऽस्त्री पानपात्रं [8]मदकोऽप्यनुतर्षणम् ॥४३॥
[9]अक्षदेवः, घातसवोऽक्षधूर्तो द्यूतकृत्समाः ।

---

(१) इक्षुशाकादिकृतस्य मद्यस्य त्रीणि । [ईख आदि की शराब, सिरका आदि] ।

(२) द्वे मद्यकल्कस्य । [मदिरा का घाण] ।

(३) मद्यसन्धानस्य [मदिरा बनाना] ।

(४) द्वे किण्वस्य । [मदिरा का बचा हुआ तलछट, मद्य का कीचड़] ।

(५) सुरामण्डस्य द्वे । [मद्य का माँड, ऊपर का भाग]।

(६) पानगोष्ठ्या द्वे । ['मद्यपान गोष्ठी'] ।

(७) द्वे पानपात्रस्य । [मदिरा का प्याला] ।

(८) द्वे मद्यपानस्य । चत्वार्यर्थैकार्थानीत्यन्ये । [मद्य पीना या मदिरा का प्याला] ।

(९) पञ्च द्यूतकृतः । [जुवारी] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्युर्लग्नकाः प्रतिभुवः, [2]सभिका द्यूतकारकाः ॥४४॥
[3]द्यूतोऽस्त्रियामक्षवती कैतवं पण इत्यपि ।
[4]पणोऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते ॥४५॥
[5]परिणायस्तु शारीणां समन्तात्प्रचलेऽस्त्रियाम् ।
[6]अष्टापदं शारिफलं, [7]प्राणिद्यूतं समं मुसलम् ॥४६॥
[8]उक्ता भूरिप्रयोगत्वादेकस्मिन् येऽत्र यौगिकाः।

---

(१) द्वे प्रतिभुवः । ['जामिन' 'विचवैया'] ।
(२) द्यूतकारकाणां द्वे ['फड़िया' 'जुवाडी'] ।
(३) चत्वारि द्यूतस्य । ['जूवा'] । तत्र द्यूतोऽस्त्रियाम् ।
(४) द्यूते पणस्य द्वे । ['बाजी' 'दाँव'] ।
(५) त्रीणि पाशकस्य । ['पाशा' 'कौड़ी'] ।
(६) एकं शारीणां समन्ताच्चालनस्य । ['स्यार चलाना' 'मोहरा चलाना'] ।
(७) द्वे शारिफलस्य । ['चौपड़'] ।
(८) प्राणिद्यूतस्य द्वे । [मुर्गा' 'मेढ़ा' आदि की लड़ाई में हार जीत पर बाजी लगाना] ।
(९) अत्र = भूम्यादिवर्गे, ये यौगिकाः—मालाकारादि-शब्दाः प्रचुरप्रयोगदर्शनात् पुंलिङ्गादावेकत्रैव उक्ताः, ते तद्धर्म्यादन्यलिङ्गेऽपि बोध्याः । यथा मालाकरणात् स्त्री अपि 'मालाकारी' । कुलमपि 'मालाकारम्'—इत्यादि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते ॥४७॥

॥ इति शूद्रवर्गः ॥

इत्यमरसिंहकृतौ नामलिङ्गानुशासने । [illegible] शठः
द्वितीयकाण्डो भूम्यादिः [illegible] समाप्तः ॥१॥

[illegible] घातक [illegible]

—:०:—

इत्यमरसिंहकृतौ नामलिङ्गानुशासने द्वितीयं काण्डम् ।

किं चाऽत्रयेऽयौगिका जातिवाचकाः करणादिशब्दास्तेऽपि पुंयोगादिना, ताद्धर्म्याच्च–स्त्रियां, क्लीबे च बोध्याः । यथा–करणस्य स्त्री 'करणी' । कुम्भकारस्य स्त्री कुम्भकारीत्यादि ।

इति मरुमण्डलमार्त्तण्ड–तर्करत्न–शारदावतार–श्रीस्नेहिरामजि-शास्त्रिणां पौत्रेण, न्यायाचार्य-श्रीशिवनारायणशास्त्रिणां पुत्रेण, कविचक्रचक्रवर्त्तिना श्रीरघुनन्दनप्रसाद-शास्त्रिणा सङ्कलितायाममरकोशस्य टीकाया मभिनवराजलक्ष्म्यां द्वितीयं काण्डम् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ अमरकोशे

तृतीयं काण्डम्

❀ अथ [illegible] ❀

विशेष्यनिघ्नैः सङ्कीर्णैर्नानार्थैरव्ययैरपि ।
लिङ्गादिसंग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः ॥ १ ॥
[2]स्त्रीदाराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतं पदैः ।

---

(१) सामान्ये = सामान्यकाण्डे-विशेष्यनिघ्नादिभिरुपलक्षिताः, वर्गसंश्रयाः=पूर्वोक्तस्वर्गादिवर्गाश्रयाः-वर्गाः-उच्यन्ते । 'सुकृती-पुण्यवान्धन्य' इत्यादीनां स्वर्गमनुष्यादिवर्गोक्तदेवमनुष्यादिविशेषणतया-सामान्यकाण्डस्य वर्गाश्रयत्वं स्पष्टमेव ।

(२) स्त्री-दार-कलत्रादिभिश्शब्दैर्यादृशैर्लिङ्गसङ्ख्याविशिष्टैः, यद्विशेष्यं = स्त्रीदारकलत्रादिरूपं, प्रस्तुतं = प्रक्रान्तं, तस्य-द्रव्यगुणक्रियाशब्दा भेदकाः=विशेषणानि स्युः । गुणशब्दो यथा-'धन्या स्त्री' 'धन्या दाराः' 'धन्यं कलत्रम्' । द्रव्यशब्दो यथा-'दण्डिनी स्त्री' 'दण्डिनो दाराः' 'दण्डि कलत्रम्' । क्रियाशब्दो यथा-'पाचिका-स्त्री' 'पाचिका दाराः' 'पाचकं कलत्र'मिति । एवञ्च-त्रिलिङ्गताऽत्रोक्तशब्दानामित्याशयः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुण-द्रव्य-क्रियाशब्दास्तथा स्युस्तस्य भेदकाः ॥२॥
सुकृती पुण्यवान् धन्यो, महेच्छस्तु महाशयः ।
हृदयालुः सुहृदयो, महोत्साहो महोद्यमः ॥३॥
प्रवीणे निपुणा-ऽभिज्ञ-[illegible]-शाक्षताः ।
वैज्ञानिकः घातकुशः कृती कुशल इत्यपि ॥४॥
पूज्यः प्रतीक्ष्यः, सांशयिकः संशयाऽऽपन्नमानसः ।
दक्षिणीयो दक्षिणार्हस्तत्र दक्षिण्य इत्यपि ॥५॥

---

(१) त्रीणि भाग्यशालिनः । सुकृती सुकृतिनौ । पुण्यवान् पुण्यवन्तौ । ['भाग्यवान्' 'भाग्यशाली'] ।

(२) द्वे महाशयस्य । [ऊँचे विचारवाला, महाशय, उदार चित्त] ।

(३) द्वे शुद्धमनसः । 'सहृदय' इत्यपि नाम । [सहृदय 'सज्जन'] ।

(४) द्वे महोत्साहस्य । ['उत्साही' 'उद्यमी' 'उद्योगी'] ।

(५) दश कर्मकुशलस्य । ['प्रवीण' 'चतुर'] ।

(६) द्वे पूज्यस्य । ['पूज्य'] ।

(७) द्वे संशयापन्नस्य । [संशयापन्न] ।

(८) त्रीणि दक्षिणायोग्स्य । ['दक्षिणा देने योग्य' 'सत्पात्र'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्युर्वदान्य-स्थूललक्ष्य-दानशौण्डा बहुप्रदे ।
[2]जैवातृकःस्यादायुष्मान्[3]तत्त्वार्थिस्तु शास्त्रवित् ॥६॥
[4]परीक्षकः कारणिको, [5]वरदस्तु समर्धकः ।
[6]हर्षमाणः [illegible] हृष्टमानसः ॥७॥
[7]दुर्मना विमना अन्तर्मना स्यादुत्सुकः [illegible] ।
[8]दक्षिणे सरलो-दारौ, [10]सुकलो दातृ-भोक्तरि ॥८॥

---

(१) चत्वारि दानवीरस्य । [दानवीर] ।

(२) द्वे आयुष्मतः । ['आयुष्मान्'] ।

(३) द्वे शास्त्रतत्त्वज्ञस्य । ['शास्त्रतत्त्ववेत्ता' 'शास्त्रमर्मज्ञ'] ।

(४) द्वे परीक्षकस्य । [परीक्षक] ।

(५) द्वे वरदस्य । [वर देनेवाला, 'यथेच्छ=खूब देने वाला'] । 'समर्द्धक' इति पाठान्तरम् ।

(६) चत्वारि प्रहर्षितस्य । [प्रसन्नमन] ।

(७) त्रीणि दुःखितमनसः । [व्याकुलचित्त, उदास, दुःखितमन'] ।

(८) द्वे उत्कण्ठितस्य । ['उत्कण्ठित'] ।

(९) त्रीणि सरलाशयस्य । ['सरलस्वभाव'] ।

(१०) एकं दानभोगशीलस्य । [दाताभोक्ता] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्परे प्रसिता-ऽऽसक्ताविष्टार्थोद्युक्त उत्सुकः ।
प्रतीते प्रथित-वित्त-ख्यात-विज्ञात-विश्रुताः ॥९॥
गुणैः प्रतीते तु कृतलक्षणा-ऽऽहतलक्षणौ शठः ।
इभ्य आढ्यो धनी, [illegible] ॥१०॥
[illegible] घातकः नेता प्रभुः परिवृढोऽधिपः ।
अधिकर्द्धिःसमृद्धःस्यात्कुटुम्बव्यापृतस्तु यः ॥११॥

---

(१) तत्परस्य त्रीणि । [तत्पर । काम में प्राणपण से जुटा हुआ] ।

(२) द्वे इष्टार्थोद्युक्तस्य । पञ्चापि पर्याया इत्येके । ['अपने इष्टकार्य की सिद्धि में लगा हुआ'] ।

(३) षट् प्रसिद्धस्य । [प्रसिद्ध, नामी]

(४) द्वे शौर्यादिगुणैः प्रसिद्धस्य । [शौर्य आदि गुणों से प्रसिद्ध] ।

(५) त्रीणि धनिनः । ['धनी'] ।

(६) दश ईश्वरस्य । ['ईश्वर' मालिक, 'प्रभु'] ।

(७) द्वे सम्पन्नस्य । [समृद्ध, सम्पन्न] ।

(८) त्रीणि कुटुम्बपालनपरस्य । तत्र उपाधिः पुंसि ['कुटुम्ब के पालन पोषण में तत्पर, 'गृहस्थी चलाने वाला'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयम् ।
[1]वराङ्गरूपोपेतो यः सिंहसंहननो हि सः ॥१२॥
[2]निश्शङ्कं कार्यकर्ता यः सम्पतन् सत्त्वसम्पदा
[3]अवाचि मूकाऽ[illegible] [4]मनोजवः पितृसन्निभः ॥ १३ ॥
[5]सत्कृत्याऽलङ्कृतां कन्यां यो ददाति स[illegible] ।
[6]लक्ष्मीवाँल्लक्ष्मणः श्रीलः श्रीमान्त्स्निग्धस्तु [7]वत्सलः ।

(१) एकं—सुन्दरशरीररूपाकृतेः । ['सुघड़ सुन्दर रंग रूप वाला'] ।

(२) एकं सत्त्वसम्पन्नस्य—निश्शङ्कं कार्यकर्तुः । सम्पतन् = उद्योगं कुर्वन् । निर्द्धार्य इत्यपि पाठः । 'सम्पन्नः सत्त्वसम्पदा' इत्यपि पाठः । ['हिम्मती' 'निडर होकर काम करनेवाला'] ।

(३) द्वे मूकस्य । ['मूक' 'गूंगा'] ।

(४) द्वे पितृसमस्य । अदन्तोपि मनोजवः, सान्तोऽपि मनोजवाश्च । [पिता के तुल्य] ।

(५) एकं सत्कारपूर्वकं कन्यादातरि । [सत्कार पूर्वक कन्यादान करने वाला] ।

(६) चत्वारि श्रीमतः । [श्रीमान्] ।

(७) द्वे वत्सलस्य । [प्रेमी, स्नेही] ।

टि० १३ श्लोके—मनोजवः स पितृसंनिभः इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः ।
[2]स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः ॥१५॥
[3]परतन्त्रः पराधीनः प्र रवा-नाथवानपि । [illegible] शठः ॥
[4]अधीनो निम्न [illegible] गृह्यकोऽप्यसौ ॥
[5]खलपूः घातकः [illegible]करः, [6]दीर्घसूत्रश्चिरक्रियः ।
[7]जाल्मोऽसमीक्ष्यकारी स्यात्कुण्ठो [8]मन्दःक्रियासु यः ।

---

(१) चत्वारि दयालोः । [दयालु] ।

(२) पञ्च स्वतन्त्रस्य । [स्वतन्त्र] ।

(३) चत्वारि परतन्त्रस्य । [परतन्त्र, 'पराधीन'] ।

(४) पञ्चाऽधीनमात्रस्य । नवापि पर्याया इत्येके । [अधीन] ।

(५) द्वे भूमिसंमार्जनकर्त्तुः, खलप्वश्च । [खलिहान से अन्न साफ करके निकालने वाला, सिट्टा आदि से धान व अन्न निकालने वाला । 'झाड़ू देने वाला,] ।

(६) द्वे विलम्बेन कार्यं कुर्वतः । [विलम्ब से काम करने वाला, सुस्त 'आलसी'] ।

(७) द्वे अविचार्य कार्यं कुर्वतः । [विना विचारे काम करने वाला] ।

(८) एकं मन्दक्रियस्य । [कुन्द, सुस्त] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अज्ञे मूढ-यथाजात-मूर्ख-वैधेय-बालिशाः ।
[2]कदर्ये कृपण-क्षुद्र-किम्पचान-मितम्पचाः ॥४८॥
[3]निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः ।
[4]वनीयको याचनको मार्गणो याचका-ऽर्थिनौ॥४९॥
[5]अहङ्कारवानहंयुः, [6]शुभंयुस्तु शुभाऽन्वितः ।
[7]दिव्योपपादुका देवा, नृ-गवाद्या जरायुजाः ॥५०॥
[9]स्वेदजा कृमि-दंशाद्याः, [10]पक्षि-सर्पादयोऽण्डजाः ।
[इति प्राणिवर्गः] ॥

(१) षण्मूर्खस्य । ['मूर्ख'] ।

(२) पञ्च कृपणस्य । ['कंजूस'] ।

(३) पञ्च निर्धनस्य । 'निर्धन' 'दरिद्र'] ।

(४) पञ्च याचकस्य । 'वनीपक इति पाठान्तरम् । ['याचक' 'मंगता'] ।

(५) द्वे अहङ्कारयुक्तस्य ['अहङ्कारी' 'घमण्डी'] ।

(६) द्वे शुभान्वितस्य । ['शुभान्वित'] ।

(७) मातापित्रादिदृष्टकारणशून्याः—अदृष्टसहकृतेभ्योऽणुभ्यो जाता ये देवास्ते 'दिव्योपपादुका' इत्युच्यन्ते । ['देवयोनि'] ।

(८) एकं जरायुजानाम् । ['जरायुज'] ।

(९) एकं स्वेदजानां यूकादीनाम् । ['स्वेदज' जू आदि'] ।

(१०) एकमण्डजानां पक्षिसर्पादीनाम् । [अण्डज]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]उद्भिदस्तरुगुल्माद्या, [2]उद्भिदुद्भिज्जमुद्भिदम् ॥५१॥
[3]सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् ।
कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् ॥५२॥
[4]तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात् ।
[5]अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् ॥५३॥
[6]निकृष्ट-प्रतिकृष्टा-ऽर्व-रेफ-याप्या-ऽवमा-ऽधमाः ।
कुपूय-कुत्सिता-ऽवद्य-खेट-गर्ह्याऽ-णकाः समाः ॥५४॥
[7]मलीमसन्तु मलिनं कच्चरं मलदूषितम् ।
[8]पूतं पवित्रं मेध्यञ्च, [9]वीध्रन्तु विमलार्थकम् ॥५५॥

---

(१) एकं तरुगुल्मादीनाम् । ['उद्भिज्ज' लता, गुल्म] ।
(२) त्रीणि उद्भिदाम् । ['उद्भिद् वृक्षादि'] ।
(३) द्वादश मनोरमस्य । ['सुन्दर' 'मनोहर'] ।
(४) यस्य दर्शनात्तृप्तिर्न भवति तस्यैकम् । [जिसको देखने से आँखों की तृप्ति नहीं हो । 'आँखों का प्यारा'] ।
(५) षट् प्रियस्य । ['प्रिय' 'प्यारा'] ।
(६) त्रयोदशाऽधमस्य । ['नीच' अधम'] ।
(७) चत्वारि मलिनस्य । ['मलिन' 'मैला'] ।
(८) त्रीणि पवित्रस्य । ['पवित्र' शुद्ध'] ।
(९) द्वे निर्मलस्वभावस्य । ['बढ़िया' 'विमल' 'स्वच्छ'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करम् ।
[2]असारं फल्गु, [3]शून्यन्तु वशिकं तुच्छ-रिक्तके ॥५६॥
[4]क्लीबे प्रधानं प्रमुखं प्रवेका-ऽनुत्तमो-त्तमाः ।
मुख्य-वर्य-वरेण्याश्च प्रवर्होऽनवराध्यवत् ॥५७॥
पराध्र्या-ऽग्र-प्राग्रहर-प्राग्न्या-ऽग्न्या-ऽग्रीयमग्रियम् ।
श्रेयाँ[5] श्रेष्ठः पुष्कलः स्यात्सत्तमश्चाऽतिशोभने ॥५८॥
[6]स्युरुत्तरपदे व्याघ्र-पुङ्गव-र्षभ-कुञ्जराः ।
सिंह-शार्दूल-नागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥५९॥

---

(१) पञ्च शोधितस्य । [स्वच्छ । साफ किया हुआ] ।
(२) द्वे निःसारस्य । ['निःसार' 'निस्तत्त्व'] ।
(३) चत्वारि तुच्छस्य । ['शून्य' 'तुच्छ' खाली'] ।
(४) सप्तदश श्रेष्ठस्य । ['उत्तम' 'श्रेष्ठ' 'अच्छा'] ।
(५) पञ्चातिशोभनस्य । ['अत्यन्त बढिया । 'अत्युत्तम'] । केचित्तु—एकविंशतिः शोभनस्येत्याहुः ।
(६) व्याघ्रसिंहकुञ्जरादय उत्तरपदे सन्तः श्रेष्ठार्थवाचका भवन्ति । यथा—पुरुषव्याघ्रः=पुरुषश्रेष्ठः । ['व्याघ्र' 'सिंह' आदि पद उत्तरपद में हों तो श्रेष्ठ अर्थ को कहते हैं] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अप्राग्र्यं द्वयहीने द्वे अप्रधानो-पसर्जने ।
[2]विशङ्कटं पृथु बृह-द्विशालं पृथुलं महत् ॥६०॥
वड्रो-रु-विपुलं, पीनं[3]-पीव्नी तु स्थूल-पीवरे ।
[4]स्तोका-ऽल्प-क्षुल्लकाः सूक्ष्मं श्लक्ष्णं दभ्रं कृशं तनु ६१
स्त्रियां-मात्रा त्रुटिः, पुंसि-लव-लेश-कणा-ऽणवः ।
[5]अत्यल्पेऽल्पिष्ठमल्पीयः कनीयोऽणीय इत्यपि ॥६२॥
[6]प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ।

---

(१) त्रीणि अप्रधानस्य । ['अप्रधान' गौण'] । अप्रधानो-पसर्जने इमे द्वे=द्वे नामनी, द्वयहीने=स्त्रीलिङ्ग-पुंलिङ्ग-रहिते । अर्थात् नित्यं क्लीबे स्तः ।

(२) नव विशालस्य । ['विशाल' । वड्रू='बडा'] ।

(३) चत्वारि स्थूलस्य । ['मोटा'] ।

(४) चतुर्दश सूक्ष्मस्य । तत्र-मात्रा-त्रुटी-स्त्रियाम् । लवादयः पुंसि । ['महीन' 'पतला' 'सूक्ष्म'] ।

(५) पञ्च स्वल्पस्य । ['स्वल्प' 'थोड़ा'] ।

(६) द्वादश बहुलस्य । ['ज्यादा, अधिक, खूब, विपुल'] ।

टि०-६२ श्लोके 'मात्रा-त्रुटी' इति पाठान्तरम् । 'त्रुटी' इति च ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरुहं पुरु भूयिष्ठं स्फारं भूयश्च भूरि च ॥६३॥
[1]परःशताद्यास्ते येषां परा सङ्ख्या शतादिकात् ।
[2]गणनीये तु गणेयं, [3]सङ्ख्यातं गणितमथ[4] समं सर्वम्[5] ।
विश्वमशेषं कृत्स्नं समस्त-निखिलाऽ-खिलानि निःशेषम्।
समग्रं सकलं पूर्णमखण्डं स्यादनूनके ॥६५॥
[6]घनं निरन्तरं सान्द्रं, [7]पेलवं विरलं तनु ।
[8]समीपे निकटा-ऽऽसन्न-संनिकृष्ट-सनीडवत् ॥६६॥
सदेशा-ऽभ्याश-सविध-समर्याद-सवेशवत् ।
उपकण्ठा-ऽन्तिका-ऽभ्यर्णा-ऽभ्यग्रा अप्यभितोऽव्ययम्।

(१) एकं शतात्परस्य । [सैकड़ों । हजारों] ।
(२) द्वे गणयितुं शक्यस्य । ['गिना जाने लायक'] ।
(३) द्वे गणितस्य । [गिना हुआ] ।
(४) चतुर्दश समग्रस्य । ['समग्र' 'पूरा'] ।
(५) त्रीणि निबिडस्य । [घना-गाढा] ।
(६) त्रीणि विरलस्य । ['दूर दूर' 'थोड़ा-थोड़ा'] ।
(७) पञ्चदश समीपस्य । अभितः-इत्यव्ययम् । ['समीप'] ।

६२ श्लोके—'स्फिरं भूयश्च भूरि च' पा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संसक्ते[1] त्वव्यवहितमपदान्तरमित्यपि ।
नेदिष्ठमन्तिकतमं,[2] स्याद्दूरं[3] विप्रकृष्टकम् ॥६८॥
दवीयश्च दविष्ठञ्च सुदूरं,[4] दीर्घमायतम्[5] ।
वर्त्तुलं[6] निस्तलं वृत्तं, बन्धुरन्तून्नताऽऽनतम्[7] ॥६९॥
उच्च-प्रांशू-न्नतो-दग्रो-च्छ्रितास्तुङ्गेऽथ[8] वामने[9] ।
न्यङ्-नीच-खर्व-ह्रस्वाः[10] स्युरवाग्रेऽवनता-ऽऽनते॥७०॥

---

(१) त्रीणि संलग्नस्य । ['लगा हुआ' 'अव्यवहित' सटा हुआ] ।
(२) द्वे अतिनिकटस्य । [अत्यन्त निकट] ।
(३) द्वे दूरस्य । ['दूर'] ।
(४) त्रीणि अत्यन्तदूरस्य । [अत्यन्त दूर] ।
(५) द्वे दीर्घस्य । [लम्बा] ।
(६) त्रीणि वर्तुलस्य । ['गोल'] ।
(७) द्वे उन्नतानतस्य । [ऊँचा-नीचा] ।
(८) षट् उन्नतस्य । ['ऊँचा'] ।
(९) पञ्च ह्रस्वस्य । ['बौना' 'छोटा' 'ह्रस्व'] ।
(१०) त्रयमधोमुखस्य । ['अधोमुख' 'औंधा'] ।

टिप्पणी—६८ श्लोके 'अपटान्तरमित्यपि' इति पाठान्तरम् ।
६९ श्लोके—'सुदूरं' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अराल[1] वृजिनं जिह्ममूर्मिमत्कुञ्चितं नतम् ।
आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि ॥७१॥
ऋजाव[2]जिह्म-प्रगुणौ, व्यस्ते[3] त्वप्रगुणा-ऽऽकुलौ ।
शाश्वतस्तु[4] ध्रुवो नित्य-सदातन-सनातनाः ॥७२॥
स्थास्नुः[5] स्थिरतरः स्थेयानेकरूपतया[6] तु यः ।
कालव्यापी स कूटस्थः, स्थावरो[7] जङ्गमेतरः ॥७३॥
चरिष्णु[8] जङ्गम-चरं त्रस-मिङ्गं चराचरम् ।

---

(१) एकादश वक्रस्य । ['टेढा'] ।
(२) त्रीणि सरलस्य । ['सीधा' 'सरल'] ।
(३) त्रीणि आकुलस्य । ['टेढा' 'व्याकुल' 'घबड़ाया हुआ' व्याकुल हुआ] ।
(४) पञ्च नित्यस्य । ['नित्य'] ।
(५) त्रीणि अतिस्थिरस्य ['अत्यन्त स्थिर'] ।
(६) एकं कूटस्थस्य । ['सदा एक समान रहने वाला, कूटस्थ, नित्य'] ।
(७) द्वे अचरस्य वृक्षादेः । ['स्थावर' 'अचल'] ।
(८) षट्-चरस्य । [जङ्गम । चलाय मान 'चञ्चल'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चलनं कम्पनं कम्प्रं चलं लोलं चलाचलम् ॥७४॥
चञ्चलं तरलञ्चैव पारिप्लव-परिप्लवे ।
[2]अतिरिक्तः समधिको, [3]दृढसन्धिस्तु संहतः ॥७५॥
[4]कक्खटं कठिनं क्रूरं कठोरं निष्ठुरं दृढम् ।
जरठं मूर्तिमन्मूर्तं, [5]प्रवृद्धं प्रौढमेधितम् ॥ ७६ ॥
[6]पुराणे प्रतन-प्रत्न-पुरातन-चिरन्तनाः ।
[7]प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः ॥ ७७ ॥
नूत्नश्च, सुकुमारन्तु कोमलं मृदुलं मृदु ।

(१) दश चलस्य । आद्यत्रयं कम्पनशीलस्येत्येके । ['चञ्चल' 'काँपता हुआ' 'कम्पन शील'] ।
(२) द्वे अधिकस्य । ['ज्यादा' 'अधिक'] ।
(३) दृढसन्धेर्द्वे । ['सुदृढ' 'मजबूत' 'पक्का'] ।
(४) नव कठिनस्य । ['कठिन' 'मूर्त्तिमान्' 'कडा'] ।
(५) त्रीणि प्रवृद्धस्य । ['बढा हुआ'] ।
(६) पञ्च पुरातनस्य । ['पुराना'] ।
(७) सप्त नूतनस्य । ['नया'] ।
(८) चत्वारि कोमलस्य । [कोमल] ।

टि० ७६ श्लोके—'कर्कशं' इति 'खक्खटं' इति च पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम् ॥ ७८ ॥
प्रत्यक्षं स्यादैन्द्रियकमप्रत्यक्षमतीन्द्रियम् ।
एकतानोऽनन्यवृत्तिरेकाग्रै-कायनावपि ॥७९॥
अप्येकसर्ग एकाग्र्योऽप्येकायनगतोऽपि च ।
पुंस्यादिः पूर्व-पौरस्त्य-प्रथमा-ऽऽद्या, अथाऽस्त्रियाम् ॥
अन्तो जघन्यश्चरममन्त्य-पाश्चात्य-पश्चिमाः । ['मम्']
मोघं निरर्थकं, स्पष्टं स्फुटं प्रव्यक्तमुल्बणम् ॥८१॥

---

(१) चत्वारि पश्चादित्यर्थे । तत्र-अनुपदम्, अन्वक्, अन्वक्षम्-इति त्रयम् अव्ययम् । अनुपदम्, अन्वक्षं क्लीबे । [पीछे-पीछे] ।

(२) द्वे इन्द्रियज्ञानस्य । [इन्द्रियजन्य प्रत्यक्ष] ।

(३) द्वे इन्द्रियेणाऽज्ञातस्य-परोक्षस्य । ['परोक्ष' 'अतीन्द्रिय'] ।

(४) सप्त एकाग्रस्य । ['एकाग्र'] ।

(५) पञ्च आद्यस्य । तत्र आदिः पुंसि । ['आदि' 'पहिला] ।

(६) षट् अन्तस्य । तत्र-अन्तः—अस्त्रियाम् । [अन्त] ।

(७) द्वे निष्प्रयोजनस्य । [निष्प्रयोजन, व्यर्थ] ।

(८) चत्वारि स्पष्टस्य । ['साफ' 'स्पष्ट'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सोधारणन्तु सामान्यमेकाकी[2] त्वेक एककः ।
भिन्नार्थका[3] अन्यतर एकस्त्वोऽन्ये-तरावपि ॥८२॥
उच्चावचं[5] नैकभेदमुच्चण्डमविलम्बितम् ।
अरुन्तुदन्तु[6] मर्मस्पृगबाधन्तु[7] निरर्गलम् ॥८३॥
प्रसव्यं[8] प्रतिकूलं स्यादपसव्यमपष्ठु च ।
वामं शरीरं सव्यं स्यादपसव्यन्तु[10] दक्षिणम् ॥८४॥

(१) द्वे सामान्यस्य । ['साधारण'] ।
(२) त्रीणि असहायस्य । ['असहाय' 'इकल्ला'] ।
(३) षट् भिन्नार्थकाः । ['दूसरा' 'भिन्न' 'इतर'] ।
(४) द्वे अनेकप्रकारस्य । ['अनेकप्रकार'] ।
(५) द्वे उत्तालस्य । ['ऊँचा] ।
(६) द्वे मर्मपीडकस्य । तत्र-मर्मस्पृक् मर्मस्पृशौ—इत्येवं रूपाणि । ['मर्मवेधी'] ।
(७) द्वे अबाधितस्य । ['अबाध' 'विना रोकटोक'] ।
(८) चत्वारि विरुद्धार्थस्य । ['विरुद्ध' प्रतिकूल] ।
(९) एकं सव्यशरीरस्य । वाममागस्य । दक्षिणस्यापि क्वचित् । ['शरीर का वामभाग'] ।
(१०) शरीरदक्षिणभागस्यैकम् । ['शरीर का दक्षिण भाग'] ।

८४ श्लोके—'दक्षिणे' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]सङ्कटं ना तु सम्बाधः, [2]कलिलं गहनं समे ।
[3]सङ्कीर्णे सङ्कुला-ऽऽकीर्णे, [4]मुण्डितं परिवापितम् ॥८५॥
[5]ग्रन्थिते सन्दितं दृब्धं, [6]विसृतं विस्तृतं ततम् ।
अन्तर्गतं विस्मृतं स्यात्प्राप्त-प्रणिहिते समे ॥८६॥
वेल्लित-प्रेङ्खिता-ऽऽधूत-चलिता-ऽऽकम्पिता धुते ।
[10]नुन्न-नुन्ना-ऽस्त-निष्ठ्यूता-ऽऽविद्ध-क्षिप्ते-रिताःसमाः ॥

---

(१) द्वे सङ्कटस्य । ['सँकडा' 'संङ्कीर्ण' 'भरा हुआ'] ।
(२) द्वे दुष्प्रवेशस्य । ['दुष्प्रवेश' 'व्याप्त'] ।
(३) त्रीणि सङ्कीर्णस्य । ['सङ्कीर्ण 'भरा हुआ'] ।
(४) द्वे कृतमुण्डनस्य । ['मुण्डित' 'शिर मुँडाया हुआ'] ।
(५) त्रीणि गुम्फितस्य । ['गूंथा हुआ, 'गाँठ दिया हुआ' 'बन्धा हुआ'] ।
(६) त्रीणि लब्धप्रसरस्य । ['फैला हुआ' विस्तृत] ।
(७) द्वे विस्मृतस्य । ['भूला हुआ'] ।
(८) द्वे प्राप्तस्य, स्थापितस्य च । ['प्राप्त' 'पाया हुआ'] ।
(९) षडीषत्कम्पितस्य । ['कम्पित 'चलित'] ।
(१०) सप्त प्ररितस्य । ['प्रेरित' 'फेंका हुआ'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिक्षिप्तन्तु[1] निवृतं, चोरितं[2] मुषितार्थकम् ।
प्रवृद्ध[3]-प्रसृते, न्यस्त[4]-निसृष्टे, गुणिता[5]-ऽऽहते ॥८८॥
निदिग्धो[6]-पचिते, गूढ[7]-गुप्ते, गुण्ठित[8]-रूषिते ।
द्रुता[9]-ऽवदीर्णे, उद्गूर्णो[10]-द्यते, काचित[11]-शिक्यिते ।

---

(१) द्वे परिखादिना वेष्टितस्य । ['परिक्षिप्त' परिखा आदि से परिवेष्टित] ।

(२) द्वे चोरितस्य । ['चोरित' 'चोरा या गया'] ।

(३) द्वे प्रसृतस्य । [बढ़ा हुआ 'फैला हुआ'] ।

(४) द्वे त्यक्तस्य । ['रखा गया' छोड़ा गया'] ।

(५) द्वे गुणितस्य । [गुणा किया हुआ] ।

(६) द्वे पुष्टिं प्रापितस्य । ['थोपा गया' बढाया गया'] ।

(७) द्वे गुप्तस्य । ['गुप्त'] ।

(८) द्वे धूलिलिप्तस्य । [धूलि आदि से 'लिप्त'] ।

(९) द्वे द्रुतस्य । [पिघला हुआ] ।

(१०) द्वे उत्तोलितस्य । ['वाया गया' 'उठाया गया' 'ताना गया'] ।

(११) द्वे शिक्ये स्थापितस्य । [छींके पर रखा हुआ] ।

---

८९ श्लोके 'मुषितरूषिते' इत्यपि पाठः ।

CC-0. Prof. Satya Vrat Shastri Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]घ्राण-घ्राते, [2]दिग्ध-लिप्ते, [3]समुदक्तो-द्धृते-समे।
वेष्टितं[4] स्याद्वलयितं संवीतं रुद्धमावृतम् ॥९०॥
[5]रुग्णं भुग्नेऽथ [6]निशित-क्षुण्ण-शातानि तेजिते।
[7]स्याद्विनाशोन्मुखं पक्वं, हीर्ण-हीतौ तु लज्जिते ॥९१॥
[9]वृते तु वृत्त-वावृत्तौ, [10]संयोजित उपाहितः।

(१) द्वे आघ्रातस्य ['सूंघा गया']।
(२) द्वे लिप्तस्य। ['लिप्त']।
(३) द्वे उद्धृतस्य जलादेः। ['निकाला हुआ']। 'समे' इति प्रवृद्धादिभिः पूर्वोक्तैरन्वेति। तेन-समे-इत्यस्य प्रवृद्ध-प्रसृतादिकौ समुदक्तोद्धृतान्तौ द्वौ द्वौ समानार्थावित्यर्थः।
(४) पञ्च नद्यादिवेष्टितस्य। ['वेष्टित' 'नद्यादि से घेरा हुआ']।
(५) द्वे वक्रस्य। ['मोडा हुआ']।
(६) चत्वारि शाणादिना तीक्ष्णीकृतस्य। ['तेज किया हुआ' 'शान पर धार दिया हुआ']।
(७) द्वे विनाशोन्मुखस्य। ['पका हुआ' 'विनाशोन्मुख']
(८) त्रीणि सञ्जातलज्जस्य। ['लज्जित']।
(९) त्रीणि स्वयंवरादौ स्वीकृतस्य वरादेः। ['वृत' 'वरण किया गया']।
(१०) द्वे मेलितस्य, संयोजितस्य च। ['जोड़ा हुआ' 'संयोजित' 'रखा हुआ' लगाया हुआ]।

टि० ९२ श्लोके-'वृत्त-व्यावृत्तौ' इत्यन्ये पठन्ति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राप्यं गम्यं समासाद्यं, [2]स्यन्नं रीणं स्नुतं स्रुतम्॥९२॥
[3]संगूढः स्यात्सङ्कलितोऽवगीतः ख्यातगर्हणः।
विविधः स्याद्बहुविधो नानारूपः पृथग्विधः॥९३॥
[6]अवरीणो धिक्कृतश्चाऽप्यवध्वस्तो-ऽवचूर्णितः।

---

(१) त्रीणि प्राप्तुं शक्यस्य। ['प्राप्य' 'गम्य' पाया जा सकनेवाला]।

(२) चत्वारि प्रस्नुतस्य। ['चुवा हुआ' झरा हुआ']।

(३) द्वे अङ्कान्तरेणैकीकृतस्याङ्कादेः। ['जोड़ा हुआ' 'जोड़ दिया गया अङ्क']।

(४) द्वे अतिनिन्दितस्य। ['अत्यन्त गर्हित' 'काफी बदनाम']।

(५) चत्वारि नानारूपस्य। [अनेकरूप' 'नानारूपवाला']

(६) द्वे निन्दितसामान्यस्य। ['निन्दित' 'धिक्कृत']।

(७) द्वे अवचूर्णितस्य, नाशितस्य। [विध्वस्त, 'पीसा गया' 'चूर्ण' 'चून' किया गया' 'चूर २ कर दिया गया']। [निक्षिप्तसुधाचूर्णस्येत्येके]।

---

९२ श्लोके—'स्रुतं स्नुते' इति पा०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अनायासकृतं फाण्टं, [2]स्वनितं ध्वनितं समे ॥९४॥
[3]बद्धे सन्दानितं मूतमुदितं सन्दितं सितम् ।
निष्पक्के क्वथितं, पाके क्षीरा-ऽऽज्य-हविषां शृतम् ॥९५॥
[6]निर्वाणो मुनि-वह्न्यादौ, निर्वातस्तु गतेऽनिले ।
पक्कं परिणते, गूनं हन्ने, [10]मीढन्तु मूत्रिते ॥९६॥

(१) अनायासकृतस्य क्वाथस्य द्वे । ['पीसकर लुगदी किया गया', 'चटनी बनाया गया'] ।

(२) द्वे कृतस्य शब्दस्य । ['ध्वनित', 'कहा गया'] ।

(३) षड् बद्धस्य । ['बान्धा गया'] ।

(४) द्वे साकल्येन पक्वस्य । ['औटाया गया' 'खूब पकाया गया'] ।

(५) एकं क्षीरादिपाकस्य क्षीरादिषुपाकस्यच। ['सिजाया गया' 'औटाया गया' 'कढाया गया दूध खीर, घृत आदि] ।

(६) मुनिमरणस्य, वह्न्यादिनिर्वाणस्य चैकम् । [मोक्ष या बुझना] । (७) वातशून्यस्यैकम् । ['वायुशून्य' 'निर्वात'] ।

(८) पक्वस्य द्वे । ['परिपक्व'] ।

(९) द्वे गुदनिःसृतपुरीषस्य । ['हगा हुआ', 'बैठा हुआ टट्टी' 'गुदा से निकाला हुआ मल'] ।

(१०) द्वे उपस्थनिष्कासितमूत्रस्य । [मूता हुआ, (मूत्र)] ।

टि० ९६ श्लोके—'गताऽनिले' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]पुष्टे तु पुषितं, [2]सोढे क्षान्तमुद्वान्तमुद्गते ।
[4]दान्तस्तु दमिते, [5]शान्तः शमिते, [6]प्रार्थितेऽर्दितः ॥९७॥
[7]ज्ञप्तस्तु ज्ञपिते, [8]छन्नश्छादिते, [9]पूजितेऽञ्चितः ।
[10]पूर्णस्तु पूरिते, क्लिष्टः [11]क्लिशितेऽ[12]वसिते सितः९८
[13]प्रुष्ट-प्लुष्टो-षिता दग्धे, [14]तष्ट-त्वष्टौ तनूकृते ।

(१) यस्य पोषणं कृतन्तस्य द्वे । [पुष्ट] ।
(२) सोढस्य द्वे । [सहन किया हुआ] ।
(३) कृतस्य वमनस्य द्वे । [बाहर निकाला हुआ] ।
(४) कृतं दमनं यस्य तस्य वृषभादेर्द्वे । [दान्त] ।
(५) द्वे शमनं प्रापितस्य । [शान्त किया हुआ] ।
(६) द्वे याचितस्य । [मांगा हुआ] ।
(७) द्वे बोधं प्रापितस्य । [बोधित] ।
(८) द्वे आच्छादितस्य । [ढका हुआ] ।
(९) द्वे पूजितस्य । [पूजा किया हुआ] ।
(१०) द्वे पूर्णस्य । (११) द्वे प्राप्तक्लेशस्य । (१२) द्वे समाप्तस्य ।
(१३) चत्वारि दग्धस्य । ['जला हुआ' 'दग्ध'] ।
(१४) त्रीणि तनूकृतस्य । ['छीला हुआ' 'पतला किया हुआ'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वेधितं[1]-च्छिद्रितौ विद्धे, विन्नं[2]-वित्तौ विचारिते ॥९९॥
निष्प्रभे[3] विगता-ऽरोकौ, [4]विलीने विद्रुत-द्रुतौ ।
[5]सिद्धे निर्वृत्त-निष्पन्नौ, [6]दारिते भिन्न-भेदितौ ॥१००॥
ऊतं[7] स्यूतमुतश्चेति त्रितयं तन्तुसन्तते ।
स्यादर्हिते नमस्यित-नमसितमपचायिता-ऽर्चिता-ऽपचितम्[8]।
[9]वरिवसिते वरिवस्यितमुपासितश्चोपचरितश्च।
[10]सन्तापित-सन्तप्तौ धूपित-धूपायितौ च दूनश्च ॥१०२॥

---

(१) त्रीणि विद्धस्य। ['बींधा हुआ' 'छेद किया हुआ']।

(२) त्रीणि विचारितस्य। [विचारित]।

(३) निष्प्रभस्य त्रीणि। ['निष्प्रभ' 'हतप्रभ']।

(४) त्रीणि स्वतो द्रवीभूतस्य। ['द्रुत' 'पिघला हुआ' 'टंघला हुआ]।

(५) त्रीणि सिद्धस्य। ['सिद्ध'। 'बना हुआ' 'तैयार']।

(६) त्रीणि विदारितस्य। [फाड़ा हुआ]।

(७) चत्वारि स्यूतस्य। [सीया हुआ]।

(८) षट् नमस्कृतस्य [जिसको नमस्कार किया गया हो]।

(९) चत्वारि पूजितस्य। [पूजित]।

१०) पञ्च सन्तापितस्य। ['सन्तापित' 'सन्तप्त' 'दुःखित']।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]हृष्टे मत्तस्तृप्तः प्रहृष्टः प्रमुदितः प्रीतः ।
[2]छिन्नं छातं लूनं कृत्तं दातं दितं छितं वृक्णम् १०३
[3]स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं पन्नं च्युतं गलितम् ।
[4]लब्धं प्राप्तं विन्नं भावितमासादितं च भूतश्च १०४
[5]अन्वेषितं गवेषितमन्विष्टं मार्गितं मृगितम् ।
[6]आर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमितं समुन्नमुत्तश्च ॥१०५॥
[7]त्राणं त्रातं रक्षितमवितं गोपायितं च गुप्तश्च ।
[8]अवगणितमवमता-ऽवज्ञातेअवमानितश्च परिभूते १०६
[9]त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टे । ['ष्टम्'] ।

(१) षट् प्रमुदितस्य । ['प्रसन्न' 'हर्षित' 'खुश'] ।
(२) अष्टौ खण्डितस्य । ['खण्डित' 'काटा हुआ'] ।
(३) सप्त च्युतस्य । ['गिरा हुआ' 'भ्रष्ट'] ।
(४) षट् प्राप्तस्य । ['प्राप्त' 'लब्ध'] ।
(५) पञ्च गवेषितस्य । ['खोजा गया'] ।
(६) सप्त आर्द्रस्य । ['गीला'] ।
(७) षट् रक्षितस्य । ['रक्षित'] ।
(८) पञ्च अवमानितस्य । ['अवमानित'] ।
(९) षट् त्यक्तस्य । ['छोड़ा गया' 'परित्यक्त'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]उक्तं भाषितमुदितं जल्पितमाख्यातमभिहितं लपितम्
[2]बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसिता-ऽवगते ।
[3]उरीकृतमुररीकृतमङ्गीकृतमाश्रुतं प्रतिज्ञातम् ॥१०८॥
सङ्गीर्ण-विदित-संश्रुत-समाहितो-पश्रुतो-पगतम् ।
[4]ईलित-शस्त-पणायित-पनायित-प्रणुत-पणित-पनितानि ।
अपि गीर्ण-वर्णिता-ऽभिष्टुते-डितानि स्तुतार्थानि ।
[5]भक्षित-चर्वित-लीढ-प्रत्यवसित-गिलित-खादित-प्सातम् ।
अव्यवहृता-ऽन्न-जग्ध-ग्रस्त-ग्लस्ता-ऽशितं भुक्ते ।
[6]क्षेपिष्ठ-क्षोदिष्ठ-प्रेष्ठ-वरिष्ठ-स्थविष्ठ-बंहिष्ठाः ॥१११॥
क्षिप्र-क्षुद्रा-भीप्सित-पृथु-पीवर-बहुल-प्रकर्षार्थाः ।

---

(१) सप्त उक्तस्य । ['कहा गया'] ।
(२) सप्त ज्ञातस्य । ['जाना गया'] ।
(३) एकादश स्वीकृतस्य । ['स्वीकृत' 'अङ्गीकृत'] ।
(४) द्वादश स्तुतस्य । [स्तुति—एवं प्रशंसा किया गया] ।
(५) चतुर्दश खादितस्य, चर्वितस्य च । 'चर्वित-लिप्ते' ति पाठान्तरम् ['खाया हुआ' 'चबाया हुआ'] ।
(६) एकैकमतिशयक्षिप्रादीनाम् । [अत्यन्त तीव्र आदि] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

साधिष्ठ-द्राघिष्ठ-स्फेष्ठ-गरिष्ठ-हसिष्ठ-वृन्दिष्ठाः ॥११२॥
बाढ-व्यायत-बहु-गुरु-वामन-वृन्दारका-ऽतिशये ।

* इति विशेष्यनिघ्नवर्गः ॥ १ ॥

* अथ सङ्कीर्णवर्गः २ *

प्रकृति-प्रत्ययार्थाद्यैः सङ्कीर्णे लिङ्गमुन्नयेत् ।

---

(१) एकैकमतिशयितबाढाद्यर्थकम् । यथा—अतिशयेन बाढम्—साधिष्ठम्—इत्यादि । [अत्यन्त क्षिप्र आदि अर्थों में क्षेपिष्ठ आदि शब्द हैं] ।

इति विशेष्यनिघ्नवर्गः ॥ १ ॥

(२) सङ्कीर्णार्थलिङ्गकशब्दैरारब्धत्वादस्य वर्गस्य 'सङ्कीर्णवर्ग' इति नाम । तथाचात्र सङ्कीर्णे वर्गे—प्रकृत्यर्थेन, प्रत्ययार्थेन [क्वचिद्रूपभेदादिना च—] लिङ्गमुन्नयेत् । तत्र प्रकृत्यर्थेन यथा—'अपरस्परा' इत्यत्र 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयो' रित्यनेन परवर्त्तिपरशब्दस्येव लिङ्गं भवति, परशब्दश्च त्रिलिङ्ग इति अपरस्परशब्दोऽपि त्रिलिङ्गः । प्रत्ययार्थेन यथा—शान्तिः, गतिः । अत्र स्त्रियां क्तिनो विधानात्स्त्रीलिङ्गता । रूपभेदेन च कर्मशब्दादेः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[अथ क्रियाऽधिकारः]

कर्म[1] क्रिया, तत्सातत्ये[2] गम्ये स्युरपरस्परा: ॥१॥
साकल्या[3]-ऽऽसङ्गवचने पारायण-तुरायणे ।

क्लीबत्वम् । साहचर्येण–डिम्बादेः पुंस्त्वम् । केचित्तु—भिन्नजातीयेन लिङ्गेन संसर्गे सति–अत्र वर्गे, वर्गान्तरे च–कृत्यर्थाद्यैर्लिङ्गं ज्ञेयम् । इत्थञ्च लिङ्गसंग्रहे वक्ष्यमाणमपि लिङ्गमुन्नेयमित्यर्थमाहुः ।

[इत आरभ्य 'क्रिये'त्यस्याधिकारोऽपि बोध्यः] ।

[१] द्वे क्रियायाः । ['क्रिया'] ।

[२] क्रियायाः क्रियावताञ्च सातत्ये–अपरस्परशब्द इत्यर्थः । अपरे च परे च–अपरस्पराः । क्रियासातत्ये–'अपरस्परं गच्छन्ती' त्यादिषु क्लीबता । क्रियावतां सातत्ये त्रिलिङ्गता—'अपरस्पराः सार्था गच्छन्ति', 'अपरस्पराः स्त्रिय आगच्छन्ति', 'अपरस्पराणि कुलानि यान्ति' । ['तांता बन्धना' 'तांता लगना'] ।

(३) साकल्यवचने—पारायणम् । ['पूरा करना' 'पूर्णता' 'भरपूर होना'] । आसङ्गवचने–तुरायणम् । अत्र 'परायण'मिति बहुसंमतः पाठः । 'असङ्गेत्यपिच्छेदः' । ['आसक्त होना', 'तन्मय होना'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदृच्छा स्वैरिता, हेतुशून्या त्वास्या विलक्षणम् ॥२॥
शमथस्तु शमः शान्तिर्दान्तिस्तु दमथो दमः ।
अवदानं कर्म वृत्तं, काम्यदानं प्रवारणम् ॥ ३ ॥
वशक्रिया संवननं, मूलकर्म तु कार्मणम् ।

[१] द्वे स्वातन्त्र्यस्य । [स्वतन्त्रता से करना] ।

[२] हेतुशून्यस्थितेरेकम् । ['निष्प्रयोजन बैठना' 'निरर्थक बैठना'] । 'आस्था' इति पाठान्तरम् ।

[३] त्रीणि शान्तेः । ['शान्त होना' 'शान्ति धारण करना'] ।

[४] त्रीणि तपः-क्लेशसहनाख्यस्य दमस्य । [इन्द्रियों का दमन करना, कष्ट सहन करना] ।

[५] प्रशस्तकर्मणो द्वे । [किया हुआ अच्छा काम] ।

[६] द्वे काम्यदानस्य । ['जो चाहे सो देना'] ।

[७] द्वे वशीकरणस्य । ['वश करना'] ।

[८] द्वे ओषधिमूलादिभिरुच्चाटनादेः । ['कामण करना' 'जादू करना'] ।

२ श्लोके-'पारायण-परायणे' इति पाठान्तरम् ।

'हेतुशून्या त्वास्था'—पाठान्तरम् ।

३ श्लोके-'अपदानं कर्म वृत्तम्' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विधूनन[1] विधुवनं, तर्पणं[2] प्रीणना-ऽवनम् ॥४॥
पर्याप्तिः[3] स्यात्परित्राणं हस्तवारणमित्यपि ।
सेवनं[4] सीवनं स्यूतिर्विदरः[5] स्फुटनं भिदा ॥५॥
आक्रोशनमभीषङ्गः, संवेदो[7] वेदना[8] न ना ।
समूर्च्छनमभिव्याप्तिर्याच्ञा[9] भिक्षाऽर्थनाऽर्दना ॥६॥

(१) द्वे कम्पनस्य । [कम्पाना] ।

(२) त्रीणि प्रीणनस्य । ['तर्पण करना' 'तृप्त करना'] ।

(३) त्रीणि परित्राणस्य । ['मारते हुए का हाथ पकड़ लेना' 'रोकना'] । (४) त्रीणि सूचीक्रियायाः । ['सीना'] ।

(५) त्रीणि द्विधाभावस्य । ['फटना' 'फूटना'] ।

(६) द्वे गाल्यादिदानादेः—शापदानस्य च । ['गाली देना' 'शाप देना' 'बुरा-भला कहना'] ।

(७) द्वे अनुभवस्य । तत्र वेदना न पुंसि । ['अनुभव करना' 'समझना'] ।

(८) द्वे सर्वतो व्याप्तेः । ['चारों ओर फलना' 'गमक उठाना' 'व्याप्त होना'] ।

(९) चत्वारि याच्ञायाः ['मांगना'] ।

५ श्लो के—'हस्तधारणम्' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]वर्द्धनं छेदनेऽथ[2] द्वे आनन्दन-सभाजने ।
आप्रच्छनमथाऽऽम्नायः[3] सम्प्रदायः, [4]क्षये क्षिया ॥७॥
[5]ग्रहे ग्राहो, [6]वशः कान्तौ, [7]रक्षणस्त्राणे, [8]रणः क्वणे ।
[9]व्यधो वेधे, [10]पचा पाके, [11]हवो हूतौ, [12]वरो वृतौ ॥८॥

(१) द्वे कर्त्तनस्य । ['काटना' 'कतरना'] ।

(२) त्रीणि आप्रच्छनस्य । ['कुशल मङ्गल पूछना' 'छाती से लगाना' 'पुचकारना'] ।

(३) द्वे मन्त्रोपदेशादेर्गुरुपरम्परया प्राप्तेः । ['परम्परा से मन्त्र आदि का प्राप्त होना'] ।

(४) द्वे अपचयस्य । ['घटना' 'कम होना' 'छीजना'] ।

(५) द्वे ग्रहणस्य । ['ग्रहण करना' 'पकड़ लेना' 'स्वीकार करना'] । (६) द्वे इच्छायाः । ['इच्छा करना'] ।

(७) द्वे रक्षणस्य । [रक्षा करना] ।

(८) द्वे शब्दकरणस्य । ['शब्द करना'] ।

(९) द्वे वेधनस्य । ['वींधना' 'निशाना मारना'] ।

(१०) द्वे पाकस्य । ['पकाना' 'रसोई करना'] ।

(११) द्वे आह्वानस्य । ['बुलाना' 'आवाज देना'] ।

(१२) द्वे वेष्टनस्य । [घेरना] । वरणस्य वा । ['लपेटना' 'स्वीकारना' मांगना] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ओषः[1] ओषे, नयो[2] नाये, ज्यानिर्जीर्णौ[3], भ्रमो[4] भ्रमौ।
[5]स्फातिर्वृद्धौ, प्रथा[6] ख्यातौ, स्पृष्टिः[7] पृक्तौ, स्रवः[8] स्रवे॥
[9]एधा समृद्धौ, [10]स्फुरणे स्फुरणा, [11]प्रमितौ प्रमा।
[12]प्रसूतिः[13] प्रसवे, श्च्योते प्राधारः, [14]क्लमथः क्लमे ॥१०॥

(१) द्वे दाहस्य। ['जलना' 'दग्ध होना']।
(२) द्वे नीतेः। ['नीति वर्त्तना']।
(३) द्वे हानेः। ['हानि होना' 'नुक्सान लगना']।
(४) द्वे भ्रमणस्य। ['घूमना' 'भ्रम होना']।
(५) द्वे वृद्धेः। ['बढ़ना' फैलना]।
(६) ख्यातेर्द्वयम्। ['प्रसिद्ध होना']।
(७) द्वे स्पर्शनस्य। ['छूना' 'स्पर्श करना']।
(८) द्वे प्रस्रवणस्य। ['झरना' 'टपकना']।
(९) द्वे धनसम्पत्तेः। 'विधे'स्यपि पाठः। ['धन धान्य की बढ़ती होना' 'वृद्धि होना']।
(१०) द्वे स्फुरणस्य। ['फरकना']। (११) प्रमाज्ञानस्य द्वे। ['प्रमाज्ञान करना' 'ठीक २ समझना']। (१२) प्रसवस्य, प्रेरणस्य वा। ['जन्मना' 'प्रसव करना' 'उत्पन्न करना' 'प्रेरणा करना']। (१३) क्षरणस्य द्वे। ['चूना' 'झरना']।
(१४) द्वे ग्लानेः। ['ग्लानि होना' 'थकना' 'हारना']।

१० श्लोके—'क्लमथुः' इति पाठान्तरम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]उत्कर्षोऽतिशये, [2]सन्धिः श्लेषे, विषय[3] आशये ।
[4]क्षिपायां क्षेपणं, [5]गीर्णिर्गिरौ, [6]गुरणमुद्यमे ॥११॥
[7]उन्नाय उन्नये, [8]श्रायः श्रयणे, [9]जयने जयः ।
[10]निगादो निगदे, [11]मादो मद, [12]उद्वेग उद्धूमे ॥१२॥

(१) द्वे उत्कर्षस्य। ['बढ़ती होना' 'बड़ाई होना' 'उन्नति होना']। (२) द्वे सन्धानस्य। ['जोड़ना 'मिलाना']।

(३) आशयस्य द्वे। 'आश्रये' इत्यपि पाठः। [विषय होना]।

(४) द्वे प्रेरणस्य। ['फेंकना' 'बगाना']।

(५) द्वे निगरणस्य। ['निगलना']।

(६) द्वे भाराद्युद्यमनस्य। ['बोझा आदि उठाना']।

(७) ऊहस्य, ऊर्ध्वनयनस्य च द्वे। ['ऊपर को उठाना' 'तर्क करना']।

(८) द्वे सेवायाः। [सेवा करना, 'आश्रय ग्रहण करना' 'सहारा लेना']। (९) द्वे जयस्य। ['जीतना']।

(१०) द्वे कथनस्य। ['कहना]।

(११) द्वे हर्षस्य। ['हर्षित होना' 'मस्त होना' 'नशे में चूर होना']।

(१२) द्वे उद्वेगस्य। ['उद्विग्न होना' 'उकताना']।

११ श्लोके—'विषयं आश्रये' इति पाठान्तरम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विमर्दनं परिमलेऽभ्युपपत्तिरनुग्रहः ।
निग्रहस्तु निरोधः स्यादभियोगस्त्वभिग्रहः ॥१३॥
मुष्टिबन्धस्तु संग्राहो, डिम्बे डमर-विप्लवौ ।
बन्धनं प्रसितिश्चारः, स्पर्शः स्प्रष्टोपतप्तरि ॥१४॥

(१) कुङ्कुमादिमर्दनस्य द्वे । ['उबटना' 'इत्र' 'फुलेल' 'कुङ्कुम आदि—लगाना' ।

(२) द्वे अनुग्रहस्य । [अनुग्रह करना 'स्वीकार करना' कृपा करना, 'दुःख आदि दूर करना'] ।

(३) द्वे निग्रहस्य । ['दण्ड देना, 'दबाना' 'रोकना']।

(४) द्वे कलहाह्वानस्य । [झगड़ा करना] ।

(५) द्वे मुष्टिबन्धस्य । [मुट्ठी बान्धना, कसके पकड़ना, 'पकड़ना'] । (६) त्रीणि उपद्रवस्य । ['लूटपाट करना धाड़ा डालना' 'मार पीट करना, गाली गलौज' आदि करना, उपद्रव करना'] ।

(७) त्रीणि बन्धनस्य । ['कैद करना' बान्धना' हवालात में एवं 'कारागार में डालना'] ।

(८) सन्तापस्य त्रीणि । [सन्तप्तस्येत्येके] । उपतप्तरि= उपसन्तप्तभावे, भावप्रकरणानुरोधात् ['सन्तप्त होना'] ।

टि० १३ श्लोके—'विग्रहस्तु विरोधः स्यात्' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निकारो विप्रकारः [२]स्यादाकारस्त्विङ्ग इङ्गितम् ।
[३]परिणामो विकारो द्वे, समे [४]विकृति-विक्रिये ॥१५॥
[५]अपहारस्त्वपचयः, [६]समाहारः समुच्चयः ।
[७]प्रत्याहार उपादानं, [८]विहारस्तु परिक्रमः ॥१६॥
[९]अभिहारोऽभिग्रहणं, [१०]निर्हारोऽभ्यवकर्षणम् ।

(१) द्वे अपकारस्य । ['अपकार करना'] ।

(२) अभिप्रायानुरूपचेष्टायाश्चीणि । ['इशारा करना' चेष्टा करना'] । (३) द्वे प्रकृतेरन्यथाभावे । ['परिणत होना' बदलना'] ।

(४) द्वे वि द्धक्रियायाः । ['खराब होना' 'विकृत होना' 'बिगड़ना'] । चत्वारि परिणामस्येत्येके ।

(५) द्वे अपहरणस्य । ['लेना' 'उठाना' 'कम करना'] ।

(६) द्वे राशीकरणस्य । ['इकट्ठा करना']

(७) विषयेभ्य इन्द्रियपरावर्त्तनस्य । ['प्रत्याहार' 'स्वीकार या संग्रह करना' 'विषयों से इन्द्रियों को हटाना'] ।

(८) क्रीडार्थं सञ्चरणस्य । [घूमना । 'विहार करना' 'मनोविनोदार्थ पैदल' 'इधर उधर टहलना'] ।

(९) द्वे चौर्यकरणस्य, आभिमुख्येन ग्रहणस्य वा । ['चोरी करना' 'सामनें से लेना' 'थामना' 'पकड़ना'] ।

(१०) द्वे शल्यादेः, शस्त्रादेश्च युक्त्या निस्सारणस्य ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनुहारोऽनुकारः स्यादर्थस्यापगमे व्ययः ॥१७॥
प्रवाहस्तु प्रवृत्तिः स्यात्प्रवहो गमनं बहिः ।
वियामो वियमो यामो यमः संयाम-संयमौ ॥१८॥
हिंसाकर्माऽभिचारः स्याज्जागर्या जागरा द्वयोः ।

['खैंचना' 'निकालना' 'शस्त्र शल्य आदि का निकालना' 'पकडकर खैंचना'] ।

(१) द्वे अनुहारस्य । ['नकल करना'] ।

(२) एकं व्ययस्य । ['धन आदि का खर्च होना'] ।

(३) द्वे अविच्छेदेन जलादिप्रवाहस्य । ['जल आदि का निरन्तर बहना'] ।

(४) बहिर्गमनस्यैकम् । ['बाहर जाना' 'दूर देशजाना।'] ।

(५) षट् संयमनस्य । ['संयम करना' 'रोकना'] स्वामी तु–द्वे विविधयमनस्य, द्वे उपरतिमात्रस्य, द्वे च संयमनस्येत्याह ।

(६) द्वे अभिचारस्य । ['मूठ मारना' 'मारण प्रयोग करना'] ।

(७) द्वे जागरणस्य । तत्र–'जागरा' स्त्रीपुंसयोः । ['जागना'] 'जाग्रिया' 'जागर्ति' रित्यपि नामनी ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]विघ्नोऽन्तरायःप्रत्यूहः, [2]स्यादुपघ्नोऽन्तिकाश्रये ॥
निर्वेश[3] उपभोगः स्यात्[4]परिसर्पः परिक्रिया ।
[5]विधुरन्तु प्रविश्लेषोऽभिप्रा[6]यश्छन्द आशयः ॥२०॥
[7]संक्षेपणं समसनं, [8]पर्यवस्था विरोधनम् ।

(१) त्रीणि प्रत्यूहस्य । ['विघ्न करना' विघ्न होना, 'विघ्न-बाधा'] ।

(२) समीपभूतस्य आश्रयस्य एकम् । ['उठँगना' 'सहारा लेना' 'समीपस्थ आश्रय' ।]

(३) द्वे उपभोगस्य । ['जीविका एवं निर्वाह का खर्च देना' 'उपभोग करना' जीविका' 'पेटिया' 'गुजारा'] ।

(४) द्वे परिजनादिना वेष्टनस्य । ['इकठ्ठा होना' 'परिकर बान्धना' 'गोल बान्धना' 'गोलमें मिलना' 'जुटना'] ।

(५) द्वे अत्यन्तवियोगस्य । ['विछुड़ना' 'अलग होना'] ।

(६) त्रीणि अभिप्रायस्य । अयं छन्दशब्दोऽदन्तः । ['अभिप्राय' 'चाहना' 'आशय' 'मनोभाव'] ।

(७) द्वे संक्षेपस्य । ['सङ्क्षेप करना' 'समास करना'] ।

(८) द्वे विरोधस्य । ['विरुद्ध कहना' 'विरुद्धपक्ष लेना' 'विरोध करना'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिसर्या[1] परीसारः, स्यादास्या[2] त्वासना स्थितिः॥२१॥
विस्तारो[3] विग्रहो व्यासः, स[4] च शब्दस्य विस्तरः।
संवाहनं[5] मर्दनं स्याद्विनाशः[6] स्याददर्शनम् ॥२२॥
संस्तवः[7] स्यात्परिचयः, प्रसरस्तु[8] विसर्पणम्।
नीवाकस्तु[9] प्रयामः स्यात्संनिधिः[10] संनिकर्षणम् २३

(१) द्वे सर्वतो गमनस्य। ['चारों ओर जाना' 'पसरना' 'फैलना']। (२) त्रीणि आसनस्य। ['बैठना']।

(३) त्रीणि पटादिविस्तारस्य। ['विस्तार करना' 'फैलाना']।

(४) शब्दविस्तरस्यैकम्। ['शब्दों का विस्तर' फैलाव]।

(५) द्वे पादमर्दनादेः। ['पैर आदि दबाना']।

(६) द्वे तिरोधानस्य। ['नष्ट होना' 'तिरोधान होना']।

(७) द्वे परिचयस्य। ['परिचय करना' 'जान पहिचान करना']। (८) द्वे व्रणादिप्रसरणस्य। [घाव आदि का फैलना]।

(९) द्वे धान्यसञ्चयस्य। क्रयस्य जनानान्तश्रादरातिशयस्य वा। ['धन धान्य का सञ्चय करना' 'जमा करना' 'खरीदना']।

(१०) द्वे संनिधानस्य। ['पास में आना' 'निकट बैठना' 'पास में बैठना']।

२२ श्लोके—'स्यान्मर्दनं संवहनम्' इति पाठान्तरम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]लवोऽभिलावो लवने, [2]निष्पावः पवने पवः ।
[3]प्रस्तावः स्यादवसरस्त्वसरः सूत्रवेष्टनम् ॥२४॥
[5]प्रजनं स्यादुपसरः, [6]प्रश्रय-प्रणयौ समौ ।
धीशक्तिर्निष्क्रमोऽस्त्री[7] तु संक्रमो दुर्गसञ्चरः ॥२५॥

(१) त्रीणि लवनस्य । ['काटना'] ।

(२) त्रीणि धान्यादीनां बहुलीकरणस्य । ['धान्य को भूसा आदि अलग करके सफा करना' 'बर्षाना'] ।

(३) द्वे प्रस्तावस्य । ['मौका' 'अवसर' 'प्रसङ्ग' 'उपस्थित होना'] । (४) सूत्रादिवेष्टनक्रियाया द्वे । [सूत लपेटना] ।

(५) प्रथमगर्भग्रहणस्य द्वे । ['पहिले पहल गर्भ धारण करना'] । (६) द्वे प्रीत्या प्रार्थनस्य, प्रणयस्य वा । ['प्रेम पूर्वक प्रार्थना करना' 'प्रेम दर्शाना'] ।

(७) द्वे बुद्धिसामर्थ्यस्य । ['ऊहाऽपोह आदि करना'] । तदुक्तं—

शुश्रूषा श्रवणं चैव ग्रहणं धारणन्तथा ।
ऊहाऽपोहौ च विज्ञानं तत्त्वज्ञानञ्च धीगुणाः' ॥ इति ।

(८) द्वे दुर्गमार्गस्य, तत्प्रवेशनक्रियाया वा । तत्र—सङ्क्रमः-अस्त्री = नस्त्रियाम् । पुंनपुसकयोरेवेत्यर्थः । [दुर्गमें प्रवेश] ।

२४ श्लोके—'प्रसर-प्रणयौ' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रत्युत्क्रमः प्रयोगार्थः, प्रक्रमः स्यादुपक्रमः ।
स्यादभ्यादानमुद्घात आरम्भः, सम्भ्रमस्त्वरा ॥२६॥
प्रतिबन्धः प्रतिष्टम्भोऽवनायस्तु निपातनम् ।
उपलम्भस्त्वनुभवः, समालम्भो विलेपनम् ॥२७॥
विप्रलम्भो विप्रयोगो, विलम्भस्त्वतिसर्जनम् ।

(१) द्वे कर्मारम्भे प्रथमप्रयोगस्य । ['कार्य के आरम्भ का प्रथम प्रयोग'] । 'प्रयुद्धार्थः' इत्यपि पाठः । ['युद्ध के लिए खड़े होना'] ।

(२) द्वे प्रथमारम्भस्य । ['पहिले पहिल आरम्भ करना' 'किसी कार्य को पहिले पहिल प्रारम्भ करना'] ।

(३) त्रीण्यारम्भसामान्यस्य । ['आरम्भ करना'] । 'पञ्चापि आरम्भस्ये'त्येके ।

(४) द्वे त्वरायाः । [जल्दी करना 'हड़बड़ाहट'] ।

(५) द्वे निरोधस्य । [रुकावट डालना 'रुकना'] ।

(६) द्वे अधोनयनस्य । ['नीचे गेरना' 'फेकना'] ।

(७) द्वे अनुभवस्य । ['अनुभव करना'] ।

(८) द्वे कुङ्कुमादिना लेपनस्य । ['लेप करना'] ।

(९) द्वे स्नेहिजनवियोगस्य । ['वियोग' 'बिछुड़ना'] ।

(१०) द्वे दानस्य । ['देना'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]विश्रावस्तु प्रविख्यातिरवेक्षा प्रतिजागरः ॥२८॥
निपाठ-निपठौ पाठे, तेमे-स्तेमौ समुन्दने ।
आदीनवा-ऽऽस्रवौ क्लेशे, मेलके सङ्ग-सङ्गमौ ॥२९॥
संवीक्षणं विचयनं मार्गणं मृगणा मृगः ।
परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम् ॥ ३० ॥
[9]निर्वर्णनन्तु निध्यानं दर्शना-ऽऽलोकने-क्षणम् ।

(१) द्वे अतिप्रसिद्धेः । ['अत्यन्त प्रसिद्धि' 'विख्यात होना'] । (२) द्वे अवेक्षणस्य । ['निगाह रखना' 'चौकसी रखना' 'जागते रहना' 'सावधान रहना'] ।
(३) त्रीणि पठनस्य । ['पढ़ना' 'पाठ करना'] ।
(४) त्रीणि आर्द्रीभावस्य । ['भीगना' 'गीला होना'] ।
(५) त्रीणि क्लेशस्य । [कष्ट पाना] ।
(६) त्रीणि सङ्गमस्य । ['मिलना, मेला लगना'] ।
(७) पञ्च-अन्वेषणस्य । 'मृगये'त्यपि पाठः । ['खोजना'] ।
(८) चत्वारि—आलिङ्गनस्य । [आलिङ्गन करना] ।
(९) पञ्च वीक्षणस्य । ['देखना' 'गौर करना'] ।

टि० ३९ श्लोके—'अन्वीक्षणम्' 'अन्वेक्षणम्' 'मृगया' 'मृगः' इति पा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः ॥३१॥
[2]उपशायो विशायश्च पर्यायशयनार्थकौ ।
[3]अर्तनश्च ऋतीया च हृणीया च घृणार्थकाः ॥३२॥
[4]स्याद्व्यत्यासो विपर्यासो व्यत्ययश्च विपर्यये ।
[5]पर्ययोऽतिक्रमस्तस्मिन्नतिपात उपात्ययः ॥३३॥
[6]प्रेषणं यत्समाहूय तत्र स्यात्प्रतिशासनम् ।
स संस्तावः क्रतुषु या स्तुतिभूमिर्द्विजन्मनाम् ॥३४॥

---

(१) चत्वारि निराकरणस्य । ['प्रत्याख्यान करना' 'नाहीं करना'] ।

(२) द्वे प्रहरकादौ पर्यायेण शयनस्य । [पारी२ से सोना] ।

(३) चत्वारि जुगुप्सनस्य, घृणायाः । ['घृणा करना' 'बुराई करना' 'निन्दा करना'] ।

(४) चत्वारि व्यत्यासस्य । ['अदला-बदला करना' हेरफेर करना, 'उलट फेर करना'] ।

(५) चत्वारि अतिक्रमस्य । ['उलङ्घना'] ।

(६) एकं भृत्यादेराहूय प्रेषणस्य । ['नौकर आदि को बुलाकर काम में लगाना'] ।

(७) एकं यज्ञे स्तावकद्विजावस्थानभूमेः । [यज्ञीयस्तुतिस्थल]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निघ्नाय तक्ष्यते यत्र काष्ठे काष्ठं-स उद्धनः ।
स्तम्बघ्नस्तु स्तम्बघनः स्तम्बो येन निहन्यते ॥३५॥
आविधो विध्यते येन, तत्र विष्वक्समे निधः ।
उत्कारश्च निकारश्च द्वौ धान्योत्क्षेपणार्थकौ ॥३६॥
[निगारो-द्वार-विक्षावो-द्वाहास्तु गरणादिषु] ।

---

(१) एकम् उद्धनस्य । [जिस काठ पर रखकर बढ़ई (खाती) लकड़ी काटता है, उसका नाम । 'उठगना'] ।

(२) तृणगुच्छादिच्छेदनस्य द्वे । ['रांपडा'] ।

(३) द्वे भ्रमरवेधनसूच्यादेः । [बढई का औजार–'वर्मी' वर्मा'] ।

(४) तुल्यारोहपरिणाहस्य वृक्षादेरेकमित्येके । 'वेधनभेदस्येति तु गौडाः । ['फैला हुआ वृक्ष' या बढ़ई का छेद करने का औजार] ।

(५) द्वे धान्यानामूर्ध्वं क्षेपणस्य । ['धान बर्साना' धानको साफ करने को ऊपर से गिराना'] ।

(६) निगरणस्यैकं । ['निगलना'] । उद्गारस्यैकं । [डकार लेना ।] विक्षवणस्यैकं । [छींकना] । उद्ग्रहणस्यैकम् । ['उगिलना'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

औरत्यवरतिविरतय उपरामेऽथास्त्रियान्तु निष्ठेवः ।
निष्ष्यूतिर्निष्ठीवनं निष्ठेवनमित्यभिघानि ॥ ३७ ॥
जवने जूतिः, सातिस्त्ववसाने स्यादथ ज्वरे जूतिः ।
उदजस्तु पशुप्रेरणमकरणिरित्यादयः शापे ॥३८॥
गोत्रान्तेभ्यस्तस्य वृन्दमित्यौपगवकादिकम् ।

---

(१) चत्वारि उपरतेः । ['उपराम होना' 'विरत होना' 'काम से अलग होना'] ।

(२) चत्वारि मुखेन श्लेष्मनिरसनस्य । तत्र–निष्ठेवः–अस्त्रियाम् । [थूकना] ।

(३) द्वे वेगस्य । ['वेग' वेग से चलाना'] ।

(४) द्वे समापनस्य । ['समाप्त होना' 'समाप्त करना'] ।

(५) द्वे ज्वरणस्य । ['बुखार आना] ।

(६) द्वे पशुप्रेरणस्य । [पशुओं को हांकना] ।

(७) 'अजननिः' 'अवग्राहः' 'निग्राह' इत्यादीनि शापे । ['तेरा जन्म वृथा हो' 'तूं नहीं जन्मता तो ही अच्छा था' इत्यादि शाप देना'] ।

(८) गोत्रप्रत्ययान्तेभ्यो 'वृन्द'मित्यर्थे = तस्य समूह इत्यर्थे' वुञ् भवति । तथाच–उपगोरपत्यानि औपगवाः, औपगवानां समूहः–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आपूपिकं शाष्कुलिकमेवमाद्यमचेतसाम् ॥ ३९ ॥
माणवानान्तु माणव्यं, सहायानां सहायता ।
हल्या हलानां, ब्राह्मण्य-वाडव्ये तु द्विजन्मनाम् ४०
द्वे पर्शुकानां पृष्ठानां पार्श्व-पृष्ठ्यमनुक्रमात् ।

औपगवकमित्यादि । [चेतनवाची गोत्रप्रत्ययान्त शब्द से समूह अर्थ में वुञ् प्रत्यय होता है । जैसे–औपगवकम्= औपगवों का समूह] ।

(१) अचेतनाऽपूपादिवृन्दे 'आपूपिकं' 'शाष्कुलिक' मित्यादि भवति । [अचेतनों से समूह अर्थ में ठक् होता है, जैसे 'आपूपिकम्' इत्यादि] ।

(२) एकं माणवकसमूहस्य । [माणवकों (बटुओं) का समूह] ।

(३) एकं सहायसमूहस्य । ['सहायकों का समूह'] ।

(४) एकं हलसमूहस्य । [हलों का समूह] ।

(५) द्वे ब्राह्मणसमूहस्य । ['ब्राह्मणों का समूह'] ।

(६) पर्शुकसमूहस्यैकम् । [पर्शुओं का समूह] । पृष्ठसमूहस्य चैकम् । ['पृष्ठों का समूह'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]खलानां खलिनी खल्याऽप्यथ[2] मानुष्यकं नृणाम् ४१
[3]ग्रामता जनता धूम्या पाश्या गल्या पृथक् पृथक् ।
[4]अपि साहस्र-कारीष-चार्मणा-ऽऽथर्वणादिकम् ॥४२॥

॥ इति सङ्कीर्णवर्गः ॥ २ ॥



---

(१) द्वे खलसमूहस्य । [खलिहानों का समूह] ।

(२) एकं मनुष्यसमूहस्य । [मनुष्यों का झुण्ड] ।

(३) ग्राम-जन-धूम-पाश-गलसमूहे पृथगेकैकम् । [ग्रामों का समूह, प्रजाजनों का झुण्ड, धूम समूह, पाशों (फन्दों) का समूह, गलों का समूह] ।

(४) सहस्राणां, करीषाणां, चर्मणामथर्वणाञ्च समूहे एकैकम् । [हजारों का समूह, करीषों का (गोहरियों, का छाणों का) समूह, चमड़ों का समूह, अथर्ववेदियों का समूह] ।

॥ इति सङ्कीर्णवर्गः ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ अथ नानार्थवर्गः ॥ ३ ॥ ❀

नानार्थाः केऽपि कान्तादिवर्गेष्वेवाऽत्र कीर्तिताः ।
भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते ॥ १ ॥

आकाशे त्रिदिवे नाको, लोकस्तु भुवने जने ।

(१) केऽपि नानार्था अत्र कान्तखान्तादिवर्गेषु एव कथिताः, न पूर्ववर्गेषु । यथा–'क'शब्दः । ये च शब्दा येषु पर्यायेषु प्रचुर प्रयोगाः–ते तेषु पूर्वत्र कथिताः । अपिशब्दादत्र कान्तादिवर्गेऽपि च कथिताः । यथा नाकशब्दः स्वर्गे प्रचुरप्रयोग इति स्वर्गपर्यायेषु पूर्वमुक्तः अत्र कान्तवर्गेपि च उक्त इति । [कुछ नानार्थ शब्द तो पहिले नहीं कहे गए भी यहाँ कहे जाएगें । जैसे–'क' शब्द । और कुछ नानार्थ शब्द–जहाँ उनका प्रचुर प्रयोग होता है, वहाँ भी कहे गए हैं, और यहाँ भी कहे गए हैं, विशेष अर्थ बताने के लिए । जैसे–'नाक' शब्द] ।

(२) आकाशे. स्वर्गे च–नाकः । ['नाक'—स्वर्ग और आकाश] ।

(३) भुवने, जने च—लोकः । ['लोक'–१४ भुवन और प्रजा, जनता] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पद्ये[1] यशसि च श्लोकः, शरे[2] खड्गे च सायकः ॥२॥
जम्बुकौ[3] क्रोष्टु-वरुणौ, पृथुकौ[4] चिपिटा-ऽर्भकौ ।
आलोकौ[5] दर्शनो-द्द्योतौ, भेरी-पटहमानकौ[6] ॥३॥
उत्सङ्ग-चिह्नयोरङ्कः[7], कलङ्को[8]-ऽङ्का-ऽपवादयोः ।

(१) पद्ये, यशसि च-श्लोकः । ['श्लोकः'-पद्य और यश]।

(२) बाणे, खड्गे च-सायकः । [सायक-बाण और खड्ग]।

(३) शृगाले, वरुणे च जम्बुकः । ['जम्बुक'-शृगाल, वरुण, नीच, कायर]।

(४) चिपिटे, बाले च-पृथुकः । ['पृथुक'-चिउडा और बालक]।

(५) दर्शन-प्रकाश-वन्दिजनभाषणेषु-आलोकः । [आलोक-दर्शन, उजेला, वन्दी चारणों का प्रशंसा विषयकशब्द और जयशब्द]।

(६) भेर्यां, पटहे, मृदङ्गे, ध्वनदम्बुदे च-आनकः । ['आनक'-भेरी (नगाड़ा), पटह (तासा), मृदंग, गर्जता हुआ मेघ]।

(७) उत्सङ्गचिह्नयोः, रूपकविशेषाऽपराधचिह्नरेखाऽऽजिभूषणरूपकाऽग्रसमीपेषु च अङ्कः । ['अङ्क'-गोद, चिह्न, नाटकविशेष, अपराध, रेखा, नाटक का १ भाग, समीप,]।

(८) 'कलङ्कोऽङ्केऽपवादे च कालायसमलेपि चे'ति मेदिनी । [कलङ्क-चिह्न, अपवाद, लोहे का कीट (मल)]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तक्षको नाग-वर्द्धक्योरर्कः स्फटिक-सूर्ययोः ॥४॥
[3]मारुते वेधसि ब्रध्ने पुंसि कः, कं शिरो-ऽम्बुनोः ।
[4]स्यात्पुलाकस्तुच्छधान्ये सङ्क्षेपे भक्तसिक्थके ॥ ५ ॥
[5]उलूके करिणः पुच्छमूलोपान्ते च पेचकः ।

---

(१) सर्पभेदे, वर्द्धकौ च तक्षकः । [तक्षक–तक्षक सर्प, बढ़ई (खाती)] ।

(२) 'अर्कोऽर्कपर्णे स्फटिके रवौ ताम्रे दिवस्पतौ' इति मेदिनी । [अर्क–स्फटिक, सूर्य, आक (मदार), ताम्बा, इन्द्र] ।

(३) 'कं ब्रह्मणि समीरात्मयमदक्षेषु भास्करे । मयूरेऽग्नौ च पुंसि स्यात्सुखशीर्षजलेषु कम्–' इति मेदिनी । अत्र ब्रध्नः=सूर्यः । [कं० (पुं०)–वायु, ब्रह्मा, सूर्य, आत्मा, यम, दक्ष प्रजापति, मोर, अग्नि]–[कं०–(नपुं०)–शिर, जल, सुख] ।

(४) तुच्छधान्यादिषु–पुलाकः । [भक्तसिक्थक = भात की किनकी । पुलाक–छोटाधान्य विशेष, सङ्क्षेप, भात की किनकी] ।

(५) उलूकहस्तिपुच्छप्रान्तभागयोः–पेचकः । [पेचक–उल्लू, हाथी की पोंछ के पास का भाग] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कमण्डलौ च करकः,[२] सुगते च विनायकः ॥६॥
[३]किष्कुर्हस्ते वितस्तौ च, शूकः[४]कीटे च वृश्चिकः ।
प्रतिकूले प्रतीकस्त्रिष्वेकदेशे तु पुंस्ययम् ॥७॥

---

(१) 'करकस्तु-पुमान् पक्षिविशेषे दाडिमेऽपि । द्वयोर्मेघोपले, न स्त्री करङ्के च कमण्डलौ'-इति मेदिनी । [करक-पक्षिभेद, अनार, ओला, अस्थिकङ्काल, कमण्डलु (करुआ)] ।

(२) 'विनायकस्तु हेरम्बे तार्क्ष्ये विघ्ने जिने गुरौ' इति मेदिनी । [विनायक-गणेशजी, गरुड, विघ्न, बुद्ध, गुरु] ।

(३) 'किष्कुर्द्वयोर्वितस्तौ च सप्रकोष्ठकरेपि च' इति मेदिनी । [किष्कु-१ हाथ, २ वित्ता, (२ विलान्द)] ।

(४) वृश्चिकस्तु द्रुणौ राशौ शूककीटौषधीभिदोः, इति मेदिनी । [वृश्चिक-विच्छू, वृश्चिकराशि, शूक (डंक) वाला कीटविशेष, ओषधिभेद] ।

(५) 'प्रतीकोऽवयवेऽपि स्यात्प्रतिकूलविलोमयोः' इति मेदिनी । तत्र एकदेशे-पुंसि, अन्यत्र त्रिषु । [प्रतीक-विरुद्ध, शरीर आदि का अवयव, उलटा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्याद्भूतिकं तु भूनिम्बे कत्तृणे भूस्तृणेऽपि च ।
[2]ज्योत्स्निकायाञ्च घोषे च कोशातक्यथ कट्फले[3]॥८॥
सिते च खदिरे सोमवल्कः स्यादथ[4] सिह्लके ।
तिलकल्के च पिण्याको, बाह्लीकं रामठेऽपि च ॥९॥

---

(१) 'स्याद्भूतिकन्तु भूनिम्बे दीप्य-भूस्तृण-कत्तृणे' इति मेदिनी । [भूतिक–मोर शिखा, भूनिम्ब (चिरायता), कत्तृण (रोहिष घास), भूस्तृण (मालाकार घास)] ।

(२) ज्योत्स्निका=पटोलिका (तरोई साक), घोषः–(ननुआ) अपामार्ग इति केचित् । 'कोशातकः कचे पुंसि पटोल्यां घोषके स्त्रियाम्' इति मेदिनी । [कोशातकी–तरोई, भिण्डी, घीया, नेनुआ साक, (अपामार्ग)] ।

(३) सितखदिर-कट्फलयोः सोमवल्कः । [सोमवल्क–सफेद खैर, कायफल] ।

(४) 'पिण्याकोऽस्त्री तिलकल्के हिङ्गुबाह्लीक-सिह्लके' इति मेदिनी । [पिण्याक–तिल का चूर्ण, खली, हींग, सिह्लक, केशर, कुंकुम] ।

(५) 'बाह्लीकं–बाह्लिकं धीर-हिङ्गुनोर्नाऽश्वदेशयो'रितिरभसः । [बाह्लीक–केसर (कुंकुम), हींग, धीर, घोड़ों का देश (बलख देश), और बलख देश का बढ़िया अर्बी घोड़ा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महेन्द्र-गुग्गुलू-लूक-व्यालग्राहिषु कौशिकः ।
रुक्-ताप-शङ्कास्वातङ्कः, स्वल्पेऽपि क्षुल्लकस्त्रिषु ॥१०॥
जैवातृकः शशङ्केऽपि, खुरेऽप्यश्वस्य वर्त्तकः ।

---

(१) महेन्द्रः=इन्द्रः । व्यालग्राही=आहितुण्डिकः [सँपेरा]। 'कौशिको नकुले व्यालग्राहे गुग्गुल-शक्रयोः । विश्वामित्रे च कोश-ज्ञोलूकयोरपि कौशिकः'-इति विश्वः । [कौशिक-इन्द्र, गूगल, उल्लू, सँपेरा (मदारी, कालवेलिया), नकुल, विश्वामित्र, कोश का ज्ञाता] ।

(२) 'आतङ्को-रोग सन्ताप-शङ्कासु मुरजध्वनौ' इति मेदिनी-कोशः । [आतङ्क-रोग, सन्ताप, शङ्का, मृदङ्ग ध्वनि] ।

(३) 'क्षुल्लकस्त्रिषु नीचेऽल्पे' इति मेदिनी । [क्षुल्लक-नीच, अत्यन्त स्वल्प, बहुत थोड़ा] ।

(४) 'जैवातृकः-पुमान्त्सोमे दीर्घायुः-कृशयोरपि' इति मेदिनीकोशः । [जैवातृक-चन्द्र, दीर्घायु, कृश] ।

(५) 'वर्त्तकस्तु खुरेऽश्वस्य, विहगे वर्त्तिका द्वयो'रिति मेदिनीकोशः । [वर्त्तक-घोड़े का खुर, बटेर] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्याघ्रेऽपि पुण्डरीको ना, यवान्यामपि दीपकः ॥११॥
शालावृकाः कपि क्रोष्टु-श्वानः, स्वर्णेऽपि गैरिकम् ।
पीडार्थेऽपि व्यलीकं स्यादलीकं त्वप्रियेऽनृते ॥१२॥

---

(१) 'पुण्डरीकः-सिताम्भोजे सितच्छत्रे च भेषजे । पुंसि व्याघ्रेऽग्निदिङ्नागे कोशकारान्तरेऽपि चे' ति मेदिनीकोशः । [पुण्डरीक—श्वेतकमल, श्वेतच्छत्र, ओषधि, व्याघ्र, अग्निकोण का दिग्गज, कोशकार जन्तु (रेशम का कीडा)] ।

(२) दीपकं-वागलङ्कारे वाच्यवद्दीप्तिकारके । दीपकश्चाजमोदायां यवानीबर्हिचूडयोः' इति मेदिनीकोशः । [दीपक-अजवाइन, दीप, दीपकालङ्कार, उद्दीपक, अजमोदा, मोरशिखा ओषधि] ।

(३) वानर-जम्बुक-कुक्कुरेषु शालावृकः । [शालावृक-बन्दर, गीदड़, कुत्ता] ।

(४) 'गैरिकं-धातु-रुक्मयोः' इति मेदिनीकोशः । [गैरिक-गेरू, सोना] ।

(५) 'व्यलीको नागरे स्मृतः । व्यलीकमप्रियाऽकार्यवैलक्ष्ये-ष्वपि पीडने' इति विश्वः । [व्यलीक-पीडा, दुःख, अप्रिय, अकार्य, वैलक्ष्य (आश्चर्य, लज्जा) नागर (चतुर)] ।

(६) 'अलीकमप्रियेऽपि स्याद्बोध्यसत्ये नपुंसकम्'—इति मेदिनीकोशः । [अलीक-अप्रिय, ललाट, झूठ] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शीला-न्वयावनूके, द्वे शल्के शकल-वल्कले ।
साऽष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले ॥ १३ ॥
दीनारेऽपि च निष्कोऽस्त्री, कल्कोऽस्त्री शमलै-नसोः ।
दम्भेऽप्यथ पिनाकोऽस्त्री शूल-शङ्करधन्वनोः ॥१४॥

---

(१) 'अनूकन्तु कुले शीले पुंसि स्याद्गतजन्मनि' इति मेदिनीकोशः । ['अनूक'—कुल, शील, गतजन्मा—(वृद्ध)] ।

(२) शल्कं—खण्डम्, वल्कलं—त्वक् । [शल्क—टुकड़ा, वल्क—छिलका] ।

(३) 'निष्कमस्त्री साऽष्टहेमशते दीनारकर्षयोः । वक्षोऽलङ्करणे हेममात्रे हेमपलेऽपि चे'ति मेदिनी । (दीनार—मोहर) । [निष्क—१०८ तोला सोना, सोने की मोहर, १ तोला सोना, गले का कण्ठा, हार, सोना, ४ या ५ तोला सोना] ।

(४) 'कल्कोऽस्त्री घृततैलादिशेषे दम्भेऽविनीतके । विट् किट्टयोश्च पापे च त्रिषु पापाशये पुनः' इति मेदिनी । [कल्क—पिट्ठी, दम्भ, अविनीत, विष्ठा, किट्ट, पाप, पापी] ।

(५) 'पिनाकोऽस्त्री रुद्रचापे पांशुवर्ष—त्रिशूलयोः' इति मेदिनी । [पिनाक—शिवजी का धनुष, त्रिशूल, धूलिवर्षा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धेनुका[1] तु करेण्वाश्च, मेघजाले[2] च कालिका ।
कारिका[3] यातना-वृत्योः, कर्णिका[4] कर्णभूषणे ॥१५॥
करिहस्तेऽङ्गुलौ पद्मबीजकोश्यां, त्रिषूत्तरे[5] ।

---

(१) करेणुर्धन्वोर्धेनुका । ['धेनुका'-हथिनी, धेनु] ।

(२) 'कालिका चण्डिकाभेदे कार्ष्ण्ये वृश्चिकपत्रयोः । क्रमदेये वस्तुमूल्ये धूसरी-नवमेघयोः । पटोलशाखा-रोमाली-मांसीकाकी-शिवासु च । मेघावलौ च' इति मेदिनी । [कालिका-काली,कालुष्य, खन्धीसे = किस्त से ऋण का रुपया देना, नवीन मेघ, मेघमण्डल, काकी, जम्बुकी, रोमावली, ओषधिभेद] ।

(३) 'कारिका नटयोर्षिति । कृतौ विवरणश्लोके शिल्पयातनयोरपि । नपुंसकन्तु कर्मादौ,कारकं कर्त्तरि त्रिषु'इति मेदिनी । 'यातना-कृत्यो' रित्यपि पाठः । [कारिका-पीडा, कृति, व्याख्या, श्लोक, शिल्प, आदि] ।

(४) 'कर्णिका करिहस्ताग्रे करमध्याङ्गुलावपि । क्रमुकादिच्छटांशेऽब्जवराटे कर्णभूषणे' इति मेदिनी । [कर्णिका-कान का आभूषण (बाली, लूंग झूमका आदि), हाथी की सूंड का अग्रभाग, मध्यमा अङ्गुलि,कुट्टनी,कमलका बीचका भाग, वृक्षोंका अग्रभाग] ।

(५) खान्तेभ्यः प्रागुत्तरे त्रिषु ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृन्दारकौ रूपि-मुख्यावेके मुख्या[2]-न्य-केवलाः ॥१६॥
[3]स्याद्दाम्भिकः कौक्कुटिको यश्चाऽदूरेरितेक्षणः ।
[4]लालाटिकः प्रभोर्भालदर्शी कार्याऽक्षमश्च यः ॥१७॥
[भूभृन्नितम्ब-वलय-चक्रेषु कटकोऽस्त्रियाम् ।

(१) वृन्दारकं-सुरे पुंसि मनोज्ञ-श्रेष्ठयोस्त्रिषु' इति मेदिनी। [वृन्दारक-सुन्दर, मनोहर, श्रेष्ठ, देवता]।

(२) 'एकं संख्यान्तरे श्रेष्ठे केवलेतरयोस्त्रिषु' इति मेदिनी। [एक-एक, श्रेष्ठ, केवल, कोई एक]।

(३) नीचैर्लोचनो दाम्भिकश्च-कौक्कुटिकः। 'अथ कौक्कुटिकोऽदूरप्रेरिताक्षे च दाम्भिके' इति मेदिनी। [कौक्कुटिक-दम्भी, नीची नजर रखने वाला]।

(४) 'लालाटिकः प्रभोर्भालदर्शिन्याश्लेषणाऽन्तरे। कार्याऽक्षमे'-इति मेदिनी। 'भावदर्शी'त्यपि पाठः क्वचित्। 'लालाटिकः सदाऽऽलस्ये प्रभोर्भावनिदर्शिनी'त्यजयकोशात्। [लालाटिक-आज्ञार्थ मालिक के मुखको ओर देखने वाला, जी हजूर, कार्य करने में अक्षम, केवल मुख ताकने वाला, आलसी, काम शास्त्रोक्त आलिङ्गन]

(५) पर्वतनितम्ब-वलय-चक्रेषु-कटकः। 'कटकोऽस्त्री

[1 एतच्चिह्नान्तर्गताः २२ श्लोकपर्यन्तं पञ्च श्लोकाः प्रक्षिप्ताः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टकः ॥१८॥
[2]पाकौ पक्ति-शिशू, [3]मध्यरत्ने नेतरि नायकः ।
[4]पर्यङ्कः स्यात्परिकरे, [5]स्याद्व्याघ्रेऽपि च लुब्धकः ॥१९॥

नितम्बोऽद्रेर्दन्तिनां दन्तमण्डले । सामुद्रलवणे, राजधानी-वलययो रपि' इति मेदिनी । [कटक--पर्वत का नितम्ब (बीच का) भाग, कड़ा, चक्र, हाथी का दन्तमण्डल, समुद्री लवण, राजधानी, छावनी, वलय = गोल कड़ा] ।

(१) सूच्यग्रभाग-क्षुद्रशत्रु-रोमाञ्चेषु—कण्टकः । 'कण्टको न स्त्रियां क्षुद्रशत्रौ मत्स्यादिकीकसे । नैयायिकादिदोषोक्तौ स्याद्रोमाञ्च-द्रुमाङ्गयोः' इति मेदिनी । [कण्टक-क्षुद्रशत्रु, कांटा, रोमाञ्च, मछली का कांटा, न्यायशास्त्रोक्त दोष विशेष, समूह का अग्रभाग] । (२) पाकबालयोः-पाकः । [पाक-पाक, (अन्नपकाना), बालक] । (३) हारमध्यमणौ, नेतरि च नायकः । [हार के बीच की बड़ी मणि, नेता] ।

(४) 'मञ्चके परिकरे च पर्यङ्कः । 'पर्यङ्को-मञ्च-पर्यङ्क-वृषीपर्यस्तिकासु च' इति मेदिनी । [पर्यङ्क-मञ्चक, परिकर, आसन, 'पीढा' 'कुर्सी' पालथी] ।

(५) व्याघ्रे, व्याधे च- लुब्धकः । [लुब्धक-व्याघ्र, व्याध, बहेलिया] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पेटकस्त्रिषु वृन्देऽपि, गुरौ देश्ये च देशिकः ।
खेटकौ ग्राम-फलकौ, धीवरेऽपि च जालिकः ॥२०॥
पुष्परेणौ च किञ्जल्कः, शुल्कोऽस्त्री स्त्रीधनेऽपि च ।
स्यात्कल्लोलेऽप्युत्कलिका, वार्द्धकं भाव-वृन्दयोः २१

---

(१) वृन्दे मञ्जूषायाञ्च-पेटकः । [पेटक-समूह, पिटारी, पेटी, सन्दूक] ।

(२) देशभवाचार्ययोर्देशिकः । [देशिक-गुरु, आचार्य, देशवासी] । (३) ग्रामे चर्मफलके च खेटकः । [खेटक-गाँव, खेड़ा, ढाल] । (४) धीवरेऽपि जालिकः । ['जालिको वाच्यवद् ग्रामजालि-जालोपजीविनोः' इति मेदिनी । [जालिक-धीवर, ग्रामजाली] । (५) केसर-पुष्परेणवोः—किञ्जल्कः । [किञ्जल्क-पुष्प केसर, पुष्प पराग] ।

(६) घट्टादिदेये, स्त्रीधनेऽपि च शुल्कः । [शुल्क-फीस, महसूल, विवाह विशेष में श्वसुर आदि को देय धन स्त्री, धन] ।

(७) उत्कण्ठायां, कल्लोले च उत्कलिका । [उत्कलिका-उत्कण्ठा, बड़ी लहर, हेला (स्त्री का हाव भाव कटाक्ष)] ।

(८) वृद्धानां वृन्दं, वृद्धस्य भावो वा—वार्द्धकम् । [वार्द्धक-वृद्धों का समूह, बुढ़ापा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]करिण्याऽञ्चापि गणिका, [2]दारकौ बाल-भेदकौ ।
[3]अन्धेऽप्यनेडमूकः स्याट्टङ्कौ[4] दर्पा-ऽश्मदारणौ॥२२॥]

[इति कान्तवर्गः ॥]

[5]मयूखस्त्विट्-कर-ज्वालास्वलि-बाणौ शिलीमुखौ ।
[6]शङ्खो निधौ ललाटास्थि कम्बौ न स्त्रीन्द्रियेऽपि खम् ॥

---

(१) करिणी-वेश्ययोर्गणिका । [गणिका-वेश्या, हथिनी, जूही, ओषधि विशेष (जया)] ।

(२) बालक-भेदकयोर्दारकः । [दारक-बालक, फाडनेवाला]।

(३) अन्धे, वक्तुं श्रोतुं चाऽसमर्थेऽनेडमूकः । [अनेडमूक-अन्धा, गूँगा बहरा] ।

(४) गर्वेऽश्मभेदने च टङ्कः । [टङ्क-अभिमान, टांकी] ।

(५) 'मयूखः- किरणेऽपि च । ज्वालायामपि शोभायाम्' इति मेदिनी । [मयूख-किरण, ज्वाला, शोभा] ।

(६) भ्रमर-बाणयोः-शिलीमुखः । [शिलीमुख-भ्रमर, बाण] ।

(७) 'शङ्खः-कम्बौ न योषिन्ना भालास्थिन निधिभित् नखे' इति मेदिनी । [शङ्ख-निधिविशेष, नख, कनपटी, शङ्ख] ।

(८) 'खमिन्द्रिये पुरे क्षेत्रे शून्ये बिन्दौ विहायसि । संवेदने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घृणि-ज्वाले अपि शिखे—

(इति खान्तवर्गः) ।

—[2]शैल-वृक्षौ नगावगौ ।

[3]आशुगौ वायु-विशिखौ, [4]शरा-ऽर्क-विहगाः खगाः ॥२४॥

[5]पतङ्गौ पक्षि-सूर्यौ च, [6]पूगः क्रमुक-वृन्दयोः ।

देवलोके शर्मण्यपि नपुंसकम्' इति मेदिनी । [ख—इन्द्रिय, नगर, क्षेत्र, शून्य, बिन्दु, आकाश, स्वर्ग, सुख, ज्ञान] ।

(१) 'शिखा—ज्वालाबर्हिचूडालाङ्गलिक्यग्रमात्रके । चूडामात्रे शिफायाञ्च ज्वालायां प्रपदेपि च' इति मेदिनी । [शिखा—किरण, ज्वाला, चोटी, अग्रभाग, कलिहारी, पैर का अग्रभाग] ।

(२) 'नगो महीरुहे शैले भास्करे पवनाशने' इति मेदिनी । नगवत्—अगोऽपि । [नग, अग—वृक्ष, पर्वत, सूर्य, सर्प] ।

(३) वायु-बाणावाशुगौ । [आशुग—वायु, बाण] ।

(४) 'खगः सूर्ये ग्रहे देवे मार्गणे च विहङ्गमे' इति मेदिनी । [खग—सूर्य, ग्रह, देव, पक्षी, बाण] ।

(५) पतङ्गः—शलभे शालिप्रभेदे पक्षिसूर्ययोः । क्लीबे सूते' इति मेदिनी । [पतङ्ग—पक्षी, सूर्य, पतङ्ग, टिड्डी, पारा] ।

(६) क्रमुकवृक्षे वृन्दे च—पूगः । [पूग—सुपारी, समूह आदि] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पशवोऽपि मृगा, वेगः प्रवाह-जवयोरपि ॥ २५ ॥
परागः कौसुमे रेणौ स्नानीयादौ रजस्यपि ।
गजेऽपि नाग-मातङ्गावपाङ्गस्तिलकेऽपि च ॥ २६ ॥

(१) 'मृगः पशौ कुरङ्गे च करिनक्षत्रभेदयोः । अन्वेषणायां, याच्ञायां, मृगी तु वनितान्तरे' इति मेदिनी । [मृग–पशु, हरिण, हाथी की जाति विशेष, मृगशिरा नक्षत्र, खोजना, माँगना] ।

(२) 'वेगो रयप्रवाहयोः । रेतः क्लिन्नाकयोश्चापि' इति हैमः । [वेग–वेग, प्रवाह, वीर्य, कुचला] ।

(३) 'परागः–कौसुमे रेणौ धूलिस्नानीययोरपि । गिरिप्रभेदे विख्यातावुपरागे च चन्दने' इति मेदिनी । [पराग–पुष्परेणु, धूलि, स्नानोपयोगी लोढा, सुगन्धित चूर्ण, कीर्त्ति, ग्रहण लगना, चन्दन, पर्वत विशेष] ।

(४) 'नागं नपुंसके रङ्गे सीसके करणान्तरे । नागः पन्नग-मातङ्गक्रूराचारिषु तोयदे । नागकेसरपुन्नाग-नागदन्तकमस्तके । देहाऽनिलप्रभेदे च श्रेष्ठे स्यादुत्तरे स्थितः' इति मेदिनी । [नाग–रांगा, सीसा, सर्प, हाथी, क्रूर, मेघ, नागकेसर, पुन्नाग] ।

'मातङ्गः श्वपचे गजे' इति मेदिनी । [मातङ्ग–हाथी, चाण्डाल] ।

(५) 'अपाङ्गस्त्वङ्गहीने स्यान्नेत्रान्ते तिलकेऽपि च' इति मेदिनी । [अपाङ्ग–अपङ्ग, आँख का कोना, तिलक] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्गः[1] स्वभाव-निर्मोक्ष-निश्चया-ऽध्याय-सृष्टिषु ।
योगः[2] संनहनो-पाय-ध्यान-सङ्गति-युक्तिषु ॥ २७ ॥
भोगः[3] सुखे स्त्र्यादिभृतावहेश्च फण-काययोः ।

---

(१) 'सर्गस्तु निश्चयाध्यायमोक्षोत्साहात्मसृष्टिषु' इति मेदिनी । (मूले-निर्मोक्षः=त्यागो, मोक्षश्च) । [सर्ग-निश्चय, अध्याय, मोक्ष, उत्साह, स्वभाव, सृष्टि, आत्मा] ।

(२) 'योगोऽपूर्वार्थसम्प्राप्तौ सङ्गतिध्यानयुक्तिषु । वपुःस्थैर्य-प्रयोगे च विष्कम्भादिषु मेषजे । विस्रब्धघातके द्रव्योपायसन्नहनेष्वपि । कार्मणेऽपि च' इति मेदिनी । मूले-सन्नहनं = कवचम् । उपायः = सामदानादिरुपायः । [योग-सङ्गति, युक्ति, चित्तवृत्ति निरोध, दैवयोग, प्रयोग, योग, औषध, जादू टोना, द्रव्य, सामदानादि उपाय तैयारी] ।

(३) 'भोगः-सुखे धने चाहेः शरीरफणयोर्मतः । पालनेऽभ्यवहारे च निर्वेशे पण्ययोषिताम् ॥' इति विश्वः । [भृतिः=भाडा] [भोग-सुख, धन, साँप का फण और शरीर, पालन, भोजन, वेश्या आदि की फीस तनखाह, बन्धान, भाड़ा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चातके हरिणे पुंसि सारङ्गः शबले त्रिषु ॥२८॥
कपौ च प्लवगः, शापे त्वभिषङ्गः पराभवे ।
योनाद्यङ्गे युगः पुंसि, युगं युग्मे कृतादिषु ॥२९॥
स्वर्गे-षु-पशु-बाण-वज्र-दिङ्-नेत्र-घृणि-भू-जले ।

(१) 'सारङ्गः पुंसि-हरिणे चातके च मतङ्गजे । शबले त्रिषु' इति मेदिनी । [सारङ्ग—चातक, हरिण, चित्ररङ्ग, हाथी] ।

(२) 'प्लवगो वानरे भेके सारथौ चोष्णदीधितेः' इति मेदिनी । [प्लवग—बन्दर, मेंढक, सूर्य का सारथि अरुण] ।

(३) अभिषङ्गः—पराभवाऽऽक्रोशशपथेषु पुंसि । [अभिषङ्ग—शाप, पराभव, शपथ निन्दा, गाली] ।

(४) 'युगो हलाद्यङ्गे न द्वयोस्तु कृतादिषु । युग्मे हस्तचतुष्केऽपि वृद्धिनामौषधेऽपि चे'ति मेदिनी । [युग—हल व रथ बैल गाड़ी आदि का अंग (जूवा), सत्ययुग आदि युग, जोड़ी, ४ हाथ, वृद्धि औषधि] ।

(५) 'गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान् । स्त्री सौरभेयी-दृग्बाणदिग्वाग्भूष्वप्सु भूम्नि चे'ति मेदिनी । लक्ष्यदृष्ट्योरितिपाठे—प्रयोगानुसारेण स्त्रियां पुंसि च गोशब्दो बोध्य इत्यर्थः । 'लक्ष्यदृष्ट्यो'रिति पाठान्तरम् । [गौः—स्वर्ग, बाण, गाय, बैल, वाणी, वज्र, दिशा, नेत्र, किरण, पृथिवी, जल, लक्ष्य, दृष्टि] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लक्ष्य-दृष्ट्योः स्त्रियां पुंसि गौर्लिङ्गं[1] चिह्न-मेफसोः ॥३०॥
शृङ्गं[2] प्राधान्य-सान्वोश्च, वराङ्गं[3] मूर्ध-गुह्ययोः ।
भगं[4] श्री-काम-माहात्म्य-वीर्य-यत्ना-र्क-कीर्तिषु ॥३१॥

❀ इति गान्ताः ❀

---

(१) 'लिङ्गं चिह्नेऽनुमाने च साङ्ख्योक्तप्रकृतावपि । शिवमूर्त्तिविशेषे च मेहनेऽपि नपुंसकम् ।' इति मेदिनी [लिङ्ग—चिह्न, पुरुषलिंग, अनुमान, हेतु, प्रकृति, शिवलिङ्ग] ।

(२) 'शृङ्गं—प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके । विषाणोत्कर्षयोश्चाऽथ शृङ्गः स्यात्कूर्चशीर्षके । स्त्री विषायां स्वर्णमीनभेदयोः ऋषभौषधौ' इति मेदिनी । [शृङ्ग—प्रभुत्व, पर्वत शिखर, सींग, पिचकारी, उत्कर्ष] ।

(३) 'वराङ्गं योनिमातङ्गमस्तकेषु गुडत्वचि ।' इति मेदिनी । [वराङ्ग—योनि, मस्तक, हाथी, ओषधिभेद] ।

(४) 'भगं—श्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्त्तिषु । माहात्म्यैश्वर्ययत्नेषु धर्मे मोक्षेऽथ ना रवौ ॥' इति मेदिनी । [भग—श्री, योनि, शोभा, ऐश्वर्य, यश, वीर्य, इच्छा, ज्ञान, वैराग्य, कीर्त्ति, प्रभाव, यत्न, धर्म, मोक्ष, रवि] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिघः परिघातेऽस्त्रेऽप्योघो वृन्देऽम्भसां रये ।
मूल्ये पूजाविधावर्घोऽहो-दुःख-व्यसनेष्वघम् ॥३२॥
त्रिष्विष्टेऽल्पे लघुः—

❀ इति घान्ताः ❀

—काचः शिक्य-मृद्भेद-दृ-ग्रुजः ।

---

(१) 'परिघो योगभेदेऽस्त्रविशेषेऽर्गलघातयोः' इति मेदिनी । [परिघ—परिघ-योग, अर्गला, 'आगल' घात] ।

(२) 'ओघो वेगे जलस्य च । वृन्दे परम्परायाश्च द्रुतनृत्यो-पदेशयोः' इति मेदिनी । [ओघ-जलका वेग, समूह, परम्परा, द्रुत, नृत्यका उपदेश] ।

(३) मूल्ये पूजाविधौ च-अर्घः । [अर्घ-मूल्य, पूजाविधि विशेष = अर्घ] ।

(४) दुष्कृतदुःखव्यसनेषु-अघम् । [अघ-पाप, दुःख, व्यसन] ।

(५) इष्टेऽल्पे च त्रिषु-लघुः । [लघु-इष्ट अल्प, द्रुत] ।

(६) 'काचः शिक्ये मणौ नेत्ररोगभेदे मृदन्तरे' । [काच-काच (सीसा), मोतिया बिन्द, छींका, मट्टीविशेष] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विपर्यासे विस्तरे च प्रपञ्चः, पावके शुचिः ॥३३॥
मास्यमात्ये चात्युपधे पुंसि मेध्ये सिते त्रिषु ।
अभिष्वङ्गे स्पृहायां च गभस्तौ च रुचिः स्त्रियाम् ॥३४॥

❀ इति चान्ताः ❀

प्रसन्ने भल्लुकेऽप्यच्छो, गुच्छः स्तबक-हारयोः ।
परिधानाऽञ्चले कच्छो जलप्रान्ते त्रिलिङ्गकः ॥

❀ इति छान्ताः ❀

---

(१) 'प्रपञ्चः सञ्चयेऽपि स्याद्विस्तरे च प्रतारणे' इति मेदिनी । [प्रपञ्च-सञ्चय, तिकड़मबाजी, ठगी, विस्तर प्रपञ्च, फैलाव,] ।

(२) 'शुचिर्ग्रीष्माग्निशृङ्गारेष्वाषाढे शुद्धमन्त्रिणि । ज्येष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिषु' इति मेदिनी । [शुचि-आषाढ़, अग्नि, ग्रीष्म, शृङ्गार, परीक्षित शुद्ध मन्त्री आदि, श्वेत, शुद्ध, पवित्र, साफ, निर्मल] ।

(३) आलिङ्गने स्पृहायां दीप्तौ, शोभायाञ्च स्त्रियां-रुचिः । [रुचि-आलिङ्गन, इच्छा, छबि, शोभा] ।

(४) स्वच्छे भल्लूकेऽच्छः । [अच्छ-स्वच्छ, भालू, अच्छा]।

(५) स्तबकहारयोर्गुच्छः । [गुच्छ-हार, गुच्छा] ।

(६) वस्त्राञ्चले पुंसि, जलप्रान्ते च त्रिषु-कच्छः । [कच्छ-लांग, कच्छा, जल का प्रान्त भाग, कच्छ देश] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]केकि-तार्क्ष्यावहिभुजौ, [2]दन्त-विप्रा-ऽण्डजा द्विजाः ।
[3]अजा विष्णु-हर-च्छागा, [4]गोष्ठा-ध्व-निवहा व्रजाः ३६
[5]धर्मराजौ जिन-यमौ, [6]कुञ्जो दन्तेऽपि न स्त्रियाम् ।

---

(१) मयूरगरुडावहिभुजौ । [अहिभुक्-मयूर, गरुड] ।

(२) अण्डजाः=पक्षिणः । 'द्विजः स्याद् ब्राह्मणक्षत्रवैश्य-दन्ताऽण्डजेषु ना । द्विजा भार्य्या हरेणौ च'—इति मेदिनी । [द्विज—दांत, ब्राह्मण आदि द्विजाति, ब्राह्मण, पक्षी] ।

(३) 'अजो हरौ हरे कामे विधौ छागे रघोः सुते' इति विश्वः । [अज—हरि, शिव, कामदेव, ब्रह्मा, बकरा, रघु का पुत्र अज] ।

(४) 'व्रजो गोष्ठाऽध्व-वृन्देषु' इति मेदिनी । गोस्थान-मार्गसमूहेषु व्रजः । [व्रज—गोष्ठ, मार्ग, समूह] ।

(५) 'धर्मराजो यमे बुद्धे युधिष्ठिरनृपे पुमान्' इति मेदिनी । [धर्मराज—यम, युधिष्ठिर, बुद्ध] ।

(६) 'कुञ्जोऽस्त्रियां निकुञ्जेऽपि हनौ दन्तेऽपि दन्तिनाम्' इति मेदिनी । [कुञ्ज—निकुञ्ज, हाथी का दांत, हनु (जबड़ा)] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

वलजे[1] क्षेत्र-पूद्वारे, वलजा वल्गुदर्शना ॥३७॥
समक्ष्मांशे[2] रणेऽप्याजिः, प्रजा[3] स्यात्सन्ततौ जने ।
अब्जौ[4] शङ्ख-शशाङ्कौ च, स्वके[5] नित्यं निजं त्रिषु ॥३८॥

❀ इति जान्ताः ❀

---

(१) 'वलजे' इति द्विवचनम् । 'वलजं गोपुरे क्षेत्रे सस्य-सङ्गरयोरपि । वलजा वरयोषायां यूथ्याम्'—इति मेदिनी । वल्गुदर्शना=सुन्दरी । [वलज—खेत, नगरद्वार, बिना पछोड़ा हुआ धान्य, युद्ध, अत्यन्त सुन्दरी स्त्री, जूही] ।

(२) 'आजिः स्त्री समभूमौ च सङ्ग्रामे'—इति मेदिनी । [आजि—युद्ध, समभूमि] ।

(३) सन्ततौ=पुत्रादिसन्ताने, लोके च प्रजा स्त्रियाम् । [प्रजा—सन्तान, प्रजा] ।

(४) 'अब्जोऽस्त्री शङ्खे ना निचुले धन्वतरौ च हि किरणे । क्लीबं पद्मे' इति मेदिनी । [अब्ज—शङ्ख, वेत, धन्वन्तरि, चन्द्र, पद्म] ।

(५) आत्मीयादौ नित्ये च निजं त्रिषु । [निज—आत्मीय-जन, नित्य] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]पुंस्यात्मनि प्रवीणे च क्षेत्रज्ञो वाच्यलिङ्गकः ।
संज्ञा[2] स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचना ॥३६॥
[दोषज्ञौ वैद्य-विद्वांसौ, ज्ञौ विद्वान् सोमजोऽपि च ।
विज्ञौ प्रवीण-कुशलौ, कालज्ञौ ज्ञानि-कुक्कुटौ ॥]

* इति ञान्ताः *

काके[3]-भगण्डौ करटौ, गजगण्ड[4]-कटी कटौ ।

---

(१) आत्मनि क्षेत्रज्ञः पुंसि, कुशले वाच्यलिङ्गकः । [क्षेत्रज्ञ-आत्मा, प्रवीण, कुशल] ।

(२) 'सञ्ज्ञा नामनि गायत्र्यां चेतनारवियोषितोः । अर्थस्य सूचनायाञ्च हस्ताद्यैरपि योषिति' इति मेदिनी । [सञ्ज्ञा-नाम, गायत्री, चेतना, सूर्यपत्नी, सञ्ज्ञा, हाथ आदि से इशारा करके किसी बात की सूचना देना] ।

(३) 'करटो' गजगण्डे स्यात्कुसुम्भे निन्द्यजीवने । एकादशाहादिश्राद्धे दुर्दुरूढेऽपि वायसे ॥ वाद्यभेदे'-इति मेदिनी । [करट-हाथी का गण्डस्थल, कुसुम्भा, निन्द्यजीवन=पापी, एकादशाहादि नवश्राद्ध, दुर्दुरूट, (खल, खचडा), कौवा, वाद्यभेद] ।

(४) 'कटः श्रोणौ क्रियाकारे किलिञ्जेऽतिशये शवे । समये गजगण्डेऽपि पिप्पल्याञ्च कटी मता' इति विश्वः । [कट-हाथी का

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

शिपिविष्टस्तु खलतौ दुश्चर्मणि महेश्वरे ॥ ४० ॥
देवशिल्पिन्यपि त्वष्टा, दिष्टं दैवेऽपि न द्वयोः ।
रसे कटुः कटुकार्ये त्रिषु मत्सर-तीक्ष्णयोः ॥ ४१ ॥

गण्डस्थल, कटि, चटाई, अतिशय, उत्कट मुर्दा, समय, मुरदे की अरथी, श्मशान, क्रियाकार] ।

(१) 'शिपिविष्टः शिवः शौरिर्दुश्चर्मा खलतिस्तथा' इति मेदिनी । [शिपिविष्टः-शिव, विष्णु, खल्वाट, दुश्चर्मा (जिसका चमडा बदसूरत हो, कोढियल शरीर)] ।

(२) 'त्वष्टा पुमान्देवशिल्पितक्ष्णोरादित्यभिद्यवि' इति मेदिनी । [त्वष्टा-विश्वकर्मा, बढई, सूर्य (भेद)] ।

(३) 'दिष्टं दैवे पुमान्काले' इति मेदिनी । [दिष्ट-भाग्य, समय (काल)] ।

(४) 'कटुः स्त्री कटुरोहिण्यां लताराजिकयोरपि । नपुंसकमकार्ये स्यात्पुंलिङ्गो रसमात्रके ॥ त्रिषु तद्वत्सुगन्ध्योश्च मत्सरेऽपि खरेऽपि च' इति मेदिनी । [कटु-कुटकी, लता, राई, अनुचितकार्य, कटुवा, सुगंध, मत्सर, तीक्ष्ण, प्रखरस्वभाववाला] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]रिष्टं क्षेमा-ऽशुभाऽभावेष्वरिष्टे[2] तु शुभा-ऽशुभे ।
[3]माया-निश्चल-यन्त्रेषु कैतवाऽनृत-राशिषु ॥ ४२ ॥
अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम् ।
[4]सूक्ष्मैलायां त्रुटिः स्त्री स्यात्कालेऽल्पे संशयेऽपि सा ॥

---

(१) 'रिष्टं क्षेमेऽशुभेऽभावे पुंसि खड्गे च फेनिले' इति मेदिनी । [रिष्ट—रीठा, कुशल, शुभ, अशुभाऽभाव, खड्ग] ।

(२) 'अरिष्टो लशुने निम्बे फेनिले काक—कङ्कयोः । अरिष्टमशुभे तक्रे सूतिकागार आसवे । शुभे मरणचिह्ने चे'ति मेदिनी । [अरिष्ट—शुभ, अशुभ, लहसुन, नीम, रीठा, कौवा, गृध्र, छाछ, सूतिकागृह, अरिष्ट (आसव), मरण चिह्न] ।

(३) मायादिष्वर्थे कूटम् । तत्र—माया = शाम्बरी, [जादू] । यन्त्रं = मूषकादिबन्धनं । [चूहे आदि पकड़ने का पिंजड़ा आदि] । कैतवं = कपटम् । अयोघने = यत्र संस्थाप्य, येन वा लोहादेः कुट्टनं भवति, तत्र । सीरांगे = हलावयवे—फालाधारे । [कूट—माया, निश्चल (ध्रुव), मृगादिबन्धन यन्त्र, कपट, झूठ, राशि (कुड्डी), अयोघन (गर्म लोहे को कूटने का मुद्गर आदि), पर्वत का शिखर, हल का अवयव (जिसमें फाल लगाया जाता है)] ।

(४) 'त्रुटिः स्त्री संशये स्वल्पे सूक्ष्मैला-कालमानयो'—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ओर्त्युत्कर्षाश्रयः कोट्यो, मूले लग्नकचे जटा ।
व्युष्टिः फले समृद्धौ च, दृष्टिर्ज्ञानेऽक्षि दर्शने ॥४४॥
इष्टिर्यागे-च्छयोः, सृष्टं निश्चिते बहुनि त्रिषु ।

रिति मेदिनी । [त्रुटि-संशय, कमी, थोड़ा, छोटी इलायची, सूक्ष्मकाल विशेष] ।

(१) 'अश्रय' इति बहुवचनान्तम् । 'कोटिः स्त्री धनुषोऽग्रेऽश्रौ संख्याभेदप्रकर्षयो' रिति मेदिनी । [कोटि-उत्कर्ष, कोना, धनुष का अग्रभाग, करोड़] ।

(२) 'जटा लग्नकचे मूले मांस्यां प्लक्षे पुनर्जटी' इति मेदिनी । [जटा-जड़, जटामांसी, मिले हुए बाल] ।

(३) समृद्धिफलयोर्व्युष्टिः । 'व्युष्टिः फले समृद्धौ स्त्री' इति मेदिनी । [व्युष्टि-समृद्धि और फल] ।

(४) ज्ञानाक्षिदर्शनेषु दृष्टिः । [दृष्टि-ज्ञान, आँख, देखना] ।

(५) 'इष्टिर्मताऽभिलाषे च संग्रहश्लोकयागयोः' इति मेदिनी । [इष्टि-इच्छा, याग, संग्रहश्लोक] ।

(६) 'युक्तिनिर्मितयोः प्राज्ये त्रिषु सृष्टन्तु निश्चिते' इति रुद्रः । [सृष्ट-निश्चित, बहुत, निर्मित, युक्त] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कष्टे तु कृच्छ्र-गहने, दक्षा[2]-ऽमन्दा-ऽगदेषु च ॥४५॥
पटु,-द्वौ वाच्यलिङ्गौ च-

* इति टान्ताः *

—[3]नीलकण्ठः शिवेऽपि च ।
पुंसि[4] कोष्ठोऽन्तर्जठरं कुसूलोऽन्तर्गृहं तथा ॥४६॥

---

(१) कृच्छ्र गहनस्थानयोः कष्टम्। [कष्ट-कष्ट, 'काठा' 'बडा' गहन, बीहड स्थान]।

(२) 'पटुर्दक्षे च नीरोगे चतुरेऽप्यभिधेयवत्। पटोले तु पुमान्क्लीबे छत्रा-लवणयोरपी'ति मेदिनी। द्वौ=कष्टपटू-वाच्यलिङ्गौ। [पटु-चतुर, तेज, नीरोग, लवण, पटोल, छत्रा]।

(३) 'नीलकण्ठस्तु दात्यूहे कलविङ्के च खञ्जने। सिताऽपाङ्गे हरे पीतसारके कालकण्ठवत्' इति विश्वः। [नीलकण्ठ-शिव, चटक, खञ्जन, पक्षिविशेष]।

(४) 'कोष्ठः कुसूले चाऽऽत्मीये मध्ये कुक्षेर्गृहस्य च' इति मेदिनी। [कोष्ठ-कोठा (पेटका कोठा), कोबरी, कोठा]।

टि०—४५ श्लोके 'सुष्टिर्निश्चिते बहुले त्रिषु' पाठान्तरम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निष्ठा[1] निष्पत्ति-नाशा-ऽन्ताः, काष्ठोत्कर्षे[2] स्थितौ दिशि।
त्रिषु[3] ज्येष्ठोऽतिशस्तेऽपि, कनिष्ठोऽतियुवा-ऽल्पयोः[4] ॥
दण्डोऽस्त्री[5] लगुडेऽपि स्याद्गुडो[6] गोले-चुपाकयोः।

(१) 'निष्ठा निष्पत्तिनाशान्तयाच्ञानिर्वहणेषु च' इति मेदिनी। ['निष्ठा'–पूर्ण होना, विनाश, अन्त, याच्ञा, निवहना]।

(२) 'काष्ठा दारुदरिद्रायां कालमान-प्रकर्षयोः। स्थानमात्रे दिशि च स्त्री दारुणि स्यान्नपुंसकम्'–इति मेदिनी। ['काष्ठा'–दारुहलदी, काष्ठा, प्रकर्ष, दिशा, काठ, स्थान]।

(३) 'ज्येष्ठः श्रेष्ठे च वृद्धे च त्रिषु मासान्तरे पुमान्। ज्येष्ठा तु गृहगोधाख्यजन्तुनक्षत्रभेदयो'रिति मेदिनी। ['ज्येष्ठ'–बड़ा, श्रेष्ठ, वृद्ध ज्येठ मास, नक्षत्र, छिपकली 'ज्येष्ठा']।

(४) 'कनिष्ठोऽतियुवाऽत्यल्पानुजे स्त्री दुर्बलाङ्गुलौ' इति मेदिनी। ['कनिष्ठ'–छोटा, छोटा भाई। 'कनिष्ठा'–छोटी अंगुली]।

(५) 'दण्डो यमे मानभेदे लगुडे दमसैन्ययोः। व्यूहभेदे प्रकाण्डेऽश्वे कोणमन्थानयोरपि ॥ अभिमाने ग्रहे दण्डश्चण्डांशोः पारिपार्श्विके' इति विश्वः। ['दण्ड'–दण्डा, यम, नाप, दण्डदेना, सेना, व्यूहभेद, वृक्ष की पेडी, घोडा, वादन दण्ड, मथनदण्ड]।

(६) 'गुडः स्याद्गोलके हस्तिसन्नाहेक्षुविकारयोः। गुडा स्नुह्याञ्च कथिता गुडिकायाञ्च योषिति' इति मेदिनी। 'गुड'–गोला, हाथी का कटहडा और कवच गुड]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्प-मांसात्पशू [1]व्याडा, गोभू[2]वाचस्त्विडा इलाः ॥४८॥
[3]क्ष्वेडा वंशशलाकाऽपि, [4]नाँडी नालेऽपि षट्क्षणे ।
[5]काँण्डोऽस्त्री दण्ड-बाणा-ऽर्व-वर्गा-ऽवसर-वारिषु ॥४९॥

(१) 'व्याडो व्याघ्रे खले सर्पे' इति रभसः । व्यालोऽपि । ['व्याड' 'व्याल'–हिंसक व्याघ्र आदि, दुष्ट, सर्प] ।

(२) '–इडा तु बुधयोषिति । सौरभेय्याश्च वचने वसुमत्यामपि स्त्रियाम् । इला कलत्रे सौम्यस्य धरित्र्यां गवि वाचि च' इति मेदिनी । ['इडा' 'इला'–बुधकी स्त्री, पृथिवी, गौ, वाणी] ।

(३) 'क्ष्वेडा वंशशलाकायां सिंहनादे च योषिति । लोहितार्कपर्णफले घोषपुष्पे नपुंसकम् । दुरासदे च कुटिले वाच्यलिङ्गः प्रकीर्त्तितः । ध्वनौ विषे कर्णरोगे क्ष्वेडः–' इति मेदिनी । [क्ष्वेडा–बांस की सलाई, सिंहनाद, दुरासद, कुटिल] ।

(४) 'नाडी–नाले व्रणान्तरे । शिरायां गण्डदूर्वायां चर्यायां कुहनस्य च । तथा षट्क्षणकालेऽपि' इति मेदिनी । [नाडी–नाल (डंठल), नासूर, नस, ६ क्षणकाल, कपट चाल, दूर्वानाल] ।

(५) 'काण्डः स्तम्बे तरुस्कन्धे बाणेऽवसरनीरयोः । कुत्सिते अभिजाडीवृन्दे रहसि न स्त्रियाम्' इति मेदिनी । [काण्ड–डण्डा, बाण, घोड़ा, वर्ग, अवसर, जल, वृक्ष का स्कन्ध प्रदेश, कुत्सित, एकान्त] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्याद्भाण्डमश्वाभरणेऽमत्रे मूलवणिग्धने ।

❀ इति डान्ताः ❀

[2]भृशं-प्रतिज्ञयोर्बाढं, [3]प्रगाढं भृश-कृच्छ्रयोः ॥५०॥

[4]शक्त-स्थूलौ त्रिषु दृढौ, [5]व्यूढौ विन्यस्त-संहतौ ।

❀ इति ढान्ताः ❀

[6]भ्रूणोऽर्भके स्त्रैणगर्भे, [7]बाणो बलिसुते शरे ॥५१॥

(१) 'भाण्डं पात्रे वणिङ्मूलधने भूषाश्वभूषयोः' इति मेदिनी। [भाण्ड-घोड़े का गहना, बर्त्तन-भांडा व्यापारी का मूलधन, गहना]।

(२) भृशे प्रतिज्ञायाञ्च बाढम्। [बाढं-अत्यन्त, स्वीकार, हाँ]।

(३) 'दृढे कृच्छ्रे प्रगाढः स्या'दिति धरणिः। [प्रगाढ-दृढ, 'कड़ा' अत्यन्त, गहन]।

(४) 'दृढः स्थूले नितान्ते च प्रगाढे बलवत्यपि' इति मेदिनी। [दृढ-मोटा, समर्थ मजबूत, प्रगाढ, कठिन,]।

(५) 'व्यूढः संहतविन्यस्ते पृथुलेऽप्यभिधेयवत्' इति मेदिनी। [व्यूढ-लम्बा-चौड़ा, विरचित, जचाया हुआ, संहत, मिलित]।

(६) 'भ्रूणः स्त्रीगर्भेऽडिम्भयो'रिति मेदिनी। [भ्रूण-बच्चा, गर्भ]।

(७) 'बाणः स्याद्गोस्तने दैत्यभेदे केवलकाण्डयोः। बाणा तु बाणमूले स्त्री नीलझिण्ट्यां पुनर्द्वयोः'-इति मेदिनी। ['बाण'-गोस्तन, बाणासुर, बाण]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कणोऽतिसूक्ष्मे धान्यांशे, [2]सङ्घाते प्रमथे गणः ।
[3]पणो द्यूतादिषूत्सृष्टे भृतौ मूल्ये धनेऽपि च ॥५२॥
[4]मौर्व्यां द्रव्याश्रिते सत्त्वे शौर्ये सन्ध्यादिके गुणः ।
[5]निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः ॥५३॥

(१) 'कणा जीरककुम्भीरमक्षिकापिप्पलीषु च । कणोऽतिसूक्ष्मधान्यांशे-' इति मेदिनी । [कण-अन्नादिका कण, लेश (अतिसूक्ष्म)] ।

(२) 'गणः स्यात्प्रमथे संघे संख्यासैन्यप्रभेदयो'रिति मेदिनी । [गण-सङ्घात, देवपारिषद, देवगण, सङ्ख्या भेद, सैन्य भेद] ।

(३) 'पणो माने वराटानां मूल्ये कार्षापणे धने । द्यूते विक्रय्यशाकादेर्बद्धमुष्टौ ग्लहे भृतौ' इति धरणिः । [पण-१ पैसा= बीस २० गण्डा, अर्थात्-अस्सी ८० कौड़ी, कार्षापण (४ पैसा, या १ रुपया) दाँव, शर्त्त, नौकरी, मजूरी, मूल्य, धन, जूवा, फाटका-सट्टा, बेचने के लिए बान्धी हुई शाक आदि की जुट्टी] ।

(४) 'गुणो मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये । त्यागे शौर्यादिसत्त्वादिसन्ध्याद्यावृत्तिरज्जुषु । शुक्लादावपि बुद्ध्याञ्च' इति मेदिनी । [गुण-प्रत्यञ्चा, गौण, रूप आदि, रसोइया, सत्त्व आदि, इन्द्रिय, त्याग, शौर्य आदि, रज्जु, बुद्धि, सन्धि विग्रह आदि] ।

(५) 'क्षणो व्यापारशून्याल्पमुहूर्त्तोत्सवपर्वसु' इति रुद्रः । [क्षण-खाली समय, छुट्टी का समय, क्षण, उत्सव, मुहूर्त्त, पर्व, त्यौहार] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णन्तु चाक्षरे ।
अरुणो[2] भास्करेऽपि स्याद्वर्णभेदेऽपि च त्रिषु ॥५४॥
[3]स्थाणुः शर्वेऽप्यथ द्रोणः[4] काकेऽप्याजौ[5] रवे रणः ।

(१) 'वर्णो द्विजादिशुक्लादियशोगुणकथासु च । स्तुतौ ना, न स्त्रियां भेदरूपाऽक्षरविलेखने' इति मेदिनी । [वर्ण-ब्राह्मण आदि, शुक्ल आदि, अक्षर, स्तुति, यश, गुणवर्णन, वर्णन] ।

(२) 'अरुणोऽव्यक्तरागेऽर्के सन्ध्यारागेऽर्कसारथौ । निश्शब्दे कपिले कुष्ठभेदे ना गुणिनि त्रिषु' इति मेदिनी । ['अरुण'-सूर्य, सूर्य का सारथि, गुलाबी रंग (हलका लाल), सन्ध्या के समय की आकाश की ललाई] ।

(३) '-स्थाणुः-कीले हरे पुमान् । अस्त्री ध्रुवे-' इति मेदिनी । [स्थाणु-शिव, खूंटा, कीली, ध्रुव] ।

(४) 'द्रोणोऽस्त्रियामाढके स्यादाढकादिचतुष्टये । पुमान् कृपीपतौ कृष्णकाके स्त्री नीवृदन्तरे । स्त्रियां काष्ठाम्बुवाहिन्यां गवादन्यामपीष्यते' इति मेदिनी । [द्रोण-२॥ सेर, १० सेर, द्रोणाचार्य, द्रोणकाक, देश भेद (देहरा-'दून')] ।

(५) 'रणः कोणे क्वणे पुंसि समरे पुंनपुंसक'मिति मेदिनी । [रण-युद्ध, शब्द, कोण] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]ग्रामणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु ॥५५॥
[2]ऊर्णा मेषादिलोम्नि स्यादावर्त्ते चान्तरा भ्रुवोः ।
[3]हरिणी स्यान्मृगी हेमप्रतिमा हरिता च या ॥५६॥
त्रिषु[4] पाण्डौ च हरिणः, [5]स्थूणा स्तम्भेऽपि वेश्मनः ।

---

(१) 'ग्रामणीर्भौगिके पत्यौ प्रधाने नापितेपि चे'ति मेदिनी। [भौगिकः=ठाकुर, नम्बरदार । ग्रामणी–नाई, गाँव का मुखिया, ग्रामाधिप (जमीन्दार, ठाकुर), प्रधान, पति] ।

(२) 'ऊर्णा मेषादिलोम्नि स्यादन्तरावर्त्तके भ्रुवो'रिति मेदिनी । [ऊर्णा–ऊन, भौंह के बीच की भौंरी (रोमावर्त्त चिह्न विशेष)] ।

(३) 'हरिणी हरितायाञ्च नारीभिद्वृत्तभेदयोः । सुवर्ण-प्रतिमायाञ्च–'इति मेदिनी । [हरिणी–मृगी जाति की स्त्री, हरिणी, स्वर्ण प्रतिमा, हरितवर्ण स्त्री, हरिणी छन्द] ।

(४) 'हरिणः पुंसि सारङ्गे शबले त्वभिधेयवत्'इति मेदिनी । [हरिण–पाण्डुवर्ण, मृग] ।

(५) 'स्थूणा स्यात्सूर्म्यां स्तम्भेऽपि वेश्मनः' इति मेदिनी । [स्थूणा–लौहमूर्त्ति स्तम्भ (खम्भा, थूणी)] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तृष्णे [1]स्पृहा-पिपासे द्वे, [2]जुगुप्सा-करुणे घृणे ॥५७॥
[3]वणिक्पथे च विपणिः, [4]सुरा प्रत्यक् च वारुणी ।
[5]करेणुरिभ्यां स्त्री नेभे, [6]द्रविणं तु बलं धनम् ॥५८॥
[7]शरणं गृह-रक्षित्रोः, श्रीपर्णं कमलेऽपि च ।

---

(१) 'तृष्णा स्यात्तर्षलिप्सयो'रिति मेदिनी । [तृष्णा—प्यास, इच्छा]।

(२) 'घृणा जुगुप्साकृपयो'रिति मेदिनी । [घृणा—घृणा, दया]।

(३) 'आपणे पण्यवीथ्याञ्च पण्ये च विपणिः स्त्रियाम्' इति रुद्रः । [विपणि—दुकान, बाजार, बिक्री की वस्तु] ।

(४) 'वारुणी गण्डदूर्वायां प्रतीचीसुरयोः स्त्रियाम्' मेदिनी । [वारुणी—मद्य, गाँडर दूब, पश्चिम दिशा] ।

(५) 'करेणुर्गजयोषायां स्त्रियां पुंसि मतङ्गजे' इति मेदिनी । इभ्यां = हस्तिन्यां, स्त्री = स्त्रियाम् । इभे = गजे, ना = पुंसि । [करेणु—हथिनी, हाथी] ।

(६) 'द्रविणं न द्वयोर्विरो काञ्चने च पराक्रमे' इति मेदिनी । [द्रविण—धन, सोना, बल] ।

(७) 'शरणं गृहरक्षित्रोर्वधरक्षणयोरपी'ति मेदिनी । [शरण-गृह, रक्षक, वध, रक्षा] ।

(८) 'श्रीपर्णी कुम्भीगम्भार्योः क्लीबे पद्माग्निमन्थयो'रिति रभसः । [श्रीपर्ण—कमल, अग्निमन्थ वृक्ष] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषो-ऽभिमर-लोहेषु तीक्ष्णं क्लीबे खरे त्रिषु ॥५९॥
प्रमाणं हेतु-मर्यादा-शास्त्रे-यत्ता-प्रमातृषु ।
करणं साधकतमे क्षेत्र-गात्रे-न्द्रियेष्वपि ॥ ६० ॥
प्राण्युत्पादे संसरणमसम्बाधचमूगतौ ।

(१) 'तीक्ष्णं समुद्रलवणं विषलोहाऽऽजिमुष्ककें। क्लीबे, यवाग्रजे पुंसि, तिग्मात्मत्यागिनोस्त्रिषु' इति मेदिनी। [तीक्ष्ण—विष, लोह, समुद्रलवण, युद्ध, यवशूक, तीक्ष्ण (तेज), मरने को हरदम तैयार, जानपर खेलने वाला]।

(२) 'प्रमाणं नित्यमर्यादाशास्त्रेषु सत्यवादिनि। इयत्तायाञ्च हेतौ च क्लीबैकत्वे प्रमातरि' इति मेदिनी। [प्रमाण—हेतु, प्रमाण मर्यादा, शास्त्र, सत्यवादी, इयत्ता (नाप), नित्य]।

(३) 'करणं कारणे काये साधनेन्द्रियकर्मसु। कायस्थे व्रतबन्धे च नाट्यगीतप्रभेदयोः॥ पुमान् शूद्राविशोः पुत्रे वानरादौ च कीर्त्यते॥' इत्यमरः। [करण—कार्यसिद्धि में साधकतम कारण, क्षेत्र, शरीर, इन्द्रिय, साधन, कर्म, कायस्थ जाति, व्रतबन्ध= उपनयन, नाट्यभेद, गीतभेद, वैश्य से शूद्रा में उत्पन्न]।

(४) 'अथ संसरणं क्लीबमसम्बाधचमूगतौ' इति मेदिनी। [संसरण—प्राणियों की उत्पत्ति, निर्द्वन्द्व=लगातार निर्बाध सेना का बढाव, फैलना, राजमार्ग]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घण्टापथेऽथ वोन्ताऽन्ने समुद्गिरणमुन्नये ॥ ६१ ॥
अतस्त्रिषु, विषाणं[2] स्यात्पशुशृङ्गे-भदन्तयोः ।
प्रवणं[3] क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे ॥६२॥
संकीर्णो[4] निचिता-ऽशुद्धा विरिणं[5] शून्यमूषरम् ।

(१) 'भुक्तोज्झितोन्मूलितयोः । स्यादुद्धरणमुन्नये' इति रभसः । [समुद्गिरण—वान्त (वमन किया हुआ) अन्न, उद्धरण देना, तर्क करना, उखाडना] ।

अतः = इत आरभ्य इरिणशब्दपर्यन्तं, त्रिषु = त्रिलिङ्गाः । 'स्वतस्त्रिषु-इति पठित्वा,—'स्वत एव,—न तु वाच्यलिङ्गतया,—त्रिषु = त्रिलिङ्गो विषाणशब्दः' इत्यर्थमाह स्वामी ।

(२) 'विषाणं—त्रिषु शृङ्गे भदन्तयोः' इति मेदिनी । [विषाण—सींग, हाथी दांत] ।

(३) 'प्रवणो ना चतुष्पथे । क्रमनिम्नमहीभागोदारप्रह्वेषु च त्रिषु' इति मेदिनी । [प्रवण—चौराहा, क्रमनिम्नभूमि, ढलाव, उदार, प्रह्व = अनुकूल, तत्पर] ।

(४) 'संकीर्णं संकटे व्याप्ते कुत्रचिद्वर्णसङ्करे' -हृत्यजयः । [सङ्कीर्ण—वर्ण सङ्कर, सकडा, व्याप्त, मिश्रित] ।

(५) 'ईरिणन्तूषरे शून्ये' इति मेदिनी । ह्रस्वादिरप्ययम् । [इरिण—शून्य, ऊसर भूमि] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[[1]सेतौ च वरणो, [2]वेणी नदीभेदे कचोच्चये] ॥

❀ इति णान्ताः ❀

देव[3]-सूर्यौ विवस्वन्तौ, [4]सरस्वन्तौ नदा-ऽर्णवौ ॥६३॥
[5]पक्षि-तार्क्ष्यौ गरुत्मन्तौ, [6]शकुन्तौ भास-पक्षिणौ ।
[7]अग्न्यु-त्पातौ धूमकेतू, जीमूतौ मेघ-पर्वतौ ॥६४॥

(१) सेतौ प्राकारे च वरणः । [वरण—प्राकार, पुल, पानी की क्यारी] । (२) नदीभेदे केशसञ्चये च वेणी । [वेणी—नदीभेद, केशोंकी लट, आटी (जूड़ा)] । (३) 'विवस्वांस्तु सुरे सूर्ये' इति मेदिनी । [विवस्वान्—देवता, सूर्य] ।

(४) 'सरस्वांस्तु नदे चाब्धौ नान्यवद्रसिके स्त्रियाम् । वागीश्वीरत-वाग्देवी-गो-नदीषु नदीभिदि' इति मेदिनी । [सरस्वान्—नद, समुद्र] ।

(५) द्वयोर्गरुत्मान् । [गरुत्मान्—पक्षी, गरुड] ।

(६) 'शकुन्तो विहगे भासे' इति हैमः । [शकुन्त—पक्षी, भासपक्षी] ।

(७) 'धूमकेतुः स्मृतो वह्नावुत्पातग्रहभेदयो' रिति विश्वः । [धूमकेतु—अग्नि, पुच्छल तारा, उत्पात] ।

(८) 'जीमूतोऽद्रौ भूतिकरे देवताडे पयोधरे' इति मेदिनी । [जीमूत—मेघ, पर्वत, देवताड वृक्ष, नौकर, बरोई आक] ।

CC-0. Jangamwadi Math Collection. Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हस्तौ[1] तु पाणि-नक्षत्रे, मरुतौ[2] पवना-ऽमरौ ।
यन्ता[3] हस्तिपके सूते, भर्ता[4] धातरि पोष्टरि ॥६५॥
यानपात्रे[5] शिशौ पोतः, प्रेतः[6] प्राण्यन्तरे मृते ।
ग्रहभेदे[7] ध्वजे केतुः, पार्थिवे[8] तनये सुतः ॥६६॥

---

(१) 'हस्तः करे करिकरे सप्तकोष्ठकरेपि च । ऋक्षे केशात्परो व्राते-'इति मेदिनी । [हस्त–हाथ, हाथीकी सूंड, हस्त नक्षत्र, १ हाथ (नाप)] । (२) 'मरुद्देवे समीरे ना ग्रन्थिपर्णे नपुंसकम्' इति मेदिनी । [मरुत्–देवता, वायु, गठिवन] । (३) यन्ता 'हस्तिपके सूते' इति मेदिनी । [यन्ता–सारथि,महावत-हाथीवान]।

(४) 'भर्त्ता स्वामिनि पुंसि स्यात् त्रिषु धातरि पोष्टरी'ति मेदिनी । [भर्त्ता–ब्रह्मा, पोषक, मालिक, पति] ।

(५) 'पोतः शिशौ वह्नित्रे च गृहस्थाने च वाससी'ति मेदिनी । [पोत–जहाज, बालक गृहस्थान, वस्त्र (पोतडा)] ।

(६) 'प्रेतो भूतान्तरे पुंसि मृते स्याद्वाच्यलिङ्गकः' इति मेदिनी । [प्रेत–मृतक, भूत-प्रेत] ।

(७) 'केतुर्ना रुक्पताकारिग्रहोत्पातेषु लक्ष्मणि' इति मेदिनी । [केतु–केतुग्रह, ध्वजा, उत्पात, रोग, शत्रु] ।

(८) 'सुतः स्यात्पार्थिवे पुत्रे स्त्र्यपत्ये तु सुता स्मृता' इति मेदिनी । [सुत–राजा, पुत्र] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्थपतिः कारुभेदेऽपि, [2]भूभृद् भूमिधरे नृपे ।
[3]मूर्धाभिषिक्तो भूपेऽपि, [4]ऋतुः स्त्रीकुसुमेऽपि च ॥
विष्णावप्यजिता-ऽव्यक्तौ, [5]सूतस्त्वष्टरि सारथौ ।

---

(१) 'स्थपतिः कञ्चुकिन्यपि । जीवेष्टियाजके शिल्पिभेदे ना सत्तमे त्रिषु' इति मेदिनी । [स्थपति–कञ्चुकी, बढई, कारीगर, सज्जन 'बृहस्पतिसव' यज्ञ कर्त्ता] ।

(२) पर्वतराज्ञोर्भूभृत् । [भूभृत्–पर्वत, राजा] ।

(३) 'मूर्द्धाभिषिक्तो भूपाले मन्त्रिणि क्षत्रियेऽपि चे'ति मेदिनी । [मूर्द्धाभिषिक्त–राजा, मन्त्री, क्षत्रिय] ।

(४) 'ऋतुर्मासि वसन्तादौ धीरे स्त्रीकुसुमेऽपि चे'ति धरणिः । [ऋतु–मास, ऋतु, धीर, स्त्री का आर्त्तव (मासिक धर्म काल)] ।

(५) 'अजितो ना हरौ त्रिषु । अनिर्जिते च'–इति विश्वः । 'अव्यक्तः शङ्करे विष्णावव्यक्तं महदादिके । आत्मन्यपि स्यादव्यक्तमस्फुटे त्वभिधेयवत्' इति विश्वः । ['अजित'–हरि, अपराजित । 'अव्यक्त'–हरि, शिव, अस्फुट, महदादि, आत्मा] ।

(६) सूतस्तु सारथौ तक्षिण क्षत्रियाद् ब्राह्मणीसुते । बन्दिपारदयोः पुंसि प्रसूते प्रेरिते त्रिषु' इति मेदिनी । [सूत–बढई, सारथि, क्षत्रिय से ब्राह्मणी में उत्पन्न, पारा, प्रसूत, प्रेरित, बन्दीजन] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

व्यक्तः[1] प्राज्ञेऽपि, दृष्टान्तावुभे[2] शास्त्र-निदर्शने ॥६८॥
क्षत्ता[3] स्यात्सारथौ द्वाःस्थे क्षत्रियायाञ्च शूद्रजे ।
वृत्तान्तः[4] स्यात्प्रकरणे प्रकारे कार्त्स्न्यवार्त्तयोः ॥६९॥
आनर्त्तः[5] समरे नृत्यस्थान-नीवृद्विशेषयोः ।

---

(१) 'व्यक्तं स्फुटमनीषिणो'रिति मेदिनी । [व्यक्त-स्पष्ट, पण्डित] ।

(२) 'दृष्टान्त उदाहृतौ । शास्त्रे च मरणे' इति मेदिनी । [दृष्टान्त-उदाहरण, शास्त्र, मरण] ।

(३) 'क्षत्ता शूद्रात्क्षत्रियाजे प्रतीहारे च सारथौ । भुजिष्या-तनये क्षत्ता नियुक्ते च प्रजासृजि' इति विश्वः । [क्षत्ता-सारथि, द्वारपाल, शूद्रसे क्षत्रियामें उत्पन्न, दासीपुत्र, ब्रह्मा, नियुक्त] ।

(४) 'वृत्तान्तोऽवसरे भावे कार्त्स्न्यवार्त्ताविशेषयोः । प्रक्रिया-याञ्चे'ति विश्वः । [वृत्तान्त-प्रकरण, (अवसर-मौका), प्रकार, (प्रक्रिया), बात, (हाल चाल) सम्पूर्ण] ।

(५) 'आनर्तो देशभेदेपि नृत्यस्थाने जने रणे' इति मेदिनी । [आनर्त्त-नाचघर, (नृत्यशाला), युद्ध, जन, देशविशेष (गुजरातमें 'आरनद'—द्वारकापुरी)] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतान्तो यम-सिद्धान्त-दैवा-ऽकुशलकर्मसु ॥७०॥
[2]श्लेष्मादि रसरक्तादि महाभूतानि तद्गुणाः ।
इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः ॥७१॥
[3]कक्षान्तरेऽपि शुद्धान्तो नृपस्याऽसर्वगोचरे ।
[4]कासू-सामर्थ्ययोः शक्तिर्मूर्त्तिः [5]कौठिन्य-काययोः ॥७२॥

(१) यमादिषु-कृतान्तः । [कृतान्त-यमराज, सिद्धान्त, भाग्य, दुःदृष्ट (दुर्भाग्य-बुरे कर्म)] ।

(२) कफपित्तादि, रसरक्तमांसादि, पञ्चभूतानि पृथिव्यादीनि, रूपरसादयश्च भूत गुणाः, इन्द्रियाणि, गैरिकादिपाषाणभेदाः, भूवादयश्च-धातवः । [धातु-कफ-पित्त आदि, रस रुधिर आदि, पृथिवी आदि ५ भूत, तथा उनके रूप रस आदि गुण, इन्द्रिय, गैरिक आदि, सोना आदि, भूवादि धातु] ।

(३) 'शुद्धान्तोऽन्तःपुरे गृहकक्षाभेदे च भूपतेः' इत्यजयः । [शुद्धान्त-अन्तःपुर, ड्योढ़ी, जनानखाना] ।

(४) 'शक्तिरस्त्रान्तरे गौर्यामुत्साहादौ बले स्त्रियाम्'-इति मेदिनी । [शक्ति-सांग, सेल (अस्त्र), सामर्थ्य, गौरी देवी, उत्साह, बल] ।

(५) काठिन्यकाययोर्मूर्त्तिः । [मूर्त्ति-कठिनता, शरीर, मूर्त्ति]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विस्तार-वल्ल्योर्व्रततिर्वसती[2] रात्रि-वेश्मनोः ।
क्षयाऽर्चयोरपचितिः[3], सातिर्दाना-ऽवसानयोः[4] ॥७३॥
[5]अर्तिः पीडा-धनुष्कोट्योर्जातिः[6] सामान्य-जन्मनोः ।

(१) विस्तारे लतायाञ्च व्रततिः । [व्रतति–विस्तार, लता] ।

(२) 'वसतिः स्यात्स्त्रियां वासे यामिन्याञ्च निकेतने'–इति मेदिनी । [वसति–रात्रि, गृह, वसना] ।

(३) 'भवेदपचितिः पूजाव्ययनिष्कृतिहानिषु'–इति मेदिनी । [अपचिति–कमी, पूजा, हानि, खर्च, बदला ।]

(४) दानाऽवसानयोः सातिः । [साति–दान, अवसान (समाप्ति)] ।

(५) 'पीडायां धनुषः कोटौ च अर्त्तिः आर्त्तिरित्यन्ये पठन्ति' । [अर्त्ति–(आर्त्ति)–पीडा, धनुष की कोटि (कोना)] ।

(६) 'जातिश्छन्दसि सामान्ये मालत्यां गोत्रजन्मनोः । जातिर्जातीफले धात्र्यां चुल्लीकम्पिल्लयोरपी'ति विश्वः । [जाति–जाति, मालती, गोत्र, जन्म, जायफल, चूल्हा, कबीला, धात्री, आँवला] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रचार[1]-स्यन्दयो रीतिरीतिर्डिम्बे[2]-प्रवासयोः ॥ ७४ ॥
उदये[3]ऽधिगमे प्राप्तिर्लेता[4] त्वग्नित्रये युगे ।
वीणाभेदे[5]ऽपि महती, भूतिर्[6]भस्मनि संपदि ॥७५॥

---

(१) 'रीतिः प्रचारे स्यन्दे च लोहकिट्टाऽऽरकूटयो'रिति विश्वः । [रीति–रीति-रिवाज, (प्रचार), लोहकीट, पीतल, स्यन्द (प्रवाह, पिघला हुआ द्रव्य)] ।

(२) 'ईतिर्डिम्बे प्रवासेऽतिवृष्ट्यादिषट्सु च स्त्रिया'मिति मेदिनी । [ईति–डिम्ब (=उत्पात, उपद्रव, विप्लव) प्रवास, अति वृष्टि, अनावृष्टि, चूहे, टिड्डी, पशु, पक्षी, गृहयुद्ध, राजविग्रह आदि खेती के ६ विघ्न] ।

(३) 'प्राप्तिर्लाभे महोदये' । [प्राप्ति–लाभ, अभ्युदय] ।

(४) युगभेदेऽग्नित्रये त्रेता । [त्रेता–अग्नित्रय, त्रेतायुग] ।

(५) 'महती वल्लकीभेदे प्राज्ये तु स्यान्नपुंसकम् । तत्त्वभेदे पुमान् वृद्धे वाच्यवत्—'इति मेदिनी । [महती–वीणाभेद (नारद की वीणा), बड़ी । महत्–बडा, बहुत, महत्तत्त्व, वृद्ध] ।

(६) 'भूतिर्भस्मनि सम्पत्तिहस्तिशृङ्गारयोः स्त्रियाम्' इति मेदिनी । [भूति–भस्म, सम्पत्ति, हाथी का शृंगार] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नदी-नगर्योर्नागानां भोगवत्यथ संङ्गरे ।
सङ्गे सभायां समितिः, क्षय-वासावपि क्षितिः ॥७६॥
रवेरर्चिश्च शस्त्रञ्च वह्निज्वाला च हेतयः ।
जगती जगति च्छन्दोविशेषेऽपि क्षितावपि ॥७७॥
पङ्क्तिश्छन्दोऽपि दशमं, स्यात्प्रभावेऽपि चाऽऽयतिः ।

(१) 'अथ भोगवती नागपुरीनद्योरहौ पुमान्' इति मेदिनी । [भोगवती-नदी, नागों की नगरी] ।

(२) युद्धसङ्गसभासु-समितिः । [समिति-युद्ध, संगति, सभा] । (३) 'क्षितिर्निवासे मेदिन्यां कालभेदे क्षये स्त्रियाम्' इति मेदिनी । [क्षिति-हानि, निवास, पृथिवी, प्रलय] ।

(५) 'हेतिः स्यादायुधज्वालासूर्यतेजःसु योषिति' इति मेदिनी । [हेति-सूर्य किरण, शस्त्र, वह्नि की ज्वाला] ।

(६) 'जगती भुवने क्ष्मायां छन्दोभेदे जनेपि च' इति मेदिनी । [जगती-जगत्, पृथ्वी, जगती छन्द, भुवन] ।

(७) पंक्तिर्दशाक्षरच्छन्दोदशसङ्ख्यादिषु स्त्रियाम्' —इति मेदिनी । [पङ्क्ति-दशअक्षरके पाद वाला छन्द, दस, पाँत] ।

(८) 'आयतिः संयमे दैर्घ्ये प्रभावाऽऽगामिकालयो'रिति विश्वः । [आयति-प्रभाव, उत्तरकाल, संयम, लम्बाई] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पत्तिर्गतौ च, मूले तु पक्षतिः पक्षभेदयोः ॥७८॥
प्रकृतिर्योनि-लिङ्गे च, कैशिक्याद्याश्च वृत्तयः ।
सिकताः स्युर्वालुकाऽपि, वेदे श्रवसि च श्रुतिः ॥७९॥
वनिता जनिताऽत्यर्थानुरागायां च योषिति ।

---

(१) 'पत्तिना पदगे स्त्रियाम् । गतावेकरथैकेभव्यश्वपञ्चपदातिके' इति मेदिनी । [पत्ति–पैदल, गति, सेनाविशेष] ।

(२) पक्षभेदयोः=मासार्द्धस्य पक्षस्य, मूले = प्रतिपदि, पक्षिपक्षस्य च मूले–पक्षतिरित्यन्वयः । 'पक्षतिस्तु भवेत्पक्षमूले च प्रतिपत्तिथौ' इति मेदिनी । [पक्षति–पाँख का मूल, प्रतिपदा तिथि] ।

(३) 'प्रकृतिर्गुणसाम्ये स्यादमात्यादिस्वभावयोः । योनौ लिङ्गे पौरवर्गे–' इति मेदिनी । [प्रकृति–योनि, लिङ्ग, मूलप्रकृति, अमात्य आदि राज्याङ्ग, स्वभाव, पुरवासी जन] ।

(४) 'वृत्तिर्विवरणे जीव्ये कैशिक्यादिषु चेष्यते' इति विश्वः । [वृत्ति–कैशिकी आदि, वृत्ति विवरण, छात्रवृत्ति आदि, जीविका] ।

(५) 'सिकता स्त्री सिकतिले बालुकायान्तु भूमनी'ति मेदिनी । [सिकता–बालुका, बालुयुक्त प्रदेश] ।

(६) 'श्रुतिः श्रोत्रे तथाम्नाये वार्त्तायां श्रोत्रकर्मणी'ति विश्वः । [श्रुति–वेद, कान, वार्ता, सुनना] ।

(७) वनिता जातरागस्त्री-स्त्रियोः स्त्री त्रिषु याचिते' इति मेदिनी । [वनिता–अत्यन्त अनुरक्त (आसक्त) स्त्री, स्त्रीमात्र] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]गुप्तिः क्षितिव्युदासेऽपि, [2]धृतिर्धारण-धैर्ययोः ॥८०॥
[3]बृहती क्षुद्रवार्ताकी छन्दोभेदे महत्यपि ।
[4]वासिता स्त्रीकरिण्योश्च, [5]वार्त्ता वृत्तौ जनश्रुतौ ॥८१॥
[6]वार्त्तं फल्गुन्यरोगे च, त्रिष्वप्सु च घृता-ऽमृते ।

---

(१) 'गुप्तिः कारा च रक्षा च दीर्णञ्च विवरं भुवः'—इति शाश्वतः । [गुप्ति—कारागार, रक्षा, भूमिके भीतर की सुरङ्ग, दरार, भूमिगृह आदि] ।

(२) 'धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु' इति विश्वः । ['धृति' योग, धैर्य, धारणा, यज्ञ, सन्तोष] ।

(३) 'बृहती क्षुद्रवार्त्ताक्यां कण्टकार्याञ्च वाचि च । वारिधान्यां महत्याञ्च च्छन्दोवसनभेदयो'रिति विश्वः । [बृहती—भण्टा, कंटकारी, वाणी, बड़ी, जलपात्र, बृहतीच्छन्द, वस्त्रभेद] ।

(४) 'वासिता करिणीनार्योर्वासितं भाविते रुते' इति मेदिनी । [वासिता—स्त्री, हथिनी] ।

(५) 'वार्त्ता वार्तिङ्गणे वृत्तौ वार्त्ता कृष्याद्युदन्तयोः । वृत्तिमन्नीरुजोर्वार्त्ता' इति विश्वः । [वार्त्ता—जीविका, बात, खेती आदि रोजगार, कथा] ।

(६) 'वार्त्तमारोग्यफल्गुनो'रिति विश्वः । [वार्त्त—तुच्छ साधारण, आरोग्य] ।

(७) 'अमृतं यज्ञशेषे स्यात्पीयूषे सलिले घृते । अयाचिते च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कलधौतं रूप्य-हेम्नोर्निमित्तं[2] हेतु-लक्ष्मणोः ॥८२॥
[3]श्रुतं शास्त्रा-ऽवधृतयोर्युगे[4]-पर्याप्तयोः कृतम् ।
[5]अत्याहितं महाभीतिः कर्म जीवाऽनपेक्षि च ॥८३॥
[6]युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु ।

मोक्षे च ना धन्वन्तरिदेवयोः' इति मेदिनी। [अमृत–जल, अमृत, घृत, यज्ञशेष, अयाचित (स्वयं प्राप्त) मोक्ष, धन्वन्तरि, देवता। 'घृत'–जल, घृत]।

(१) कलधौतं सुवर्णे स्याद्रजते च नपुंसक'मिति मेदिनी। [कलधौत–चान्दी, सोना]।

(२) हेतुचिह्नयोः निमित्तम्। [निमित्त–हेतु, चिह्न]।

(३) श्रवणशास्त्रयोः श्रुतम्। [श्रुत–शास्त्र, सुना हुआ]।

(४) 'कृतं युगेऽलमर्थे स्याद्विहिते हिंसिते त्रिषु' इति मेदिनी। [कृत–सत्ययुग, पर्याप्त, विहित, हिंसित]।

(५) 'महाभीतौ जीवनाऽनपेक्षकर्मणि चाऽत्याहितम्। [जान पर खेल जाना] [अत्याहित–बड़ा भारी भय, जानपर खेलना]।

(६) 'भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीवं त्रिषूचिते। प्राप्ते वृत्ते समे सत्ये देवयोन्यन्तरे तु ना ॥ कुमारेऽपी'ति मेदिनी। [भूत–पृथिवी आदि पञ्चमहाभूत, उचित, सत्य, मृत, भूत-प्रेत, बीता हुआ, कुमार]।

Dr. Umila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृत्तं[1] पद्ये चरित्रे त्रिष्वतीते दृढ-निस्तले ॥ ८४ ॥
महद्राज्यं[2] चाऽवगीतं[3] जन्ये स्याद्गर्हिते त्रिषु ।
श्वेतं[4] रूप्येऽपि, रजतं[5] हेम्नि रूप्ये सिते त्रिषु ॥८५॥
त्रिष्वतो. जगदिङ्गेऽपि[6], रक्तं[7] नील्यादिरागि च ।

---

(१) 'वृत्तोऽवीतेऽप्यतीतेऽपि वर्त्तुलेऽपि मृते वृते । वृत्तेऽन्यलिङ्ग वा क्लीवे छन्दश्चारित्रवृत्तिषु' इति मेदिनी । [वृत्त = पद्य, मृत, बीता हुआ, चरित्र, वृत्ति, खबर, अतीत, दृढ, गोल, घेरा] ।

(२) राज्ये महदादौ महत् । [महत्–राज्य, बड़ा, महत्तत्व] ।

(३) 'अवगीतस्तु निर्वादे दुष्टगर्हितयोरपी'ति मेदिनी । [अवगीत–जन्य = लोकापवाद, निन्दित, दुष्ट, अपवाद] ।

(४) रूप्यादिषु श्वेतम् । [श्वेत–पर्वत, चान्दी, धवल, श्वेतद्वीप, कौड़ी] ।

(५) 'रजतं रञ्जने रूप्ये शोणिते हृदहारयो' रित्यजयः । अत आरभ्य—तान्तवर्गसमाप्ति यावत्–त्रिषु । ['रजत'–चांदी रंग, हृद, हार, शोणित] ।

(६) 'जगत्स्याद्विष्टपे क्लीबं वायौ ना जङ्गमे त्रिषु' इति मेदिनी । [जगत्–जङ्गम, भुवन, वायु] ।

(७) 'रक्तोऽनुरक्ते नीलादिरञ्जिते लोहिते त्रिषु । क्लीबन्तु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अवदातः सिते पीते शुद्धे, बद्धा-ऽर्जुनौ सितौ ॥८६॥
युक्तेऽतिसंस्कृते भर्विण्यभिनीतोऽथ संस्कृतम् ।
कृत्रिमे लक्षणोपेतेऽप्यनन्तोऽनवधावपि ॥८७॥
ख्याते हृष्टे प्रतीतोऽभिजातस्तु कुलजे बुधे ।

कुङ्कुमे ताम्रे प्राचीनाऽमलकेऽसृजि' इति मेदिनी । [रक्त-लाल, रंगा हुआ, रुधिर, अनुरक्त, कुङ्कुम, ताम्बा, लाल-आंवला] ।

(१) शुद्धादावदातः । [अवदातः-गौर, श्वेत, शुद्ध] ।

(२) बद्धाऽवसितधवलेषु सितः । [सित-बद्ध, श्वेत, अवसित (समाप्त)] ।

(३) युक्तातिसंस्कृतक्षमाद्यालिषु-अभिनीतः-[अभिनीत-उचित, अत्यन्त परिष्कृत, क्षमाशील] ।

(४) 'संस्कृतः कृत्रिमे शस्ते भूषितेऽप्यन्यलिङ्गकः । क्लीबन्तु लक्षणोपेते-' इति मेदिनी । [संस्कृत-कृत्रिम, संस्कृत, (कृत-संस्कार), शोभन, सुलक्षण] ।

(५) 'अनन्तः केशवे शेषे पुमान्निरवधौ त्रिषु' इति मेदिनी । [अनन्त-विष्णु, शेषनाग, अनवधि] ।

(६) 'प्रज्ञातज्ञातहृष्टेषु प्रतीतः सादरे त्रिषु' इति मेदिनी । [प्रतीत-प्रसिद्ध, प्रहृष्ट, सादर, ज्ञात] ।

(७) 'अभिजातः कुलीने स्यान्न्याय्यपण्डितयोस्त्रिषु' इति मेदिनी । [अभिजात-कुलीन, उचित, पण्डित] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]विविक्तौ पूत-विजनौ, मूर्च्छितौ[2] मूढ-सोच्छ्रयौ ॥८८॥
द्वौ चाऽम्ल-परुषौ शुक्तौ, शितौ धवल-मेचकौ ।
सत्ये[5] साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत् ॥८९॥
[6]पुरस्कृतः पूजितेऽरात्यभियुक्तेऽग्रतःकृते ।

---

(१) 'विविक्तं त्रिष्वसम्पृक्ते रहः-पूत-विवेकिषु'—इति मेदिनी । [विविक्त-पवित्र, निर्जन, एकान्त, विवेकी, असंपृक्त] ।

(२) 'मूर्च्छितमपि सोच्छ्रये मूढे' इति मेदिनी । [मूर्च्छित-मूर्ख, मूर्च्छित (बेहोश), बढा हुआ, फैला हुआ] ।

(३) 'शुक्तं पूताम्लनिष्ठुरे' इति मेदिनी । [शुक्त-खट्टा, (सिर्का), रूखा, आचार, सडा हुआ] ।

(४) 'निशितेऽपि शितिर्भूर्जे नाऽसिताऽसितयोस्त्रिषु' इति मेदिनी । [शित-श्वेत, भूर्जपत्र, मेचक (नीला), तीक्ष्ण] ।

(५) 'सन् साधौ घोरशस्तयोः । मान्ये सत्ये विद्यमाने त्रिषु साध्व्युभयोः स्त्रियाम्' इति मेदिनी । [सत्-सत्य, साधु, विद्यमान, प्रशस्त, पूजित] ।

(७) 'पुरस्कृतोऽभिगस्ताऽरिग्रस्ताग्रेकृतपूजिते' इति मेदिनी । [पुरस्कृत-पूजित, सत्कृत, आगे किया गया, शत्रु से आक्रान्त] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

निवातावाश्रया-ऽवातौ शस्त्राऽभेद्यञ्च वर्म यत् ॥९०॥
[2]जातो-न्नद्ध-प्रवृद्धाः स्युरुच्छ्रिता, [3]उत्थितास्त्वमी ।
वृद्धिम-त्प्रोद्यतो-त्पन्ना, आदृतौ सादरा-ऽर्चितौ ॥९१॥

❀ इति तान्ताः ❀

अर्थोऽभिधेय-रै-वस्तु-प्रयोजन-निवृत्तिषु ।
निपाना-ऽऽगमयोस्तीर्थमृषिजुष्टे जले गुरौ ॥ ९२ ॥

---

(१) 'निवातो दृढसन्नाहे निवासे वातवर्जिते' इति मेदिनी । [निवात–आश्रय, वायुरहित, शस्त्रसे अभेद्य सुदृढ कवच] ।

(२) 'उच्छ्रितं त्रिषु सञ्जाते समुन्नद्धप्रवृद्धयोः' इति मेदिनी । [उच्छ्रित–उत्पन्न, उमडा हुआ, ऊंचा, बढा हुआ] ।

(३) 'उत्थितं स्यात्त्रिषूत्पन्ने प्रोद्यते वृद्धिमत्यपि' इति मेदिनी । [उत्थित–उत्पन्न, बढा हुआ, उठा हुआ] ।

(४) सादरार्चितयोरादृतः । [आदृत–सादर, पूजित, आदर किया गया] ।

(५) अभिधेयादिष्वर्थेष्वर्थः । [अर्थ–अर्थ, धन, वस्तु, प्रयोजन, निवृत्ति] ।

(६) निपानं = जलावतारः, जुष्टं = सेवितम् । जलाशयादिषु तीर्थम् । [तीर्थ–सीढी, कूप आदि, आगम (वेद), तीर्थ, गुरु] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समर्थस्त्रिषु शक्तिस्थे सम्बद्धार्थे हितेऽपि च ।
दशमीस्थौ क्षीणराग-वृद्धौ, वीथी पदव्यपि ॥९३॥
आस्थानी-यत्नयोरास्था, प्रस्थोऽस्त्री सानु-मानयोः ।
[शास्त्र-द्रविणयोर्ग्रन्थः, संस्थाऽऽधारे स्थितौ मृतौ] ।

* इति थान्ताः *

---

(१) शक्तिस्थादिषु समर्थः । [समर्थ-शक्त, सम्बद्धार्थ, हित] ।

(२) नष्टवीर्यादौ दशमीस्थः । [दशमीस्थ-वृद्ध, क्षीण-वीर्य, क्षीण काम वासना वाला] ।

(३) 'वीथी पंक्तौ मृदङ्गे च रूपकान्तरवर्त्मनोः' इति मेदिनी । [वीथी-पंक्ति, मृदङ्ग, नाटकभेद, मार्ग] ।

(४) 'आस्था त्वालम्बनाऽऽस्थानयत्नापेक्षासु योषिती'ति मेदिनी । [आस्था-सभा, यत्न, अपेक्षा, आलम्बन, श्रद्धा] ।

(५) 'प्रस्थोऽस्त्रियां मानभेदे सानावुन्मितवस्तुनि' इति मेदिनी । [प्रस्थ-पर्वत सानु (पठार), १ सेर वस्तु; १ सेर] ।

(६) द्वयोर्ग्रन्थः । [ग्रन्थ-शास्त्र, धन] ।

(७) त्रिषु संस्था । [संस्था-आधार, मरण, स्थिति] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभिप्राय-वशौ छन्दावब्दौ जीमूत-वत्सरौ ॥९४॥
अपवादौ तु निन्दा-ऽऽज्ञे, दायादौ सुत-बान्धवौ ।
पादा रश्म्य-ङ्घ्रि-तुर्यांशाश्चन्द्रा-ग्न्य-र्कास्तमोनुदः ९५
निर्वादो जनवादेऽपि, शादौ जम्बाल-शष्पयोः ।
साऽऽरावे रुदिते त्रातर्याक्रन्दो दारुणे रणे ॥९६॥

(१) द्वयोश्छन्दः । [छन्द—अभिप्राय, छन्द] ।

(२) द्वयोरब्दः । [अब्द—मेघ, वर्ष] ।

(३) द्वयोरपवादः । [अपवाद—निन्दा, आज्ञा] ।

(४) द्वयोर्दायादः । [दायाद—पुत्र, बान्धव] ।

(५) त्रिषु—पादः । [पाद—किरण, पैर, चतुर्थांश] ।

(६) त्रिषु—तमोनुत् । [तमोनुद्—चन्द्र, सूर्य, अग्नि] ।

(७) 'निर्वादो लोकवादेऽपि परिनिष्ठितवादयो'रिति मेदिनी । [निर्वाद—लोकवाद, परिनिष्ठित = निश्चित-वाद] ।

(८) द्वयोः शादः । [शाद—कर्दम, कीचड़, घास] ।

(९) चतुर्षु—आक्रन्दः । [आक्रन्द—जोर से रोना, राजा, रक्षक, भीषण युद्ध] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्यात्प्रसादोऽनुरागेऽपि, [2]सूदः स्याद्व्यञ्जनेऽपि च ।
[3]गोष्ठाध्यक्षेऽपि गोविन्दो, [4]हर्षेऽप्यामोदवन्मदः ९७
[5]प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम् ।
स्त्री [6]संविज्ञान-संभाषा-क्रियाकारा-ऽऽजि-नामसु ९८

(१) 'प्रसादोऽनुग्रहे काव्यप्राण-स्वास्थ्यप्रसत्तिषु' इति मेदिनी । [प्रसाद-अनुराग, प्रसन्नता, अनुग्रह, स्वास्थ्य, काव्य का प्रसाद गुण] ।

(२) सूपकारव्यञ्जनयोः सूदः । [सूद-व्यञ्जन, रसोइया] ।

(३) 'गोविन्दो वासुदेवे स्याद् गवाध्यक्षे बृहस्पतौ' इति मेदिनी । [गोविन्द-वासुदेव, गवाध्यक्ष, बृहस्पति] ।

(४) 'आमोदो गन्धहर्षयोः' इति मेदिनी । [आमोद-अत्यन्त मनोहर सुगन्ध, हर्ष] ।

'मदो-रेतसि कस्तूर्यां गर्वे हर्षेभदानयो'रिति च विश्वः । [मद-हर्ष, कस्तूरी, गर्व, हस्तिमद, वीर्य] ।

(५) त्रिषु ककुदः । [ककुद-प्राधान्य, प्रधान राजचिह्न, वृषभ का पीठ का उभड़ा हुआ मांस (थूहा)] ।

(६) संभाषा = सम्भाषणम् । क्रियाकारः=कर्मनियमः,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धर्मे[1] रहस्युपनिषत्स्याद्द्वौ[2] वत्सरे शरत् ।
पदं[3] व्यवसित-त्राण-स्थान-लक्ष्माऽङ्घ्रि-वस्तुषु ॥९९॥
गोष्पदं[4] सेविते माने, आस्पदम्[5] प्रतिष्ठाकृत्यमास्पदम् ।
त्रिष्विष्ट[6]-मधुरौस्वादू, मृदू[7] चाऽतीक्ष्ण-कोमलौ ॥१००॥

पणबन्धो वा । आजिः = युद्धम् । नाम-संज्ञा । [संविद्-ज्ञान, सम्भाषण, चेतना, कर्मनियम, प्रतिज्ञा, पणबन्ध (शर्त्त), युद्ध, नाम, सङ्केत, आचार] ।

(१) 'उपनिषत्तु भवेद्धर्मे वेदान्ते विजने स्त्रियाम्' इति मेदिनी । [उपनिषद्-धर्म, एकान्त, जनशून्य स्थान, वेदान्त] ।

(२) द्वयोः शरत् । [शरद्-शरदृतु, वर्ष] ।

(३) षट्सु व्यवसितादिषु पदम् । [पद-व्यवसिति, व्यवसाय, रक्षा, स्थान, चिह्न, पैर, वस्तु, पदसंज्ञक] ।

(४) द्वयोर्गोष्पदम् । [गोष्पद-सेवित, मान, गोखुर, छोटा गढ़हा] ।

(५) द्वयोरास्पदम् । आ-दान्तात्त्रिषु । [आस्पद-प्रतिष्ठा, कृत्य] ।

(६) इष्टमधुरयोः स्वादुः-त्रिषु । [स्वादु-इष्ट, मधुर] ।

(७) द्वयोर्मृदुः। [मृदु-कोमल,मुलायम, मृदु स्वभाव वाला] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मूढा-ऽल्पा-ऽपटु-निर्भाग्या मन्दा स्युर्द्वौ तु[2] शारदौ ।
प्रत्यग्रा-ऽप्रतिभौ, [3]विद्व-त्सुप्रगल्भौ विशारदौ १०१

* इति दान्ताः *

[4]व्यामो वटश्च न्यग्रोधावु[5]त्सेधः काय उन्नतिः ।
[6]पर्याहारश्च मार्गश्च विवधौ वीवधौ च तौ ॥१०२॥
[7]परिधिर्यज्ञियतरोः शाखायामुपसूर्यके ।

---

(१) चतुर्षु-मन्दः । [मन्द-मूर्ख, अल्प, मूढ, आलसी, मन्दभाग्य] ।

(२) नवीन-प्रतिभाशून्ययोः शारदः । [शारद-नवीन, प्रतिभाशून्य, शरदृतुभव सस्य] ।

(३) पण्डितप्रवीणयोर्विशारदः ।[विशारद-पण्डित, प्रवीण] ।

(४) द्वयोर्न्यग्रोधः । [न्यग्रोध-वट, व्याम (फैलाई हुई दो भुजाओं का अन्तर)] ।

(५) द्वयोरुत्सेधः । [उत्सेध-शरीर, उन्नति, उँचाई] ।

(६) मार्गादौ विवध वीवधौ । पर्याहारः = उभयतो बद्ध-शिक्यं काष्ठम् [बहंगी] । [विवध, वीवध-मार्ग, बंहगी] ।

(७) यज्ञियवृक्षशाखादौ-परिधिः । [परिधि-पलाश आदि यज्ञियवृक्ष की शाखा, परिवेष—सूर्य का (उपमण्डल) घेरा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बन्धकं व्यसनं चेतःपीडाऽधिष्ठानमाधयः ॥१०३॥
स्युः समर्थन-नीवाक-नियमाश्च समाधयः ।
दोषोत्पादेऽनुबन्धः स्यात्प्रकृत्यादिविनश्वरे ॥१०४॥
मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने ।
विधुर्विष्णौ चन्द्रमसि, परिच्छेदे बिलेऽवधिः ॥१०५॥

---

(१) बन्धकादिष्वर्थेष्वाधिः । [आधि—बन्धक, व्यसन, मानसी पीडा, अधिष्ठान] ।

(२) समर्थनादिषु समाधिः । तत्र नीवाकः—वचनाऽभावः, मूलधनवृद्ध्यर्थं धान्यादिसङ्ग्रहो वेति दीक्षितः । [समाधि—समर्थन, समाधान, नियम, नीवाक (= वचनाऽभाव, कमबोलना) या धन्य संग्रह, समाधि] ।

(३) दोषोत्पादादिषु—अनुबन्धः । [अनुबन्ध—दोष की उत्पत्ति, प्रकृत्यादिका विनश्वर = (ककारादि अनुबन्ध), मुख्यपित्रादिका अनुयायी बालक, प्रकृतानुवर्त्तन] ।

(४) विष्णुचन्द्रयोर्विधुः । [विधु—विष्णु, चन्द्रमा, कर्पूर] ।

(५) परिच्छेदबिलयोरवधिः । [अवधि—अवधि, बिल, अध्याय, परिच्छेद, अवधान] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

[1]विधिर्विधाने दैवेऽपि, [2]प्रणिधिः प्रार्थने चरे ।
[3]बुध-वृद्धौ पण्डितेऽपि, [4]स्कन्धः समुदयेऽपि च १०६
[5]देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम् ।

---

(१) विधिर्ना नियतौ काले विधाने परमेष्ठिनि' इति मेदिनी । [विधि-विधान, दैव, ब्रह्मा] ।

(२) 'प्रणिधिर्याचने चरे इति हैमः । [प्रणिधि-प्रार्थना, गुप्तचर] ।

(३) 'बुधः-कवौ रौहिणेये' इति मेदिनी । [बुध-पण्डित, बुध (चन्द्रपुत्र)] ।

'वृद्धो जीर्णे प्रवृद्धे ज्ञे त्रिषु क्लीबन्तु शैलजे' इति च मेदिनी । [वृद्ध-बुड्ढा, बढा हुआ, पण्डित] ।

(४) 'स्कन्धः स्यान्नृपतावंसे संपरायसमूहयोः । काये तरुप्रकाण्डे च भद्रादौ छन्दसो मिदि' इति मेदिनी । [स्कन्ध-राजा, कन्धा, युद्ध, समूह, शरीर, वृक्ष का स्कन्ध] ।

(५) 'सिन्धुर्वमथुदेशाब्धिनदे ना सरिति स्त्रिया'मिति मेदिनी । [सिन्धु-देश, नद, समुद्र, नदी, हस्तिमद, हस्ति शीकर] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विधा[1] विधौ प्रकारे च, साधू[2] रम्येऽपि च त्रिषु ॥१०७॥
वधूर्[3]जाया स्नुषा स्त्री च, सुधा[4] लेपोऽमृतं स्नुही ।
सन्धा[5] प्रतिज्ञा मर्यादा, श्रद्धा[6] संप्रत्ययः स्पृहा ॥१०८॥
मधु[7] मद्ये पुष्परसे क्षौद्रेऽप्यन्धं तमस्यपि ।

---

(१) 'विधा गजान्ने ऋद्धौ च प्रकारे वेतने विधौ' इति विश्वः । [विधा–विधान, हाथी की खुराक, ऋद्धि, प्रकार, वेतन] ।

(२) 'साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत्' इति विश्वः । [साधु–रमणीय, चारु, सज्जन, साहूकार] ।

(३) पत्नीस्नुषास्त्रीषु वधूः । [वधू—स्त्री, पतोहू, नवोढा (बहू), पत्नी] ।

(४) 'सुधा गङ्गेष्टकाचूर्णं स्नुही चामृतमूर्वयो'रित्यजयः । [सुधा—चूना, अमृत, स्नुही, गङ्गा, मूर्वा] ।

(५) प्रतिज्ञामर्यादयोः–सन्धा । [सन्धा–प्रतिज्ञा, मर्यादा, सन्धि] ।

(६) आदरस्पृहयोः श्रद्धा । [श्रद्धा—आदर, इच्छा] ।

(७) मद्यादौ मधु । [मधु—मदिरा, पुष्परस (मकरन्द), सहत, जल, दुग्ध, चैत्र, वसन्त, मधु दैत्य] ।

अत आरभ्य धान्तसमाप्तिपर्यन्तं–त्रिषु ।

(८) तमस्यप्यन्धम् । [अन्ध—अन्धकार, अन्धा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतस्त्रिषु, समुन्नद्धौ[1] पण्डितंमन्य-गर्वितौ ॥१०९॥
[2]ब्रह्मबन्धुरधिक्षेपे [3]निर्देशेऽथाऽवलम्बितः ।
अविदूरोऽप्यवष्टब्धः, [4]प्रसिद्धौ ख्यात-भूषितौ॥११०॥

* इति धान्ताः *

[5]सूर्य-वह्नी चित्रभानू, [6]भानू रश्मि-दिवाकरौ ।
[7]भूतात्मानौ धातृ-देहौ, [8]मूर्ख-नीचौ पृथग्जनौ ॥१११॥

---

(१) पण्डितम्मन्यगर्वितयोः समुन्नद्धः । [समुन्नद्ध—पण्डितमानी, गर्वित] ।

(२) अधिक्षेपनिर्देशयोर्ब्रह्मबन्धुः । [ब्रह्मबन्धु—निन्दित-ब्राह्मण, ब्राह्मणजाति] ।

(३) अवलम्बिताविदूरयोरवष्टब्धः । [अवष्टब्ध—अवलम्बित, निकट, आक्रान्त] ।

(४) ख्यातभूषितयोः प्रसिद्धः । [प्रसिद्ध—विख्यात, विभूषित] ।

(५) सूर्यवह्न्योश्चित्रभानुः । [चित्रभानु—सूर्य, अग्नि] ।

(६) रश्मिसूर्ययोः—भानुः । [भानु—किरण, सूर्य] ।

(७) धातृदेहयोर्भूतात्मा । [भूतात्मा—ब्रह्मा, देह] ।

(८) मूर्खनीचयोः पृथग्जनः । [पृथग्जन—मूर्ख, नीच] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ग्रावाणौ शैल-पाषाणौ, पत्त्रिणौ[2] शर-पक्षिणौ ।
तरु[3]-शैलौ शिखरिणौ, शिखिनौ[4] वह्नि-बर्हिणौ ॥११२॥
प्रतियत्नावुभौ[5] लिप्सो-पग्रहावथ सादिनौ[6] ।
द्वौ सारथि-हयारोहौ, वाजिनोऽश्वे[7]-षु-पक्षिणः ॥११३॥
कुलेऽप्यभिजनो[8] जन्मभूम्यामप्यथ हायनाः[9] ।

---

(१) शैलपाषाणयोर्ग्रावा । [ग्रावा–पर्वत, पाषाण] ।

(२) शरपक्षिणोः पत्त्री । [पत्त्री–बाण, पक्षी] ।

(३) द्वयोरर्थयोः शिखरी [शिखरी–वृक्ष, पर्वत] ।

(४) वह्निमयूरयोः शिखी । [शिखी–अग्नि, मयूर] ।

(५) प्रतियत्नबन्दीग्रहणयोः प्रतियत्नः । [प्रतियत्न–लिप्सा = मनोरथ, संस्कार = गुणाधान, उपग्रह = बन्दी पकड़ना, अनुकूल करना] ।

(६) सारथिहयारोहयोः सादी । [सादी–सारथि,घुड़सवार] ।

(७) अश्वबाणपक्षिषु वाजी । [वाजी–घोड़ा, बाण, पक्षी] ।

(८) जन्मभूकुलयोरभिजनः । [अभिजन—कुल, कुल-प्रधान, जन्मभूमि] ।

(९) शब्द-रश्मि-व्रीहिभेदेषु हायनः । [हायन–वर्ष, किरण, साठी, नीवार आदि व्रीहिविशेष] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वर्षा-र्चि-व्रीहिभेदाश्च, [1]चन्द्राऽग्न्य-र्का विरोचनाः ११४
केशेऽपि [2]वृजिनो, [3]विश्वकर्माऽर्क-सुरशिल्पिनोः ।
[4]आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च ॥११५॥
शक्रो घातुकमत्तेभो वर्षुकाऽब्दो घनाघनः ।
घनो मेघे मूर्त्तिगुणे, त्रिषु मूर्त्ते निरन्तरे ॥११६॥

---

(१) 'विरोचनः प्रह्लादस्य तनयेऽर्केऽग्निचन्द्रयो' रिति मेदिनी । [विरोचन–प्रह्लाद का पुत्र, वह्नि, सूर्य] ।

(२) 'वृजिनं कल्मषे क्लीबं केशे ना कुटिले त्रिषु' इति रभसः । [वृजिन–पाप, केश, कुटिल] ।

(३) 'विश्वकर्मा सहस्रांशौ मुनिभिद्देवशिल्पिनो' रिति मेदिनी । [विश्वकर्मा–सूर्य, देवशिल्पी] ।

(४) यत्नादावात्मा । [आत्मा–यत्न, धैर्य, बुद्धि, स्वभाव, ब्रह्म, शरीर, परमात्मा, चित्त] ।

(५) घातुकादौ घनाघनः । [घनाघन–इन्द्र, घातुक (क्रूर), मत्तहस्ती, वर्षा करने वाला मेघ] ।

(६) मेघ–काठिन्य–मूर्त्तनिरन्तरेषु घनः । [घन–मेघ, कडा, दृढ, मूर्तिमान्, घनफल = विस्तार, निरन्तर = घना] ।

टि० ११६ श्लोके–'शक्र-घातुक-मत्तेभ-वर्षुकाब्दा घनाघनाः' इति पा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभिमानोऽर्थादिदर्पे ज्ञाने प्रणय-हिंसयोः ।
इन्द्रः सूर्ये प्रभौ, राजा मृगाङ्के क्षत्रिये नृपे ॥११७॥
वाणिन्यौ नर्त्तकी-दूत्यौ, स्रवन्त्यामपि वाहिनी ।
ह्रादिन्यौ वज्र-तडितौ, वन्दायामपि कामिनी ॥११८॥

---

(१) दर्पादावभिमानः । [अभिमान—धन आदि का घमण्ड, ज्ञान, प्रणय, = अनुराग, हिंसा] ।

(२) सूर्यप्रभ्वोरिनः । [इन—सूर्य, प्रभु, राजा] ।

(३) चन्द्रे नृपादौ च राजा । [राजा—चन्द्रमा, क्षत्रिय, यक्ष, इन्द्र, राजा] ।

(४) नर्त्तकीदूत्योर्वाणिनी । 'वाणिनी—नर्त्तकी-मत्ता-विदग्ध-वनितासु च' इति मेदिनी । [वाणिनी—नर्त्तकी, दूती, कामोन्मत्ता, चतुर वनिता] ।

(५) 'वाहिनी स्यात्तरङ्गिण्यां सेनासैन्यप्रभेदयो'रिति विश्वः । [वाहिनी—नदी, सेना, सेना भेद] ।

(६) वज्रविद्युतोर्ह्रादिनी । [ह्रादिनी—वज्र, बिजली] ।

(७) 'कामिनी भीरुवन्दयोः' । [कामिनी—कामिनी स्त्री वन्दा, विलासिनी] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]त्व-ग्देहयोरपि तनुः, [2]सूनाऽधोजिह्विकापि च ।
[3]क्रतु-विस्तारयोरस्त्री वितानं त्रिषु तुच्छके ॥११९॥
मन्देऽथ [4]केतनं कृत्ये केतावुपनिमन्त्रणे ।
[5]वेदस्तत्त्वं तपो ब्रह्म, [6]ब्रह्मा विप्रः प्रजापतिः ॥१२०॥
[7]उत्साहने च हिंसायां सूचने चाऽपि गन्धनम् ।

---

(१) त्वगादौ तनुः । [तनु-त्वचा, शरीर, अल्प, विरल, कृश] ।

(२) 'सूना पुत्र्यां वधस्थानगलशुण्डिकयोरपी'ति विश्वः । [सूना-कसाई खाना, जीभ के बीच का भाग उपजिह्वा] ।

(३) यज्ञादौ वितानः । [वितान-यज्ञ, चन्दवा, विस्तार, तुच्छ, मन्द=मूढ] ।

(४) कृत्यादौ केतनम् । [केतन-कृत्य=कार्य, केतु (ध्वजा), निवास, श्राद्धादिमें निमन्त्रण] ।

(५) वेदादौ ब्रह्म । [ब्रह्म-वेद, तत्त्व = चैतन्य, तप] ।

(६) विप्रादौ ब्रह्मा । [ब्रह्मा-ब्राह्मण, प्रजापति, ब्रह्मा] ।

(७) 'गन्धनं सूचनोत्साहहिंसनेषु प्रकाशने' इति विश्वः । उत्साहनादौ गन्धनम् । [गन्धन-उत्साह, उत्साहित करना, मारना, चुगली खाना] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आतञ्चनं प्रतीवाप-जवना-ऽऽप्यायनार्थकम् ॥१२१॥
व्यञ्जनं लाञ्छने श्मश्रु-निष्ठाना-ऽवयवेष्वपि ।
स्यात्कौलीनं लोकवादे युद्धे पश्वहिपक्षिणाम् ॥१२२॥
स्यादुद्यानं निःसरणे वनभेदे प्रयोजने ।
अवकाशे स्थितौ स्थानं, क्रीडादावपि देवनम् ॥१२३॥

(१) प्रतीवापः = दुग्धादौ दध्याद्यर्थं तक्रादिप्रक्षेपः ['जावँण देना'] । निक्षेपो वा जवनं = वेगः । आप्यायनं = तर्पणम् । [आतञ्चन–दूधमें जावंण देना, दही जमाना, निक्षेप रखना, वेग, आप्यायन, तृप्त करना] ।

(२) लाञ्छनादौ व्यञ्जनम् । [व्यञ्जन–चिह्न, 'वर्दी'–'चपड़ास', मोंछ–डाढी, कढी आदि; व्यञ्जन, लिङ्ग, योनि] ।

(३) लोकवादादौ कौलीनम् । [कौलीन–लोक निन्दा, सर्प आदि का एवं पशु पक्षियों का–मेढा तीतर आदि का-युद्ध, कुलीनता]।

(४) निस्सरणादावुद्यानम् । [उद्यान–बगीचा, निकलना, प्रयोजन] ।

(५) स्थित्यवकाशयोः स्थानम् । [स्थान–ठहरना, अवकाश, ठहरने की जगह] ।

(७) क्रीडाव्यवहारस्तुत्यादौ देवनम् । [देवन–व्यवहार, विजिगीषा, क्रीडा, स्तुति आदि] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]उत्थानं पौरुषे तन्त्रे सन्निविष्टोद्गमेऽपि च ।
[2]व्युत्थानं प्रतिरोधे च विरोधाचरणेऽपि च ॥१२४॥
[3]मारणे मृतसंस्कारे गतौ द्रव्ये-ऽर्थदापने ।
निर्वर्त्तनो-पकरणा-ऽनुव्रज्यासु च साधनम् ॥१२५॥
[4]निर्यातनं वैरशुद्धौ दाने न्यासाऽर्पणेऽपि च ।

---

(१) पौरुषादावुत्थानम् । [उत्थान-पुरुषार्थ, उद्योग, उठना, प्राङ्गण, तन्त्र=ताना-बाना, ढाँचा] ।

(२) प्रतिरोधादौ व्युत्थानम् । [व्युत्थान—प्रतिरोध, विरुद्धाचरण, विद्रोह] ।

(३) मारणादौ साधनम् । [साधन-मारना, मृतक का अग्नि संस्कार, जाना, सेना, द्रव्य, धन आदि दिलाना, सिद्धौषध, साधना, उपाय, पुरुष-लिङ्ग, अनुगमन = सहगमन] ।

(४) वैरशुद्ध्यादौ निर्यातनम् । [निर्यातन-'वैर चुकाना', बदला लेना, देना, धरोहर-थाती-वापिस देना] ।

टि० १२५ श्लोके-'गतौ द्रव्योपादने' इति पाठा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यसनं[1] विपदि भ्रंशे दोषे कामज-कोपजे ॥१२६॥
पक्ष्माऽक्षिलोम्नि[2] किञ्जल्के तन्त्वाद्यंशेऽप्यणीयसि ।
तिथिभेदे[3] क्षणे पर्व, वर्त्म[4] नेत्रच्छदेऽध्वनि ॥१२७॥
अकार्य[5]-गुह्ये कौपीनं, मैथुनं[6] सङ्गतौ रते ।
प्रधानं[7] परमात्मा धीः, प्रज्ञानं[8] बुद्धि-चिह्नयोः ॥१२८॥

---

(१) विपदादौ व्यसनम् । [व्यसन–विपत्ति, दैवी अरिष्ट, गिरना, फेल होना, व्यसन, (जूआ, वेश्यागमन, मदिरापान, आदि बुरी आदत)] ।

(२) अक्षिलोमादौ–पक्ष्म । [पक्ष्म–आँख का रोआँ, पुष्प-केसर, सूत आदिका सूक्ष्म अंश । ।

(३) क्षणादौ पर्व । [पर्व–उत्सव, गाँठ, अमावास्या आदि तिथि, त्यौहार] ।

(४) नेत्रच्छदादौ वर्त्म । [वर्त्म–पलक, मार्ग] ।

(५) अकार्यगुह्ययोः कौपीनम् । [कौपीन–निन्दितकर्म, लिङ्ग, लंगोट] ।

(६) सङ्गतिसुरतयोः–मैथुनम् । [मैथुन–सङ्गति सम्बन्ध, स्त्रीसङ्ग, सुरत] ।

(७) परमात्मादौ प्रधानम् । [प्रधान–बुद्धि, प्रकृति, परमात्मा, प्रधानमन्त्री, श्रेष्ठ] ।

(८) बुद्ध्यादौ प्रज्ञानम् । [प्रज्ञान–बुद्धि, चिह्न] ।

Dr. Urmila Sharma Collection, Varanasi

. CC0. In Public Domain, Digitizagtion by eGangotri

[1]प्रसूनं पुष्पफलयोर्निधनं[2] कुल-नाशयोः ।
[3]क्रन्दने रोदना-ऽऽह्वाने, [4]वर्ष्म देह-प्रमाणयोः ॥१२९॥
[5]गृह-देह-त्विट्-प्रभावा धामान्यर्थं[6] चतुष्पथे ।
सन्निवेशे च संस्थानं, लक्ष्मं[7] चिह्न-प्रधानयोः ॥१३०॥
[8]आच्छादने सम्पिधानमपवारणमित्युभे ।

---

(१) पुष्पादौ प्रसूनम् । [प्रसून–पुष्प, फल] ।

(२) कुलनाशयोर्निधनम् । [निधन–कुल, नाश] ।

(३) रोदनादौ क्रन्दनम् । [क्रन्दन–रोना, बुलाना] ।

(४) देहादौ वर्ष्म । [वर्ष्म–देह, नाप, अत्यन्त सुन्दर आकृति] ।

(५) गृहादौ धाम । [धाम–गृह, शरीर, जन्म, दीप्ति, प्रभाव, स्थान, रश्मि] ।

(६) चतुष्पथादौ संस्थानम् । [संस्थान–चौराहा, आकृति, ढांचा, मृत्यु, संनिवेश = ढाँचा जचाना, बैठाना] ।

(७) चिह्नादौ लक्ष्म । [लक्ष्म–चिह्न, प्रधान] ।

(८) संपिधानाऽपवारणे उभे आच्छादने । [आच्छादन–ढकना, वस्त्र, घेरना, रोकना] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आराधनं साधने स्यादवाप्तौ तोषणेऽपि च ॥१३१॥
अधिष्ठानं चक्र-पुर-प्रभावा-ऽध्यासनेष्वपि ।
रत्नं स्वजातिश्रेष्ठेऽपि, वने सलिल-कानने ॥१३२॥
तलिनं विरले स्तोके, वाच्यलिङ्गास्तथोत्तरे ।
समानाः सत्समैके स्युः, पिशुनौ खल-सूचकौ॥१३३॥

---

(१) साधनादावाराधनम् । [आराधन–साधन करना, प्राप्त करना, सन्तुष्ट करना, सिद्ध करना] ।

(२) रथचक्रादावधिष्ठानम् । [अधिष्ठान–रथचक्र, नगर, प्रभाव, ठहरना, बैठना, रहना] ।

(३) स्वजातिश्रेष्ठे मण्यादौ च रत्नम् । [रत्न–मणि, हीरा-पन्ना आदि, अपनी २ जाति में जो श्रेष्ठ हो वह] ।

(४) सलिलादौ वनम् । [वन–जल, वन = जङ्गल] ।

(५) विरलादौ तलिनम् । [तलिन–विरल (दूर २), थोड़ा] ।

अथ तलिनादारभ्य नान्तवर्गसमाप्तिपर्यन्तं वाच्यलिङ्गाः ।

(६) तत्समादौ समानः । [समान–सज्जन, सदृश, एक, समान नामक वायु] ।

(७) खलसूचकयोः पिशुनः । [पिशुन–खल, कौवा, चुगलखोर, क्रूर, दुष्ट, कुङ्कुम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]हीन-न्यूनावूनगर्ह्यौ, [2]वेगि-शूरौ तरस्विनौ ।
[3]अभिपन्नोऽपराद्धोऽभिग्रस्त-व्यापद्गतावपि ॥१३४॥

❀ इति नान्ताः ❀

[4]कलापो भूषणे बर्हे तूणीरे संहतावपि ।
[5]परिच्छदे परीवापः पर्युप्तौ सलिलस्थितौ ॥ १३५ ॥
गोधु[6]-ग्गोष्ठपती गोपौ, [7]हर-विष्णू वृषाकपी ।

---

(१) न्यूनगर्ह्ययोर्हीनन्यूनौ । [हीन, न्यून-कमती, निन्द्य, नीच] ।

(२) वेगिशूरयोस्तरस्वी । [तरस्वी-वेगवान्, शूर] ।

(३) अपराद्धादावभिपन्नः । [अभिपन्न-अपराधी, भागा हुआ, ग्रस्त, विपत्ति में पड़ा हुआ] ।

(४) भूषणादौ कलापः [कलाप-भूषण, तागडी, मोरकी पाँख, भाथी, समूह] ।

(५) परिच्छदादौ परीवापः । [परीवाप—परिवार, चारों ओर अन्न बोना, जलाधार, जलाशय, उपकरण, डेरा, तम्बू, आदि] ।

(६) गोधुग्गोष्ठपत्योर्गोपः [गोप—गोप, गोष्ठपति, गौ को दूहने वाला ग्वाला] ।

(७) विष्णुशिवयोः-वृषाकपिः [वृषाकपि-विष्णु, शिव] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बाष्पमूष्मा-ऽश्रु, कशिपु[२] त्वन्नमाच्छादनं द्वयम् ॥१३६॥
तल्पं[३] शय्या-ऽट्ट-दारेषु, स्तम्बेऽपि[४] विटपोऽस्त्रियाम् ।
प्राप्तरूप-स्वरूपा-ऽभिरूपा बुध-मनोज्ञयोः ॥ १३७ ॥
भेद्यलिङ्गा अमी, [६]कूर्मी वीणाभेदश्च कच्छपी ।
[[७]कुतपो मृगरोमोत्थपटे चाऽह्नोऽष्टमेंऽशके] ॥

❀ इति पान्ताः ❀

---

(१) ऊष्माश्रुणि बाष्पम् [बाष्प—भाफ, आँसू] ।

(२) अन्नवस्त्रयोः सहोक्तौ कशिपु पुंनपुंसकयोः [कशिपु—भोजन, वस्त्र] । (३) शय्यादौ तल्पम् [तल्प—शय्या, अटारी, (तल्प = मकान आदि का तल्ला), पत्नी] ।

(४) 'विटपं पल्लवे षिङ्गे विस्तारे स्तम्बशाखयो'रिति विश्वः । [विटप—पल्लव, रंडीबाज, भडुवा, पौधा एवं शाखा आदि का विस्तार (फैलाव),] ।

(५) प्राप्तरूपादयो बुधरम्ययोः । अमी भेद्यलिङ्गाः [प्राप्तरूप, स्वरूप, अभिरूप—सुन्दर, मनोहर, पण्डित] ।

(६) वीणाभेदकूर्म्योः कच्छपी [कच्छपी—सरस्वतीजी की वीणा, कछुवी] ।

(७) मृगरोमपटादौ-कुतपः [कुतप—पशमीना, तूस,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]रवर्णे पुंसि रेफः स्यात्कुत्सिते वाच्यलिङ्गकः ॥१३८॥

❀ इति फान्ताः ❀

[2]अन्तराभवसत्त्वेऽश्वे गन्धर्वो दिव्यगायने ।
[3]कम्बुर्ना वलये शङ्खे, द्विजिह्वौ [4]सर्प-सूचकौ ॥१३९॥
[5]पूर्वोऽन्यलिङ्गः प्रागाह पुंबहुत्वेऽपि पूर्वजान् ।

❀ इति बान्ताः ❀

दुशाला आदि मृग रोमके ऊनी वस्त्र, १५ मुहूर्तात्मक १ दिन का आठवाँ मुहूर्त्त $\frac{8}{15}$]।

(१) कुत्सितादौ रेफः । [रेफ--'र' वर्ण, कुत्सित]।

(२)अन्तरा जन्ममरणयोर्मध्ये यातनाभोगार्थं शरीरधारिणः सत्त्वाः । अश्वादौ-गन्धर्वः । वान्त एवायं तु प्रसिद्धः । [गन्धर्व-यातनार्थ शरीरधारी, गन्धर्व नामक देवजाति, घोड़ा, देवताओं के विश्वावसु आदि गायक]।

(३) वलयादौ कम्बुः [कम्बु—चूडी, शङ्ख, हाथी]।

(४) सर्पसूचकयोर्द्विजिह्वः । [द्विजिह्व-सर्प, चुगलखोर]।

(५) पूर्वशब्दः प्राग्वाची वाच्यलिङ्गः, स यदा पूर्वजान् पितामहादीन् आह तदा पुंसि बहुत्वे च ज्ञेय इत्यर्थः । परन्तु वान्त एवायं प्रसिद्धो, न बान्तः । [पूर्व— पूर्वदिशा, पहिले, पूर्वज]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुम्भौ[1] घटे-ममूर्धाऽशौ, डिम्भौ[2] तु शिशु-बालिशौ ॥
[3]स्तम्भौ स्थूणा-जडीभावौ, शम्भू[4] ब्रह्म-त्रिलोचनौ ।
कुक्षि[5]-भ्रूणा-ऽर्भका गर्भाः, [6]विस्रम्भः प्रणयेऽपि च १४१
[7]स्याद्भेर्यां दुन्दुभिः पुंसि स्यादक्षे दुन्दुभिः स्त्रियाम् ।
[8]स्यान्महारजने क्लीबं कुसुम्भं करके पुमान् ॥१४२॥

---

(१) घटादौ कुम्भः । [कुम्भ—घट, वेश्यागामी, हाथी का शिरोभागविशेष] ।

(२) द्वयं डिम्भः [डिम्भ—बालक, मूर्ख] ।

(३) द्वयोरर्थयोः स्तम्भः । [स्तम्भ—खम्भा, स्तम्भन, होना रुकना] । (४) द्वयोः शम्भुः । [शम्भु—ब्रह्मा, शिव] ।

(५) कुक्ष्यादिषु गर्भः [गर्भ—कुक्षि, गर्भस्थबालक, बच्चा] ।

(६) 'विस्रम्भः केलिकलहे विश्वासे प्रणये वधे' इति विश्वः । [विस्रम्भ—विश्वास, प्रणय, (परिचय, प्रार्थना, प्रेम,) वध' केलि—कलह] ।

(७) भेर्यादौ दुन्दुभिः [दुन्दुभि—नगारा, जूवेका पाशा विशेष=छक्का] ।

(८) महारजनादौ कुसुम्भशब्दः [कुसुम्भ—कसूंभा, सोना, करक=कमण्डलु] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षत्रियेऽपि च नाभिर्ना,[1] सुरभिर्गवि च स्त्रियाम् ।
सभा[3] संसदि सभ्ये च, त्रिष्वध्यक्षेऽपि वल्लभः[4]॥१४३॥

❀ इति भान्ताः ❀

किरण[5]-प्रग्रहौ रश्मी, कपि[6]-भेकौ प्लवङ्गमौ ।
इच्छा[7]-मनोभवौ कामौ, शौर्य[8]-योगौ पराक्रमौ ॥१४४॥

---

(१) क्षत्रियरथचक्रपिण्डिकादौ नाभिः । [नाभि–क्षत्रिय, चक्र का मध्यभाग, सुण्डी, मुख्य राजा] ।

(२) गोचम्पकचैत्रघ्राणतर्पणादौ सुरभिः । [सुरभि–देवताओं की गौ, गौ, सुगन्धि, मनोहर, चम्पा, वसन्त ऋतु, जायफल] ।

(३) सभ्यसंसदोः सभा । [सभा–गृह, सभा, सभ्य, द्यूतशाला, जूवा] ।

(४) अध्यक्षदयितादौ वल्लभः । [वल्लभ–प्रिय, अध्यक्ष, शुभ लक्षण घोड़ा] ।

(५) किरणप्रग्रहयो रश्मिः । [रश्मि–किरण, लगाम, रस्सी, नेत्रलोम] ।

(६) कपिभेकयोः–प्लवङ्गमः । [प्लवङ्गम–वानर, मण्डूक] ।

(७) इच्छामदनयोः कामः । [काम–इच्छा, कामदेव, वीर्य] ।

(८) शौर्योद्योगयोः पराक्रमः । [पराक्रम–उद्योग, सामर्थ्य, विक्रम=शूरता] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धर्माः पुण्य-यम-न्याय-स्वभावा-ऽऽचार-सोमपाः ।
[2]उपायपूर्व आरम्भ उपधा चाप्युपक्रमः ॥१४५॥
[3]वणिक्पथः पुरं वेदो निगमो, [4]नागरो वणिक् ।
नैगमौ द्वौ, [5]बले रामो नील-चारु-सिते त्रिषु १४६
[6]शब्दादिपूर्वो वृन्देऽपि ग्रामः, [7]क्रान्तौ च विक्रमः ।

---

(१) पुण्यादौ धर्मः । [धर्म–पुण्य, यमराज, न्याय, स्वभाव, आचार, सोमपानकर्त्ता, यज्ञ] ।

(२) 'उपक्रमः स्यादुपधौ चिकित्सारम्भविक्रमे' इति विश्वः । [उपक्रम–उपायपूर्वक आरम्भ, चिकित्सा, विक्रम, जांच, परीक्षा, उपधा-डर लोभ आदि दिखाकर सचाई की जांच] ।

(३) वणिक्पथादौ निगमः । [निगम–बाजार, नगर, वेद, चटाई, बणिया] ।

(४) नागरवणिजौ–नैगमौ । [नैगम–नगरवासी, वैश्य, उपनिषद] । (५) बलरामपरशुराममृगादौ–रामः । [राम–बलराम, परशुराम, रामचन्द्र, पशु विशेष, नील, मनोहर, श्वेत] ।

(६) 'ग्रामः स्वरे संवसथे वृन्दे शब्दादिपूर्वकः' इति विश्वः । [ग्राम–स्वर, गाँव, शब्द आदि से उत्तर में रहे तो समूह अर्थ में] । (७) शक्तिसम्पत्ति–क्रान्त्योर्विक्रमः । [विक्रम–शक्ति सम्पत्ति, पराक्रम, चलना] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्तोमः स्तोत्रेऽध्वरे वृन्दे, जिह्मस्तु[2] कुटिलेऽलसे १४७
[[3]उष्णेऽपि घर्मश्चेष्टा[4]ऽलङ्कारे भ्रान्तौ च विभ्रमः] ।
[5]गुल्मा रुक्-स्तम्ब-सेनाश्च, [6]जामिः स्वसृ-कुलस्त्रियोः ॥
त्रिषु[7] श्यामौ हरि-त्कृष्णौ, [8]श्यामा स्याच्छारिवा निशा ।
क्षिति-क्षान्त्योः क्षमा, युक्ते क्षमं शक्ते हिते त्रिषु ॥

(१) स्तोत्रादौ स्तोमः । [स्तोम–स्तोत्र, यज्ञ, समूह] ।

(२) कुटिलाऽलसयोर्जिह्मः । [जिह्म–कुटिल, आलसी] ।

(३) प्रस्वेदोष्णादौ घर्मः । [घर्म–पसीना, घाम, गर्मी] ।

(४) चेष्टादौ विभ्रमः । [विभ्रमः–चेष्टा, अलङ्कार, भ्रान्ति] ।

(५) रुजादौ गुल्मः । [गुल्म–गुल्म (गोला) रोग, पौधा, तिल्ली, घाट, सेना, सेना की रक्षा, चुंगी आदि की चौकी] ।

(६) भगिनीकुलस्त्रियोर्जामिः । [जामि–बहिन, कुलीन स्त्री] ।

(७) 'क्षमा तितिक्षा, पृथ्वी च योग्ये शक्ते हिते क्षमम्'–इति धरणिः । [क्षमा–पृथ्वी, क्षमा, शक्त, योग्य, हित] ।

(८) श्यामादिषु श्यामशब्दः—त्रिषु लिङ्गेषु । [श्याम–हरा, काला, अक्षयवट, मेघ, विधारा, कोयल, काली मिर्च, सैन्धव लवण, अप्रसूता स्त्री, ककुनी, शारिवा, रात्रि, यमुना, हलदी] ।

(९) शारिवादिषु श्यामा । [श्यामा–शारिवा, अप्रसूता स्त्री आदि पूर्वोक्त श्यामशब्दवत्] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]ललामं पुच्छ-पुण्ड्रा-ऽश्वभूषा-प्राधान्य-केतुषु ।
[2]सूक्ष्ममध्यात्ममप्याद्ये[3] प्रधाने प्रथमस्त्रिषु ॥१५०॥
[4]वामौ वल्गु-प्रतीपौ, [5]द्वावधमौ न्यून-कुत्सितौ ।
[6]जीर्णं च परिभुक्तं च यातयाममिदं द्वयम् ॥१५१॥

❀ इति मान्ताः ❀

(१) पुच्छादिषु ललामम् । [ललाम–पुच्छ, घोड़े के गले का आभूषण, प्रधान, शृङ्ग, ध्वजा, पुण्ड्र=(घोड़े के मस्तक का चिन्ह)] ।

(२) अध्यात्मादिषु सूक्ष्मम् । [सूक्ष्म–छल, अल्प, अध्यात्म, अग्नि] ।

(३) आदि–प्रधानादिषु–प्रथमः । [प्रथम–आदि, पहिला, प्रधान] ।

(४) सुन्दरप्रतीपयोर्वामः । [वाम–सुन्दर, विरुद्ध] ।

(५) न्यूनादिष्वधमः । [अधम–कमती, न्यून, अधम, निन्दित–(नीच)] ।

(६) जीर्णादिषु यातयामम् । [यातयाम–पुराना, परिभुक्त–परित्यक्त] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तुरङ्ग-गरुडौ ताक्ष्यौ, निलया-ऽपचयौ क्षयौ ।
श्वशुर्यौ देवर-श्यालौ, भ्रातृव्यौ भ्रातृज-द्विषौ ॥१५२॥
पर्जन्यौ रसदब्दे-न्द्रौ, स्यादर्यः स्वामि-वैश्ययोः ।
तिष्यः पुष्ये कलियुगे, पर्यायोऽवसरे क्रमे ॥१५३॥
प्रत्ययोऽधीन-शपथ-ज्ञान-विश्वास-हेतुषु ।

---

(१) तुरङ्गगरुडयोस्ताक्ष्यः । [ताक्ष्य-घोड़ा, गरुड़] ।

(२) गृहाऽपचययोः क्षयः । [क्षय-गृह, अपचय=कमी, क्षयरोग] ।

(३) द्वयोरर्थयोः श्वशुर्यः । [श्वशुर्य-देवर, श्यालक] ।

(४) द्वयोरर्थयोर्भ्रातृव्यः । [भ्रातृव्य-भतीजा, शत्रु] ।

(५) शब्दायमाने मेघे, इन्द्रे च पर्जन्यः । [पर्जन्य-मेघ शब्द, इन्द्र, गर्जता हुआ मेघ] ।

(६) द्वयोरर्थयोरर्यः । [अर्य-स्वामी, राजा, वैश्य] ।

(७) द्वयोस्तिष्यः । [तिष्य-पुष्यनक्षत्र, कलियुग] ।

(८) पर्यायश्चतुर्ष्वर्थेषु । [पर्याय-अवसर, क्रम, प्रकार, निर्माण] ।

(९) अधीनादिषु प्रत्ययः । [प्रत्यय-अधीन, शपथ, ज्ञान, छिद्र, विश्वास, हेतु, आचार, प्रसिद्धि, सन् आदि प्रत्यय] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रन्ध्रे शब्देऽर्थेऽनुशयो दीर्घद्वेषा-ऽनुतापयोः ॥१५४॥
स्थूलोच्चयस्त्वसाकल्ये गजानां मध्यमे गते ।
समयाः शपथा-ऽऽचार-काल-सिद्धान्त-संविदः ॥१५५॥
व्यसनान्यशुभं दैवं विपदित्यनयास्त्रयः ।
अत्ययोऽतिक्रमे कृच्छ्रे दोषे दण्डेऽप्यथापदि ॥१५६॥
युद्धाऽऽयत्योः संपरायः, पूज्यस्तु श्वशुरेऽपि च ।

---

(१) दीर्घद्वेषादावनुशयः । [अनुशय–दीर्घवैर, दीर्घद्वेष, पश्चात्ताप, अनुबन्ध] ।

(२) असाकल्यादौ स्थूलोच्चयः । [स्थूलोच्चय–असाकल्य (मोटा मोटी), हाथी की मध्यम चाल, गण्डोपल, पेटारी] ।

(३) शपथादौ समयः । [समय–शपथ, आचार, काल, सिद्धान्त, संवित् = बुद्धि, सङ्केत, निर्देश, भाषा] ।

(४) व्यसनादिष्वनयः । [अनय–व्यसन, दुर्दैव, विपत्ति] ।

(५) अतिक्रमादावत्ययः । [अत्यय–अतिक्रम, कष्ट, दोष, दण्ड, उत्पात, नाश] ।

(६) आपत्तियुद्धादौ संपरायः । [संपराय–आपत्ति, युद्ध, आयति (उत्तर काल)] ।

(७) श्वशुरपूजार्हयोः पूज्यः । [पूज्य–श्वशुर, पूजनीय] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]पश्चादवस्थायि बलं समवायश्च सन्नयौ ॥ १५७ ॥
[2]सङ्घाते सन्निवेशे च संस्त्यायः, [3]प्रणयास्त्वमी ।
विस्रम्भ-याच्ञा-प्रेमाणो, [4]विरोधेऽपि समुच्छ्रयः १५८
[5]विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि ।
[6]निर्यासेऽपि कषायोऽस्त्री, [7]सभायाञ्च प्रतिश्रयः ॥१५९॥

---

(१) पश्चादवस्थायिबल-समवायादौ सन्नयः । [सन्नय-मोर्चे के पीछे सहायतार्थ खडी सेना, कुमक, समवाय] ।

(२) सङ्घातसन्निवेशयोः संस्त्यायः । [सस्त्याय-सङ्घात, संनिवेश, घर, विस्तार] ।

(३) त्रिषु प्रणयः । [प्रणय-विश्रम्भ (विश्वास, परिचय), मांगना, प्रेम] ।

(४) वैरोन्नत्योः समुच्छ्रयः । [समुच्छ्रय-विरोध, वैर, समुन्नति] । (५) देशादौ विषयः । [विषय-देश, जिसको जो ज्ञात हो वह उसका विषय, शब्द आदि विषय, गोचर, जिला] ।

(६) निर्यासे रसभेदेऽङ्गरागे विलेपने च कषायः । [कषाय — निर्यास = गोंद, कसैला, अङ्गराग, विलेपनद्रव्य, सुगन्धित] ।

(७) सभाऽऽश्रयाभ्युपगमेषु प्रतिश्रयः । [प्रतिश्रय-सभा, आश्रय, अङ्गीकार] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रायो भूम्न्यन्तगमने, [2]मन्युर्दैन्ये क्रतौ क्रुधि ।
[3]रहस्यो-पस्थयोर्गुह्यं, [4]सत्यं शपथ-तथ्ययोः ॥१६०॥
[5]वीर्यं बले प्रभावे च, [6]द्रव्यं भव्ये गुणाश्रये ।
[7]धिष्ण्यं स्थाने गृहे भे-ऽग्नौ, [8]भाग्यं कर्म शुभाशुभम् ॥

---

(१) बाहुल्यादौ प्रायः । [प्राय–बाहुल्य, तुल्य, अनशन, अन्तगमन = मृत्यु] ।

(२) दैन्यादौ–मन्युः । [मन्यु–दीनता, यज्ञ, क्रोध,शोक] ।

(३) द्वयोर्गुह्यम् । [गुह्य–रहस्य, लिङ्ग, योनि, दम्भ, कछुवा] ।

(४) द्वयोः सत्यम् । [सत्य–शपथ, सत्ययुग, सच्चा] ।

(५) द्वयोर्वीर्यम् । [वीर्य–बल, प्रभाव, शुक्र, तेज, सामर्थ्य] ।

(६) द्वयोर्द्रव्यम् । [द्रव्य–भव्य = सुन्दर, पृथिव्यादि द्रव्य, धन, पीतल, औषध, विलेप, लाक्षा, वृक्षका विकार] ।

(७) स्थानादौ–धिष्ण्यम् । [धिष्ण्य–स्थान, गृह, नक्षत्र, अग्नि, शक्ति] ।

(८) शुभाशुभकर्मादौ भाग्यम् । [भाग्य–शुभ, अदृष्ट, शुभाऽशुभ कर्म] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कशेरु-हेम्नोर्गाङ्गेयं, [2]विशल्या दन्तिकाऽपि च ।
[3]वृषाकपायी श्री-गौर्योरभि[4]ख्या नाम-शोभयोः॥१६२॥
[5]आरम्भो निष्कृतिः शिक्षा पूजनं सम्प्रधारणम् ।
उपायः कर्म चेष्टा च चिकित्सा च नव क्रियाः॥१६३॥
[6]छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः ।
[7]कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने ॥

(१) भीष्मस्वर्णकशेरुकेषु गाङ्गेयशब्दः । [गाङ्गेय—कशेरु, सोना, भीष्म] ।

(२) दन्तिकागुडूच्यादिषु विशल्या । [विशल्या—दन्ती, गुडूची, अग्निशिखा = इन्द्रपुष्पी, कलियारी] ।

(३) द्वयोर्वृषाकपायी । [वृषाकपायी—श्री, गौरी, शतावरी, जीवन्ती] ।

(४) द्वयोरभिख्या । [अभिख्या—नाम, शोभा, यश] ।

(५) नवस्वर्थेषु क्रिया । [क्रिया—आरम्भ, निष्कृति = प्रायश्चित्त, शिक्षा, पूजन, निश्चय, उपाय, कर्म, चेष्टा, चिकित्सा] ।

(६) चतुर्षु च्छाया । [छाया—सूर्यपत्नी, कान्ति, प्रतिबिम्ब, छाया, पङ्क्ति, प्रतिमा, धूप, पालन, शोभा] ।

(७) चतुर्षु कक्ष्याशब्दः । [कक्ष्या—ड्योढी, चौक, काञ्ची (तागडी), हाथी के कमर में बांधने की रस्सी, उद्योग, सादृश्य] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृत्या[1] क्रिया-देवतयोस्त्रिषु मेद्ये धनादिभिः ।
जन्यं[2] स्याज्जनवादेऽपि, जघन्योऽन्त्ये[3]-ऽधमेऽपि च ॥
गर्ह्य[4]-हीनौ च वक्तव्यौ, कल्यौ[5] सज्ज-निरामयौ ।
आत्मवाननपेतोऽर्थादर्थ्यौ[6], पुण्यन्तु[7] चार्वपि॥१६६॥

---

(१) त्रिष्वर्थेषु कृत्याशब्दः । [कृत्या—क्रिया, कृत्या = मरणाधिष्ठात्री देवता, धन स्त्री आदि के लोभ से फोड़ने योग्य शत्रु-पक्ष का व्यक्ति] ।

(२) 'जन्यं निर्वादयुद्धयोः' इति धरणिः । [जन्य—लोकापवाद, युद्ध, हट्ट = दूकान] ।

(३) अन्तादौ जघन्यः । [जघन्य—अन्त्य, अधम, आखिरी, लिङ्ग, निन्दित] ।

(४) द्वयोर्वक्तव्यः । 'गर्ह्याऽहीनौ' 'गर्ह्याऽधीनौ' इत्यपि पाठः । [वक्तव्य—निन्दित, हीन, कहने योग्य] ।

(५) सज्जादौ कल्यः । [कल्य—तैयार, स्वस्थ=रोग रहित, प्रभात, कल, गूंगा, चतुर, कल्याणवचन] ।

(६) द्वयोरर्थ्यः । [अर्थ्य—आत्मवान्, ज्ञानी, अर्थयुक्त = न्याय्य, उचित] ।

(७) धर्ममनोज्ञादिषु—पुण्यम् । [पुण्य—सुन्दर, मनोहर, धर्म, पुण्य] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]रूप्यं प्रशस्तरूपेऽपि, [2]वदान्यो वल्गुवागपि ।
[3]न्याय्येऽपि मध्यं, [4]सौम्यन्तु सुन्दरे सोमदैवते १६७

❀ इति यान्ताः ❀

निवहा-ऽवसरौ वारौ, [6]संस्तरौ प्रस्तरा-ऽध्वरौ ।
गुरू गीष्पति-पित्राद्यौ, द्वापरौ युग-संशयौ ॥१६८॥

(१) सुन्दरे रजतादौ च-रूप्यम् । 'प्रशस्तेरूपेऽपि । पा० । [रूप्य—सुन्दर, रमणीय, रूपवान्, चान्दी, सोने चान्दी का सिक्का, रुपया] ।

(२) 'वदान्यो दातृवाग्मिनोः' इत्यजयः । [वदान्य-वाग्मी, अच्छा वक्ता, दानशील] ।

(३) वलग्राधमन्याय्येषु-मध्यम् । [मध्य—न्याय्य=उचित, अधम, मध्यदेश (कमर)] ।

(४) बुधसुन्दरमनोज्ञादिषु सौम्यम् । [सौम्य—शान्त शीतल स्वभाव, सुन्दर, सोमदेवताका हवि, बुध] ।

(५) द्वयोर्वाः । [वार—निवह (समूह), अवसर, हर, द्वार, मद्यपात्र] ।

(६) द्वयोः संस्तरः । [संस्तर- पत्थर, यज्ञ] ।

(७) द्वयोरर्थयोर्गुरुः । [गुरु—बृहस्पति, बड़ा, भारी, पिता आदि, गुरु] । (८) द्वयोर्द्वापरः । [द्वापर—द्वापर युग, संदेह] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकारौ[1] भेद-सादृश्ये, आकारावि[2]ङ्गिता-ऽऽकृती ।
[3]किंशारू सस्यशूके-षू, [4]मरू धन्व-धराधरौ ॥१६९॥
[5]अद्रयो द्रुम-शैला-ऽर्काः, [6]स्त्रीस्तना-ऽब्दौ पयोधरौ ।
[7]ध्वान्ता-ऽरि-दानवा वृत्रा, [8]बलि हस्तां-शवः कराः ॥
[9]प्रदरा भङ्ग-नारीरु-बाणा, [10]अस्राः कचा अपि ।

---

(१) भेदसादृश्ययोः प्रकारः । [प्रकार-तुल्य, भेद] ।

(२) द्वयोराकारः । [आकार-इङ्गित, आकृति] ।

(३) द्वयोः किंशारुः । 'धान्यशूके-षू' इति पाठान्तरम् । [किंशारु-धान्यशूक, बाण] ।

(४) द्वयोर्मरुः । [मरु-मरुभूमि, पर्वत] ।

(५) द्रुमादावद्रिः [अद्रि-वृक्ष, पर्वत, सूर्य] ।

(६) स्तनाब्दयोः पयोधरः । [पयोधर-स्तन, मेघ, नारियल, कशेरु] ।

(७) त्रिषु वृत्रः । [वृत्र-अन्धकार, शत्रु, वृत्रासुर, पर्वतभेद] ।

(८) बल्यादौ करः । [कर-राज्य का कर, हाथ, ओला, हाथी की सूंड, किरण] ।

(९) भङ्गादौ प्रदरः । बालाः, इत्यपि पाठान्तरम् । [प्रदर-भगदड, पराजय, प्रदर (स्त्रीरोग), बाण] ।

(१०) अश्रुकचयोरस्रः । [अस्र-आंसू, बाल, कोना, रक्त] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अजातश्मश्रुर्गौः कालेऽप्यश्मश्रुर्ना च तूवरौ ॥१७१॥
[2]स्वर्णेऽपि राः, [3]परिकरः पर्यङ्क-परिवारयोः ।
[4]मुक्ताशुद्धौ च तारः [5]स्याच्छारौ वायौ स तु त्रिषु १७२
कर्बुरेऽथ [6]प्रतिज्ञा-ऽऽजि-संवि-दापत्सु सङ्करः ।
वेद[7]भेदे गुप्तवादे मन्त्रो, [8]मित्रो रवावपि ॥ १७३ ॥

---

(१) द्वयोस्तूवरः । [तूवर—विना सींगका बैल, विना मोंछका पुरुष (निर्मूछिया)] ।

(२) धनस्वर्णादौ रै-शब्दः [रै—सोना, धन] ।

(३) पर्यङ्कादौ परिकरः [परिकर—पलङ्ग, कमर कसना, परिवार, समूह, विवेक, आरम्भ] ।

(४) मौक्तिकशुद्ध्यादौ तारः । [तार—मोती की आब, आबदार मोती, तैरना, अत्युच्च स्वर, चान्दी] ।

(५) वायुकर्बुरयोः शारः । [शार—वायु, चित्रर्ण,] ।

(६) त्रिषु सङ्करः [सङ्कर—प्रतिज्ञा, युद्ध, ज्ञान, विपत्ति, शमीफल=सांगर, क्रियाकार] ।

(७) द्वयोर्मन्त्रः । [मन्त्र—वेदमन्त्र, देवता साधनका मन्त्र गुप्तसलाह] ।

(८) सूर्यादौ मित्रशब्दः । [मित्र—सुहृत्, सूर्य] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मखे-षु-यूपखण्डेऽपि स्वरुर्गुह्येऽप्यवस्करः ।
आडम्बरस्तूयरवे गजेन्द्राणां च गर्जिते ॥१७४॥
अभिहारोऽभियोगे च चौर्ये संनहनेऽपि च ।
स्याज्जङ्गमे परीवारः खड्गकोषे परिच्छदे ॥१७५॥
विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनम् ।

---

(१) वज्रयज्ञबाणयूपखण्डेषु स्वरुः । [स्वरुः—यज्ञ, यूपखण्ड, (छीलने के समय यूपका पहिला गिरा हुआ छिलका), वज्र, बाण] ।

(२) वर्चस्कगुह्ययोरवस्करः । [अवस्कर—विष्ठा, लिङ्ग, योनि] ।

(३) द्वयोराडम्बरः । [आडम्बर—हाथी के गर्जने का शब्द, तूर्यशब्द, (तूर्य = नफीरी, तुतुही), समारम्भ (लम्बा, काम फैलाना] ।

(४) अभियोगादावभिहारः । [अभिहार—अभियोग, चढाई, चोरी, चोरी करना, कवच आदि पहिन कर तैयार होना, तैयारी] ।

(५) जङ्गमादौ परीवारः । [परीवार—परिजनवर्ग, तलवार की म्यान, उपकरण] ।

(६) विटपादौ विष्टरः, [विष्टर—वृक्ष, दर्भमुष्टि, पीढा आदि आसन] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]द्वारि द्वाःस्थे प्रतीहारः प्रतीहार्यप्यनन्तरे १७६
[2]विपुले नकुले विष्णौ बभ्रुर्ना पिङ्गले त्रिषु ।
[3]सारो बले स्थिरांऽशे च न्याय्ये क्लीबं वरे त्रिषु ॥ १७७॥
[4]दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम् ।
[5]महाऽरण्ये दुर्गपथे कान्तारं पुंनपुंसकम् ॥ १७८ ॥
[6]मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु ।

---

(१) द्वारस्थादौ प्रतीहारः। अनन्तरे = द्वारपाले। [प्रतीहार द्वार, जमादार, दर्बान। प्रतीहारी—द्वाररक्षिका स्त्री, द्वारपालिका]।

(२) विपुलनकुलादौ बभ्रुः, [बभ्रु—विपुल, नकुल, विष्णु, नकुलसदृश पिङ्गल वर्ण, भूरा रंग]।

(३) बलादौ सारः। [सार—बल, सार भाग, न्यायोचित, श्रेष्ठ, मज्जा, मींगी, जल, धन]।

(४) द्यूतकारादौ दुरोदरः। [दुरोदर—जुवाडी, दांव, शर्त, जूवा]।

(५) महारण्यादौ कान्तारः। [कान्तार—घोर वन, दुर्गम-मार्ग, कतारी, (ईख)]।

(६) अन्यशुभद्वेषादौ मत्सरः। [मत्सर—दूसरे की उन्नति से डाह, परसम्पत्ति को देखकर जलना, कंजूस, क्रोध, मात्सर्य]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये ॥१७९॥
[2]वंशाऽङ्कुरे करीरोऽस्त्री तरुभेदे घटे च ना ।
[3]ना चमूजघने हस्तसूत्रे प्रतिसरोऽस्त्रियाम् ॥१८०॥
[4]यमा-ऽनिले-न्द्र-चन्द्रा-ऽर्क-विष्णु-सिंहां-ऽशु-वाजिषु ।
शुका-ऽहि-कपि-भेकेषु हरिर्ना कपिले त्रिषु ॥१८१॥
[5]शर्करा कपरांऽशेऽपि, [6]यात्रा स्याद्यापने गतौ ।

---

(१) देवाद्वृतादौ वरः । [वर—वरदान, देव कृपासे प्राप्त, श्रेष्ठ, ईषत्प्रिय] ।

(२) वंशाङ्कुरादौ करीरः । [करीर—बाँस का अङ्कुर, कैर, वट] ।

(३) चमूजघनादौ प्रतिसरः [प्रतिसर—सेना का जघन (पृष्ठ) भाग, हाथ का रक्षा सूत्र, कांगन डोरा, कङ्कण, माला, व्रण की शुद्धि, रक्षासूत्र] ।

(४) यमाऽनिलादौ हरिः । [हरि—यम, वायु, इन्द्र, चन्द्र, सूर्य, विष्णु, सिंह, किरण, घोड़ा, शुक, सर्प, बन्दर, मेढक, कपिल (भूरा)] ।

(५) कपरांशे खण्डविकृत्यादौ च शर्करा । [शर्करा—कंकड़ी, ठिकरी, बालू, चीनी, कंकरीला प्रदेश] ।

(६) यापनादौ यात्रा । [यात्रा—कथंचित् निभाना, चलाते चलना, यात्रा=जाना, देवपूजोत्सव] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]इरा भू-वा-क्सुरा-ऽप्सु [2]स्यात्तन्द्री निद्रा-प्रमीलयोः ॥
[3]धात्री स्यादुपमाताऽपि क्षितिरप्यामलक्यपि ।
[4]क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका ॥१८३॥
त्रिषु क्रूरेऽधमेऽल्पेऽपि क्षुद्रो, [5]मात्रा परिच्छदे ।
अल्पे च परिमाणे स्यान्मात्रं कार्त्स्न्येऽवधारणे ॥१८४॥

---

(१) पृथिव्यादाविरा । [इरा—भूमि, वाणी, मद्य] ।

(२) निद्रादौ तन्द्रा, तन्द्री वा । [तन्द्रा—निद्रा, ऊंघना, (रोग आदि, थकावट से आँख लगना)] ।

(३) उपमात्रादौ-धात्री । [धात्री-धाय, पृथ्वी, आमलकी, माता] ।

(४) व्यङ्गादौ—क्षुद्रा । [क्षुद्रा-अङ्ग विकल स्त्री, नटी, वेश्या, सहत की मक्खी, कंटकारी] ।

क्रूरादौ क्षुद्रः । [क्षुद्र-क्रूर, नीच, थोड़ा, कृपण] ।

(५) परिच्छदादौ-मात्रा । [मात्रा-परिच्छद, कर्ण भूषण, थोड़ा नाप, धन, अक्षर मात्रा] ।

कार्त्स्न्यादौ-मात्रम् । [मात्र सब, अवधारण] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]आलेख्या-ऽऽश्चर्ययोश्चित्रं, [2]कलत्रं श्रोणि-भार्ययोः ।
[3]योग्य-भाजनयोः पात्रं, [4]पत्त्रं वाहन-पक्षयोः ॥१८५॥
[5]निदेश-ग्रन्थयोः शास्त्रं, [6]शस्त्रमायुध-लोहयोः ।
[7]स्याज्जटांऽ-शुकयोर्नेत्रं, क्षेत्रं [8]पत्नी-शरीरयोः ॥१८६॥

---

(१) आलेख्यादौ–चित्रम् । [चित्र–तसबीर, तमाशा, विचित्र रंग] ।

(२) श्रोण्यादौ–कलत्रम । [कलत्र–कटि, दुर्गस्थान, भार्या] ।

(३) योग्यभाजनयोः पात्रम् । [पात्र–योग्य, बत्तन, नदी का पाट, यज्ञ-पात्र, पत्ता, मन्त्री] ।

(४) वाहनादौ–पत्त्रम् । [पत्त्र–वाहन–सवारी, पाँख] ।

(५) निदेशादौ–शास्त्रम् । [शास्त्र–आज्ञा, ग्रन्थ] ।

(६) आयुधादौ शस्त्रम् । [शस्त्र–हथियार, लोहा, शस्त्री = छुरी] ।

(७) जटादौ नेत्रम् । [नेत्र–जटा, वस्त्र (नतना, छन्ना), नेता, रथ, नेत्र, रस्सी, वृक्षमूल] ।

(८) पत्न्यादौ–क्षेत्रम् । [क्षेत्र–शरीर, पत्नी, खेत, सिद्धस्थान, तीर्थ] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]मुखाग्रे क्रोड-हलयोः पोत्रं, [2]गोत्रन्तु नाम्नि च ।
[3]सत्त्रमाच्छादने यज्ञे सदादाने वनेऽपि च ॥१८७।
[4]अजिरं विषये कायेऽप्यम्बरं व्योम्नि वाससि ।
[5]चक्रं राष्ट्रेप्यक्षरं तु मोक्षेपि, क्षीरमप्सु च ॥१८८॥

---

(१) शूकरमुखाग्रादौ-पोत्रम् । [पोत्र-वस्त्र, सूकर का मुखाग्र, हलका मुखाग्र भाग] ।

(२) नामपर्वतादौ गोत्रशब्दः । [गोत्र-पर्वत, नाम, कुल, गोत, पर्वत,] ।

(३) आच्छादनादौ-सत्त्रम् । [सत्त्र-आच्छादन, यज्ञ सदावर्त्त, वन, कपट] ।

(४) विषयादावजिरम् । [अजिर-आंगन, विषय, शरीर, वायु, मेढक] ।

(५) गगनादावम्बरम् । [अम्बर-आकाश, वस्त्र, अम्बर, (सुगन्ध द्रव्य), कपास] ।

(६) राष्ट्रकोकरथाङ्गादौ—चक्रम् । [चक्र-राष्ट्र, सेना, पहिया, चक्र (षड्यन्त्र), व्रज, शस्त्र, चाक, आवर्त्त, चक्रवाक] ।

(७) मोक्षापवर्गब्रह्मादावक्षरम् । [अक्षर-मोक्ष, ब्रह्म, प्रणव, अच्युत] ।

(८) दुग्धे जले च-क्षीरम् । [क्षीर-दूध, जल] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्वर्णेऽपि भूरि-चन्द्रौ द्वौ, [2]द्वारमात्रेऽपि गोपुरम् ।
[3]गुहा-दम्भौ गह्वरे द्वे, [4]रहोऽन्तिकमुपह्वरे ॥१८९॥
[5]पुरोऽधिकमुपर्यग्राण्यगारे नगरे पुरम् ।
मन्दिरञ्चाऽथ [7]राष्ट्रोऽस्त्री विषये स्यादुपद्रवे ॥१९०॥

---

(१) भूरिः—स्वर्णकृष्णब्रह्मादौ पुंसि, सुवर्णे क्लीबम् । [भूरि-सोना, वासुदेव, कृष्ण, शिव, ब्रह्मा, बहुत] । कर्पूरस्वर्णादौ चन्द्रः । ['चन्द्र-सोना, कपूर, कबीला, चन्द्रमा, सुन्दर] ।

(२) पूर्द्वारि, द्वारसामान्ये च गोपुरम् । [गोपुर-नगर का द्वार, द्वार] ।

(३) गुहादम्भयोर्गह्वरम् । [गह्वर-गुफा, कुञ्ज, गहन, दम्भ, कपट] ।

(४) अन्तिकादौ रहसि च-उपह्वरम् । [उपह्वर-एकान्त, निर्जनस्थान, निकट] ।

(५) अधिकादावग्रम् । [अग्र-आगे, अधिक, ऊपर, छटांक १ पल, आलम्बन, समूह, प्रान्तभाग, प्रधान, प्रथम] ।

(६) अगारनगरयोः पुरमन्दिरशब्दौ । [पुर-शरीर, नगर, घर के ऊपर छत पर का घर] । [मन्दिर-नगर, घर, समुद्र] ।

(७) देशादौ—राष्ट्रः । [राष्ट्र-देश, उपद्रव] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]दरोऽस्त्रियां भये श्वभ्रे, [2]वज्रोऽस्त्री हीरके पवौ ।
[3]तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे ॥१९१॥
[4]औशीरश्चामरे दण्डेऽप्यौशीरं शयना-ऽऽसने ।
पुस्करं [5]करिहस्ताग्रे वाद्यभाण्डमुखे जले ॥१९२॥
व्योम्नि खड्गफले पद्मे तीर्थौ-षधिविशेषयोः ।
[6]अन्तरमवकाशा-ऽवधि-परिधानाऽन्तर्द्धि-भेद-तादर्थ्ये ॥

---

(१) भयादौ दरः । [दर–भय, गर्त्त, कन्दरा] ।

(२) हीरकादौ वज्रम् । [वज्र–हीरा, वज्र] ।

(३) प्रधानादौ तन्त्रम् । [तन्त्र–प्रधान, सिद्धान्त, जुलाहा, जुलाहे के औजार, कुटुम्ब गृहस्थी-चलाना, उपकरण, तन्त्र शास्त्र] ।

(४) चामरे दण्डे-औशीरः । शयनासनयोश्च–औशीरम् । [औशीर–चामर, दण्ड, शयन आसन, (पलङ्ग-बिछौना)] ।

(५) करिहस्ताग्रादौ–पुष्करम् । [पुष्कर–हाथी की सूंड का अग्रभाग, तूर्य आदि बाजे का मुख, जल, आकाश, खड्ग का फल, पद्म, पुष्करतीर्थ, पुहकरमूल, पुष्कर द्वीप, पक्षिविशेष] ।

(६) अवकाशादावन्तरम् । [अन्तर–अवकाश, अवधि,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

छिद्रा-ऽऽत्मीय-विना-बहि-रवसर-मध्येऽन्तरात्मनि च।
मुस्तेऽपि पिठरं, राजकशेरुण्यपि नागरम् ॥१९४॥
शार्वरं त्वन्धतमसे घातुके भेद्यलिङ्गकम्।
गौरोऽरुणे सिते पीते, व्रणकार्यप्यरुष्करः ॥१९५॥

परिधानीय वस्त्र, व्यवधान, भेद, तादर्थ्य, छिद्र, आत्मीय, विना, बाह्य, अवसर, मध्य, अन्तरात्मा]।

(१) स्थाल्यां मुस्ते मन्थनदण्डे च पिठरम्। [पिठर–बटलोही, मोथा, मन्थन दण्ड (रई)]।

(२) मुस्तकशुण्ठीविदग्धादौ नागरम्। [नागर–राज कशेरू कन्द विशेष, सोंठ, नागरमोथा, चतुर, नगरोत्पन्न]।

(३) घातुकादौ शार्वरम्। [शार्वर–अन्धकार, घातुक, क्रूर, घातक हाथी]।

(४) अरुणादौ गौरः। [गौर–गुलाबी, श्वेत, पीला, स्वच्छा, पीली सरसों]।

(५) भल्लातके व्रणकारके च–अरुष्करः। [अरुष्कर–भिलावा, घाव करनेवाला द्रव्य]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जठरः कठिनेऽपि स्यादधस्तादपि चाऽधरः ।
अनाकुलेऽपि चैकाग्रो, व्यग्रो व्यासक्त आकुले ॥
उपर्यु-दीच्य-श्रेष्ठेष्वप्युत्तरः स्यादनुत्तरः ।
एषां विपर्यये श्रेष्ठे, दूरा-ऽनात्मो-त्तमाः पराः ॥१९७॥
स्वादु-प्रियौ च मधुरौ, क्रूरौ कठिन-निर्दयौ ।

(१) कठिने कुक्षौ च जठरः । [जठर-कठिन,पेट,कुक्षि,बद्ध]।

(२) ओष्ठेऽधस्ताच्चाधरः । [अधर-अधरोष्ठ, नीच, हीन, नीचे]।

(३) एकतानेऽनाकुले च-एकाग्रः । [एकाग्र-एकचित्त, अव्याकुल, धीर]।

(४) व्यासक्तादौ-व्यग्रः । [व्यग्र-आसक्त, व्याकुल, फँसा हुआ, घबड़ाया हुआ]।

(५) प्रतिवाक्यादावुत्तरशब्दः । [उत्तर-ऊपर, उत्तर दिग्भव, श्रेष्ठ, उत्तर देना]।

(६) श्रेष्ठादावनुत्तरः । [अनुत्तर-श्रेष्ठ, चुप होना, नीचे]।

(७) दूरादौ-परः । [पर-दूर, दूसरा, श्रेष्ठ, केवल, शत्रु]।

(८) स्वादुप्रिययोर्मधुरः । [मधुर-मीठा, शोभन, प्रिय]।

(९) कठिननिर्दययोः क्रूरः । [क्रूर-कठिन,कठोर,कड़ा, निर्दय]।

१९८= श्लोके—'स्वादुप्रियौ तु मधुरौ' पा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उदारो[1] दातृ-महतोरितरस्त्वन्य[2]-नीचयोः ॥१९८॥
मन्द[3]-स्वच्छन्दयोः स्वैरः, शुभ्रमुद्दीप्त[4]-शुक्लयोः ।

❀ इति रान्ताः ❀

चूडा[5] किरीटं केशाश्च संयता मौलयस्त्रयः ॥१९९॥
द्रुमप्रभेद[6]-मातङ्ग-काण्ड-पुष्पाणि पीलवः ।

---

(१) दातृमहतोरुदारः । [उदार–दाता, महान्, सबको प्रसन्न रखनेवाला] ।

(२) अन्यनीचयोरितरः । [इतर–दूसरा, नीच] ।

(३) मन्दस्वच्छन्दयोः स्वैरः । [स्वैर–मन्द, मनमाना, स्वच्छन्द] ।

(४) उद्दीप्तशुक्लयोः शुभ्रः । [शुभ्र–चमकता हुआ, सफेद] ।

(५) चूडादौ त्रिषु मौलिः । [मौलि-चूडा (शिखा), मुकुट] ।

(६) मातङ्गादौ पीलुः । [पीलु–पीलवृक्ष, हाथी, बाण, परमाणु, पुष्प] ।

---

१९९ श्लोके—'मन्दस्वच्छन्दयोः स्वैरम्' पा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतान्ता-ऽनेहसोः[1] कालश्चतुर्थेऽपि युगे कलिः॥२००॥
[3]स्यात्कुरङ्गेऽपि कमलः, [4]प्रावारेऽपि च कम्बलः।
[5]करो-पहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम्॥
[6]स्थौल्य-सामर्थ्य-सैन्येषु बलं ना काक-सीरिणोः।
[7]वातूलः पुंसि वात्यायामपि वाताऽसहे त्रिषु॥२०२॥

---

(१) यमसमययोः—कालः। [काल—यमराज, समय, मृत्यु, कृष्ण-काला,]।

(२) कलहादौ कलिः। [कलि—कलियुग, कलिका, झगड़ा, युद्ध, शूर]।

(३) मृगे जले कमले च कमलम्। [कमल—हरिण, कमल, जल, ताम्र, गगन]।

(४) नागराज सास्नाप्रावारादिषु कम्बलः। [कम्बल—कम्बल, नागराज, जल, गौ के गले का कम्बल=लटकता हुआ मांस]।

(५) करादौ—बलिः पुंसि। प्राण्यङ्गे बलिः स्त्रियाम्। [बलि—कर, उपहार=भेंट, बलि (झुर्री, त्रिवलि), धरण-वल्ली]।

(६) स्थौल्यादौ बलम्। कालादौ बलः। [बल—मोटाई, सामर्थ्य, रूप, सेना, बलभद्र, कौवा]।

(७) वात्यादौ वातूलः। वातल-वातुलावपि दृश्येते। [वातूल—वात्या = 'भमूलिया' घूमती हुई 'आन्धी', वातासह]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भेद्यलिङ्गः शठे व्यालः पुंसि श्वापद-सर्पयोः ।
मलोऽस्त्री पाप-विट्-किट्टान्यस्त्री शूलं रुगायुधम् ॥२०३
शङ्कावपि द्वयोः कीलः, पालिः स्त्र्यश्र्य-ङ्क-पङ्क्तिषु ।
कला शिल्पे कालभेदेऽप्यालीसख्या-ऽऽवली अपि ॥

---

(१) शठादौ—व्यालः । [व्याल—शठ, हिंस्रजन्तु, सर्प, सिंह, दुष्ट हाथी] ।

(२) पापादौ मलः । [मल—पाप, विष्ठा, कीट, मैल, मल, कृपण] ।

(३) रुगादौ शूलम् । [शूल—रोग, त्रिशूल, मृत्यु, ध्वजा, शूल योग, वेश्या] ।

(४) स्थाणुवह्निज्वालादौ च कीलः । [कील—कीली, ज्वाला, कोहनी का आघात, स्तम्भ, खूंटा, लेश] ।

(५) अश्र्यङ्कादिषु पालिः स्त्री । [पालि—कोना, गोदी, पङ्क्ति, चिह्न, कर्णपाली, मोंछ युक्त स्त्री, जूं, छात्रदेय द्रव्य=पारी] ।

(६) शिल्पादौ—कला । [कला—शिल्पकला, कालभेद, मूल धन की वृद्धि = व्याज, अंश, १६ वाँ हिस्सा, चन्द्रमा का १६ वाँ भाग] ।

(७) सख्यादिष्वालिः । [आलि-आली,-सखी, पङ्क्ति, सेतु, क्यारी, पुल, स्वच्छ हृदय] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अब्ध्यम्बुविकृतौ वेला काल-मर्यादयोरपि ।
[२]बहुलाः कृत्तिका गावो बहुलोऽग्नौ शितौ त्रिषु ॥२०५
[३]लीलाः विलास-क्रिययोरुपलाः[४] शर्करापि च ।
[५]शोणितेऽम्भसि कीलालं, [६]मूलमाद्ये शिफा-भयोः ॥

---

(१) समुद्रजलविकारविशेषे कालादौ च–वेला । [वेला–समुद्रकी ज्वार, काल, मर्यादा, समुद्र का तट–जिससे आगे समुद्र नहीं बढता, अक्लेश से मरना, राजा का भोजन, रोग] ।

(२) कृत्तिकादिषु–बहुलः । [बहुला—कृत्तिका, गौ, अग्नि, नील, इलायची, आकाश, कृष्णपक्ष, बहुत] ।

(३) विलासादौ–लीला । [लीला–खेल, क्रीडा, लीला, शृङ्गार क्रिया, आनन्द] ।

(४) प्रस्तरे उपलः, शर्करायां–उपला । [उपल, उपला–चीनी, मिश्री, पत्थर, रत्न] ।

(५) शोणितादौ कीलालम् । [कीलाल–रुधिर, जल] ।

(६) प्रथमादौ मूलम् । [मूल–जड़, पहिला, मूल नक्षत्र, मूलधन, निकट] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जालं[1] समूह आनाय-गवाक्ष-क्षारकेष्वपि ।
शीलं[2] स्वभावे सद्वृत्ते, सस्ये[3] हेतुकृते फलम् ॥२०७॥
छदिर्नेत्ररुजोः[4] क्लीबं समूहे पटलं न ना ।
अधः-स्वरूपयोरस्त्री तलं[5], स्याच्चाऽऽमिषे[6] पलम् ॥२०८॥

---

(१) समूहादौ जालम् । [जाल–समूह, जाल, गवाक्ष, (जाली–झरोखा), अस्फुट = अधखिली कली, दम्भ, छल-छद्म] ।

(२) स्वभावादौ शीलम् । [शील—स्वभाव–प्रकृति सद्वृत्त = सच्चरित] ।

(३) सस्यादौ फलम् । [फल–सस्य = धान, हेतुकृत = फल, लाभ, बाणाग्रभाग, जायफल] ।

(४) छदिःसमूहादौ–पटलम् । [पटल–छदि = गृहाच्छादन = छान, नेत्ररोग, समूह, पेटारी] ।

(५) अधःस्वरूपादौ–तलम् । [तल–अधोभाग, स्वरूप, ज्यावातवारण, थप्पड, मूंठ] ।

(६) आमिषे कर्षचतुष्टये च पलम् । [पल–मांस, ४-या ५ तोला = १ छटाक] ।

---

२०७ श्लोके–'जालं समूह आनायो गवाक्ष-क्षारकावपि' इति पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

और्वाऽनलेऽपि पातालं, चैलं वस्त्रेऽधमे त्रिषु ।
[3]कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले ॥२०९॥
निर्णीते [4]केवलमिति त्रिलिङ्गे त्वेक-कृत्स्नयोः ।
[5]पर्याप्ति-क्षेम-पुण्येषु कुशलं शिक्षिते त्रिषु ॥२१०॥
[6]प्रवालमङ्कुरेऽप्यस्त्री, त्रिषु [7]स्थूलं जडेऽपि च ।

---

(१) नागलोके वडवानले च पातालम् । [पाताल–पाताल, बिल, बडवाग्नि (=ज्वालामुखी)] ।

(२) वस्त्रादौ–चेलम् । [चेल–वस्त्र, अधम, नीच, पापी] । 'चैल'–मित्यपि पाठः ।

(३) शङ्कुसङ्कुले श्वभ्रादौ च कुकूलम् । [कुकूल–कंटकाकीर्ण गड्हा, भूसे की अग्नि] ।

(४) निर्णीतादौ केवलम् । [केवल—निर्णीत, एक, सम्पूर्ण = सब] ।

(५) पर्याप्त्यादौ कुशलम् । [कुशल–भरपूर, क्षेम-कुशल, पुण्य] ।

(६) अङ्कुरविद्रुमादौ प्रवालम् । [प्रवाल—अङ्कुर, मूंगा, वीणादण्ड, पल्लव] ।

(७) जडपीवरादौ स्थूलम् । [स्थूल–मोटा, मूर्ख] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]करालो दन्तुरे तुङ्गे, [2]चारौ दक्षे च पेशलः ॥२११॥
[3]मूर्खे-ऽर्भकेऽपि बालः स्याल्लोलः[4]चञ्चल-सतृष्णयोः ।

❀ इति लान्ताः ❀

[5]दव-दावौ वना-ऽरण्यवह्नी, [6]जन्म-हरौ भवौ ॥२१२॥
[7]मन्त्री सहायः सचिवौ, [8]पति-शाखि-नरा धवाः ।

---

(१) द्वयोः करालः । [कराल—दन्तुर = नीचा-ऊंचा, ऊंचा = करारा, भीषण] ।

(२) चारुदक्षयोः पेशलः । [पेशल—चारु = सुन्दर, चतुर] ।

(३) मूर्खादौ बालः । [बाल—मूर्ख, बालक, केश, हाथी और घोड़ों आदि के पोंछ के बाल] ।

(४) चञ्चलादौ—लोलः । [लोल—चञ्चल, लम्पट, इच्छुक] ।

(५) द्वयोर्दवो दावश्च । [दव-दाव, वन, वन की अग्नि= दावानल] ।

(६) द्वयोर्भवः । [भव—जन्म, शिव, क्षेम, संसार, सत्ता, प्राप्ति] ।

(७) द्वयोः सचिवः । [सचिव—मन्त्री, सहायक] ।

(८) त्रिषु धवः । [धव—पति, धव वृक्ष, मनुष्य, धूर्त] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अवयः[1] शैल-मेषा-ऽर्का, आज्ञा[2]-ऽऽह्वाना-ऽध्वरा हवाः ॥
भावः[3] सत्ता-स्वभावा-ऽभिप्राय-चेष्टा-ऽऽत्म-जन्मसु ।
स्यादुत्पादे[4] फले पुष्पे प्रसवो गर्भमोचने ॥ २१४ ॥
अविश्वासेऽपह्नवेऽपि[5] निकृतावपि निह्नवः ।
उत्सेका[6]-ऽमर्षयोरिच्छाप्रसवे मह उत्सवः ॥२१५॥
अनुभावः[7] प्रभावे च सतां च मतिनिश्चये ।

(१) शैलादौ-अविः । [अवि-पर्वत, मेष, भेड, सूर्य, नाथ] ।

(२) आज्ञादौ हवः । [हव-आज्ञा, आह्वान, यज्ञ] ।

(३) सत्तादौ भावः । [भाव-सत्ता, स्वभाव, अभिप्राय, चेष्टा, आत्मा, जन्म] ।

(४) उत्पादादौ प्रसवः । [प्रसव-उत्पन्न होना, गर्भमोचन,=प्रसूति, बच्चा, फूल, फसल] ।

(५) अविश्वासादौ निह्नवः । [निह्नव-अविश्वास, छिपाना, शठता] ।

(६) उत्सेकादौ-उत्सवः । [उत्सव-उद्रेक, वृद्धि, उत्सव, कोप, इच्छा का वेग = वृद्धि होना] ।

(७) प्रभावादौ-अनुभावः । [अनुभाव-प्रभाव, भावसूचक, सज्जनों का अनुरूप निश्चय] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]स्याज्जन्महेतुःप्रभवः स्थानं चाद्योपलब्धये ॥२१६॥
[2]शूद्रायां विप्रतनये शस्त्रे पारशवो मतः ।
[3]ध्रुवो भभेदे क्लीबन्तु निश्चितं शाश्वते त्रिषु ॥२१७॥
[4]स्वो ज्ञातावात्मनि स्वं,त्रिष्वात्मीये, स्वोऽस्त्रियां धने ।
स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च ॥२१८॥
[6]शिवा गौरी-फेरवयोर्द्वन्द्वं[7] कलह-युग्मयोः ।

---

(१) जन्महेत्वादौ–प्रभवः । [प्रभव–जन्महेतु, पराक्रम, जन्म का मूल स्थान, ज्ञानका आदिस्थान] ।

(२) शूद्रायां विप्रपुत्रे शस्त्रादौ च पारशवः । [पारशव–ब्राह्मण से शूद्रा में उत्पन्न, पर-स्त्री-पुत्र, फर्सा] ।

(३) निश्चितादौ ध्रुवः । [ध्रुव–ध्रुवतारा, निश्चित, नित्य, खूंटा, कीली, शिव, वट, तर्क, निश्चल] ।

(४) ज्ञातावात्मनि च स्वः पुंसि । आत्मीये–त्रिषु । धनेऽस्त्रियाम् । [स्व–ज्ञाति, आत्मा, आत्मीय, धन] ।

(५) स्त्रीकटिवस्त्रग्रन्थ्यादौ नीवी । [नीवी–स्त्री की धोती की गांठ, अण्टी-टेंट, मूलधन, जामिन में पुत्र आदि को रखना] ।

(६) गौर्यादौ शिवा । [शिवा–पार्वती, शृगाल, शृगाली] ।

(७) कलहादौ द्वन्द्वम् । [द्वन्द्व–कलह, झगड़ा, जोड़ा, रहस्य, स्त्री पुरुष का जोड़ा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

द्रव्या-ऽसु-व्यवसायेषु सत्त्वमस्त्री तु जन्तुषु ॥२१९॥
क्लीबं नपुंसके षण्डे वाच्यलिङ्गमविक्रमे ।

❀ इति वान्ताः ❀

द्वौ विशौ वैश्य-मनुजौ, द्वौ चरा-ऽभिमरौ स्पशौ ॥
द्वौ राशी पुञ्ज-मेषाद्यौ, द्वौ वंशौ कुल-मस्करौ ।
रहः-प्रकाशौ वीकाशौ, निर्वेशो भृति-भोगयोः ॥२२१॥

---

(१) द्रव्यादौ-सत्त्वम् । [सत्त्व-द्रव्य, प्राण, निश्चय, बल, स्वभाव, जन्तु] ।

(२) नपुंसकादौ क्लीबम् । वान्तोऽप्ययमिति केचित् । [क्लीब-नपुंसक, निर्बल] ।

(३) द्वयोर्विट् शान्तः । [विश्-वैश्य, मनुष्य, प्रवेश] ।

(४) द्वयोः स्पशः । [स्पश-गुप्तचर, युद्ध] ।

(५) पुञ्जादौ-राशिः । [राशि-पुञ्ज, मेष आदि राशि] ।

(६) कुलादौ वंशः । [वंश-कुल, बांस, वर्ग, पृष्ठ की हड्डी] ।

(७) रहसि प्रकाशे च वीकाशः । [वीकाश-एकान्त, निर्जन, स्पष्ट खुलासा] ।

(८) द्वयोरर्थयोर्निर्वेशः । [निर्वेश-भाडा, वेतन, मजूरी, भोग, उपभोग] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतान्ते पुंसि कीनाशः क्षुद्र-कर्षकयोस्त्रिषु ।
पदे लक्ष्ये निमित्तेऽपदेशः स्यात्कुशमप्सु च ॥२२२॥
दशाऽवस्थाऽनेकविधाऽप्याशा तृष्णाऽपि चाऽऽयता ।
वशा स्त्री करिणी च स्याद्, दृग् ज्ञाने ज्ञातरि त्रिषु ॥

---

(१) कृतान्तादौ कीनाशः । [कीनाश–यमराज, क्षुद्र, कृपण, गुप्त मारनेवाला, गुप्त हत्यारा] ।

(२) पदादावपदेशः । [अपदेश–स्थान, लक्ष्य=निशाना, निमित्त, कपट] ।

(३) दर्भजलादौ कुशम् । [कुश–जल, दर्भ, जल, कुशद्वीप, बन्धन रज्जु, रम्भा = कुस्सा] ।

(४) दीपवर्त्यवस्थादौ–दशा । [दशा–दीप की बत्ती, बाल्य आदि अवस्था, वस्त्र का अञ्चल] ।

(५) दिक्तृष्णादौ–आशा । [आशा–दिशा, लम्बी चौड़ी तृष्णा (आशा)] ।

(६) वन्ध्याकरिण्यादौ–वशा । [वशा–स्त्री, हथिनी, बन्ध्या गाय] ।

(७) ज्ञानादौ दृक् । [दृश्–ज्ञान, ज्ञाता, नेत्र, बुद्धि] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

स्यात्कर्कशः साहसिकः कठोरा-ऽमसृणावपि ।
प्रकाशोऽतिप्रसिद्धेऽपि, शिशावज्ञे च बालिशः ॥२२४॥
[कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघ-दिव्ययोः] ।

* इति शान्ताः *

सुर-मत्स्यावनिमिषौ, पुरुषावात्म-मानवौ ।

---

(१) साहसिकादौ–कर्कशः । [कर्कश–साहसी, कठोर, रूखा, खरखरा, कृपण, निर्दय, दृढ, ईख] ।

(२) स्फुटातपाऽतिप्रसिद्धादौ प्रकाशः । [प्रकाश–उजेला घाम, अति प्रसिद्ध, स्फुट] ।

(३) मूर्खबालयोर्बालिशः । [बालिश–बच्चा, मूर्ख, अज्ञान] ।

(४) कुड्मलादौ–कोशः । [कोश, कोष–कली, तलवार की म्यान, कोश, खजाना, दिव्य (शपथ)] ।

(५) देवमत्स्ययोरनिमिषः । [अनिमिष–देवता, मछली] ।

(६) आत्ममनुष्ययोः पुरुषः । [पुरुष–आत्मा, मानव–(मनसेषु)] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]काक-मत्स्यात्खगौ ध्वांक्षौ, [2]कक्षौ तु तृण-वीरुधौ ॥
[3]अभीषुः प्रग्रहे रश्मौ, [4]प्रैषः प्रेषण-मर्दने ।
[5]पक्षःसहायेऽप्यु[6]ष्णीष शिरोवेष्ट-किरीटयोः ॥२२६॥
[7]शुक्ले मूषके श्रेष्ठे सुकृते वृषभे वृषः ।

---

(१) मत्स्यभक्षककाकभिक्षुकेषु ध्वाङ्क्षः । [ध्वाङ्क्ष–कौवा, जल में से पकड़ कर मछली खानेवाला पक्षी, भिक्षुक, तक्षक] ।

(२) तृणवीरुधोः–कक्षः । [कक्ष–सूखा घास फूस, लता, बगल-काँख, अरण्य, लांग, श्रेणि, करधनी, रथ, गृहप्रकोष्ठ (ड्योढी), गजबन्धनरज्जु] ।

(३) प्रग्रहादावभीषुः । अभीशुरपि । [अभीषु–लगाम, किरण] ।

(४) प्रेषणादौ–प्रैषः प्रेषोपि । [प्रैष–प्रेषण, मर्दन, पीडा, उन्माद] ।

(५) सहायपार्श्वादौ–पक्षः । [पक्ष–सहाय, मासार्ध = पक्ष, पार्श्व, ग्रह, बल, मित्र, चूल्हे का छेद, पाँख, हाथी व घोड़े के पार्श्व] ।

(६) किरीटादौ–उष्णीषम् । [उष्णीष–पगड़ी, मुकुट, शिरोवर्त्ती रोमावर्त्त = चिह्न विशेष] ।

(७) श्रेष्ठशुक्लादौ वृषः । [वृष–अधिक शुक्रवाला, चूहा, श्रेष्ठ, बैल, धर्म] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कोषोऽस्त्री कुड्मले खड्गपिधाने-ऽर्थौघ-दिव्ययोः ।
[2]द्यूतेऽक्षे शारिफलकेऽप्याकर्षोऽथाक्षमिन्द्रिये ॥२२७॥
ना द्यूताङ्गे कर्षे चक्रे व्यवहारे कलिद्रुमे ।
[4]कर्षूर्वार्ता करीषाग्निः कर्षूः कुल्याभिधायिनी ॥२२८॥
[5]पुम्भावे तत्क्रियायां च पौरुषं, [6]विषमप्सु च ।

---

(१) कोषशब्दः षान्तोऽत्र क्वचित्-पठ्यते । क्वचिच्च कोश-शब्दः शान्तः पूर्वत्र शान्तवर्गे पठ्यते । [कोष-कली, म्यान, खजाना, दिव्य-विषभक्षण आदि शपथ] ।

(२) द्यूतादावाकर्षः । [आकर्ष-जूवा, पाशा, चौपड़, आकर्षण, इन्द्रिय] ।

(३) इन्द्रियादावक्षः । [अक्ष-इन्द्रिय, पाशा, तोला, चक्रनाभिक्षेप्य लौहदण्ड, व्यवहार, मुकद्दमा, बहेड़ा] ।

(४) वार्त्तादौ कर्षूः स्त्रियाम् । [कर्षू-वार्त्ता (= खेती-बाडी, रोजगार) करीष (गोहरी) की अग्नि, नदी, नहर] ।

(५) पुंभावादौ पौरुषम् । [पौरुष-पुरुषत्व, पुरुषार्थ, पराक्रम, तेज, पुरसा] ।

(६) जलगरलयोर्विषम् । [विष-जहर, जल] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]उपादानेऽप्यामिषं स्याद्[2]परावेऽपि किल्बिषम्॥२२९॥
[3]स्याद्वृष्टौ लोकधात्वंशे वत्सरे वर्षमस्त्रियाम्।
[4]प्रेक्षा नृत्येक्षणं प्रज्ञा, भिक्षा[5] सेवाऽर्थना भृतिः॥२३०॥
त्विट्[6] शोभापि, त्रिषु प , [7]न्यक्षं कार्त्स्न्य-निकृष्टयोः।

(१) मांसोपादानादिषु–आमिषम् । [आमिष–मांस, उपादान=घूस, भोग्य वस्तु, संभोग]।

(२) अपराधपापादौ किल्बिषम् । [किल्बिष–पाप, अपराध, रोग]।

(३) वृष्ट्यादौ वर्षम् । लोकं धत्ते इति लोकधातुः= जम्बूद्वीपः, तस्यांशे=भारतादौ । [वर्ष–वृष्टि, भारतादि वर्ष, मेघ, जम्बूद्वीप, वर्षा ऋतु]।

(४) नृत्येक्षणप्रज्ञयोः प्रेक्षा । [प्रेक्षा–नाच, तमाशा देखना, बुद्धि]।

(५) सेवाप्रार्थनादौ–भिक्षा । [भिक्षा–सेवा, नौकरी, मांगना, मजूरी, भाडा, भिक्षा में मिली वस्तु]।

(६) शोभाकान्त्यादौ त्विट्शब्दः षान्तः । [त्विट्–शोभा, प्रभा, वाणी]। वक्ष्यमाणा न्यक्षादयस्त्रयोऽपि, त्रिषु = वाच्यलिङ्गाः ।

(७) कार्त्स्न्यादौ न्यक्षम् । [न्यक्ष–परशुराम, सम्पूर्ण–(न्यक्ष = नक्की), निकृष्ट = अधम]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रत्यक्षेऽधिकृतेऽध्यक्षो, रूक्षस्त्वप्रेम्ण्यचिक्कणे॥२३१॥

॥ इति षान्ताः ॥

रवि-श्वेतच्छदौ हंसौ, सूर्य-वह्नी विभावसू ।
वत्सौ तर्णक-वर्षौ द्वौ, सारङ्गाश्च दिवौकसः ॥२३२॥
शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः ।

---

(१) प्रत्यक्षाध्यक्षयोरध्यक्षः । [अध्यक्ष–प्रत्यक्ष, प्रधान -अधिकारी] ।

(२) अस्निग्धादौ–रूक्षः । [रूक्ष–स्नेहरहित, रूखा, निःस्नेह] ।

(३) रविहंसयोर्हंसः । [हंस–सूर्य, हंस, विष्णु, संन्यास भेद, हंस परहंस, परमात्मा, द्वेषरहित, प्राणवायु, निर्लोभी राजा] ।

(४) सूर्याग्न्योर्विभावसुः । [विभावसु–सूर्य, अग्नि, हार विशेष] ।

(५) तर्णकवर्षयोर्वत्सः । [वत्स–बछड़ा, वर्ष, साल, पुत्र आदि] ।

(६) सारङ्गदेवादौ दिवौकाः । [दिवौकस्–देवता, चातक] ।

(७) शृङ्गारादौ रसः । [रस–शृङ्गार आदि ९ रस, जहर, वीर्य, मधुर आदि ६ रस, अनुराग, रस, स्वाद, पारा, जल, देहगत धातु] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]पुंस्युत्तंसा-ऽवतंसौ द्वौ कर्णपूरे च शेखरे ॥२३३॥
[2]देवभेदेऽनले रश्मौ वसू रत्ने धने वसु ।
[3]विष्णौ च वेधाः, स्त्री [4]त्वाशीर्हिताऽऽशंसा-ऽहिदंष्ट्रयोः॥
[5]लालसे प्रार्थनौ-त्सुक्ये, हिंसा[6] चौर्यादिकर्म च ।
[7]प्रसूरश्वापि, भू-द्यावौ रोदस्यौ रोदसी च ते ॥२३४॥

---

(१) कर्णपूरादावुत्तंसः, अवतंसश्च । [अवतंस-उत्तंस-कर्णपूर, झूमका, शिरोभूषण] ।

(२) देवभेदादौ वसुः । [वसु-अष्टवसु, अग्नि, किरण, रत्न, धन, राजा, श्यालक = साला, मधुर] ।

(३) विष्णुब्रह्मा च वेधाः । [वेधस्-विष्णु,ब्रह्मा,पण्डित] ।

(४) हिताशंसानादौ-आशीःशब्दः षान्तः स्त्रियाम् । [आशिष्-कल्याण चाहना, सांप की विषैली दाढ] ।

(५) प्रार्थनादौ लालसा । [लालसा-प्रार्थना, तृष्णा, औत्सुक्य] ।

(६) चौरकर्ममारणयोर्हिंसा । [हिंसा-चोरी, घात] ।

(७) अश्वाजनन्योः प्रसूः स्त्रियाम् । [प्रसू-घोड़ी, माता, कदली = केला लता] ।

(८) पृथिव्यादौ रोदसी, रोदस्यौ च । इकारान्तस्य वा द्विवचने रूपम् । [रोदसी, रोदसि-पृथ्वी और अन्तरिक्ष आकाश (स्वर्ग)] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]ज्वाला-भासोर्न पुंस्यर्चि[2]र्ज्योतिर्भ-द्योत-दृष्टिषु ।
[3]पापा-ऽपराधयोरागः, [4]खग-बाल्यादिनोर्वयः ॥२३६॥
[5]तेजः-पुरीषयोर्वर्चो, [6]महस्तूत्सव-तेजसोः ।
[7]रजो गुणे च स्त्रीपुष्पे, [8]राहौ ध्वान्ते गुणे तमः ॥

(१) ज्वालादावर्चिः क्लीबे । [अर्चिष्-ज्वाला=शिखा, प्रभा] ।

(२) नक्षत्रादौ ज्योतिः क्लीबे । [ज्योतिष्-नक्षत्र, प्रकाश, अग्नि, सूर्य, नेत्र] ।

(३) पापापराधयोरागः सान्तं क्लीबे । [आगस्-पाप, अपराध] ।

(४) खगादौ वयः सान्तं क्लीबे । [वयस्-पक्षी, बाल्य आदि अवस्था, यौवन] ।

(५) तेजःपुरीषयोर्वर्चः सान्तं क्लीबे । [वर्चस्-तेज, विष्ठा, रूप,] ।

(६) उत्सवादौ महः सान्तम् । [महस्-उत्सव, तेज] ।

(७) गुणादौ रजः । [रजस्-रजोगुण, स्त्रीरज, धूलि, पराग] ।

(८) ध्वान्तादौ तमः । [तमस्-राहु, अन्धकार, तमोगुण, शोक] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]छन्दः पद्येऽभिलाषे च, [2]तपः कृच्छ्रादिकर्म च ।
[3]सहो बलं सहा मार्गो, [4]नभः खं श्रावणो नभाः ॥
[5]ओकः सद्माश्रयश्चौकाः, [6]पयः क्षीरं पयोऽम्बु च ।
[7]ओजो दीप्तौ बले, स्रोत[8] इन्द्रिये निम्नगारये ॥२३६॥

---

(१) पद्यादौ छन्दः । [छन्दस्–पद्य, वेद, अभिलाष, अभिप्राय, स्वच्छन्दता] ।

(२) कृच्छ्रादौ तपः सान्तं क्लीबे । [तपस्–तपस्या, माघ-मास, शिशिर ऋतु, घन, लोक] ।

(३) बले क्लीबे, पुंसि मार्गशीर्षादौ सहःशब्दः । [सहस्–बल, मार्गशीर्ष, हेमन्त ऋतु, ज्योतिः] ।

(४) गगनादौ नभः । [नभस्–आकाश, श्रावण, मेघ, पीकदान, घ्राण, वर्षा ऋतु] ।

(५) सद्मादौ ओकः सान्तं पुंसि, क्लीबे च । [ओकस्–गृह, आश्रय] ।

(६) जलादौ पयः । [पयस्–दूध, जल] ।

(७) बलादावोजः । [ओजस्–कान्ति, बल, अवष्टम्भ=धैर्य, प्रकाश] ।

(८) इन्द्रियादौ स्रोतः । [स्रोतस्–इन्द्रिय, नदीका स्रोत (प्रवाह)] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेजः[1] प्रभावे दीप्तौ च बले शुक्रेऽप्यतस्त्रिषु ।
विद्वान्[2] विदंश्च, बीभत्सो[3] हिंस्रेऽप्यतिशये[4] त्वमी ॥२४०॥
वृद्धप्रशस्ययोर्ज्यायान्[5], कनीयांस्तु[6] युवाऽल्पयोः ।

---

(१) प्रभावादौ तेजः । [तेज–प्रभाव, प्रभा, कान्ति, बल, वीर्य, तेज, तेजस्विता=किसी की कडी बात एवं अपमान आदि न सहना] ।

इत आरभ्य सान्ताः त्रिषु ।

(२) पण्डितादौ विद्वान् विदंश्च । [विद्वान्-विदत् पण्डित, समझदार, आत्मज्ञानी] ।

(३) विकृतादौ बीभत्सः । [बीभत्स–बिगडा हुआ, क्रूर, पापी, हिंस्र, घृणित] ।

(४) वक्ष्यमाणाश्चत्वारोऽतिशयेऽर्थे ।

(५) अतिशयेन वृद्धः, प्रशस्यश्च–ज्यायान् । [ज्यायान्–अत्यन्त श्रेष्ठ, अत्यन्त वृद्ध] ।

(६) युवाल्पयोः–कनीयान् । [कनीयान्–नौजवान, अत्यन्त छोटा, बहुत स्वल्प, अनुज] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वरीयांस्तूरु-वरयोः,[1] साधीयान् साधु-बाढयोः ॥२४१॥

❀ इति सान्ताः ❀

[3]दलेऽपि बर्हं, [4]निर्बन्धा-ऽपरोगा-ऽर्कादयो ग्रहाः ।
[5]द्वार्यापीडे क्वाथरसे निर्यूहो नागदन्तके ॥२४२॥
[6]तुलासूत्रेऽश्वादिरश्मौ प्रग्राहः प्रग्रहोऽपि च ।

---

(१) ऊरुवरयोः-वरीयान् । [वरीयान्-अत्यन्त श्रेष्ठ, अत्यन्त अधिक] ।

(२) अतिशयितः साधुर्बाढो वा-साधीयान् । [साधीयान्-अत्यन्त साधु, श्रेष्ठ, बहुत ठीक] ।

(३) पिच्छपत्त्रयोर्बर्हम् । [बर्ह-मोरपंख, पत्ता] ।

(४) निर्बन्धादौ ग्रहः। [ग्रह-आग्रह, ग्रहण, सूर्य आदि ग्रह, अनुग्रह, युद्ध की तैयारी, पूतना आदि बालग्रह, राहु, यज्ञपात्र] ।

(५) 'निर्यूहः शेखरे द्वारे निर्यासे नागदन्तके' इति विश्वः । 'निर्व्यूह' इति क्वचित्पाठः। [निर्यूह-द्वार, शिरो भूषण, क्वाथ का रस, नागदन्त (खूंटी)] ।

(६) तुलासूत्रादौ प्रग्राह, प्रग्रहौ । [प्रग्राह, प्रग्रह-तराजू का सूत्र (एवं डंडी)-लगाम] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]पत्नी-परिजना-ऽऽदान-मूल-शापाः परिग्रहाः ॥२४३॥
[2]दारेषु च गृहाः, [3]श्रोण्यामप्यारोहो वरस्त्रियाः ।
[4]व्यूहो वृन्देऽप्यहिर्वृत्रेऽप्यग्नी-न्द्र-र्कास्तमोऽपहाः २४४
[5]परिच्छदे नृपार्हेऽर्थे परिबर्हो,-

❀ इति हान्ताः ❀

-ऽव्ययाः परे ।

---

(१) पत्न्यादौ परिग्रहः । [परिग्रह-पत्नी, परिजन, मूल, शाप, आदान=स्वीकार, ग्रहण, राहुमुखस्थ सूर्य] ।

(२) स्त्रीगृहादौ गृहशब्दः । [गृह-स्त्री, घर] ।

(३) श्रोण्यादौ आरोहः । [आरोह-वड आदि वृक्षों की जटा, सुन्दरी स्त्री की कटि, चढना, हाथी पर चढना, लम्बाई, ऊँचाई] ।

(४) वृन्दादौ व्यूहः । [व्यूह-समूह, व्यूह रचना, निर्माण, तर्क] ।

(५) सर्पवृत्रयोरहिः । [अहि-साँप, वृत्रासुर] ।

(६) अग्न्यादौ तमोपहः । [तमोपह-सूर्य, चन्द्रमा, अग्नि] ।

(७) परिच्छदादौ परिबर्हः । [परिबर्ह-परिच्छद=उपकरण। [खाट-पीढी आदि गृहोपकरण, उपभोग साधन वस्तु, राजोपयोगी वस्तु-हाथी घोडा छत्र-चामर आदि] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे ॥२४५॥
आ प्रगृह्यः स्मृतौ वाक्येऽप्यास्तु स्यात्कोप-पीडयोः।
पाप-कुत्से-षदर्थे कु, धिङ् निर्भर्त्सन-निन्दयोः॥२४६॥
चाऽन्वाचय-समाहारे तरेतर-समुच्चये।
स्वस्त्याशीः-क्षेम-पुण्यादौ, प्रकर्षे लङ्घनेऽप्यति २४७

(१) अथ अनेकार्था अव्यया उच्यन्ते। ईषदर्थेऽभिव्याप्त्यादौ च—आङ्। [आङ्—ईषत् = थोडा, अभिव्याप्ति, मर्यादा, अभिविधि, धातुयोगज अर्थ (आहरणादि)]।

(२) स्मृतौ वाक्यारम्भे च—आ [आ—वाक्यारम्भ, स्मरण]।

(३) कोपपीडयोः—आः! [आः—कोप, पीडा का प्रदर्शन]।

(४) पापादौ—कु। [कु—पाप, निन्दा = दोष कीर्त्तन, थोडा]।

(५) निर्भर्त्सनादौ—धिक्। [धिक्—निन्दा, झिड़कना, धमकाना]।

(६) अन्वाचयादौ चः। [च—समुच्चय, अन्वाचय, इतरेतरयोग, समाहार]।

(७) आशीःक्षेमादौ—स्वस्ति। [स्वस्ति—आशीर्वाद, क्षेम, पुण्य, मङ्गल आदि]।

(८) प्रकर्षादौ अति। [अति—प्रकर्ष, अत्यन्त, उल्लङ्घन प्रशंसा]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वित्[1]प्रश्ने च वितर्के च, तु स्याद्भेदे[2]ऽवधारणे ।
सकृत्[3]सहैकवारे चाप्याराद्[4]दूर-समीपयोः ॥२४८॥
प्रतीच्यां[5] चरमे पश्चादुता[6]-ऽप्यर्थ-विकल्पयोः ।
पुनः[7]-सहार्थयोः शश्वत्साक्षात्[8]प्रत्यक्ष-तुल्ययोः ॥२४९॥
खेदा[9]ऽनुकम्पा-सन्तोष-विस्मया-ऽऽमन्त्रणे बत ।

(१) प्रश्नादौ-स्वित् । [स्वित्-प्रश्न, वितर्क] ।

(२) भेदेऽवधारणे तु । [तु-भेद, अवधारण] ।

(३) एकवारे सहार्थे च-सकृत् । [सकृत्-एक साथ, एक बार] ।

(४) दूरसमीपयोराराद् । [आराद्-दूर, समीप] ।

(५) प्रतीच्यादौ-पश्चात् । [पश्चात्-पश्चिम, पीछे] ।

(६) विकल्पाऽप्यर्थादौ-उत । [उत-अपि के अर्थ-समुच्चय प्रश्न आदि में एवं विकल्प में] ।

(७) पुनःसहार्थयोः शश्वत् । [शश्वत्-पुनः, बार बार, एक साथ] ।

(८) प्रत्यक्षतुल्ययोः साक्षात् । [साक्षात्-प्रत्यक्ष, तुल्य] ।

(९) खेदादौ बत ! [बत-खेद, अनुकम्पा, सन्तोष, आश्चर्य, आमन्त्रण] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]हन्त हर्षेऽनुकम्पायां वाक्यारम्भ-विषादयोः ॥२५०॥
[2]प्रति प्रतिनिधौ वीप्सा-लक्षणादौ प्रयोगतः ।
[3]इति हेतु-प्रकरण-प्रकाशादि-समाप्तिषु ॥ २५१ ॥
[4]प्राच्यां पुरस्तात्प्रथमे, [5]पुरार्थेऽग्रत इत्यपि ।
[6]यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे ॥२५२॥

---

(१) हर्षादौ हन्त ! [हन्त–हर्ष, अनुकम्पा, वाक्यारम्भ, विषाद] ।

(२) प्रतिनिध्यादौ–प्रति । [प्रति–प्रतिनिधि, वीप्सा, लक्षण, भाग, इत्थंभूताख्यान आदि अर्थों में] ।

(३) हेत्वादौ–इति । [इति–हेतु, प्रकरण = प्रकार, प्रकाश = प्रसिद्ध, एवमर्थ, समाप्ति] ।

(४) प्राच्यादौ–पुरस्तात् । (५) पुरार्थे–अग्रतः । [पुरस्तात्–अग्रतः—पहिले, पूर्व में, आगे] ।

(६) साकल्यादौ–यावत्, तावत् । [यावत्, तावत्–(जितना-उतना) संपूर्ण, अवधि, मान, अवधारण] ।

---

२५१ श्लोके–'प्रकरणप्रकर्षादिसमाप्तिषु' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]मङ्गला-ऽनन्तरा-ऽऽरम्भ-प्रश्न-कार्त्स्न्येष्वथो अथ ।
[2]वृथा निरर्थका-ऽविध्योर्नाना[3]ऽनेको-भयार्थयोः ॥२५३॥
नु [4]पृच्छायां विकल्पे च, [5]पश्चात्सादृश्ययोरनु ।
[6]प्रश्ना-ऽवधारणा-ऽनुज्ञा-ऽनुनया-ऽऽमन्त्रणे ननु ॥२५४
[7]गर्हा-समुच्चय-प्रश्न-शङ्का-सम्भावनास्वपि ।

---

(१) मङ्गलादौ–अथो, अथ । [अथो, अथ—मङ्गल, अनन्तर, आरम्भ, प्रश्न, कार्त्स्न्य] ।

(२) निरर्थकाऽविध्योर्वृथा । [वृथा–निरर्थक, बिना विधि के]

(३) अनेकोभयार्थयोः–नाना । [नाना–अनेक, बिना, उभय ।

(४) पृच्छादौ नु । [नु–प्रश्न, विकल्प] ।

(५) पश्चात्सादृश्ययोः–अनु । [अनु–पश्चात्, सादृश्य] ।

(६) प्रश्नादौ ननु । [ननु–प्रश्न, अवधारण, अनुज्ञा, आमन्त्रण] ।

(७) गर्हादौ–अपि । [अपि—निन्दा, समुच्चय, प्रश्न, शङ्का, संभावना] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]उपमायां विकल्पे वा, सामि त्वर्धे[2] जुगुप्सिते ॥२५५॥
[3]अमा सह समीपे च, कं [4]वारिणि च मूर्धनि ।
[5]इवेत्थमर्थयोरेवं, [6]नूनं तर्केऽर्थनिश्चये ॥२५६॥
[7]तूष्णीमर्थे सुखे जोषं, किं [8]पृच्छायां जुगुप्सिते ।
[9]नाम प्राकाश्य-संभाव्य-क्रोधो-पगम-कुत्सने ॥२५७॥

---

(१) उपमादौ वा । [वा—विकल्प, उपमा] ।

(२) अर्धे जुगुप्सिते च सामि । [सामि—आधा, निन्दित] ।

(३) सहार्थे, समीपे च—अमा । [अमा—सहार्थ, समीप] ।

(४) जलशिरसोः कम् । [कं—जल, शिर] ।

(५) इवेत्थमर्थयोः—एवम् । [एवम्—इस प्रकार, उपमा, अङ्गीकार, निश्चय] ।

(६) तर्कादौ—नूनम् । [नूनं—तर्क, निश्चय] ।

(७) तूष्णीमर्थे सुखे—जोषम् । [जोषं—चुप रहना, सुख से बैठना—रहना] ।

(८) जुगुप्सायां पृच्छायाञ्च किम् । [किम्—निन्दा, प्रश्न] ।

(९) प्राकाश्यादौ नाम । [नाम—प्रसिद्धि, संभावना, क्रोध, सद्वेष स्वीकार, निन्दा] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अलं[1] भूषण-पर्याप्ति-शक्ति-वारणवाचकम् ।
हुं वितर्के[2] परिप्रश्ने, समया[3]ऽन्तिक-मध्ययोः ॥२५८॥
पुनरप्रथमे[4] भेदे, निर्निश्चय[5]-निषेधयोः ।
स्यात्प्रबन्धे[6] चिरातीते निकटाऽऽगामिके पुरा ॥२५९॥
ऊर्र्यूरी चोररी च विस्तारेऽङ्गीकृतौ[7] त्रयम् ।
स्वर्गे[8] परे च लोके स्ववार्त्ता-संभाव्ययोः[9] किल॥२६०॥

---

(१) भूषणादौ-अलम् । [अलं-भूषण, पर्याप्ति, शक्ति, वारण = निषेध] ।

(२) वितर्कपरिप्रश्नयोः—हुं । [हुं-तर्क, प्रश्न, क्रोधोक्ति, मनाना, लज्जा] ।

(३) अन्तिकमध्ययोः समया । [समया-समीप, मध्य] ।

(४) अप्रथमे भेदे च पुनः । [पुनः-फिर, भेद] ।

(५) निश्चयनिषेधयोः निः । [निर्-निश्चय, निषेध] ।

(६) प्रबन्धादौ-पुरा । [पुरा-प्रबन्ध, निरन्तर, पुराने समय, बहुत पहिले, निकटमें, भविष्यत् में] ।

(७) विस्तारेऽङ्गीकृतौ च-ऊररी, ऊरी, उररी । [ऊररी, ऊरी, उररी-विस्तार, स्वीकार] ।

(८) स्वर्गादौ स्वः । [स्वर्-स्वर्ग, परलोक] ।

(९) वार्त्तादौ किल । [किल-वार्त्ता, संभावना] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]निषेधवाक्यालङ्कार-जिज्ञासा-ऽनुनये खलु ।
[2]समीपो-भयतः-शीघ्र-साकल्या-भिमुखेऽभितः॥२५५॥
[3]नाम-प्राकाश्ययोः [4]प्रादुर्मिथोऽन्योन्यं रहस्यपि ।
[5]तिरोऽन्तर्धौ तिर्यगर्थे, [6]हा विषाद-शु-गर्तिषु ॥२५६॥
[7]अहहेत्यद्भुते खेदे, हि [8]हेतावववधारणे ।

* इति नानार्थवर्गः ॥ ३ ॥ *

---

(१) निषेधादौ खलु । [खलु—निषेध, वाक्यालङ्कार, जिज्ञासा, अनुनय] ।

(२) समीपादौ अभितः । [अभितस्—समीप, दोनों ओर, शीघ्र, साकल्य, सामनें] ।

(३) नामप्राकाश्यादौ–प्रादुः । [प्रादुस्—नाम, प्रकट होना] ।

(४) अन्योन्यादौ मिथः । [मिथस्-परस्पर, एकान्त] ।

(५) अन्तर्धितिर्यगर्थयोः–तिरः । [तिरस्—अन्तर्धान होना, टेढा] ।

(६) विषादादौ–हा । [हा-विषाद, शोक, पीडा] ।

(७) अद्भुतखेदयोः अहह । [अहह्-आश्चर्य, खेद, पीडा] ।

(८) हेत्वादौ–हि । [हि—हेतु, अवधारण] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ अथ अव्ययवर्गः ॥ ४ ॥ ❀

[1]चिराय-चिररात्राय-चिरस्या-ऽऽद्याश्चिरार्थकाः ।
[2]मुहुः-पुनःपुनः-शश्व-दभीक्ष्ण-मसकृत् समाः ॥ १ ॥
[3]स्राग् झटित्यञ्जसा-ऽह्नाय-द्राङ् मङ्क्षु सपदि द्रुते ।
[4]बलवत्सुष्ठु किमुत स्वत्यतीव च निभरे ॥ २ ॥
[5]पृथग्विनाऽन्तरेण-र्ते हिरुङ् नाना च वर्जने ।
[6]यत्तद्यतस्ततो हेतावसाकल्ये[7] तु चिच्चन ॥ ३ ॥
[8]कदाचिज्जातु, [9]सार्धं तु साकं सत्रा समं सह ।

---

(१) त्रीणि चिरकालस्य । आद्यपदेन-चिरं चिरेण, चिरात्, चिरमिति गृह्यन्ते । [विलम्ब, देरी] ।

(२) पञ्च-पौनःपुन्यार्थकाः । [बार बार] ।

(३) सप्त द्रुतार्थाः । ['झटपट' 'जल्दी'] ।

(४) षट् अतिशयवाचकाः । [अत्यन्त] ।

(५) षट् वर्जनार्थकाः । [छोड़कर, विना] ।

(६) चत्वारि हेत्वर्थकानि । [हेतु] ।

(७) द्वे असाकल्यार्थे । [असाकल्य, अर्थात्-कोई एक] ।

(८) द्वे 'कस्मिंश्चित्काले' इत्यर्थके । [कभी--कदाचित्] ।

(९) पञ्च सहार्थकानि । [साथ] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आनुकूल्यार्थकं[1] प्राध्वं, व्यर्थके[2] तु वृथा मुधा ॥४॥
आहो[3] उताहो किमुत विकल्पे किं किमूत च ।
तु[4] हि च स्म ह वै पादपूरणे, पूजने[5] स्वती ॥५॥
दिवाऽह्नीत्यथ[6] दोषा च नक्तं च रजनाविति ।
तिर्यगर्थे[7] साचि तिरोऽप्यथ[8] संबोधनार्थकाः ॥६॥
स्युः प्याट् पाडङ्ग हे हे भोः,[9] समया निकषा हिरुक् ।[10]

---

(१) एकमानुकूल्यार्थकम् । ['अनुकूल करना' 'पादरा करना' सीधा करना,] ।
(२) द्वे व्यर्थार्थके । ['वृथा'] ।
(३) षट्-वितर्कार्थकानि । ['वितर्क'] ।
(४) षट्—पादपूरणे । [पादपूरण] ।
(५) द्वे पूजने । [पूजन] ।
(६) अह्नीत्यर्थे द्व । ['दिन में'] ।
(७) रात्रावित्यर्थे द्वे । ['रात्रि में'] ।
(८) द्वे तिर्यगर्थे । ['टेढा'] ।
(९) षट् सम्बोधनार्थकानि । ['सम्बोधन'] ।
(१०) त्रीणि सामीप्यार्थकानि । ['समीप' 'पास'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतर्किते[1] तु सहसा, स्यात्[2]पुरः पुरतोऽग्रतः ॥७॥
स्वाहा[3] देवहविर्दाने श्रौषट् वौषट् वषट् स्वधा ।
किंचिदीषन्मनागल्पे[4], प्रेत्या[5]-ऽमुत्र भवान्तरे ॥८॥
वै[6] वा यथा तथैवैवं साम्ये[7]ऽहो ही च विस्मये ।
मौने तु[8] तूष्णीं तूष्णीकां, सद्यः[9] सपदि तत्क्षणे ॥९॥
[10]दिष्ट्या समुपजोषं चेत्यानन्देऽर्था[11]न्तरेऽन्तरा ।

---

(१) एकमविचारितेऽर्थे । ['सहसा' 'अकस्मात्'] ।
(२) त्रीण्यग्रार्थकानि । ['आगे'] ।
(३) देवहविर्दानादौ पञ्च । [देवताओं को हविर्दान] ।
(४) त्रीण्यल्पार्थकानि । [थोडा] ।
(५) द्वे भवान्तरे [जन्मान्तर में] ।
(६) षट् साम्यार्थकानि । ['सादृश्यार्थक' इवार्थक] ।
(७) द्वे विस्मयार्थके । ['आश्चर्यार्थक'] ।
(८) द्वे मौने । ['मौन'] ।
(९) तत्क्षणे द्वे । ['तत्काल', 'उसी समय'] ।
(१०) द्वे आनन्देऽर्थे । ['आनन्द की बात है'] ।
(११) त्रीणि मध्येऽर्थे । ['मध्य'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्तरेण च मध्ये स्युः, प्रसह्य तु हठार्थकम् ॥१०॥
युक्ते[2] द्वे सांप्रतं स्थाने[3]ऽभीक्ष्णं शश्वदनारते ।
अभावे[4] नह्य नो नापि, मास्म माऽलं च वारणे[5] ॥११॥
पक्षान्तरे[6] चेद्यदि च, तत्त्वे[7] त्वद्धाऽञ्जसा द्वयम् ।
प्राकाश्ये[8] प्रादुराविः स्यादोमेवं परमं मते[9] ॥१२॥
[10]समन्ततस्तु परितः सर्वतो विष्वगित्यपि ।

---

(१) एकं हठे । [हठ] ।
(२) द्वे युक्ते । [युक्त] ।
(३) द्वे अनारते । ['सतत', 'निरन्तर'] ।
(४) चत्वारि अभावे । [नहीं] ।
(५) त्रीणि वारणे । [निषेध–नाहीं] ।
(६) पक्षान्तरे द्वे । ['पक्षान्तर'] ।
(७) तत्त्वे द्वे । [तत्त्वकथन] ।
(८) द्वे प्राकाश्ये । [प्रकट होना] ।
(९) त्रीण्यङ्गीकारे । [स्वीकार] ।
(१०) चत्वारि सर्वत इत्यस्मिन्नर्थे । [चारों ओर] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अकामानुमतौ[1] काममसूयोपगमेऽस्तु[2] च ॥१३॥
ननु[3] च स्याद्विरोधोक्तौ, कच्चित्काम[4]प्रवेदने ।
निःषमं[5] दुःषमं गर्ह्ये, यथास्वं[7] तु यथायथम् ।१४॥
मृषा[6] मिथ्या च वितथे, यथार्थं[8] तु यथातथम् ।
स्युरेवन्तु-पुन-र्वै-वेत्यवधारणवाचकाः[9] ॥१५॥
[10]प्रागतीतार्थकं, [11]नूनमवश्यं निश्चये द्वयम् ।

---

(१) अनिच्छानुमतौ—एकम् । [अनिच्छा से अनुमति देना ।]
(२) एकमसूययोपगमे । ['असूया से स्वीकार, 'अच्छा' 'ऐसा ही सही'] ।
(३) एकं विरोधोक्तौ । [विरुद्धोक्ति] ।
(४) एकमिष्टपरिप्रश्ने । [इष्ट प्रश्न, 'ऐसा है क्या ?'] ।
(५) द्वे गर्ह्ये । ['गर्ह्य' 'निन्दा'] ।
(७) यथायोग्ये द्वे । ['यथायोग्य'] ।
(६) द्वे असत्ये । [झूठे ही] ।
(८) द्वे सत्ये । ['यथार्थ'] ।
(९) पञ्च निर्धारणे । [निर्द्धारण] ।
(१०) अतीते एकम् । [पहिले] ।
(११) द्वे निश्चये । [निश्चय] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]संवद्वर्षेऽवरे[2] त्ववर्गा[3]मेवं स्वयमात्मना[4] ॥१६॥
[5]अल्पे नीचैर्महत्युच्चैः[6], प्रायो[7] भूम्न्यद्रुते[8] शनैः।
[9]सना नित्ये, [10]बहिर्बाह्ये, [11]स्मातीतेऽस्तमदर्शने[12] १७
[13]अस्ति सत्त्वे, [14]रुषोक्तावु, [15]ऊं प्रश्नेऽनुनये[16] त्वयि।

---

(१) एकं वर्षे। [संवत्]।
(२) अवरे–अर्वाक्। [पहिले]।
(३) एवमर्थे एकम्। [इस प्रकार]।
(४) आत्मना इत्यर्थे द्वयम्। ['स्वयम्']।
(५) एकमल्पेऽर्थे। [नीचे]।
(६) महत्येकम्। [ऊँचे]।
(७) भूम्नि प्रायः। [प्रायः]।
(८) अद्रुते शनैः। [शनैः]।
(९) नित्ये–सना। [नित्य]।
(१०) बाह्य–बहिः। [बाहर]।
(११) अतीते–स्म। [अतीत में]।
(१२) अदर्शने–अस्तम्। ['छिपना' 'अस्त']।
(१३) सत्त्वे–अस्ति। [है]।
(१४) रुषोक्तौ–उ [क्रोध से उक्ति]।
(१५) प्रश्ने–ऊ। [प्रश्न में]।
(१६) अनुनये–त्वयि। [मनाने में, खुशामद में]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

हुं तर्के[1] स्यादुषा[2] रात्रेरवसाने, नमो[3] नतौ ॥१८॥
पुनरर्थेऽङ्ग[4], निन्दायां दुष्ठु[5], सुष्ठु[6] प्रशंसने ।
सायं[7] साये, प्रगे[8] प्रातः प्रभाते, निकषाऽन्तिके[9] ॥१९॥
परुत्परार्यैषमोऽब्दे[10] पूर्वे पूर्वतरे यति ।

---

(१) हुँ तर्के । [तर्क] ।

(२) रात्रेरवसाने—उषा । [प्रातःकाल होना] ।

(३) नतौ—नमः । [नमस्कार] ।

(४) पुनरित्यर्थे अङ्ग । ['फिर' 'पुनः'] ।

(५) निन्दायां = दुष्ठु । ['निन्दा'] ।

(६) प्रशंसायां—सुष्ठु । ['अच्छा' 'सुन्दर'] ।

(७) दिनान्ते—सायम् । [सन्ध्या] ।

(८) प्रभाते—द्वे । [प्रातः] ।

(९) अन्तिके—निकषा । ['समीप', पास में] ।

(१०) पूर्वे वर्षे—परुत् । [गत वर्षे] । पूर्वतरे वत्सरे—परारि । ['परार के', दो वर्ष पूर्व'] । यति=वर्त्तमाने, वत्सरे—ऐषमः । [इस वर्ष] ।

Dr. Umila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्याऽत्राऽह्न्यथ[1], पूर्वेऽह्नीत्यादौ पूर्वोत्तराऽपरात् ॥२०॥
तथाऽधराऽन्याऽन्यतरे-तरात्पूर्वेद्युरादयः ।
उभयद्युश्चोभयेद्युः[3] परे त्वह्नि परेद्यवि[4] ॥२१॥
ह्योऽतीतेऽनागतेऽह्नि[5] श्वः[6], परश्वश्च[7] परेऽहनि ।
तदा[8] तदानीं, युगपदेकदा[9], सर्वदा[10] सदा ॥२२॥

---

(१) अस्मिन्नहनि—अद्य । ['आज'] ।

(२) पूर्वेह्नि-पूर्वेद्युः । उत्तरेऽह्नि—उत्तरेद्युः । अपरेह्नि—अपरेद्युः । एवम्—अधरेद्युः, अन्येद्युः, अन्यतरेद्युः, इतरेद्युरित्यादि । ['पहिले दिन,' 'अगले दिन,' 'दूसरे दिन' 'पिछले दिन' किसी दिन, 'दो में से किसी दिन' इत्यादि] ।

(३) उभयस्मिन्नहनीत्यर्थे—द्वयम् । [दोनों दिन] ।

(४) परेऽह्नि—परेद्यवि । [अगले दिन, 'पर दिन'] ।

(५) अतीते दिने ह्यः । [गत दिन] ।

(६) आगामिनि श्वः । ['कल' 'आनेवाले दिन'] ।

(७) परेह्नि—परश्वः ['परसों'] ।

(८) तस्मिन् काले तदा, तदानीम् । [तब] ।

(९) एकस्मिन् काले एकदा, युगपत् । ['एक साथ'] ।

(१०) सर्वस्मिन् काले—सर्वदा, सदा । ['सदा'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा ।
दिग्देशकाले[2] पूर्वादौ प्रागुदक्प्रत्यगादयः ॥२३॥

इत्यव्ययवर्गः ॥ ४ ॥

अथ लिङ्गादिसङ्ग्रहवर्गः ॥ ५ ॥

[3]सलिङ्गशास्त्रैः सन्नादि-कृ-त्तद्धित-समासजैः ।
अनुक्तैः, संग्रहे लिङ्गं सङ्कीर्णवदिहोन्नयेत् ॥ १ ॥

(१) एतस्मिन् काले-एतर्हि । एवम्—इदानीम्, अधुना, साम्प्रतम्-अपि । ['इस समय'] ।

(२) प्राच्यां दिशि-प्राक्, प्राच्या दिश इति च-प्राक् । प्राची दिक् च-प्राक् । एवं-देशे काले च । तथा-अवाच्यां दिशि,-अवाच्या दिशः,-अवाङ् देशो वा—अवाक् । एवम्-उदक्, प्रत्यक् । आदिपदेन-उत्तरात्, अधरात्, दक्षिणादित्यादयः । ['प्राक्'-पूर्व दिशा में, पूर्व दिशा से, पूर्व दिशा इत्यादि । इसी प्रकार-देश और काल भी समझना] ।

(३) सलिङ्गशास्त्रैः = पाणिन्याद्युक्तलिङ्गानुशासनसहितैः, सन्नादि-कृ-त्तद्धित-समासजैः = सन्क्यजादिप्रत्ययजैः = चिकीर्षादि-

१ 'अनुक्तौ सङ्ग्रहे' इति पाठा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः ।

शब्दैः, कृत्प्रत्ययजैः = श्वपाकादिभिः, तद्धितप्रत्ययजैः = दाण्डपातादिभिः, समासजैः = 'अकारान्तोत्तरपदो द्विगु' रित्यादिभिरुक्तैः, प्रायः-अनुक्तैः = पूर्वमनुक्तैः,-शब्दैः-उपलक्षितः-अयं लिङ्गसंग्रहः क्रियते । उपलक्षणे तृतीया । तादृशशब्दैरुपलक्षिते—इह संग्रहे = अस्मिन् लिङ्गादिसंग्रहे,-लिङ्गं सङ्कीर्णवत् = सङ्कीर्णवर्गवदेव लिङ्गं-उन्नयेत् = जानीयात् । यथा सङ्कीर्णे वर्गे प्रकृतिप्रत्ययादिभिर्लिङ्गनिर्णयःपूर्वमुक्तस्तद्वदिहाप्युन्नयेदित्यर्थः ॥ १ ॥ [पाणिनीय व्याकरणस्थ-लिङ्गबोधक सूत्र-'स नपुंसकं' 'स्त्रियां क्तिन्' आदि से, तथा-सन् क्यच्, काम्यच्, आदि तथा कृत्, तद्धित, समास-विधायक सूत्रों के आधार पर ही हम यह 'लिङ्गादिसङ्ग्रह वर्ग' बना रहे हैं। इसमें से अनुक्त लिङ्गों को संकीर्ण वर्ग में उक्त प्रक्रिया से अर्थात् प्रकृति प्रत्ययादि के अर्थों के आधार पर—स्वयं समझना]।

(१) लिङ्गेति । लिङ्गस्य-शेषः = अवशेषः, तस्य विधानम् = विधिः, अत्रोच्यमानो, व्यापी = पूर्वोक्तकाण्डत्रयस्य व्यापको बोध्यः, उत्सर्गत्वात् । परं-यदि केनाऽपि लिङ्गविशेषवचनेन अत्रोक्तेन, पूर्वोक्तेन वा,—न बाध्यते । [इस लिङ्गशेष प्रकरण में उक्त लिङ्ग विधान तीनों काण्डों में उक्त शब्दों पर लागू होगा, यदि किसी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्त्रियामीदूद्विरामैकाच्, सयोनि-प्राणि-नाम च ॥२॥
नामं विद्यु-न्निशा-वल्ली-वीणा-दि-ग्भू-नदी-धियाम् ।

विशेष वचन-'पुंसि', 'त्रिषु' आदि पूर्वोक्त से, अथवा इसी लिङ्ग प्रकरण में उक्त किसी विशेष वचन से वह बाधित न हो तो]।

(१) स्त्रियामिति-अधिकारोऽयम्, मसीशब्दं यावत्। ईच ऊच, तौ विरामे-अन्ते यस्य,-तच्च तदेकाच्च। ईकारान्तमूकारान्तञ्चैकाच्छब्दरूपमिति यावत्। तत्—स्त्रियाम्। यथा-श्रीः, धीः, ह्रीः, भ्रूः, लूः, भूः। लुनाति लूरित्यादौ कर्त्तरि तु-'कृतः कर्त्तरी'ति वक्ष्यमाणेन बाधात्त्रिलिङ्गतैव। योनिसहितप्राणिनाम-स्त्रियाम्। यथा-माता, दुहिता, याता, स्त्री। 'दार'शब्दे तु-'दाराः पुंभूम्नी'ति पूर्वोक्तवचनादस्य बाधः। [ईकारान्त ऊकारान्त एकाच् शब्द प्रायः स्त्रीलिङ्ग होते है। जैसे-श्रीः, भ्रूः। योनि सहित प्राणी वाचक शब्द भी प्रायः स्त्रीलिङ्ग होते हैं। जैसे-माता, स्वसा]।

(२) विद्युदादीनामष्टानां नामानि च स्त्रियाम्। यथा-विद्युत्, तडित्। रात्रिः, रजनिः। वल्लिः, वीरुत्। 'वीणा'पदस्थाने—'वाणी'ति युक्तः पाठः। वाक्, गौः, गीः। दिक्, हरित्। भूः, भूमिः, कुः। सरित्, त्रिस्रोताः, विपाट्। 'ह्री'ग्रहणं चिन्त्यम्,

३ श्लोके-'दिग्भूनदीह्रियाम्' इति पा०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अदन्तैर्द्विगुरेकार्थो, न स पात्रयुगादिभिः ॥ ३ ॥
तल्, वृन्दे,-ये-नि-कट्य-त्रा, वैरमैथुनिकादिवुन् ।

'इदूद्विरामैका' जित्याद्यन्यतोपि सिद्धः । अतो धियामिति पाठः । संवित्, चित्, प्रतिपत् । [विद्युत्, निशा आदि आठ शब्दों के पर्याय वाचक शब्द भी स्त्रीलिङ्ग में होते हैं । जैसे-विद्युत्, तडित्, रात्रिः, रजनिः] ।

(१) अदन्तैरेकार्थः = समाहारे अदन्तैर्जायमानः, अकारान्तोत्तरपदो द्विगुः-स्त्रियाम् । दशमूली, त्रिलोकी, सप्तशती । [समाहार में जायमान अकारान्तोत्तरपद द्विगु स्त्रीलिङ्ग होता है । जैसे-सप्तशती, 'त्रिलोकी'] ।

(२) पात्राद्यन्तो द्विगुः स्त्रियां न । यथा-पञ्चपात्रं, त्रिभुवनम् । [पर-पात्राद्यन्त द्विगु स्त्रीलिङ्ग नहीं होता है, किन्तु नपुंसक लिङ्ग ही होता है । जैसे-'पञ्चपात्रम्'] ।

(३) 'तल्'-तलन्तं स्त्रियाम्-ग्रामता जनता, बन्धुता । 'वृन्दे'=वृन्दार्थकाः=समूहार्थकाः, य-इनि-कट्य-त्राः, एतदन्ताः-स्त्रियाम् । पाशानां समूहः-पाश्या । खलिनी, शाकिनी, गोत्रा, रथकट्या । 'द्वन्द्वाद्वुन्वैरमैथुनिकयो'रिति विहितवैर-मैथुनार्थकवुन्नन्ताः स्त्रियाम् । अश्वमहिषिका, काकोलूकिका । अत्रिभरद्वा-

४ श्लोके—'वैरमैथुनिकादिवुः' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्त्री भावादावनिक्तिण्वुल्-णच्ण्वुच्क्यब्युजिञङ्निशाः
उणादिषु निरूरीश्च, ङ्याबूङन्तं चलं स्थिरम् ।

जिका । आदिना 'पादशतस्ये'ति वुन्, 'दण्डव्यवसर्गयोश्चे'ति वुनपि । द्विपदिकां ददाति । वुनो ग्रहणं-वुजोऽप्युपलक्षणम् । क्वचिद्वुरित्येव पाठः । गार्गिकया श्लाघते । 'गोत्रचरणे'ति वुञ् । शैष्योपाध्यायिका,-'द्वन्द्वमनोज्ञे'ति वुञ् । [(१) तलन्त स्त्रीलिङ्ग होता है । जैसे-ग्रामता । (२) समूहार्थक-'य' 'इनि' 'कट्यच्' 'त्र' प्रत्ययान्त स्त्रीलिङ्ग होते हैं । जैसे-'पाश्या' 'खलिनी' 'रथकट्या' 'गोत्रा' । (३) वैरमैथुनाद्यर्थक वुन्प्रत्ययान्त तथा वुञ् प्रत्ययान्त भी स्त्रीलिङ्ग होते हैं । जैसे-'काकोलूकिका'] ।

(१) 'स्त्रिया'मित्यधिकारे-भावे, कर्मादौ च ये अन्यादयः प्रत्ययास्तदन्तं स्त्रियाम् । यथा-अकरणिः, अजननिः,-'आक्रोशे नञ्यनि'रित्यनिः । कृतिः,-'स्त्रियां क्तिन्' । 'ण्वु' इति ण्वुल्ण्वुचोः सामान्यग्रहणम् । 'ण्वु' लिति पाठे तु ण्वुच उपलक्षणं बोध्यम् । प्रच्छर्दिका,-'रोगाख्याया'मिति ण्वुल् । णच्-व्यावक्रोशी । 'कर्मव्यतिहारे ण'जिति णच् । ण्वुच्-भवतः शायिका । 'पर्यायार्हे'ति ण्वुच् । व्रज्या-'व्रजयजो'रिति क्यप् । युच्-कारणा, कामना । 'ण्यासश्रन्थे'ति युच् । इञ्-कां त्वं कारिमकार्षीः-? । 'प्रश्नाख्यानयो'

५ श्लके—'उणादिष्वनिरूरीश्च' पा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्क्रीडायां प्रहरणं चेन्मौष्टा पाल्लवा 'ण'दिक् ॥५॥

रितीञ्। अङ्—छिदा। षिद्भिदेति अङ्। निः—ग्लानिः—'ग्लाग्लाज्ये' ति निः। शः—क्रिया, इच्छा। उणादिषु—न्यन्वमूदन्तमीदन्तञ्च स्त्रियाम्। श्रेणिः, श्रोणिः, कर्षूः, चमूः। अवीः, तरीः। ड्यन्तमावन्तं वा यच्चलं स्थिरं वा तत् स्त्रियाम्। कदली, रमा, वामोरूः।

(४) 'स्त्रियाम्' अधिकार में भाव में तथा कर्त्तृभिन्न कारक में जो 'अनि' 'क्तिन्' 'ण्वुल्' 'ण्वुच्' 'णच्' 'णुच्' 'क्यप्' 'युच्' 'इन्' 'अङ्' 'अ' 'नि' 'श' ये उत्तर कृदन्त के प्रत्यय, तदन्त स्त्रीलिङ्ग होता है। जैसे—'अकरणिः' आदि। (५) उणादि जो 'नि' या 'अञि' 'ऊ' 'ई' प्रत्यय, तदन्त स्त्रीलिङ्ग होता है। जैसे—'श्रेणिः'। 'चम्'। (६) ड्यन्त, आवन्त, ऊङन्त जो चर या स्थिर वे भी स्त्रीलिङ्ग होते हैं। जैसे—'गौरी', 'कदली' 'खट्वा' 'रमा' 'गङ्गा' 'वामोरूः' 'नाड़ी' 'अलाबूः']।

(१) 'तदस्यां प्रहरण'मिति णान्तं स्त्रियाम्। मुष्टिः प्रहरणमस्यां—मौष्टा, पाल्लवा। णदिक्=णोदाहरणस्येयं दिक्। तेन 'मौसला' 'दाण्डा' इत्याद्यप्युदाहरणं बोध्यम्। ['तदस्यां प्रहरणम्' इस सूत्र से क्रीडा अर्थ में जो 'ण' प्रत्यय तद्धित में कहा है, तदन्त स्त्रीलिङ्ग हो। जैसे—'मौष्टा' 'पाल्लवा' 'मौसला']।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घञो ञः सा क्रियाऽस्यां चेद्दाण्डपाता हि फाल्गुनी ।
श्यैनम्पाता च मृगया, तैलम्पाता स्वधेति दिक् ॥६॥
स्त्री स्यात्काचिन्मृणाल्यादिर्विवक्षाऽपचये यदि ।
लङ्का शेफालिका टीका धातकी पञ्जिका-ऽऽढकी ॥७॥

---

(१) सा = घञन्तवाच्या, क्रिया = दण्डपातादि क्रिया, अस्यां चेत् = फाल्गुन्यादिषु चेत्-इत्यर्थे,-घञो ञः = घञन्ताद्विहितो यो ञः, ('घञः साऽस्या'मिति सूत्रेण घञन्ताद्विहितो ञः,) तदन्तं स्त्रियामित्यन्वयः । तेन 'घञः सास्या'मिति ञान्तः स्त्रियाम् । दण्डपातोऽस्यां वर्त्तते-दाण्डपाता-फाल्गुनी । एवं-श्यैनम्पाता मृगया । तैलम्पाता स्वधा । इति दिक् । तेन 'मौसलपाता भूमि' रित्याद्यपि बोध्यम् । ['घञः साऽस्याम्' इस सूत्र से घञन्त से विहित जो 'ञ' प्रत्यय, तदन्त स्त्रीलिङ्ग होता है । जैसा-'दाण्डपाता फाल्गुनी'] ।

(२) यदि अपचये = ह्रस्वत्वे विवक्षा तर्हि काचित् स्त्री स्यात् । अर्थात्-अपचयेऽपि कचित् स्त्रीत्वं,-यथा-अल्पं मृणालं-मृणाली । अल्पो घटो-घटी, कुम्भी । [अपचय = ह्रस्वता की विवक्षा में भी कहीं स्त्रीत्व होता है । जैसे-अल्पो वंशः-वंशी] ।

(३) लङ्कादयः स्त्रियाम् । 'ङ्याबूङन्त' मिति सिद्धे प्रपञ्चार्थोऽयमारम्भः । लङ्का = रक्षःपुरी, शाखा, कुलटा, शाकिनी च ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिध्रका सारिका हिक्का प्राचिको-ल्का पिपीलिका ।
तिन्दुका कणिका भङ्गिः सुरङ्गा-सूचि-माढयः ॥८॥
पिच्छोवितण्डाकाकिण्यश्चूर्णिःशाणी द्रुणी दरत् ।
सातिः कन्था तथाऽऽसन्दी नाभी राजसभापि च ॥९॥
झल्लरी चर्चरी पारी होरा लट्वा च सिध्मला ।

शेफालिका—पुष्पभेदः । धातकी—वृक्षभेदः । पक्षिकानिखिलपद व्याख्या । आढकी = तुवरी [अरहड] । सिध्रका वृक्षभेदः । प्राचिका = वनमक्षिका, पक्षिभेदो वा । सुरङ्गा = भूमिस्थो गूढमार्गः माढिः = पत्रशिरा । [लङ्का' आदि शब्द भी स्त्रीलिङ्ग होते हैं]

(१) पिच्छा = निर्यासः । [गोंद] । वितण्डा = वादभेदः । काकिणी = पणचतुर्थांशः, एका वराटिका च । (छदाम = २० कौडी, और १ कौडी) चूर्णिः = टीकाभेदः । ['चूर्णिका टीका'] । शाणी = निकषोपलः, शणवस्त्रं वा । द्रुणी = कच्छरी, जलद्रोणी वा । [नाँद] । दरत् = प्रपातो, म्लेच्छजातिर्वा ['दर्रा'] । सातिः = दानम् । कन्था = वस्त्रभेदः । ('दुशाला') । आसन्दी = वेत्रासनम् । ['कुर्सी'] । नाभिः-प्राण्यङ्गभेदः ।

(२) चर्चरी = गीतभेदः । पारी = दोहनी । ['कटोरी'-'टोकणी'] । होरा = लग्नार्द्धम् । लट्वा = पक्षिभेदः । सिध्मला—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लाक्षा लिक्षा च गण्डूषा गृध्रसी चमसी मसी ॥१०॥

❀ इति स्त्रीलिङ्गसंग्रहः ❀ ॥ १ ॥

पुंस्त्वे,-सभेदाऽनुचराः सपर्यायाः सुरा-ऽसुराः ।
स्वर्ग-यागा-ऽद्रि-मेघा-ऽब्धि-द्रु-काला-ऽसि-शरा-ऽरयः ॥
कर-गण्डौ-ष्ठ-दो-दन्त-कण्ठ-केश-नख-स्तनाः ।

मत्स्यविकृतिः, किलासरोगिणी वा । लाक्षा–जतु । लिक्षा–यूकाण्डम् ('लीख') । गण्डूषा=उन्नतनाभिः । गृध्रसी–वातरोगभेदः । चमसी–पात्रभेदः । मसी–लेखनसाधनम् । [स्याही] । लङ्कादयो मस्यन्ताः स्त्रियाम् । [पूर्वोक्त पिच्छा आदि शब्द भी स्त्रीलिङ्ग में होते हैं] ।

(१) 'पुंस्त्वे' इत्यधिकारः पतद्ग्रहपर्यन्तम् । सभेदाः, सानुचराश्च देवाऽसुरपर्यायाः–पुंसि । यथा-अमराः, निर्जराः, देवाः, इन्द्रः । सूर्यः, गणेशः । हाहाः, मातलिः । असुराः–दैत्याः । बलिः, रावणः । कूष्माण्डः,मुण्डः चण्डः । [देवता और असुर तथा उनके अवान्तर भेद तथा उनके अनुचर आदि के पर्याय वाचकशब्द–यदि लिङ्ग विशेष विधि से बाधित नहीं हो तो पुंलिङ्ग में होते हैं] ।

(२) स्वर्गादिस्तनान्ताः सपर्यायाः, सभेदाश्च एकोनविंशतिः शब्दाः पुंसि स्युर्यदि विशेषेलिङ्गविधिना बाधो न स्यात् । यथा–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अह्नाऽहान्ताः, क्ष्वेडभेदा, रात्रान्ताः प्रागसङ्ख्यकाः१२
श्रीवेष्टाद्याश्च निर्यासा, असन्नन्ता अबाधिताः ।
केशेरु-जतु-वस्तूनि हित्वा तु-रु-विरामकाः ॥ १३ ॥

स्वर्गः, नाकः । त्रिविष्टपादौतु 'क्लीबे' इत्यादिपूर्वोक्तवचनविशेषेण बाधान्न पुंस्त्वम् । यागः-क्रतुः । तद्भेदाः-दर्शपौर्णमासादयः । एवं सर्वत्र । ['स्वर्ग' आदि स्तनान्त समेद और सपर्याय १९ शब्द-पुंलिङ्ग में होते हैं, यदि विशेष वचन से बाधित न हों तो । जैसे-स्वर्गः, यागः । 'त्रिविष्टप'-विशेष वचन 'क्लीबे' इससे बाधित होकर नपुंसक में ही होता है] ।

(१) अह्नाऽहान्ताः पुंसि । पूर्वाह्णः । द्व्यहः । क्ष्वेडः = विषं, तद्भेदाः पुंसि, विशेषवचनेनाऽबाधिताश्चेत् । यथा-'सौराष्ट्रिकः'-इत्यादि । रात्रान्ताः संख्याभिन्नपूर्वपदाः पुंसि । यथा-अहोरात्रः । पूर्वरात्रः । संख्यापूर्वपदेतु नेह-पञ्चरात्रम् ।[अह्नान्त और अहान्त शब्द पुंलिङ्ग में होते हैं । 'पूर्वाह्णः' 'द्व्यहः' । विषभेद पुंलिङ्ग होते हैं । जैसे सौराष्ट्रिक' । संख्याभिन्नपूर्वपदक 'रात्र' शब्दान्त भी पुंलिङ्ग होते हैं । जैसे-'अहोरात्रः' । सङ्ख्यापूर्वपदक 'रात्र' शब्द तो नपुंसक-लिङ्ग ही होता है, जैसे—पञ्चरात्रम्] ।

(२) श्रीवेष्टाद्या निर्यासाः पुंसि । श्रीवेष्टः, सरलः, द्रवः । आद्यपदेन-श्रीवासः, गुग्गुलुः, सिल्लक इत्यादयः । किञ्च—असन्ता,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क[३]-ष-ण-घ-भ-रो-पान्ता यद्यदन्ता अमी, अथ ।
प-थ-न-य-स-टोपान्ता, गोत्राख्याश्चरणाह्वयाः ॥१४॥

अन्नन्ताश्च पुंसि, विशेषवचनैरबाधिताश्चेत् । अङ्गिराः, चन्द्रमाः, वेधाः । मघवा, राजा । अबाधिताः किम्-अप्सरसः, जलौकसः, वर्त्म, लोम, साम । कशेरु-जतु-वस्तूनि विहाय-तु-रु-विरामकाः पुंसि । हेतुः, सेतुः, मेरुः, कुरुः । [श्रीवेष्टादि निर्यासवाचक शब्द, तथा असन्त और अन्नन्त शब्द यदि विशेष वचन से बाधित न हों तो पुंलिङ्ग होते हैं । जैसे—श्रीवेष्टः, गुग्गुलुः ।

कशेरु, जतु और वस्तु शब्दों को छोडकर 'तु' और 'रु' अन्तवाले शब्द पुंलिङ्ग में होते हैं । जैसे-हेतुः, मेरुः] ।

(३) ककारादिटान्तद्वादशवर्णोपधा अदन्ताः पुंसि । अङ्कः, लोकः । माषः, तुषः । गुणः, घुणः । दर्भः, गर्दभः । होमः । समीरः, शूकरः । यूपः, कूपः । अर्थः, नाथः । जनः, घनः । विनयः, प्रणयः । रसः, हासः । वटः । गोत्रप्रवर्त्तकाः प्रवराः, चरणानां=वेदशाखानां नामानि च पुंसि । गौतमः, भरद्वाजः । कठः । कलापः ['क' 'ष' 'ण' 'भ' 'म' 'र' 'प' 'थ' 'न' 'य' 'स' 'ट' ये १२ अक्षर जिनके उपान्त में हों, और अकार अन्त में हो, ऐसे शब्द पुंलिङ्ग में होते हैं । जैसे-लोकः, वटः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नाम्न्यकर्तरि भावे च घ-अ-ज-ब्र-ड्-ण-घा-ऽथुचः ।
ल्युः कर्तरीमनिज्भावे को घोः किः प्रादितोऽन्यतः ॥

अर्थः, यूपः, जनः विनयः, हासः, गर्दभः, गुणः, माषः आदि । एवं गोत्रवाचक और शास्त्राध्येतृवाचक शब्द भी प्रायः पुंलिङ्ग में होते हैं । जैसे–गौतमः, कठः ।

(१) नाम्नि=संज्ञायाम्, अकर्त्तरि=कर्त्तृभिन्ने कारके, भावे च,ये विहिताः–घञादयः सप्त प्रत्ययाः–तदन्ताः पुंसि । यथा–घञ्–प्रासादः । 'एरच्'–चयः, जयः । 'ऋदोरप्'–करः, गरः । 'यजयाचयते' ति नङ्–यज्ञः, 'याञ्चेत्यत्र तु विशेषतो बाधात्स्त्रीत्वमेव । न्यादः–'नौ ण चे' ति णः । 'उरश्छदः' 'प्रच्छदः'—'पुंसि संज्ञाया' मिति घः । वेपथुः–'टूवितोऽथुच्' । कर्त्तरि ल्युः–नन्दनः । भावे इमनिच्–महिमा । 'सुपि स्थ' इति कः-प्रस्थः । प्रादितोऽन्यस्मात्सुबन्ताच्च परस्मात्–घोः,–किः–प्रधिः, जलधिः । [सञ्ज्ञा के विषय में, कर्त्तृभिन्न कारक में, और भाव में विहित जो–'घञ्' 'अच्' 'अप्' 'नङ्' 'ण' 'घ' 'अथुच्'–ये ७ प्रत्यय, और कर्त्ता में 'ल्यु', तथा–भावार्थक 'इमनिच्' एवं 'क' प्रत्यय, और प्रादि से, तथा अन्य सुबन्त से परीभूत घुसञ्ज्ञक धातु से विहित जो 'कि, प्रत्यय–एतदन्त पुंलिङ्ग में होते हैं । यदि विशेषवचनबाधक न हो तो । जैसे–'प्रासादः' 'चयः' 'प्रधिः, 'जलधिः'] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वन्द्वेऽश्ववडवावश्ववडवानसमाहृते ।
कान्तः सूर्येन्दुपर्यायपूर्वोऽयःपूर्वकोऽपि च ॥ १६ ॥
वटकश्चानुवाकश्च रल्लकश्च कुडङ्गकः ।
पुङ्खो न्यूङ्खः समुद्गश्च विट-पट्ट-घटाः खटः ॥ १७ ॥

---

(२) समाहारैकवत्त्वाऽभावे द्वन्द्वे-अश्ववडवौ-अश्ववडवानिति पुंसि । सूर्येन्दुपूर्वः अयःपूर्वश्च कान्तः पुंसि-सूर्यकान्तः, अयस्कान्तः । [समाहार द्वन्द्व से अतिरिक्त (इतरेतरयोग) द्वन्द्व में 'अश्ववडव' पुंलिङ्ग में होता है, जैसे-अश्ववडवौ, अश्ववडवान्-इत्यादि । समाहार में तो 'अश्ववडवम्' यह नपुंसक ही होता है ।

सूर्य, इन्दुपर्यायपूर्वक और अयस् पूर्वक कान्त शब्द पुंलिङ्ग में होता है । जैसे-चन्द्रकान्तः, सूर्यकान्तः, अयस्कान्तः-इत्यादि] ।

(३) वटकादयः-पतद्ग्रहान्ताः पुंसि । वटकः = माषपिष्टविकारः । अनुवाकः = मन्त्रसमूहः । रल्लकः = पक्ष्मकम्बलभेदः । [पश्मीना] । कुडङ्गकः = लतागृहम् । पुङ्खः = बाणमूलम् । न्यूङ्खः = साममेदः । समुद्गः = पेटकः । विटः = जारः । पट्टः = पेषणशिला । घटः = तुला । खटः = अन्धकूपः (खड्डा) । कोट्टारः = कूरादिः ['कोठार'] । घट्टः = तीर्थम् । कोट्टः = दुर्गपुरम् । ('कोट'गढ') अरघट्टः = 'घटीयन्त्रम्' इति केचित् । हट्टः = आपणः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कोट्टार-घट्ट-हट्टाश्च पिण्ड-गोण्ड-पिचण्डवत् ।
गडुः करण्डो लगुडो वरण्डश्च किणो घुणः ॥ १८॥
दृति-सीमन्त-हरितो रोमन्थो-द्गीथ-बुद्बुदाः ।
कासमर्दो-ऽर्बुदः कुन्दः फेन-स्तूपौ स-पूपकौ ॥१९॥
आतपः, क्षत्रिये नाभिः कुणप-क्षुर-केदराः ।

['हाट'-बाजार] । पिण्डः=देहः । गोण्डः=वृद्धनाभिः । पिचण्डः=उदरम् । गडुः=कुब्जः । करण्डः=मधुकोशः । लगुडः=दण्डः ।

वरण्डः=समूहो, मुखरोगश्च । किणः=रूढव्रणचिह्नम् । [शीतला आदि के दाग] । घुणः=काष्ठकीटः । [वटक आदि पूर्वोक्त शब्द पुंलिङ्ग में होते हैं] ।

(१) दृतिः=चर्मपुटः । सीमन्तः=केश-वेशः । हरित्=दिशा । रोमन्थः=चर्वितचर्वणं पशूनाम् । उद्गीथः=ओंकारः, सामध्वनिश्च । बुद्बुदः=जलविकारः । कासमर्दः-गुल्मभेदः । अर्बुदः-मांसकीलः,-दश कोटयश्च । कुन्दः-पुष्पभेदः, चक्रभ्रमादिश्च । फेनः-पयोविकारादिः । स्तूपः=इष्टकाचयः । पूपकः=अपूपकः । 'यूपक' इति क्वचित्पाठः । आतपः-घर्मः, सूर्यालोकश्च । क्षत्रिये-नाभिः पुंसि । अन्यत्र तु स्त्रियाम् । 'कणपः=प्रासभेदः । कुणप इति पाठे-शवः । क्षुरः-वपनसाधनशस्त्रभेदः ('उस्तरा') ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूर-क्षुरप्र-चुक्राश्च गोल-हिङ्गुल-पुद्गलाः ॥ २० ॥
वेताल-भल्ल-मल्लाश्च पुरोडाशोऽपि पट्टिशः ।
कुल्माषो रभसश्चैव स-कटाहः पतद्ग्रहः ॥ २१ ॥

❀ इति पुँल्लिङ्गशेषसंग्रहः ॥२॥ ❀

द्विहीने,-ऽन्यच्च खा-ऽरण्य-पर्ण-श्वभ्र-हिमो-दकम् ।
शीतो-ष्ण-मांस-रुधिर-मुखा-ऽक्षि-द्रविणं बलम् ॥२२॥
फल-हेम-शुल्ब-लोह-सुख-दुःख-शुभा-ऽशुभम् ।

केदरः=पणः । ['खेरुँज' 'टक्का' 'रेजगारी'] । पूरः-जलप्रवृद्धिः । क्षुरप्रः-बाणः, लवनसाधनं च ('खुरपा') । चक्रः-शाकभेदः । गोलः-वर्त्तुलपिण्डादिः । हिङ्गुलः-धातुभेदः । पुद्गलः=देहादिः ।

(१) वेतालः = भूताविष्टः शवः । मल्लः = बलिष्ठः (पहलवान) । भल्लः=शस्त्रभेदः । पुरोडाशः = हविर्भेदः । पट्टिशः = शस्त्रभेदः । कुल्माषः=काञ्जिकम् । रभसः = वेगः । कटाहः = लोहपात्रभेदः । पतद्ग्रहः = निष्ठीवनपात्रम् । ['पीकदान'] । [इतिसे पतद्ग्रहान्त ये पूर्वोक्त शब्द पुंलिङ्ग में होते हैं] ।

(२) द्वाभ्यां = स्त्रीपुंसाभ्यां-हीने । अर्थात्-'क्लीबे'-इत्यधिक्रियते । अन्यच्च = पूर्वोक्तसंग्रहादवशिष्टः क्लीबे स्यात्—बाधक-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जल-पुष्पाणि लवणं व्यञ्जनान्यनुलेपनम् ॥२३॥
कोट्याः शतादिःसङ्ख्याऽन्या, वा लक्षा, नियुतं च तत्।
[२]द्व्यच्कमसिमुसन्नन्तं यदनान्तमकर्त्तरि ॥ २४ ॥

विरहे। तानेव कांश्चिद्दर्शयति–खेति। अर्थात्–खादयः, तत्पर्यायाश्च, तद्विशेषाश्च क्लीबे। यथा–खं–गगनम्। अरण्यं–विपिनम्। श्वभ्रं–बिलम्। हिमं–तुहिनम्। उदकं–जलम्। शुल्बं–ताम्रम्। जलपुष्पाणि–कमलादीनि। एतानि सपर्यायाणि, सविशेषाणि च क्लीबे। ['ख' आदि अनुलेपनान्त २६ शब्द सपर्याय और सविशेष–नपुंसक लिङ्ग में होते हैं विशेष विधिसेबाधित न हो तो। जैसे–खं, गगनम्, इत्यादि]।

(१) कोट्या अन्या, तद्रहिता, अर्थात् कोटिं विहाय, शतादिका संख्या क्लीबे। यथा शतम्, सहस्रम्, अयुतम्, अर्बुदम्। लक्षंतु वा क्लीबे। पक्षे स्त्रियाम्। लक्षं, लक्षा। तत् = तस्य लक्षस्य, पर्यायो–नियुतं च क्लीबे। ['कोटि' को छोड कर 'शत' से लेकर जो सङ्ख्यावाचक शब्द वे नपुंसकलिङ्गमें होते हैं जैसे–'शतं' 'सहस्रम्'। 'कोटि' तो स्त्रीलिङ्ग होता है। 'लक्ष' शब्द–विकल्प से नपुंसक होता है। पक्षमें स्त्रीलिङ्ग भी होता है। 'लक्ष'का पर्याय 'नियुत' भी नपुंसक लिङ्ग होता है]।

(२) असन्तमिसन्तमुसन्तमन्नन्तञ्च द्व्यच्कं क्लीबे। यथा—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्रान्तं स-लोपधं शिष्टं, रात्रं प्राक्सङ्ख्ययाऽन्वितम् ।
पात्राद्यदन्तैरेकार्थो द्विगुर्लक्ष्याऽनुसारतः ॥ २५ ॥

पयः, यशः, तेजः। सर्पिः, हविः। वपुः, आयुः, चर्म, वर्म। कर्त्तृवर्जितेऽर्थे यत्-अनाऽन्तं नाम तत् क्लीबे। गमनं, दानं, हसनम्। कर्त्तरि तु-नन्दनः, रमणः। [असन्त, इसन्त, उसन्त, और अन्नन्त द्व्यच्क शब्द नपुंसक लिङ्गमें होते हैं, विशेष वचन से बाधित न हों तो। जैसे-पयः, हविः, धनुः। कर्त्रर्थकभिन्न जो 'अन', तदन्त भी नपुंसक लिङ्ग में होते हैं। जैसे-गमनं, दानम्। कर्त्रर्थक तो पुंलिङ्ग में ही होते हैं, जैसे-नन्दनः, रमणः]।

(१) त्रान्तं, लोपधञ्च-शिष्टं = बाधकाऽबाधितं क्लीबे। दात्रं, पात्रम्, कूलं, मूलम्। बाधकैर्बाधिते तु सति-पुत्रः, वृत्रः, मन्त्रः, कालः-इत्यादौ पुंस्त्वमेव। संख्यापूर्वं रात्रं क्लीबम्। त्रिरात्रं, पञ्चरात्रम्। पात्रादिभिरदन्तैरेकार्थः = समाहारे द्विगुः क्लीबे भवति, लक्ष्यानुसारतः = शिष्टप्रयोगात्। यथा-पञ्चपात्रं, त्रिभुवनम्। असमाहारे तु—पञ्चकपालः। तद्धितार्थेऽयं द्विगुर्नबुसमाहारे। त्रिपुरी, पञ्चमूलीत्यादौ शिष्टप्रयोगात्स्त्रीत्वमेव। [त्रान्त और लकारोपध बाधकाऽबाधितशब्द नपुंसक में होते हैं। यथा-दात्रं, कूलम्। बाधक से बाधन में तो-'पुत्रः' 'मन्त्रः' आदि पुंलिङ्ग ही होते हैं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वन्द्वैकत्वा-ऽव्ययीभावौ, पथः सङ्ख्याऽव्ययात्परः ।
षष्ठ्याश्छाया बहूनां चेद्विच्छायं, संहतौ-सभा ॥२६॥

सङ्ख्यापूर्वक 'रात्र' शब्द नपुंसक में होता है। जैसे-'त्रिरात्रं' 'पञ्चरात्रं'।

पात्रादि अदन्तों का जो समाहार अर्थ में द्विगु वह भी शिष्ट प्रयोग के अनुसार से प्रायः नपुंसकलिङ्ग में होता है। जैसे-'पञ्चपात्रम्'। असमाहार द्विगु तो पुंलिङ्ग में होता है। जैसे-पञ्चकपालः।

शिष्टप्रयोगानुसार से 'पञ्चमूली' 'त्रिपुरी' आदि समाहार द्विगु स्त्रीलिङ्ग में ही होता है]।

(१) एकत्वे द्वन्द्वो—द्वन्द्वैकत्वं = समाहारद्वन्द्वः, अव्ययभावश्च-क्लीबे। पाणिपादम्, अधिहरि। संख्याव्ययात्परः कृतसमासान्तः 'पथः'-क्लीबे। द्विपथं, विपथम्। तत्पुरुषे षष्ठ्यन्तात्परा बहूनां छाया-क्लीबे। वीनां = पक्षिणां, छाया—विच्छायम्-इत्युदाहरणम्। षष्ठ्यन्तात्परो यः समूहार्थकः सभाशब्दस्तदन्तस्तत्पुरुषः क्लीबे। स्त्रीसभम्। स्त्रीसमूह इत्यर्थः। [द्वन्द्वैकत्व-अर्थात् समाहारद्वन्द्व, और अव्ययीभाव समास भी नपुंसक लिङ्ग में होते हैं। जैसे—'पाणिपादम्' 'अधिहरि'। सङ्ख्या और अव्यय से परे जो कृतसमासान्त 'पथ' शब्द वह भी नपुंसक में होता है। जैसे—'द्विपथं' 'विपथं'। तत्पुरुष में षष्ठ्यन्त से पर जो छायाशब्द

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शालार्थाऽपि परा राजा-ऽमनुष्या-ऽर्थादराजकात् ।
दासीसभं नृपसभं रक्षःसभमिमा दिशः ॥२७॥
उपज्ञो-पक्रमा-ऽन्तश्च तदादित्वप्रकाशने ।

वह भी नपुंसकलिङ्ग में होता है, यदि वह छाया बहुत की हो तो। जैसे—'इक्षुच्छायम्' ॥

षष्ठ्यन्त से परे जो समूहार्थक सभाशब्द, तदन्त जो तत्पुरुष वह नपुंसक में होता है। यथा—'स्त्रीसभम्']।

(१) तत्पुरुषे—अराजकात्—राजाऽमनुष्यार्थात्षष्ठ्यन्तात्परा शालार्थाऽपि सभा-क्लीबे इत्यन्वयः। तथा च—राजशब्दवर्जिता-द्राजपर्यायात्, अमनुष्यात् = अमनुष्यरक्षःपिशाचादिवाचकच्च षष्ठ्यन्तात्परा शालार्था, समूहार्था च सभा तत्पुरुषे क्लीबे इत्यर्थः। यथा—'दासीसभं' 'नृपसभं' 'पिशाचसभं' 'रक्षःसभम्'। इमा दिशः= इत्येवंरीत्योदाहरणानि ज्ञेयानीत्यर्थः। [राजशब्द से भिन्न जो राजपर्याय, और अमनुष्य अर्थात् राक्षसादि पर्याय षष्ठ्यन्त, उनसे परे जो शालार्थक तथा समूहार्थक सभा शब्द, तदन्त जो तत्पुरुष समास, वह नपुंसकलिङ्ग में होता है। जैसे—'दासीसभं' 'नृपसभं' 'रक्षःसभं' इत्यादि]।

(२) उपज्ञान्त, उपक्रमान्तश्च तत्पुरुषः क्लीबे, उपज्ञोपक्रमयोः प्राथम्ये द्योत्ये। कस्य=प्रजापतेः—उपज्ञा 'कोपज्ञं' सृष्टिः। 'कोपक्रमं'

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कोपज्ञ-कोपक्रमादि, कन्थोशीनरनामसु ॥ २८ ॥
भावे न-ण-क-चिद्भ्योऽन्ये, समूहे भाव-कर्मणोः ।
अदन्तप्रत्ययाः, पुण्य-सुदिनाभ्यां त्वहः परः ॥२९॥

सृष्टिः—इत्युदाहरणम् ॥ षष्ठ्यन्तात्परा या कन्था, तदन्तस्तत्पुरुषः क्लीबे, उशीनरदेशस्थसञ्ज्ञासु चेत्सा भवति । सौशमीनां कन्था—सौशमिकन्थम् । [उशीनराः = हिमालयनिकटदेशः (टेहरी-गढ़वाल)। कन्था = 'दुशाला'] । [उपज्ञान्त और उपक्रमान्त जो तत्पुरुष, वह नपुंसकलिङ्ग में हो, यदि प्राथम्य द्योत्य हो तो । जैसे—'कोपज्ञं सृष्टिः' 'कोपक्रमं सृष्टिः', । षष्ठ्यन्त से परे जो कन्थाशब्द तदन्ततत्पुरुषभी नपुंसकलिङ्ग में होता है । यथा 'सौशमिकन्थम्'] ।

(१) न-ण-केभ्योऽन्ये, चकारेत्सञ्ज्ञकेभ्यश्चान्ये ये तव्यदादयः अदन्ताः कृत्प्रत्यया भावे विहितास्तदन्तं नाम क्लीबे । किञ्च-समूहेऽर्थे, भावकर्मार्थेच येऽदन्तास्तद्धिताः प्रत्ययास्तदन्तं नाम क्लीबे। यथा—भूतं, भव्यं, भवनीयम्, ब्रह्मभूयं, सांराविणमित्यादि । नकाराद्यन्तास्तु यथा—यज्ञः, स्वप्नः, न्यादः, विघ्नः, कारणा, चेयः । समूहे तद्धिता, यथा—भैक्षं, काकं, कैदार्यं, । भावकर्मणोः—गोत्वं, मार्दवं, स्तेयम् ।

पुण्यसुदिनाभ्यां परः कृतसमासान्तः— 'अहः' शब्दः क्लीबे । पुण्याहं, सुदिनाहम् । ['न' 'ण' 'क' और चित्प्रत्यय से भिन्न जो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रियाऽव्ययानां भेदकान्येकत्वेऽप्युक्थ-तोटके ।
चोचं पिच्छं गृहस्थूणं तिरीटं मर्म योजनम् ॥३०॥
राजसूयं वाजपेयं गद्य-पद्ये कृतौ कवेः ।
माणिक्यं भाष्य-सिन्दूर-चीर-चीवर-पिञ्जरम् ॥३१॥

भावार्थक अदन्त 'तव्यत्' आदि कृत्प्रत्यय, तदन्त शब्द नपुंसकलिङ्ग होता है। यथा—'भूतं' 'भवितव्यं' 'भवनीयं'। नकाराद्यन्त तो पुंलिङ्ग आदि में ही होते हैं, जैसे—यज्ञः, विघ्नः—आदि। समूहार्थक और भावकर्मार्थक जोअदन्त तद्धितप्रत्यय, तदन्त शब्द नपुंसकलिङ्ग होते हैं। जैसे—'भैक्षं' 'काकं' 'गोत्वं' 'स्तेयम्' आदि।

पुण्य और सुदिन से परे जो कृतसमासान्त अहशब्द, वह भी नपुंसक लिङ्गमें होता है। जैसे—'पुण्याहं' 'सुदिनाहम्']।

(१) क्रियाणामव्ययानाञ्च भेदकानि क्लीबे, एकत्वे = एकवचने च स्युः। यथा—'मृदु पचति' 'कमनीयं प्रातः।' [क्रिया के विशेषण और अव्ययों के विशेषण नपुंसक लिङ्ग में होते हैं, और वे एकवचनान्त ही होते हैं। जैसे—'मृदु पचति' 'कमनीयं प्रातः']।

(२) क्लीबलिङ्गानि नामानि कानिचित्कण्ठरवेणापि निर्दिशति—उक्थेति। उक्थं=सामभेदः। तोटकं = छन्दोभेदः। चोचं= कदलीफलम्। तिरीटं = शिरोभूषणम्, सुवर्णं च। योजनं = चतु-

३० श्लोके—'मर्म—योजने' पा०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लोकायतं हरितालं विदलं स्थाल-बाह्लिकम् ।

* इति क्लीबशेषसंग्रहः ॥३॥ *

पुंनपुंसकयोः शेषोऽर्द्धर्च-पिण्याक-कण्टकाः ॥३२॥

मोदकस्तण्डकष्टङ्कः शाटकः कर्वटोऽर्बुदः ।

ष्कोशी । कवेः कृतौ काव्ये–गद्य–पद्ये क्लीबे, अन्यत्र–गद्या=कथा । पद्यं = पङ्कः । चीवरं = मुनिबौद्धभिक्षुवस्त्रम् । लोकायतं = चार्वाक-शास्त्रम् । विदलं = वंशपात्रभेदः [पिटारी] । स्थालं=भोजन-पात्रम् । बाह्लिकं=कुङ्कुमादि । 'बाह्लव' मित्यापि पाठः । तत्रबह्ल-देशेभव मित्यर्थो बोध्यः । ['उक्थ' आदि बाह्लिकान्त शब्द नपुंसकलिङ्ग में होते हैं] ।

(१) 'पुंनपुंसकयो'रित्यधिकारः । उक्तादन्यः शेषः–पुंनपुंसकयोः । यथा शङ्खपद्मौ निधिवाचकौ पूर्वं पुंसि विहितौ, देवानुचरत्वात् । तदन्यत्वाच्च शेषतया कम्बु-नलिनवाचकौ शङ्ख-पद्मशब्दौ तुपुंसि क्लीबे च भवतः । [पूर्वोक्तशब्दों से अतिरिक्त शब्द प्रायः पुंलिङ्ग और नपुंसकलिङ्ग–दोनों में होते हैं । जैसे निधिवाचक पद्मशब्द देवानुचरत्वात् पुंलिङ्ग कहा गया है, उससे बचा हुआ कमलवाचक पद्मशब्द पुंलिङ्ग और नपुंसक दोनों लिङ्गों में होता है] ।

ऋचोऽर्द्धम्–अर्द्धर्चम् । पिण्याकः = तिलकल्कः । [खली] । तण्डकः = खञ्जनफेनादिः । टङ्कः=पाषाणभेदनः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रातको-द्योग-चरक-तमाला-ऽमलका नडः ॥३३॥
कुष्ठं मुण्डं शीधु बुस्तं क्ष्वेडितं क्षेम कुट्टिमम् ।
सङ्गमं शतमाना-ऽर्म-शम्बला-ऽव्यय-ताण्डवम् ॥३४॥
कवियं कन्द-कर्पासं पारावारं युगन्धरम् ।
यूपं प्रग्रीव-पात्रीवे यूपं चमस-चिक्कसौ ॥३५॥
अर्द्धर्चादौ घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवम् ।

---

(१) 'कर्पटं' 'कर्वटं, खर्वटं' पा० । खर्वटं = नगरसमोग्रामः ['कसबा'] । वरकं = स्यूतवस्त्रम् । 'चरक' मित्यपि पाठः । नडः = अन्तर्विवरस्तृणभेदः । ['नरसल' 'डण्ठल'] । बुस्तं = मांसशष्कुली, भृष्टमांसं, पनसादिफलनिस्सारभागश्च । शतमानं = रजतपलम्, मुद्राविशेषश्च । ('चान्दी का सिक्का') । अर्मम्-अक्षिरोगः । शम्बलं = पाथेयम् । कवियं = खलीनम् । प्रग्रीवं = वातायनम् । पात्रीवं-यज्ञपात्रभेदः । ['अर्द्धर्च' 'पिण्याक' आदि चिक्कसान्त शब्द-पुंलिङ्ग और नपुंसक दोनों लिङ्गों में होते हैं] ।

अर्धर्चादिगणे घृतादीनामपि पाठः । परन्तु तेषां लोके क्लीबत्वमेव, पुंस्त्वं तु वेदविषयकम्, अतस्तेऽत्र नोक्ताः । यदि लोकेपि तथा प्रयोग इष्टस्तर्हि शिष्टप्रयोगाद्व्यवस्था । [अर्द्धर्चादिगण में घृत

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तन्नोक्तमिह, लोकेऽपि तच्चेदस्त्यस्तु शेषवत् ॥३६॥

❀ इति पुंनपुंसकशेषसंग्रहः ॥ ४ ॥ ❀

[1]स्त्रीपुंसयोरपत्यान्ता, द्वि-चतुः-षट्-पदोरगाः ।

आदि का भी पाठ मिलता है, अतः उनसे पुंलिंग भी होता है, परन्तु उनका लोक में नपुंसक लिंग ही में प्रयोग देखा जाता है, क्लीब में नहीं, उनसे पुंलिंग तो वेद में ही होता है, लोक में नहीं। अतः उनको इस प्रकरण में हम ने नहीं लिखा है। यदि कहीं उनका भी पुंलिङ्ग में भी लोक में प्रयोग देखो तो शिष्ट प्रयोग से ही व्यवस्था करना]।

(१) 'स्त्रीपुंसयो'रित्यधिकारः । अपत्यार्थे विहिता ये—अणादयः, तदन्ताः स्त्रीपुंसयोः । औपगवः, औपगवी । द्विपदचतुष्पदषट्पदवाचिनः, उरगवाचिनश्च जातिविशेषाः—स्त्रीपुंसयोः । यथा मानुषः, मानुषी । बकः, बकी । हंसः, हंसी । सिंहः, सिंही । भ्रमरः, भ्रमरी । उरगः, उरगी । अबाधिता इत्येव, नेह—मक्षिका, शिवा, लूता । जातिवाचिनश्चाऽपि स्त्रीपुंसयोः । मत्स्यः, मत्सी । पुरुषाख्याः स्त्रीयोगैः सहवर्त्तमानाः स्त्रीपुंसयोः । ब्राह्मणः, ब्राह्मणी, गोपः, गोपी । [विशेष विधि से अबाधित जो अपत्य प्रत्ययान्त और द्विपद, चतुष्पद, षट्पद, उरग (सर्प) वाचक जो जाति विशेष, (और जाति वाचक), तथा स्त्रीयोग में वर्त्तमान जो पुंवाचक शब्द—ये पुंलिङ्ग

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जातिभेदाः, पुमाख्याश्च स्त्रीयोगैः सह मल्लकः ॥३७॥
मुनिर्वराटकः स्वातिर्वर्णको झाटलिर्मनुः ।
मूषा सृपाटी कर्कन्धूर्यष्टिः शाटी कटी कुटी ॥३८॥

* इति स्त्रीपुंसशेषसंग्रहः ॥ ५ ॥ *

[1]स्त्रीनपुंसकयोर्भावक्रिययोः ष्यञ्, क्वचिच्च वुञ् ।
औचित्यमौचिती मैत्री मैत्र्यं, वुञ्प्रागुदाहृतः॥३९॥

और स्त्रीलिङ्ग-दोनों लिङ्गों में होते हैं । जैसे-'औपगवः', 'औपगवी', 'मानुषः', 'मानुषी', 'बकः', 'बकी', 'सिंहः', 'सिंही', 'अमरः', 'अमरी', 'उरगः', 'उरगी', 'पन्नगः', 'पन्नगी', 'नागः', 'नागी', 'मत्स्यः', 'मत्स्यी', 'ब्राह्मणः', 'ब्राह्मणी', 'गोपः' 'गोपी'] ।

मल्लकादयः कुट्यन्ताः स्त्रीपुंसयोः । वर्णकः = लेखनसाधनम् । ['वर्त्ता' 'स्लेट पेंसिल'] । झाटलिर्वृक्षभेदः । मूषा=स्वर्णकार-पात्रभेदः । सृपाटी-मानभेदः, चञ्चुर्वा । [मल्लक आदि कुटी पर्यन्त शब्द स्त्रीलिङ्ग और पुंलिङ्ग दोनों में होते हैं] ।

(१) स्त्रीनपुंसकयोरित्यधिकारः । भावे, कर्मणि च विहितो यः-ष्यञ्, वुञ्च, तदन्तं क्वचित् = प्रायः स्त्रीक्लीबयोः । यथा-औचित्यम्, औचिती । मैत्र्यं, मैत्री । वुञ्-प्राग् = द्वितीये काण्डे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षष्ट्यन्तप्राक्पदाः सेना-च्छाया-शाला-सुरा-निशाः ।
स्याद्वा, नृसेनं, श्वनिशं, गोशालमितरे च दिक् ॥४०॥
आब-न्नन्तोत्तरपदो द्विगुश्चाऽपुंसि, नश्च लुप् ।

उदाहृतः । यथा—आहोपुरुषिका, शैष्योपाध्यायिका । क्वचिन्न-मानोज्ञकम् ।

[भावकर्मार्थक जो ष्यञ् और वुञ्, तदन्त शब्द, वे क्वचित् = कहीं २ स्त्रीलिंग और नपुंसकलिंग दोनों में होते हैं । जैसे—'औचित्यम्', 'औचिती', 'मैत्र्यं', 'मैत्री' । वुञ्—'आहोपुरुषिका', 'शैष्योपाध्यायिका'] ।

(१) षष्ट्यन्तात्पराः सेनादयस्तत्पुरुषे—स्त्रीनपुंसकयोः स्युः । यथा—नृसेनं, नृसेना, श्वनिशं, श्वनिशा, गोशालं, गोशाला । वृक्षच्छायं, वृक्षच्छाया । 'वा' विकल्पेन क्लीबता । पक्षे स्त्रीत्वमपीत्यक्षरार्थः । इतरे च दिक् । अर्थात्—एवमेव इतरेऽपि शब्दा बोध्याः । यथा—'यवसुरं' 'यवसुरा' इत्यादि । [षष्ट्यन्तपूर्वपदक जो सेनासुराच्छाया शाला निशान्त तत्पुरुष, वह स्त्रीलिंग और नपुंसकलिंग दोनों मेंहोता है । यथा—'नृसेनं', 'नृसेना', 'श्वनिशं', 'श्वनिशा', 'गोशालं', 'गोशाला', 'वृक्षच्छायं', 'वृक्षच्छाया' इत्यादि] ।

(२) आबन्तोत्तरपदोऽन्नन्तोत्तरपदश्च द्विगुः—स्त्रीनपुंसकयोर्भवति । नश्च = अनो नकारस्य च, लुप् = लोपो भवति । उदाहरति—त्रीति । तिसृणां खट्वानां समाहारः—त्रिखट्वं, त्रिखट्वी ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

त्रिखट्वं च त्रिखट्वी च त्रितक्षं च त्रितक्ष्यपि ॥४१॥

❀ इति स्त्रीनपुंसकशेषसंग्रहः ॥ ६ ॥ ❀

त्रिषु[1] पात्री पुटी वाटी पेटी कुवल-दाडिमौ ।

❋ इति त्रिलिङ्गशेषसंग्रहः ॥ ७ ॥ ❋

परलिङ्गं[2] स्वप्रधाने द्वन्द्वे, तत्पुरुषेऽपि तत् ॥४२॥

त्रयाणां तक्ष्णां समाहारः-त्रितक्षं, त्रितक्षी । अत्र नलोपोऽपि भवति । [आबन्तोत्तरपदक द्विगुसमास और अन्नन्तोत्तरपदक द्विगुसमास, अपुंसि-अर्थात् स्त्रीलिङ्ग और नपुंसकलिङ्गों में होता है और अन् के नकार का लोप भी होता है । जैसे—'त्रिखट्वं' 'त्रिखट्वी' 'त्रितक्षं' 'त्रितक्षी' इत्यादि] ।

(१) 'त्रिषु' इत्यधिकृतम् । पात्रादयो दाडिमान्तास्त्रिषु लिङ्गेषु ज्ञेयाः । स्त्रीलिङ्गरूपप्रदर्शनन्तु ङ्यन्तत्वसूचनायैव । तत्र—पात्री-भाजनभेदः । पुटी-सम्पुटभेदः । वाटी = गृहोद्यानम् । पेटी-वेत्रलौहादिनिर्मिता मञ्जूषा । कुवलं = बदरीफलम् । दाडिमः = शुकप्रियफलवृक्षभेदः । (अनार) । [पात्री आदि दाडिमान्त शब्द तीनों लिङ्गों में होते हैं] ।

(२) स्वप्रधाने = समस्यमानपदार्थप्रधाने, द्वन्द्वे = इतरेतर-द्वन्द्वे,-परलिङ्गं = परपदस्येव लिङ्गं भवति । तत्पुरुषेऽपि-तत् =

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अर्थान्ताः प्राद्य-ल-म्प्राप्ता-ऽऽपन्न-पूर्वाः,-परोपगाः ।
तद्धितार्थे द्विगुः, सङ्ख्या-सर्वनाम-तदन्तकाः ॥४३॥
बहुव्रीहिरदिङ्नाम्नामुन्नेयं तदुदाहृतम् ।

परपदस्येव लिङ्गं-भवति । यथा-'इमे कुक्कुटमयूर्यौ,' 'मयूरी-कुक्कुटाविमौ' । 'कुलब्राह्मणः,' 'ब्राह्मणकुलम्' । सामान्यमेतत् । अस्यापवादमाह-अर्थान्ता इत्यादिना । [इतरेतरयोग द्वन्द्व में और तत्पुरुष में सामान्यतः परपद की तरह ही लिङ्ग, होता है । यथा-कुक्कुटमयूर्याविमे । 'मयूरीकुक्कुटाविमौ' 'राजभयं' 'वाप्यश्वः' इत्यादि । यह सामान्य विधि है इसका अपवाद आगे कहते हैं] ।

(१) तत्पुरुषे-अर्थान्ताः-परोपगाः=विशेष्यनिघ्नाः । यथा-द्विजार्था यवागूः, द्विजार्थं पयः, द्विजार्थः सूपः । प्रादिपूर्वाः अलम्प्राप्तापन्नपूर्वाश्च-परोपगाः=विशेष्यनिघ्नाः । यथा—प्रगत आचार्यः, प्राचार्यः । निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः । प्राप्त-जीविकः । अलं जीविकायै-अलञ्जीविकः । तद्धितार्थे द्विगुः-परोपगाः=विशेष्यलिङ्गः, वाच्यलिङ्गः । पञ्चसु कपालेषु संस्कृतः पुरोडाशः-पञ्चकपालः । सङ्ख्या, सर्वनामानि च, सङ्ख्यासर्व-नामान्ताश्च शब्दाः परोपगाः=विशेष्यनिघ्नाः । एकः, एका, एकं । त्रयः, तिस्रः, त्रीणि । सर्वः, सर्वा, सर्वम् । परमत्रयः, परमतिस्रः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुण-द्रव्य-क्रिया-योगोपाधयः परगामिनः ॥४४॥

परमसर्वः, परमसर्वा, परमसर्वम्। अदिङ्नाम्नां बहुव्रीहिसमासो वाच्यलिङ्गः। तस्य उदाहृतम्-उदाहरणम्, उन्नेयं=स्वयमेव ज्ञेयम्। यथा—बहुधनः, बहुधना। दिङ्नाम्नान्तु-उत्तरपूर्वा। [तत्पुरुष में अर्थान्तसमास विशेष्य लिङ्ग ही होता है, परवल्लिङ्ग नहीं होता है। जैसे 'द्विजार्था यवागूः' 'द्विजार्थं 'पयः' 'द्विजार्थः सूपः'।

और प्रादि उपसर्गपूर्वक, तथा-अलं, प्राप्त, आपन्न-पूर्वक जो तत्पुरुष, वह भी विशेष्यलिङ्ग ही होता है। यथा-'प्राचार्यः' 'निष्कौशाम्बिः' 'अतिखट्वः' 'प्राप्तजीविकः' अलंकुमारिः-इत्यादि। एवं-तद्धितार्थ में जो द्विगु है, वह भी विशेष्य लिङ्ग होता है। 'जैसे-'पञ्चकपालः पुरोडाशः'। सङ्ख्या और सर्वनाम, तथा संख्या-सर्वनामान्त शब्द-ये वाच्यलिङ्ग होते हैं। यथा एकः, एका, एकं, सर्वः, सर्वा, सर्वं। परमत्रयः पटाः, परमतिस्रः स्त्रियः, परमत्रि कुलम्-इत्यादि। अदिङ्नामों का बहुव्रीहि समास भी वाच्यलिङ्ग (विशेष्यलिङ्ग) होता है। यथा-बहुधनः, बहुधना, बहुधनम्। दिङ्नामबहुव्रीहि में तो-'उत्तरपूर्वा' ऐसा स्त्रीलिङ्ग ही होगा]।

(१) गुणद्रव्यक्रियाणां योगः सम्बन्ध उपाधिः-निमित्तं येषान्ते-गुणद्रव्यक्रियायोगोपाधयः-परगामिनः = वाच्यलिङ्गाः। यथा-शुक्ला शाटी, शुक्लः पटः, शुक्लं वस्त्रम्। दण्डि, दण्डी, दण्डिनी। पाचकं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतः कर्त्तर्यसंज्ञायां, कृत्याः कर्त्तरि कर्मणि ।

पाचिका, पाचकः,—इत्यादि स्वयमूहनीयम्। [गुण, द्रव्य और क्रिया इनका योग है प्रवृत्तिनिमित्त जिनका, ऐसे जो शब्द वे वाच्यलिङ्ग होते हैं। जैसे- 'शुक्लः पटः' 'शुक्ला शाटी' 'शुक्लं वस्त्रम्' इत्यादि]।

(१) कर्त्तरि विहिताः कृतः—वाच्यलिङ्गाः। परन्तु संज्ञायां विहितास्तु कृतो वाच्यलिङ्गा न भवन्ति। कर्ता, कर्त्री, कर्त्तृ। कुम्भकारः, कुम्भकारी, कुम्भकारम्। संज्ञायान्तु—धनञ्जय इत्येव। कर्त्तरि, कर्मणि च विहिताः कृत्यप्रत्यया वाच्यलिङ्गाः। यथा—कर्त्तरि यत्—भव्यः, भव्या, भव्यम्। कर्मणि 'ऋहलोर्ण्यत्' ण्यत्—कार्यः, कार्या, कार्यम्। भावादौ तु—'भवितव्य'मित्येव। 'तेन रक्तं रागा'दित्याद्यर्थे विहिता ये अणादयः, तदन्ताः शब्दा नानार्थानां भेदकाः = विशेषणानि। नानार्था वा भेदकाः = विशेष्यभूता येषान्ते तथा = वाच्यलिङ्गा इत्यर्थः। कौङ्कुमं वस्त्रं, कौङ्कुमी शाटी, कौङ्कुमः पटः। वासिष्ठं साम, वासिष्ठी ऋक्, वासिष्ठो मन्त्रः। [असञ्ज्ञा में—जो कर्त्रर्थक कृदन्तप्रत्यय—वे वाच्यलिङ्ग होते हैं। जैसे—कर्त्ता, कर्त्री, कर्त्तृ। सञ्ज्ञा में तो—'धनञ्जयः' इत्यादि नियतलिङ्ग ही होते हैं। कर्त्रर्थक और कर्मार्थक कृत्यप्रत्ययान्त भी असञ्ज्ञा में वाच्यलिङ्ग ही होते हैं। जैसे—'भव्यः' 'भव्याः' 'भव्यं' 'कार्यः' 'कार्या' 'कार्यं'। भावमें तो—'भवितव्यम्' ऐसा क्लीबलिङ्ग ही होगा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः ॥४५॥
षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम् ।
परं विरोधे, शेषन्तु ज्ञेयं शिष्टप्रयोगतः ॥४६॥

* इति लिङ्गादिसंग्रहवर्गः *

सन्ज्ञामें भी भिद्धयोः नदः' ऐसा पुंलिङ्ग ही होगा । और 'तेन रक्तं रागात्'-इत्यादि अर्थों में विहित अणादि प्रत्ययान्त भी विशेष्य लिङ्ग ही होते हैं । यथा-'माञ्जिष्ठं वस्त्रं' माञ्जिष्ठः पटः' 'माञ्जिष्ठा शाटी', 'वासिष्ठं साम' 'वासिष्ठी ऋक्' 'वासिष्ठो मन्त्रः' इत्यादि] ।

(१) षट्संज्ञकाः = षान्ता, नान्ताश्च सङ्ख्यावाचकाः, त्रिषु-समाः = त्रिष्वपि लिङ्गेषु तुल्यरूपाः । एवं—युष्मदस्मच्छब्दौ, तिङन्तानि पदानि, अव्ययञ्च—लिङ्गकृतविशेषाऽभावात् त्रिषु लिङ्गेषु समानानि । यथा—पञ्च,—नराः-नार्यः, कुलानि च । षट् स्त्रियः, षट्-पुरुषाः, षट् कुलानि वा । एवं सर्वत्र ।
[षट्सन्ज्ञक शब्द, और युष्मद् अस्मद् शब्द, तथा तिङन्त पद, तथा अव्यय-इनका तीनों लिङ्गों में समान ही रूप रहता है । यथा-पञ्च—स्त्रियः, पञ्च पुरुषाः, पञ्च कुलानि—इत्यादि] ।

(२) लिङ्गविधायकानाम्-एषां विरोधे-परं वचनं ग्राह्यम् । यथा—'स्त्रियामीदूद्विरामैका'जित्यस्य-धीः-भ्रूः-इत्यादौ सावकाशस्य-'नीः' 'लू'रित्यादौ 'कृतः कर्तृसंज्ञाया'मित्यनेन परत्वाद्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।

बाधस्तेन तत्र त्रिलिङ्गतैव। [इन पूर्वोक्त लिङ्गबोधक वचनों में जहाँ विरोध हो, वहाँ पर वचन के अनुसार लिङ्ग जानना। यथा— 'स्त्रियामीदूद्विरामैकाच्' इस वचन से 'लूः' 'नीः' इत्यादि में प्राप्त स्त्रीलिङ्गता का-'कृनः कर्त्रीर्यसञ्ज्ञायाम्' इस पर वचन से बाध हो जाने से वहाँ त्रिलिङ्गता ही होती है]।

(३) शेषम् = इह लिङ्गानुशासनेऽनुक्तं, लिङ्गादिकं, शिष्टप्रयोगाज्ज्ञातव्यम् । यथा—'चालनी तितउः पुमा'नित्यनेन पुंलिङ्गत्वमात्रलाभेपि-'तितउ परिपवनं भवती'ति महाभाष्यप्रयोगात्क्लीबलिङ्गताया अपि च लाभो बोध्यः। एवं 'कोरकः पुमा'नित्युक्तस्य पुंसि कोरकशब्दस्य माघे 'कोरकाणी'ति प्रयोगात्क्लीबताऽपि। एवमेव 'वा पुंसि पद्म'मित्यादिना पद्मस्य पुंस्त्वे उक्तेपि शिष्टैस्तथाऽप्रयोगान्न तस्य पुंलिङ्गस्य प्रयोगो युक्तो लोके। एवं सर्वत्रानुसन्धेयमिति। [अवशिष्ट लिङ्गविधि शिष्टप्रयोगों से भी जानना। जैसे— 'तितउ' शब्द को अमरकोश में पुंलिङ्ग कहा है, परन्तु महाभाष्यकार के नपुंसक में तितउशब्द के प्रयोग से वह नपुंसकलिङ्ग भी होता है। इसी प्रकार शिष्टप्रयोगानुसार से ही सर्वत्र लिङ्गों का ज्ञान और प्रयोग करना चाहिए]।

(१) इति = इत्थम् अमरसिंहकृतौ = तद्रचिते, नामलिङ्गा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सामान्यकाण्डस्तृतीयः साङ्ग एव समर्थितः ॥४७॥

❀ इत्यमरसिंहकृतावमरकोशे तृतीयं काण्डम् ❀

❋ समाप्तश्चाऽयं ग्रन्थः ❋

नुशासने = अमरकोशे, तृतीयः सामान्यकाण्डः साङ्गः–अङ्गैः सहितः, समर्थितः = परिपूर्णः। इति शिवम्। [इस प्रकार अमरसिंह-कृत नामलिङ्गानुशासन कोशका यह तीसरा काण्ड यहाँ साङ्ग पाङ्ग समाप्त होता है]।

इति श्रीपण्डितप्रकाण्ड-मरुमण्डलमार्त्तण्ड-श्रीस्नेहिरामशास्त्रिणां पौत्रेण, प्रतिवादिभयङ्करभयङ्कर-श्रीशिवनारायणशास्त्रिणां पुत्रेण, 'कविचक्रचक्रवर्त्ति' 'साहित्याचार्य' पण्डितश्रीरघुनन्दनप्रसाद-शास्त्रिणाऽभ्यूहितायाममरकोशस्य संस्कृत-सरल-टीकायां तृतीयः काण्डः।

इति व्याकरणाचार्य–राजशास्त्रिसाहित्यरत्न,उपाधिधारिणा श्रीसीतारामशास्त्रिणा विरचितायाममरकोश-भाषाटीकायां तृतीयः काण्डः॥

समाप्तश्चायममरकोशः॥

मु०–पं० वैकुण्ठनाथभार्गव, आनन्दसागरप्रेस, गायघाट, बनारस१.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi